॥ स्वाराज्यसिद्धिः ॥

S.2

श्री गणेशाय नमः



श्रीगङ्गाधरेन्द्र सरस्वती विरचिता

॥ स्वाराज्यसिद्धिः ॥

तदीयया कैवल्यकल्पद्रुमाख्य व्याख्यया

वेदान्तविभूषण, शास्त्ररत्नाकरादि विरुदाञ्चितैः चेन्नपुरीस्थ

संस्कृतकलाशाला प्रधानाऽद्वैतवेदान्त शास्त्राऽध्यापकैः

ब्रह्मश्रीयुत करुङ्कुलं कृष्णशास्त्रिभिः

विरचितया

परिमलाख्य टिप्पण्या एवं विरक्तशिरोमणिना

परमहंसेन श्रीमद्वामदेवेन स्वामिना विरचितया

श्रीवामदेवप्रसादिन्याख्य टिप्पण्या च संवलिता

प्रकाशक:

श्री हरिहर कैलाश ज्ञानपीठ

तिथि:

आषाढ शुक्ल तृतीया,

वि० स० २०५८ (२४ जून २००१)


प्रथम संस्करण:

५०० प्रतियाँ


प्राप्ति स्थानः (१) श्री हरिहर कैलाश ज्ञानपीठः
लक्ष्मण-झूला, रोड, ऋषिकेश (उत्तरांचल)
फोन : ०१३५-४३२७६५, ४३२९२४

(२) श्री हरिहर कैलाश ज्ञानपीठः
बैजनाथः पपरौला (हि० प्र०)
फोन : ०१८९४-६२६३१

(३) श्री स्वामी महेशानन्दः सोऽहम् आश्रमः
परिक्रमा मार्ग वृन्दावनः (मथुरा)
फोन : ०५६५-४४२०१४



विरक्त शिरोमणि पूज्य स्वामी वामदेव जी महाराज



भवाम्भोधिं तर्तुं परमपदमाप्तुं च मनसा क्षयं तृष्णायायोऽभिलषति सुखेनैव मनुजः।
स्वकीयं चित्तं सोऽनवरतमनादृत्य विषयान् यतेताधातुं श्रीहरिहर पदाब्जेषु कृतधीः।

।।श्रीः।।

श्री स्वाराज्यसिद्धिः

(सारांशप्रस्तुतिः)

श्रीमतागङ्गाधरेन्द्र सरस्वतीमहाभागेन विरचितोऽयं ग्रन्थः विश्वप्रसिद्धः। ग्रन्थोऽयं स्वकर्तृक कैवल्यकल्पद्रुमाख्य व्याख्यया समलङ्कृतः। अस्मिन्महति ग्रन्थे विरक्तशिरोमणिना पूज्यपादपरमहंसेन विद्वन्मूर्धन्येन स्वामिश्रीवामदेव महाराजेन कृता टिप्पणी ग्रन्थस्य गम्भीररसरहस्येन समग्रसार सर्वस्वञ्च आञ्जस्येन प्रकाशयति।

स्वाराज्यसिद्धिनामकेऽस्मिन्ग्रन्थे जगतः अभिन्ननिमित्तोपादान कारणरूपेण ब्रह्म स्वीकृतम्। तच्च प्रत्यगात्मरूपेण स्फुरत्सच्चिदानन्दरूपमेव। आत्मनः देहेन्द्रियप्राणान्तःकरणेषु तादात्म्यापत्तिरूपः अध्यास बन्धहेतुः। स चाध्यासः अविद्यामूलकः। ब्रह्मात्मैक्यरूपेण आत्मस्वरूपस्य यथार्थबोध एव बन्धनिवर्तकः।

अनादिपरम्पराप्राप्तदेहाध्यासवशात् देहनाशात् आत्मनाश इति आस्थाबलेन आत्मनः लोकान्तरगामित्वे पुनर्जन्मविश्वासवशाच्च ऐहलौकिक पारलौकिक उत्कर्षभावनया कर्मणि अधिकृतः पुरुषः प्रवर्तते। एवं रीत्या आत्मनः देहेन्द्रिय-प्राणरूपत्वं मनोरूपत्वं क्षणिकविज्ञानरूपत्वं, स्थिर विज्ञानरूपत्वं, दृष्टि रूपत्वं, ज्ञानगुणकत्वं चिज्जडरूपपरिणामशालित्वं वा इत्येतेषु दार्शनिकप्रस्थानेषु पूर्ण कृतार्थता असम्भवी। आत्मंनः अद्वितीयसच्चिदानन्दरूपतायाः विज्ञानेनैव पूर्णकृतार्थता सम्भवतीति वेदान्तराद्धान्तः।

किञ्च ये केचन आत्मनः देहपरिमाण परिमितत्वं, अणुपरिमाणत्वं, विभुत्वं वा स्वीकुर्वन्ति। एतन्मते आत्मामनोगोचरो भवति। केचित्तु आत्मानं विभुत्वे सति नित्यानुमेयत्वं सङ्गिरन्ते। केचिच्च क्षणिकविज्ञानसंज्ञकं बुद्धिवृत्ति रूपं स्वप्रकाशरूपत्व च मन्यन्ते। एतैरपि आत्मविज्ञानैः पूर्णकृतार्थता न सम्भवति। अपितु आत्मनः स्वतः सिद्ध विभुरूपताया अद्वितीय परमानन्दरूपतायाश्च विज्ञानेनैव पूर्णकृतकृत्यता सिद्ध्यति।

अपि च विभिन्न दार्शनिकैः विश्वकारणवादे मतभेदा उपस्थापिताः तत्र केचन विश्वोपादानकारणं प्रकृतिं मन्यन्ते। केचन ईश्वराधिष्ठित पृथिव्यादि परमाणून् स्वीकुर्वन्ति। अपरे क्षणिकविज्ञानस्य विवर्तरूपं स्वीकुर्वन्ति। केचन शून्य विवर्तः लोकायतिकाः स्वभावं वा संसारस्य हेतुं कथयन्ति। दैवज्ञाः कालमेव जगत्कारणं, यदृच्छावादिनश्च आकस्मिक रूपेण जगदुत्पत्तिं मन्यन्ते।

पूर्वमीमांसकाश्च जगत्प्रवाहे वैचित्र्यमभिवीक्ष्य कर्मैव कारणत्वेन स्वीकुर्वन्ति। एते सर्वे कारणवादाः अनुशीलनेन आपातरमणीयाः नात्मनः पूर्णता सम्पादने क्षमाः। ग्रन्थकृद्रीत्या ब्रह्माधिष्ठितमायोपादानकं विश्वं मन्तव्यम्।

अपिच लक्षणप्रमाणाभ्यां वस्तुसिद्धिः, न तु प्रतिज्ञामात्रेण इत्यभियुक्तोक्तरीत्या विचारणायां प्रत्यक्षमेव प्रमाणम्, इति स्वीकुर्वतां चेतना विशिष्टदेहात्मवादिनां चार्वाकाणां मतं सर्वथा भ्रममूलकमेव। पश्वादिष्वपि भोजनादौ अनुमानप्रमाणप्रवृत्ति-दर्शनात्। परेषां सुखदुःखयोः परिज्ञानमपि प्रत्यक्षमात्रेणासम्भवाच्च। नहि नश्वरदेहस्य आत्मरूपता कथमपि सम्भवति। सुषुत्यादौ देहाभानाभावेऽपि जीवनसत्वेन देहातिरिक्तः आत्मा सिद्ध्यति। किञ्च शरीरस्य परिवर्तनशीलतायाः विज्ञानमपि देहातिरिक्तं द्रष्टारं साधयति। सुषुप्ति दशायां इन्द्रियाणां भानाभावेन न तेषामात्मत्वं सिद्ध्यति। तदानीमेव प्राणास्पन्दने वृद्धि ह्रासः सुषुप्तौ प्राणानाम् अभानात् समाधौ प्राणवृत्ति निरोधात्। व्युत्थानदशायां प्राणस्य दृश्यरूपता बोधाच्च न प्राणस्यात्मत्वम्।

मनसोऽपि आत्मत्वं न सम्भवति तथा हि सुषुप्तेः पश्चात् मनसः उद्भवः सुषुप्तौ लयः व्यवहारदशायां कामादिहेतुभिः विकारापन्नं मनः नात्मा भवितुमर्हति। एवमेव सुषुप्तेरनन्तरं मनसः प्रागेताहं बुद्धेरुदयः, सुषुप्तौ च लयः कामादि विकाराणां आश्रयरूपा बुद्धिः हास्यादि विलासयुक्त्वात् नात्माभवितुमर्हति।

जीवस्य अनादि सिद्धाविभुता उपाधिवशात् सूक्ष्मतामवगाहते। बुद्धेः उन्मानत्वमेव जीवे उन्मानत्वं प्रतिभाति। पादयोः शैत्यम्, उदरे, औष्ण्यम्, शिरसिशूलम्, सहैव अनुभवपथमारोहणात् जीवस्य अणुतायाः नियामकः। अणुरूपे तस्मिन् विभुरूपता भिन्नं व्याप्यता, स्थूलता, सावयवता, नश्वरता, कार्यरूपता, स्वेतरनिमित्तोपादानकारणसापेक्षता, परिमाणपरिमितता इत्यादयः आत्मनः तथारूपत्वं विघटयन्ति।

भाट्टानुयायिनः मीमांसकाः आत्मानं चिज्जडात्मकं धर्माधर्मजन्य सुख-दुःखज्ञानाश्रयत्वञ्च स्वीकुर्वन्ति, तदपि न समीचीनम्। देहादीनामिव चिज्जडोभयात्म-कस्य परिणामिनः आत्मनः नित्यताया असम्भवात्। मनः संयुक्त आत्मनः विभुत्वे अनेकत्वे च देहप्रयत्न प्रारब्धादीनां समानतायाः कारणात् सर्वेषां जीवानां भोग साङ्कर्य प्रसङ्गः। यदि तु देहाद्युपाधिना व्यवस्था स्वीक्रीयेत तदा नैयायिकाभिमत आत्मनः नानात्वम् उच्छिद्येत। तार्किकाः आत्मनः विभुत्वं नित्यत्वं च स्वीकृत्य मनसः अणुत्वं नित्यत्वञ्च स्वीकुर्वन्ति। सुखदुःखादि साक्षात्काराय ते आत्ममनसोः संयोगं स्वीकुर्वन्ति। एतदपि अविचारितरमणीयम्। निरवयवस्य अन्येन सह

संयोगासिद्धत्वेन आत्ममनसोः सावयवत्वे नश्वरतायाः अवारणात्। सुषुप्तौ सुखानुभवः अज्ञानानुभूतिश्च "सुखमहमस्वाप्सं न किञ्चिदवेदिषम्" इति सुप्तोत्थितस्य स्मरणात् सिद्ध्यति। तस्यामवस्थायाम् आत्ममनसोः संयोगाभावः आत्मनि चैतन्यञ्च उभयं प्रमाणितं भवति। किञ्च तत्र अज्ञानानुभूतिः अज्ञानस्य भावरूपतां साधयति। न तु ज्ञानाभावरूपता अज्ञानस्य। भावाभावयोः सह स्थितेरसम्भवात्।

वेदान्त सिद्धान्ते आत्मा सुखदुःखादीनां मन-बुद्धि-इन्द्रियादीनाम् असङ्ग रूपेण स्वप्रकाश साक्षी परं प्रेमास्पदत्वेन परमानन्दरूपश्च। देहेन्द्रियादिषु तादात्म्यापत्ति कारणात् बन्धसमापततिः। तादात्म्यापत्तिरूपस्य अध्यासस्य मूलमनाद्यनिर्वचनीयम-ज्ञानमेव। यथा राहुग्रस्तस्यापि दिवाकरस्यानुग्रहात् राहुज्ञानं तथा अविद्याकृत आवरण युक्तस्य आत्मनः अनुग्रहादेव अज्ञानावरणस्यानुभवः सम्भवति। यथा नीरूपे निर्मले नभसि तलता मलिनतायाश्चारोपः। तथैव स्वप्रकाशे चिदात्मनि साक्षिणि दीनतायाः मलिनतायाश्चारोपः। अपि च यथा अज्ञानवशात् व्यक्तिः रज्जौ मालाबुद्धिमाश्रित्य लुब्धः सन् कामपरवशः तामासादयितुं प्रवर्तते। एवमेव आत्मनि अज्ञानवशात् जीवात्मा कलत्रादिषु लुब्धस्सन् कामपरवशः तानासादयितुं प्रयत्नवान् भवति। तद्भावभावितः सन् सुखदुःखादींश्चानुभवति। अयमभिप्रायः आत्मस्वरूपे अविद्या परवशः कर्मणि प्रवर्तते। तत्फलोपभोगाय पुनर्जन्मादिकमासाद्य स्वर्गनरकादिषु संसरति।

कश्चिदपि शक्तिमान् स्वीयसमाश्रितशक्तेः, शक्तिपरिमाणयोगेन वस्तुतः सद्वितीयत्वं न प्राप्नोति। मृन्निष्ठघटोत्पादिन्याः शक्तेस्तत् परिणामी भूतानां घटानां सन्नियोगेन मृदः सद्वितीयत्वं न भवति। तथैव आत्माऽपि प्रपञ्चोत्पादिनीं शक्तिं तद्विकासभूतं स्थावर जङ्गमात्मक प्रपञ्चं समाश्रित्य सद्वितीयत्वं न भवति।

अथ खलु जगत् अनुक्षण परिवर्तनशीलत्वादनित्यम्, भास्यत्वादचित्, दुःखप्रदत्वात्, दुःखरूपञ्च। कालत्रयाबाध्यत्वेन, ब्रह्म सत्, अवेद्यत्वे सति अपरोक्षत्वात् चिद्रूपम्। परम्प्रेमास्पदत्वेनानन्दरूपंञ्च। एवं रीत्या जगद् असच्चिदानन्दरूपम्, ब्रह्म च सच्चिदानन्द रूपम्। अपि च दुःखस्यैव दुःखाधारत्वे अनवस्थापतति। एवमेव अचित् पदार्थस्य मूले अचित् तत्त्वस्वीकारेऽपि। जगद् दृश्यं सावयवत्वात्, सावयवत्वात् कार्यम्। कार्यत्वं स्वेतरनिमित्तोपादानत्वस्य प्रयोजकम्। अतः असच्चिदानन्द रूपस्य जगतः अनिवर्चनीयमायायोगेन सच्चिदानन्द स्वरूप ब्रह्मैवाभिन्ननिमित्तोपादान कारणं सिद्ध्यति। ब्रह्मणो निर्विकारितायाः सिद्ध्ये उपादानोपादेय भावादैक्यम्। आत्मनः अबाध्यापरोक्षता च तस्य स्वरूपतां प्रकटयति,

अवेद्या परोक्षता च चिद्रूपताम्, अभोग्यापरोक्षता च तस्य आनन्दरूपतां द्योतयति। लक्षणसाम्यात् वस्तु साम्याद् हेतोः ब्रह्मात्मनोः महाकाशघटाकाशयोरिव तुल्यमेकत्व-साक्षात्कारः।

अपि च अनाद्यज्ञानाश्रयः विषयश्च शुद्धचिद्रूपात्मैव। चन्द्राच्छादकस्य राहोः चन्द्रेणैव प्रसिद्धिवच्चिदाच्छादकस्याज्ञानस्य चिद्रूपात्मनैव प्रसिद्धिः। चिदाश्रितानिर्वचनीयाज्ञानमेव चिद्विवर्त रूपस्य मिथ्याजगतः अभिव्यञ्जकं भवति। अनाद्यनिर्वचनीया ज्ञानरूपामाया स्वयोगेनैवात्मनि अध्यस्ता। अघटितघटना पटीयसी च माया। अनधिगते वस्तुनि अतद्बुद्धिरूप अध्यासः प्रत्यगात्मनि अज्ञोऽहमित्यादि रूपेण स्फुटतयानुभूयते। तदुक्तं हि-"अद्धयासोऽनधिगतवस्तुनि ह्यतस्मिंतद्बुद्धि-स्स्फुटमनुभूयते प्रतीचि"। (१-४९)

किञ्च "अहं हृष्टः, पुष्टः, तृप्तः, मनस्वी, विद्वान्, दृष्टा, श्रोता, मन्ता, विज्ञाता, आनन्दी ब्राह्मणोऽस्मि" इत्येवं रूपाः भावा अन्नमयप्राणमयादि कोशेषु तादात्म्यादि कारणात् भवन्ति। एवञ्च लौकिकी वैदिकी च सर्वा व्यवहृतिः अध्यासमूला सिद्ध्यति। धर्माधर्मसंयोगात् लोकाल्लोकान्तरगमनमपि अज्ञान-कृताध्याससिद्धमेव।

अन्यदपि उपादान कारणात् कार्याभिन्नत्वमेव। सुवर्णातिरिक्तं कुतः कटक कुण्डलादीनां स्थितिः? तथा घटादौ यथा आद्यन्तमध्येषु मृत्तिकैव विलसति तथैव तुल्ययुक्त्या दृश्यप्रपञ्चेऽपि आद्यन्तादिषु सर्वाधिष्ठानस्य ब्रह्मण एव पारमार्थिकी सत्यतेति निश्चप्रचम्।

अपि च यत्र रज्जौ सर्पभ्रमो भवति तत्र शब्दार्थ बुद्धि कृतोभेदः अर्थक्रिया कारितानिमित्तकश्च प्रसक्तेऽपि भेदे रज्जुसर्पस्य रज्जुरूपता अनुभव सिद्धा विद्यते। तद्वत् ब्रह्मविषये परमात्मनि प्रपञ्चे च शब्दार्थ बुद्धिकृते अर्थक्रियाकारिता निमित्तकेपि भेदे प्रसक्ते चिद्विलासरूपस्य जगतः चिद्रूपता विद्वदनुभव सिद्धैव। अपि च यथा-शुक्ति बोधानन्तरं शुक्तिरजतस्य अर्थक्रियाकारितायाः विलोपः हट्टस्थरजतस्य अर्थक्रियाकारितायाश्च अलोपः। तथैव ब्रह्मबोधानन्तरं प्रपञ्चलोपस्य सतोऽलोपस्य चानुभूतिः स्वभावसिद्धा। दृश्यत्वादि हेतुभिश्चोभयोः मिथ्यात्वं सुनिश्चितम्।

मायायोगात् जगतः अभिन्ननिमित्तोपादानकारणब्रह्मणा अविद्या कामकर्म विनिर्मुक्तस्य चिदात्मनः एकत्वमेव। विश्वस्य स्वप्ने तैजसरूपता, तैजसस्य सुषुप्तौ प्राज्ञरूपता, प्राज्ञस्य समाधौ तुरीयरूपता इव वैश्वानरस्य हिरण्यगर्भ-

रूपता, हिरण्यगर्भस्य सर्वेश्वरता सर्वेश्वरस्य शुद्धब्रह्मरूपता सम्पन्ना भवति।

अपि च 'तत्त्वमसि' इत्यादि वाक्यजन्यअखण्डार्थबोधिनी वृत्तिः काष्ठ समुद्भूत वह्निरिव कनकरज्ज्वादिवच्च स्वपरविरोधिनी। "दशमस्त्वमसि" इत्यादाविव तत्त्वमस्यापि महावाक्यैः आत्मनः अपरोक्षता सम्भवति।

इदं तु न विस्मर्त्तव्यम्, आत्मातावत् स्वप्रकाश रूपः, अतः आत्मज्ञानं न करणीयं भवति। अपितु अनात्मसु आत्ममान्यतायाः त्याग एव कर्तव्यः रोगनिवृत्त्यन्तरं स्वास्थ्यस्फुरणमिव अज्ञानावरण निवारणानन्तरं स्वरूपस्फुरणं स्वाभाविकम्।

किञ्च ब्रह्मात्मनो सहिष्णुत्वं सिद्धेऽपि एकत्वे निष्ठागत न्यूनतायाः परिहाराय निदिध्यासनं कर्त्तव्यमेव। निरन्तरं ब्रह्माभ्यासेन ध्यानापरपर्यायरूपं निदिध्यासनं च श्रुते मते चार्थे पूर्णा आस्था सम्भवति। अज्ञानेन च भ्रमः तच्च ज्ञानात् निवर्तते इति वस्तुतः नित्य प्राप्तस्यैव प्राप्तिः, विस्मृतकण्ठाभरणन्यायेन प्रसङ्गेनेति अलमति।

इत्यलम्।।

अनन्तश्रीसमलङ्कृतश्रीमज्जगदुरूशंकराचार्यः

गोवर्द्धनपीठाधीश्वरः श्रीमत्स्वामिनिश्चलानन्द सरस्वती महाराजः

जगन्नाथपुरी (उडीसा)

दिनांक ११-३-२००१

वृन्दावन



।। आमुखम् ।।

गङ्गाधारावदविहतप्रवाहा 'श्रीमद्गङ्गाधरेन्द्र सरस्वती विरचिता' प्रसादगुणा पूर्णानदीव परिपूर्णा परमगभीरा विराजते मुमुक्षुजनानुज्जीवयन्तीव ज्ञानामृतस्यन्दिनी स्वाराज्यसिद्धि नाम्नी काचन रचना। अनल्प सदर्थकल्पनाकलितया स्वोपज्ञ कल्पद्रुमाख्य व्याख्यया समलङ्कृता सकल कल्याणकारिणी सम्प्रति प्रकाशपदवीं नीयमाना साऽवश्यमेव विदुषामपि परितोषाय कल्प्स्यत इत्याशास्महे। तत्रापि तदीय कल्पद्रुमकुसुमसौरभं प्रसिसारयिषुणा विरक्तशिरोमणिना श्रीमद्वामदेवस्वामिना विरिचतया "श्रीवामदेवप्रसादिन्याख्यटिप्पण्या" संवलिता सनाथीकृता नितराम्।

स्वरिति स्वर्गस्य राजा स्वाराज्य इति रेफलोपदीर्घाभ्यां, तस्य भावः स्वाराज्यमिति कर्मोपासनाकारिणां व्याख्या। स्वस्य राजा स्वयमेव स्वतन्त्रो राजेति तस्य भावः स्वाराज्यमित्यन्येषाम्। स्वयं राजते प्रकाशत इति स्वराट् स्वप्रकाशस्तस्य भाव इति वेदान्तिनां व्याख्या। तस्य सिद्धिः स्वाराज्यसिद्धिरध्येतॄणां, तस्य सिद्धिर्ययेति ग्रन्थपक्षे तादर्थ्याद्वा।

अस्मिन ग्रन्थे त्रीणि प्रकरणानि विद्यन्ते। प्रथममध्यारोप प्रकरणं द्वितीयमपवाद प्रकरणं, तृतीयं कैवल्यप्रकरणमिति। प्रकारान्तरेणानुचिन्तने प्रथमं त्वं पदार्थनिरूपणं, द्वितीये तत्पदार्थ निरूपणं, पारिशेष्यात्तृतीयमसिपदार्थाखण्डचैतन्यैक्य निरूपणमिति। अध्यारोपापवादभ्यां निष्प्रपञ्च इति पूर्वद्वयस्योत्तरस्मिन्नेव परमतात्पर्यम्।

यद्यपि वेदान्तग्रन्थेषु चत्वार एवावान्तरविभागा उपलभ्यन्ते। चतुरध्यायी किल ब्रह्ममीमांसा तत्र च चतुः सूत्री। नैष्कर्म्यसिद्ध्यादयः परिच्छेद चतुष्टात्मकाः। खण्डनखण्डखाद्यं तत्त्व प्रदीपिका (चित्सुखी), अद्वैतसिद्धिरित्येते च। तथापि प्रायिकमेव तत्। भगवत्पादविरचितायामुपदेशसाहस्र्यां, विवेकचूड़ामण्यादौ च तददर्शनात्। आश्रम स्वामि (श्री नृसिंहाश्रम) विरचिते वेदान्ततत्त्वविवेके परिच्छेदद्वयमेव विद्यते। यदा तदीयायामेवाद्वैतदीपिकायां परिच्छेदचतुष्टयमस्ति। तस्याद्विभाग चतुष्टयनियमो नास्तीत्येव निष्कर्षः।

अत्र प्रथमेऽध्यारोपप्रकरणे त्वं पदार्थ जीव विषयक वैशेषिक सांख्ययोगादिनिरूपित नानाविधरूपाणि निरूप्य सकारणं तदपाकरणं विधाय तदीयवाच्यार्थलक्ष्यार्थो श्रुतियुक्तिभिः प्रतिपादितौ, अध्यारोपनिबन्धनभवबन्धनं च प्रादर्शि। कथमप्रत्यक्षे समानधर्मरहिते ब्रह्मणि चात्मनि चाध्यास इत्याशङ्कायामप्रत्यक्षे गगनमलिनिमाध्यासवत्तत्संभवं भाष्यानुसारेण

वदन्नेव स्वप्ने जगदध्यासोदाहरणेन निपुणं समादधौ। स्वप्ने ह्यात्मातिरिक्तं किञ्चिदपि जाग्रद्वस्तु न भासते। न हि चाक्षुषप्रत्यक्षादिविषय आत्मा तत्र कथं गजतुरगरथपथिप्रभृतीनामध्यासः स्याद् यदि प्रत्यक्ष विषये एवाश्वगजादि समानधर्मवत्येव च तदध्यास इति नियम आस्थीयेत।

द्वितीय प्रकरणे तत्पदलक्ष्यार्थ ब्रह्मणः सत्यज्ञानानन्दादि स्वरूपलक्षणं जगज्जन्मस्थिति भङ्गहेतुत्वादिकं तटस्थलक्षणं च निरूप्याध्यारोपित जगदपवाद विधयाभ्यधायि। तत्त्वमसि महावाक्यं नवकृत्वश्छान्दोग्येऽभ्यस्तो नानाविध दृष्टान्तोपस्थापनपुरःसरम्। अत्रापि नवभिः श्लोकैः सरलतरपद्धत्या चमत्कारिरीत्या सकलजनमनोमोहनशैल्या तानेव दृष्टान्तान् पुरस्कृत्य निरूपयति मूलकारो जीवपरैक्यं। तत्रैव प्रसङ्गतः प्रज्ञानं ब्रह्मेत्यादि कानि ऋग्वेदादिगतानि महावाक्यानि ग्रन्थकारः स्वीयाऽपूर्वशैल्या व्याख्यातानि। लक्षणापक्षं समर्थयन्नेवाद्वैतविरोधिनां द्वैतवादिनां स्वमनीषाकल्पित विकल्पशतानि सप्रमाणमपाकृत्याद्वैतपदत्वं प्रतिष्ठापितम्। द्वैतवादिनः किल स्वपक्ष समर्थनायाक्षिपन्ति यदि तत्त्वमस्यादि वाक्येषु लक्षणया तत्पदत्वंपदयोरखण्डचैतन्यमर्थस्तदापदद्वयवैयर्थ्यं स्यादेकेन पदेनैव विवक्षितार्थलाभोपपत्तेः। अपि च सत्यं ज्ञाननित्यादि तत्पदार्थादिशोधन परैरेव निरुपाधिक चैतन्य बोधनात् महावाक्य सार्थक्यं न शक्यते समर्थयितुमिति। तदमुक्तम्। न हि निरुपाधिक ब्रह्मावबोधमात्रेण कृतार्थता शक्य समर्थना। ''न हि भवति सता सोम्य तदा सम्पन्नो भवतीति'' श्रुतिवचनानुसारेण परमात्मनो ज्ञानमात्रं किं नाम् परमात्मसम्पत्तिरपि जायमाना न परम पुरुषार्थाय कल्पते। कुत इति। त इव व्याघ्रो वा सिंहो वा वृको वेत्यादिना पुनस्तत्तच्छरीरापत्ति प्रदर्शनात् तदपि कुत इति चेत्? तत्तद्विषयकवासनानामनवसानात्। तथैव सत्यादि पदजन्यलाक्षणिक निरुपाधि स्वरूपावबोधेऽपि त्वं पदार्थ जीवभाववासनावासित चेतसां तादृशपरिच्छिन्नत्वादिवासनाऽनिवृत्तेर्न कृतार्थता भवितुमर्हति। तत्पदार्थैक्यबोधने सति परिच्छिन्नत्वादिसकलविकलभावना निवृत्तौ दृढतरापरोक्षसाक्षात्कारे सति कृतार्थता भवति। त्वं पदार्थेन सहाऽभेदबोधे सति ईश्वरः परोक्ष इति मत्तांभिन्न इति च या वासना सा निवर्तेतेत्यपरिच्छिन्नाऽखण्डाद्वितीयब्रह्मबोधाय पदद्वयमावश्यकम्।

परोक्षानवाप्तत्व बुद्धिं परस्मिन्नपूर्णत्व दुःखित्व मोहं प्रतीचि।
निहन्तुं निजालौकिकं चात्मतत्त्वं पदे वक्तुमन्योन्यतः साभिलाषे।। (२.४५)

इत्यस्मिन् श्लोके यद्यप्युक्तार्थः सूचितो विद्यते। तथापि प्राचामाचार्याणाम-

भिप्रायानुवादमात्रे पर्यवस्यन्न स्पष्टयति तथ्यम्।

तृतीयं कैवल्यप्रकरणम्। तत्र प्रथमं शाब्दापरोक्षत्वमनुभूति युक्त्यनुमितिभिः साधितम्। दशमस्त्वमसीत्यादौ शब्दादेवापरोक्षबोधोऽनुभूयते सकलैः। तत्र नैयायिकादयः प्रत्यवतिष्ठन्ते। शब्दानां परोक्षज्ञानजननमात्रसामर्थ्यं सर्वत्र। शब्दत्वेन शाब्दबोधत्वेन कार्यकारणभाव स्वीकारात्। तत्रैव लाघवात्। शाब्दबोधत्वं परोक्षत्व व्याप्यजाति विशेषः। न च दशमस्त्वमसीत्यादावपरोक्षत्वमानुभाविकमिति शङ्कनीयम्। तत्रापि प्रथमं परोक्षज्ञान जनने सति तदैवेन्द्रिय सन्निकर्षादिनाऽपरोक्ष-ज्ञानोत्पत्ति स्वीकाराद्। दशमस्त्वमसीतिवचनश्रवणसमयमेव स्वस्योपरिदृष्टिपातात्तेनैव तत्र प्रत्यक्षज्ञानोत्पत्तेस्तत्क्षणविलम्बाननुसन्धानेन प्रथमजात परोक्षबोधेऽपरोक्षभ्रमेण शब्दादेवापरोक्षज्ञानं जनितमिति साधारणजनानां व्यवहारादिति। तन्न युक्तम्। शब्दबोधक्षणजात कण्टकवेधादि प्रयुक्तमानसविषयान्तरसंचारे पूर्वश्रुतं दशमं साक्षात्कुर्यामितीच्छोत्पत्तिप्रसङ्गात्। न हि दशमदर्शनमन्तरा नदी प्रवाहनीतसखस्य जीवनं निश्चितोमीति बालोऽप्यालपति। तस्मात्तत्र शब्दजन्यबोध एवापरोक्षात्मकः सर्वानुभूतिविषयः। यथोक्त युक्त्यनुमिती अपि तमेवार्थं द्रढयतः। एतच्च "निपुणं निशम्य दशमस्त्वमित्यदो, वचनं न हि स्वमुपलब्धुमिच्छति" इत्यादिना मूले प्रतिपादितम्।

एवं नारदायोपदेशमात्रं विहितमनूद्य श्रुतिराह- "तमसस्पारं दर्शयति भयवान्सनत्कुमार" इति। याज्ञवल्क्योऽपि जनकायोपदेशमात्रं विधायाह - अभयं वै जनकः प्राप्तोऽसीत्यादि। एतदनन्तरं श्रवणमात्रेणोत्तमाधिकारिणां कृतार्थत्वमन्येषां बलवत्प्रारब्धावरूद्ध सद्गतीनां प्राणायामादियोगापेक्षेत्यादिकं निरूप्य स्वस्य जीवन्मुक्ततोक्तिमिषेण जीवन्मुक्तस्वरूपदर्शनं च कृतमिति मुमुक्षूणां परमावश्यक सर्वाङ्गवर्णनेन पूर्णतामुपेयुषि वयमिदं ब्रूमः-

सिद्धीनामिष्टनैष्कर्म्य ब्रह्माद्वैताभिधाजुषाम्।
स्वाराज्यसिद्धिरधुना पञ्चमी संप्रकाशते।।

अनन्त श्री विभूषितः
द्वादशदर्शनपञ्चानन
आचार्य **श्रीमत्स्वामिकाशिकानन्द गिरिः**
महाराजः

दिनांक १६.५.२००१
मुम्बई

ॐ

।। प्रकाशकः ।।

श्रीमच्छङ्कावतारैः परमदयालुभिर्भगवत्पूज्यपादैर्जगद्गुरुभिः श्रीमदाद्यशङ्कराचार्यैः कलिमल-कलुषित दुःखाकुलः मनुष्येभ्य आत्यन्तिकदुःखनिवृत्ति परमानन्दा-वाप्तिरूपमोक्षमार्गं दिदर्शयिषुभिर्वेदान्तसिद्धान्तरहस्यं भाष्यप्रकरणग्रन्थैः प्रकटीकृतम्। तन्मार्गपथिकैर्विद्वद्वरैः श्रीमद्गङ्गाधरेन्द्र सरस्वतीभिः स्वाराज्यसिद्धि नामक ग्रन्थरत्नो विरचितम्।

अस्मिन् ग्रन्थेऽस्ति प्रकरणत्रयम्। "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चते" इति न्यायेन प्रथमप्रकरणे जाग्रदाद्यवस्थात्रयात्मकस्य प्रपञ्चस्य शुद्धे ब्रह्मण्यध्यारोपो दर्शितः श्रुतिविरुद्धमतानाञ्च कापिलादीनां श्रुतियुक्तिभिः सम्यग्निरासः कृतः। अपवादाख्ये द्वितीये प्रकरणे श्रुतिप्रमाणैः युक्तिभिश्चाध्यारोपितस्य प्रपञ्चस्यापवादः प्रदर्शितः। वेदान्तानां तदन्तर्गतानां च चतुर्णां महावाक्यानां तात्पर्यविषयीभूतं ब्रह्म सम्यग्निरूपितम्। कैवल्याख्ये (आगम प्रकरणाख्ये) तृतीये प्रकरणे च शब्दस्यैव ब्रह्मात्मापरोक्ष प्रमाकरणत्वं स्थापितम्।

ग्रन्थस्यास्योपादेयतामवलोक्य सर्वतन्त्रस्वतन्त्रैः वीतरागैर्ब्रह्मलीनैः श्रीमत्स्वामिवाम देवमहाभागैरस्य सुटिप्पणी व्यधायि। याऽस्मिन् प्रकाशने संगृहिता।

परमादरणीयानां गुरुवराणां सार्वभौमानां ब्रह्मलीनानां श्रीमत्स्वामिहरिहरतीर्थपादानां संस्मरणे ग्रन्थोऽयं श्रीहरिहरकैलास ज्ञानपीठ संस्थया प्रकाश्यते।

अस्य ग्रन्थस्य सम्पादने संशोधनकार्ये च श्रीमंत्त्यागी विष्णुदेवानन्द स्वामिनः महाभागस्य अत्यधिक परिश्रमः सुश्लाघनीयः प्रसंसनीयश्च। अन्येऽपि ये सहायकाः श्रीमत्स्वामि रविपुरी महाराजः, श्रीमत्स्वामि चिन्दानन्दः, ब्र० श्री उमेश चैतन्यः श्रीविश्वम्भरः नाथ छतवालः प्रमुखा ते सर्वे धन्यावादार्हाः।

इत्योंशम्

त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये

श्री हरिहरः कैलाशज्ञानपीठ (न्यास)

ऋषिकेश (उत्तरांचल प्रदेश)

अषाढ शुक्ला तृतीया सम्वत् २०५८

२४ जून २००१

श्रीस्वाराज्यसिद्धौ विषयानुक्रमणिका।।

श्लोकसंख्या

अध्यारोपप्रकरणम् ।।१।।

(१) स्वेष्टदैवतस्य सांबपरमेश्वरस्य सगुणनिर्गुणरूपत्वेनानुसंधानम्।।

(२) सर्वविघ्नोच्छेदक्षमगुरुनमस्कारावृत्तिरूपमंगलाचरणम्।।

(३) तत्त्वंपदार्थो तटस्थस्वरूपलक्षणाभ्यामुपक्षिप्य प्रत्यग्ब्रह्मैक्यलक्षणं वाक्यार्थं च प्रदर्श्य स एवाऽज्ञातः शास्त्रस्य विषयः इति कथनम्, स च यद्गुरुकृपयाज्ञातःशास्त्रस्य प्रयोजनं भवति तद्गुरुप्रणामकरणं च।।

(४) अधिकारिविशेषणीभूतसाधनचतुष्टयप्रदर्शनपूर्वकं स्वचिकीर्षितप्रतिज्ञा।।

(५) बहुतरश्रुतिस्मृतिपर्यालोचनेन बन्धस्याऽऽध्यासिकत्वं मोक्षस्य ज्ञानफलत्वञ्च सिध्यतीति प्रदर्शनपूर्वकं शास्त्रारंभसमर्थनम्।।

(६) दर्शितस्य बंधमिथ्यात्वस्य अर्थापत्या स्फुटीकरणम्।।

(७) बन्धनस्य मूलत्वेन अन्यदन्यत्तैर्थिकेष्वभ्युपगच्छत्सु कथमविद्यैवमूलमित्याशङ्कापरिहार पुरस्सरं कल्पिते कर्माऽनिवर्त्यत्वस्य दृष्टान्तफलप्रदर्शनपूर्वकोपपादनम्।।

(८-९) कर्मतत्फलविषये स्वमताऽऽविष्करणम्।।

(१०) ज्ञानकर्मणोर्भिन्नाधिकारिकत्वप्रदर्शनपूर्वकं ज्ञानकर्मसमुच्चयवादिपरिहसनम्।।

(११) यादृशज्ञानान्मोक्षसिद्धिः तादृशज्ञानविषये अन्यैरन्यस्यान्यस्य ज्ञानपदवाच्यत्वेन अंगीकृतत्वात् ज्ञाने व्यवस्थाभाव आपतितः, तथाच ज्ञानान्मोक्ष इत्यसंगतमित्याशङ्कापरिहारपूर्वकविचारावतारः।।

(१२) त्वंपदार्थे त्रयोदशधा विप्रतिपत्तिप्रदर्शनम्।।

(१३) त्वंपदार्थपरिमाणविषयकविप्रतिपत्तिप्रदर्शनम्।।

(१४) तत्पदार्थे दशधा विप्रतिपत्तिप्रदर्शनम्।।

(१५) सच्चिदानन्दाद्वये श्रौते ब्रह्मणि सर्ववेदान्तसमन्वयप्रदर्शनम्।।

(१६) एतावता प्रबंधेन मायाशबलं ब्रह्म जगत्कारणं, तच्चवस्तुतस्सच्चिदानन्दाऽद्वयमेव, स्वप्रकाशमेव, सर्वश्रुतीनां तत्रैव तात्पर्यं, तदेव च प्रत्यगात्मा इति पञ्च पदार्थाः जीवन्मुक्तिश्च दर्शिताः। तांश्चक्रमेण दिदर्शयिषुः इतः प्रभृति पञ्चविंशतिश्लोकैः विरुद्धवादिमतानि दूषयिष्यन् प्रथममष्टौ वादिनस्सामान्यतो निरस्य विजयस्थानीभूतस्वसिद्धान्ता-

(५०) जडाऽनित्याऽशुचिदुःखरूपे देहादौ तद्वैपरीत्यानुभव एवं अनात्मसु आत्मतद्धर्माणां तादात्म्यसंसर्गाध्यासे मानमिति प्रदर्शन पूर्वकं पुनरपि अध्यासस्य अनर्थपर्यवसायित्वस्य दृष्टान्तकथन पूर्वकं कण्ठोक्त्या कथनम्।।

(५१) नाऽध्यासमूलं दुःखमित्याशंकापाकरणम्।।

(५२) वैराग्यदार्ढ्याय शास्त्रप्रवृत्यौदासीन्यविच्छित्तये च अध्यासमूलकाऽनर्थ प्रतिपादनम्।।

(५३) विषसंपृक्त मोदकाऽऽस्वाद सुखवद्दुःखानुबन्धित्वादल्पविषयसुखं हेयमेवेत्यभिप्रेत्य संसारे दुःखबाहुल्यप्रपञ्चनम्।।

(५४) काम कर्म वासनाऽऽश्रयाऽज्ञान विच्छेदायाऽनुकम्पया श्रुति शास्त्राऽऽचार्य प्रवृत्तिरितिप्रदर्शनम्।।

अध्यारोपप्रकरणं समाप्तम्।।

द्वितीयमपवादप्रकरणम् ।। २।।

(१) अत्यन्ताऽप्रसिद्धस्य निर्विशेषस्य च पदवाक्यगोचरत्वाऽदर्शनात् ब्रह्म न विचारयितुं शक्यमित्याशंकाऽपनयनाय अतद्धर्मस्यापि तल्लक्षकत्वाल्लक्षणत्वं सदृष्टान्तं प्रदर्श्य अत्यन्ताऽप्रसिद्धिवारणपूर्वकं लक्ष्यस्वरूप प्रतिपादनम्।।

(२) लक्ष्यस्याऽद्वितीयत्वोपपादनाय जगतो मिथ्यात्वं प्रतिपिपादयिषुः प्रथमं कारणस्वरूप पर्यालोचनेन तत्प्रतिपादनम्।।

(३) वाचारंभणश्रुत्या तदनुगुणतर्कैश्च कार्यस्वरूपपर्यालोचनया च जगन्मिथ्यात्वोपदर्शनम्।।

(४-१०) सप्तभिः श्लोकैर्भेदखंडनम्।।

(११) वस्तुनोऽत्यन्ताऽभेदेपि कार्यकारणभावप्रत्ययः मायिकाऽवस्था भेदनिबंधनो न वास्तवः तदन्वयव्यतिरेकाऽनुविधानादिति प्रदर्शनम्।।

(१२) सद्रूपे ब्रह्मणि जगदध्यासात्तद्धर्मेणैव प्रतीतिरित्यत्र लौकिकदृष्टान्त प्रदर्शनम्।।

(१३) व्यावहारिक प्रातिभासिक पारमार्थिक सत्तात्रैविध्यकथनम्।।

(१४) सच्चित्सौख्यैकरस्येपि वस्तुनि सामान्य विशेषांश भेदोपपादनम्।।

(१५) श्रुत्यनुगुणतर्कैः स्थापितं ब्रह्मणोऽद्वितीयत्वं श्रुतितात्पर्योद्घाटने नापि व्यवतिष्ठापयिषुः तटस्थलक्षणमुखेन सृष्टि श्रुतीनामद्वितीय ब्रह्मबोधकत्वे

स्मृत्या च 'त्वं ब्रह्म सदृशोसि' इति महावाक्यार्थोऽस्तु इति कस्यचित्कल्पनायाः परिहारकथनम्।।

<u>अपवादप्रकरणं संपूर्णम्।।</u>

तृतीयं कैवल्यप्रकरणम् ।।३।।

तृतीयकैवल्यप्रकरणंसमाप्तम्।।

प्रकरणत्रयेष्वपि आहत्य १६३ श्लोकाः।।





श्री गणेशाय नमः।।



।।श्रीस्वाराज्यसिद्धिः।।

व्याख्यातुर्मङ्गलश्लोकाः।।

(१) तरुणतपनवर्णं कर्णलीलावधूत
भ्रमरनिवहगुञ्जाऽकर्णनोद्भूतहर्षम्।
अमरवरकिरीटोद्घृष्टपादाब्जमन्तः
स्फुरतु दलितविघ्नं दन्तिवक्त्रं महो नः।।१।।

।। ॐ नमः शिवाय।।

नमो वेदान्त वेद्याय शुद्धाय परमात्मने।
सर्व प्रेरक रूपाय राघवाय नमो नमः।।

अथ स्वाराज्य सिद्धेष्टिप्पणानि लिख्यन्ते। तत्रादौ मङ्गलश्लोकानां व्याख्योच्यते।।

(१) आदौ गणपति मङ्गलङ्करोति।। तरुणेति।। नः = अस्माकमन्तश्चेतसि किमपि महस्तेजः स्वयं प्रकाश चिदात्मक गणेश पदलक्ष्यं स्फुरतु। सर्वविघ्नप्रतियोगिक संसर्गाभावसंपादन पूर्वकनिवासं करोतु। कथं भूतं महः। यदेव मायाकल्पितोपाधि योगात्तरुणतपनवर्णं = तरुणतपनो मध्याह्न कालीनो भास्करस्तस्य यद्वर्णमत्यन्ततमो विरोधिभास्करं रूपं, तत्सदृशं रूपं । स्वसन्निधिमात्रेण भक्ताज्ञान नाशक्षमं स्वरूप यस्य तथा विधम्। पुनः कथंभूतं कर्णलीलावधूत भ्रमरनिवह गुञ्जाऽकर्णनोद्भूतहर्षं = कर्णयोः श्रोत्रपुटयोर्यालीला जातिस्वभावतश्चालन क्रियातयाऽवधूतस्योड्डीय-मानस्य भ्रमरनिवहस्य भ्रमरसमूहस्य पक्षवातेन जायमानं यदा गुञ्जा गुञ्जानात्मकोध्वनि विशेषस्तस्याकर्णनेनश्रवणेनोद्भूतो हर्ष आह्लादविशेषो जातो यस्य तत्तथा तथा विधमित्यर्थः। पुनरपि विशेषणान्तरमाह।। अमरवरेत्यादिना।। अमरा देवास्तेष्वपि ये वराः प्रधाना इन्द्रचन्द्रवरुणवाय्वादयो देव विशेषास्तेषां प्रणतिकरण काले किरीटैः शिरोभूषात्मकैर्मुकुटैर्घृष्टौ सम्मर्दितौ निवृत्तरजसौ पादौ यस्य तत्तथा विधम्। पुनरप्याह। दलितविघ्नमिति।। अनन्य भक्त्या समाराधितेन दलितानि नाशप्रायतामापादितानि तत्त्व साक्षात्कार तत्फलकैवल्यमोक्ष प्रतिबन्धकानि विघ्नानि येन तत्तथा। पुनरपि। दन्ति वक्त्रमिति। दन्तोऽस्यास्तीति दन्ति तथा विधं वक्त्रं मुखं यस्य तत्तथा। तथा च यथोक्त विशेषणविशिष्टो भगवान् गणपतिर्देवः स्वकीय दर्शन प्रतिबन्धकीभूतानस्मदीयान् विघ्नान् पापापरपर्यायान् नाशयन्नस्माकं हृदये सदा निवासं करोतु इति यावत्।।१।।

(१) कृपाललितवीक्षणं स्मितमनोज्ञवक्त्राम्बुजं
शशाङ्ककलयोज्ज्वलं शमितघोरतापत्रयम्।
करोतु किमपि स्फुरत्परमसौख्यसच्चिद्वपु
र्धराधरसुताभुजोद्वलयितं महो मङ्गलम्।।२।।

जयति स्वजनाऽज्ञानमत्तवारणदारणः।
वेदान्तदुर्गमारण्य केसरी नरकेसरी।।३।।

(२) सत्तर्काश्मनिशातधारसुमहावाक्यत्रिशूलायुधाऽऽ
घातक्षुण्णमदीयमोहमहिषप्राणप्रहाणोद्यता।
आनन्दामृतवाहिनी प्रणयिनी सा ब्रह्मविद्यामयी
वेदान्तप्रतिबोधिता विजयते विन्ध्याचलाऽधीश्वरी।।४।।

---

(१) अथ स्वेष्ट देवस्य परमशिवस्य सगुण निर्गुण भेदेन द्विविध स्वरूपानुसंधान लक्षणमङ्गलङ्करोति। कृपाललितवीक्षणमिति।। कृपया निर्हेतुकस्नेह प्रकृत्या ललितं सुन्दरं वीक्षणं भक्तेषु तदुद्दिधीर्षया दृष्टिपातनं यस्य तत्तथा।। यद्वा कृपा परदुःख प्रहाणेच्छा सैव ललितं वीक्षणं विशेषेण दृष्टि साधनं भक्तजनोद्धरणदर्शननिमित्तं यस्य तत्तथा। तथा स्मितमीषद्धास्ययुक्तमत एव मनोज्ञं मनोरम्यं दर्शनमात्रेण हर्षजनन द्वारा स्नेहास्पदं वक्त्राम्बुजं मुखकमलं यस्य शशाङ्ककलयोज्ज्वलं शिरोभूषणरूपया चन्द्रकलयोज्ज्वलं देदीप्यमानं स्वरूपमत एव शमितं घोरं महानर्थजनकाध्यात्मकाधिभूताधि दैवात्मकं तापत्रयं येन। धराधरस्य हिमवतो या सुता विद्याधिष्ठातृ देवतारूपा पार्वती तस्या भुजाभ्यां क्रोडीकृतं तथा वास्तवस्वरूपेण स्वकीयेन पारमार्थिकेन निरुपाधिकस्वरूपेण निरतिशयानन्दसज्ज्ञानस्वरूपं यच्च किमपि महस्तेजः शिवपदलक्ष्यं प्रत्यगभिन्नं ब्रह्मास्ति तदस्माकं चेतसि स्फुरत् सद्भक्त्याविर्भवत्सदापत्सु मङ्गलं सर्वविघ्नसंसर्गाभाव संपादनक्षमं पुण्य निचयं करोतु जनयतु तादृक्पुण्य जननद्वाराऽस्मत्सकाशात्सर्वकार्य प्रतिपक्षिभूतान्पापानपसारयेदित्यर्थः।।२।।

(२) अथ पार्वत्या मङ्गलङ्करोति।। सत्तर्केत्यादि। काचिद्भगवती विन्ध्याचलपर्वताधीश्वरी तदधिष्ठायवसन शीला परमेश्वरी सर्वजगन्नियन्त्री एकानंशा दुर्गेत्यादि नामभिः प्रसिद्धा विजयते। अस्माकं हृदये कामक्रोधादिदोषसंघ विनाशपूर्वकं स्वस्या आविर्भावलक्षणं प्रकाशं कुरुते। तथाभूतं प्रकाशं कुर्यादित्यर्थः।। कथं भूता सा। वेदान्त प्रतिबोधिता = वेदान्तैरुपनिषद् वाक्यैः सर्वकार्यात्मक जगदुपादानत्वेन। तदधिष्ठानदेवतात्मकत्वेन च प्रतिपादिता अतएव स्वकीयवास्तव स्वरूपेणाधिगता सत्याविद्यक प्रपञ्चात्मकानर्थ निवर्त्तनेन ब्रह्मानन्दमाविर्भावयति ततो ब्रह्म विद्यामयी = ब्रह्म विद्येति शब्द प्रतिपादिता भवत्यतो ब्रह्मविद्यामयीत्यर्थः। पुनरपिकथं भूता सा इत्यत आह।। सत्तर्केति।। सत् सत्याः समीचीना अद्वैत साधकत्वेन भेद निवर्तकत्वेन चाभिमता ये तर्कास्ते एवाश्मः शाणेति नाम्ना प्रख्यातः पाषाण विशेषस्तेन निशाता तीक्ष्णीकृता धारा यस्य तत्तथा। तदेव सुमहावाक्यं च

सरसिजदलनेत्रां सुप्रसन्नां दधानां
सदभयवरमुद्रापुस्तकं हस्तकञ्जैः।
विमलवसनभूषामिन्दुकुन्दप्रकाशां
विकसितहृदयाब्जे भारतीं भावयामि।।५।।

(१) भक्तानां गुरुदैवतैक्यधिषणादार्ढ्याय देवस्तनौ
व्यक्तिं याति सदा समाधिसमये येषां नृकण्ठीरवः।
श्रीसर्वज्ञपदं सदर्थकमभूद्यत्रैव तेषामहं
मोहध्वान्तविभाकरायितरजः पादाब्जयुग्मं भजे।।६।।

तच्च त्रिशूलञ्चेति तथाभूतं त्रिशूलं तदेवतदा युधुञ्चेति तत्तथा। तस्या घातेन परिहारेण क्षुण्णः पदाहतो मूर्च्छतां गतो यो ममेदं मदीयो यो मोह स एव निखिलानर्थ हेतुत्वान्महिषं महिषासुरं तथा भूतस्य तस्यासुरस्य प्राण प्रहाणाय प्राणात्मक सत्त्वनिवर्त्तनायोद्यता धृताद्वैत साक्षात्कारोत्पादनानुकूल व्यापार लक्षण खड्गकरा या भगवती तथानन्दामृतवाहिनी = आनन्दं प्रत्यगभिन्नं परमप्रेमास्पदं ब्रह्मतदेवामृतं जन्ममृत्वादि सर्वानर्थ निवृत्त्युपलक्षित सच्चिदानन्दात्मस्वरूपं ब्रह्म (तदेवामृतं) तद्वाहितुं मुमुक्षुभ्यः स्वभक्तेभ्यः प्रापयितुं शीलमस्यास्तीति सा तथा। तथा प्रणयिनी = प्रणयः स्नेहपूर्वकं भक्तानां स्वेष्टार्थाभ्यर्थनं तदस्ति यस्यां सा तथा एवं गुणा विन्ध्याधीश्वरी भगवती देवी सर्वपापानर्थोन्मूलनेनास्मदीयबुद्धौ सदा परितः सर्वतः स्फुरत्वाविर्भवत्वित्यर्थः।।४।।

(१) अथ स्वगुरून्नमस्करोति भक्तानामित्यादिना तेषां पादपद्मयुगलमहं भजेऽनुचिन्तयामि।। तेषां केषामित्यत आह।। येषां महागुरूणां तनौ शरीरे तत्रापि सूक्ष्म शरीरे प्रधानभूतायां बुद्धौ सर्वदासमाधिसमये ध्यानावस्थायां नृकण्ठीरवः = कण्ठ्यां रवो यस्य स तथा कण्ठीरवः सिंहः। नृच स एव कण्ठीरवश्च नृकण्ठीरवो नृसिंहो भगवान् देवो द्योतनात्मकः सच्चिदानन्दः परमात्मा व्यक्तिमाविर्भावतां प्रत्यक्षदर्शनविषय तामापद्यते। किमर्थमत आह।। भक्तानामिति।। भक्तानां स्वशिष्याणां गुरुदैवतैक्यधिषणं दार्ढ्याय देवतयैक्यधिषणं सम्यगैकत्व विज्ञानं बुद्ध्यपरपर्यायंतस्य भावो दैवतैक्यधिषणं गुरुषु दैवतैक्यधिषणं तत्तथा। तस्य दार्ढ्याय कुतर्कैश्छेत्तुमशक्यत्वाय स्वगुरुषु परमात्मबुद्धिदृढीकरणाय नृसिंहो भगवान् समाधिकाले प्रत्यक्षो भवति तेषामित्यर्थः।। पुनरप्याह।। श्री सर्वज्ञपदं सदर्थकम-भूत् यत्र = भगवत्कृपया त्रिकाल ज्ञानवत्वाद्येषु गुरुषु श्री सर्वज्ञ पदं सदर्थकंसम्यक्तयानुगतार्थकमभूत-सम्भवदित्यर्थः। तेषां पादाब्जयुग्मं भजे। कथंभूतं तत्पादाब्जयुग्ममित्यत आह।। मोहमित्यादि मोहोऽज्ञानं तदेवावरण विक्षेप शक्तिमत्त्वाद्बहितमः सदृशत्वात्तमः शब्दाभिध्येयं तस्यनाशने मध्याह्नकालीन भास्करवत्कुशलं रजो यस्यतत्तथा = तथाभूतञ्च तदेव पादाब्जयुग्मञ्चेति तथाभूतं श्री गुरूणां पादपद्म युग्मं सततमहमनुभावयामीत्यर्थः।।

(१) श्रीसम्बन्धमुदीक्ष्य वाचकपदे यान् शार्ङ्गिणं वैष्णवाः
चन्द्रोत्तंसपदास्पदत्वकलनाच्छंभुं च शैवा विदुः।
आनन्दाद्वयशोभमानपरमप्रेमास्पदं योगिनः
तान्पादाम्बुजरेणुधूततमसो वन्दे सदा श्रीगुरून्।।७।।

सहजकरुणयार्द्रैः सादरं या कटाक्षैः
प्रणतजनसमूहं ध्वस्तमोहं विधत्ते।
त्रिभुवनविनुतश्रीरामभद्राभिधां तां
प्रकटितगुरुमूर्तिं ब्रह्मविद्यां प्रपद्ये।।८।।

(२) व्याहारैर्मधुरैर्मनोज्ञसहजानन्दामृतस्यन्दिभिः
शिष्येभ्यः करविल्ववत्प्रथयतस्तत्वं परं श्रीगुरून्।
रामानन्दमुनीन्मनीषिमुकुटालङ्कार चिन्तामणीन्
सानन्दं प्रणमामि यत्करुणया तीर्णोऽस्मि मोहार्णवम्।।९।।

---

(१) अहं टीकाकारो गङ्गाधरेन्द्र सरस्वती संज्ञको विद्वान् सर्वदा = सर्वकालेषु स्व श्री सद्गुरून्वन्दे प्रह्वी भावंकरोमि। कथं भूतान् सद्गुरून्। येषामस्मत्सद्गुरूणां वाचकपदे श्री चन्द्रशेखराद्वयानन्द सरस्वतीति संज्ञात्मके पदे श्री सम्बन्धमुदीक्ष्य = श्रीतिपदसम्बन्ध-मुदीक्ष्य = दृष्ट्वा वैष्णवाः विष्णुभक्ता विष्णुरयमिति = विष्णुं विदुर्जानन्ति। तद्वच्छैवा अपि चन्द्रोत्तंसपदास्पदत्व-कलनात् = चन्द्रशेखरेति नाम्नः शिर आत्मके पूर्वभागे दृष्ट्वा चन्द्रशेखर पदाभिधेयं शम्भुरूपमेतान् विदुर्जानन्ति। तथा योगिनोज्ञानैकनिष्ठाः परमहंसास्तु तथाभूते नाम्न्यद्वयानन्दपदं समीक्ष्य तदभिधेयमद्वयानन्द स्वरूपं परं ब्रह्मैव यान् विदुर्जानन्ति। पुनरपि कथं भूतान्।। पादाम्बुजरेणुधूततमसः = स्वंभक्तानां भक्त्या श्रद्धा पुरस्सरं शुश्रूषया च स्पृष्ट पदरेणुकानां गुरुपसत्यादि लक्षणलक्षितानामधिकारिणां तादृकपादपद्मरजः स्पर्शनेन धूतं = नाशितं तमोऽज्ञानं यैस्तान्गुरून् सदा निजाभीष्ट सिद्धये मनोवाक्कर्मभिर्नमस्करोमीत्यर्थः।।

(२) श्री गुरून् सानन्दं परमप्रीत्या प्रणमामि मनोवाक्कायकर्मभिः प्रणिपातं करोमि। कथंभूतान्। मधुरैर्भूयोभूयः श्रवणोत्कण्ठाजनकैः श्रुतिप्रियै व्याहारैः स्वोच्चारितशब्दैरित्यर्थः। कथं भूतैः स्वोच्चारित शब्दैरित्यत आह। मनोज्ञेत्यादि। मनोज्ञं मनोरम्यं यद्वा मनोऽन्तःकरणंतद्वृत्तिं च जानाति इति मनोज्ञं मनोवृत्तिसाक्षिस्वरूपं यत्स्वप्रकाशात्मकं ज्ञानं तदेव च सहजानन्दं चेति। मनोज्ञसहजानन्दमनागन्तुकं यत्परमप्रेमास्पदं परं ब्रह्म। तदेव च स्वात्मत्वेन साक्षात्कृतं सन् मरणोपलक्षित सकलानर्थ निवृत्त्युपलक्षित स्वरूपावस्थानात्मक मोक्षत्वादमृतं यद्वा ज्ञानतदन्येन वा केनचिदप्युपायेनविनाशितुमशक्य-त्वादमृतं। तत्स्यन्दिभिः तादृकस्वरूपानन्द प्रकाशकैर्महावाक्यलक्षणैः शब्दैः स्वशिष्येभ्यः करस्थबिल्वफलवत्संशयविपर्ययशून्यतयापरं वाङ्मनसातीतं तत्त्वं परमार्थवस्तुस्वरूप प्रत्यगभिन्नं ब्रह्म प्रथयतः साक्षात्कारयत! स्वगुरूनित्यर्थः।। पुनरप्याह मनीषीति।। मनीषा सदसद्विवेकवती

कृतिभिरसुकराः क्वनु प्रबन्धाः क्वच बत वालिशबुद्धिरेष जन्तुः।
तदपि विरचनेऽत्र सद्गुरूणां सदयनिरीक्षणमेव मेऽवलम्बः।।१०।।

अभ्यर्थयामि करुणाऽमृतपूर्णचित्तान्
धीरान् प्रणम्य गुणदोषविवेचनाय।
मात्सर्यपङ्ककलुषाशयदुर्विदग्धान्
मन्ये तृणाय न विदुर्यदमी स्वदोषान्।।११।।

बहुतरपदबद्धं बालबोधोपयोगात्
सरलमिति महद्भिः साधु नोपेक्ष्यमेतत्।
सदयहृदयभाजः साभिलाषा न किं स्युः
कविवरवचनोत्काः काकलीष्वर्भकाणाम्।।१२।।

अवतारिका–प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगम नादिसिद्धये स्वेष्टदैवतं सांवमीश्वरं सगुण निर्गुण रूपाभ्यामनुसन्दधानः प्रकृतग्रन्थावान्तरप्रयोजनस्य ब्रह्मात्मैकत्वज्ञानस्य–

"यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ"
"तपःप्रभावाद्देवप्रसादाच्च" "ईश्वराज्ज्ञानमन्विच्छेत्।"
"तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।।"

"मत्तः स्मृतिर्ज्ञानमपोहनं च" इत्यादिश्रुतिस्मृतिसहस्रेभ्यः परमेश्वरप्रसादा-यतत्वाऽवगमात्तत्प्राप्त्यर्थं भक्तिश्रद्धाप्रणिपातपुरस्सरंतमेवेश्वरं प्रार्थयमानो विशिष्ट-विषयप्रयोजनसम्बन्धाधिकारिलक्षणमनुबंधचतुष्टयमर्थाद्दर्शयति–गङ्गेत्यादिना।।

बुद्धिस्तद्वन्तो मनीषिणः तेषामपि ये मुकुटाः शिरोभूषणभूताः प्रधाना इतियावत् तेषामपि येऽलङ्काराः शोभाधामिकास्ततोऽपि प्रधानतमा इति यावत्। तेष्वपि मुकुटालङ्कारात्मकेषु प्रधानतमेष्वपि चिन्तामणीनि इति।। मुकुटोत्कृष्टतापादकोत्कृष्टनिखिलावयव चिन्तामणीव विद्वत्तमख्यात्यवद्योतिकान स्वगुरूनित्यर्थः। किं संज्ञकानित्यत आह।। रामामनन्दमुनीनिति। रमतीति रामः सचासावानन्दश्चेति व्यापकानन्दविषयमनन्य व्यापारवत्वाल्लब्धतत्संज्ञकान्। रामानन्द सरस्वती संज्ञकानिति यावत् नमस्करणेन किं प्रयोजनमित्यत आह।। येषां श्री गुरूणां करुणया कृपाकटाक्ष दृष्ट्योपदिष्टेन महावाक्यार्थ ज्ञानेन मोहोऽज्ञानं तत्कार्यं जगत्तदेव हस्तादिना समुद्रमिव तर्तुमशक्यत्वात्कर्मोपासनाभिस्ततः समुद्रं तत्पारं गतोस्मितदतिक्रम्य ततो विलक्षणं सच्चिदानन्दाद्वयाखण्डपरमानन्द पदं प्राप्तोस्म्यितस्ततत्प्रतिमन्यदपश्यन्नमस्कारमात्रेण तान्भावयामीति यावत्।। इति मङ्गलश्लोकार्थः।।

मू०।। गङ्गापूरप्रचलितजटा स्रस्तभोगीन्द्रभीता
मालिङ्गन्तीमचलतनयां सस्मितं वीक्षमाणः।
लीलापाङ्गैः प्रणतजनतां नन्दयंश्चन्द्रमौलि
र्मोहध्वान्तं हरतु परमानन्दमूर्तिःशिवो नः।।१।।

गङ्गायाः = जाह्नव्याः, पूरः = प्रवृद्धप्रवाहः,तेन प्र = प्रकर्षेण, चलिताभ्यः = कम्पिताभ्यः जटाभ्यः, स्रस्तात् = अधः *प्रचलितात्, भोगिनां = सर्पाणां, इन्द्रात् = स्वामिनःशेषात्, भीतां = चकितां, अतएवाऽऽलिङ्गन्तीं = आश्लिष्यन्तीं, अचलस्य = हिमाद्रेः, तनयां = ब्रह्मविद्याऽधि-देवतां उमां, सस्मितं = ईषद्धास्यसहितं यथा भवति तथा, वीक्षमाणः = पश्यन्, तथा लीलापाङ्गैः = सहजकरुणाकमनीयकटाक्षैः, प्रणतजनतां = प्रणतजनसमूहं, नन्दयन् = सकलदुःखप्रशमनोपलक्षितनिरतिशयानन्दसमृद्धं कुर्वन्, चन्द्र-मौलिः = ज्ञानचन्द्रावतंसः, परमानन्दमूर्तिः = मानुषानन्दादिहैरण्यगर्भानन्दान्त-शतशतगुणोत्तरोत्तरोत्कृष्यमाण-विषयानन्दशीकरमहार्णवायित निरतिशयानन्दस्वरूपः, शिवः = अनन्तकल्याणगुणैः स्वतश्च परम मङ्गलरूपत्वाच्छिव शब्दाभिधेयः परमेश्वरः, नः = अस्माकं वेदान्तार्थतत्त्वजिज्ञासूनां, मोहः = अज्ञानं, तदेव स्थाण्वाद्यावृतिचौरादिरूपविक्षेपहेतुध्वान्तमिव स्वस्वरूपावरण जगद्विक्षेपहेतुत्वात् ध्वान्तं = अन्धकारस्तं, प्रकृतग्रन्थसमाप्ति प्रयोजकोत्साह प्रतिद्वंद्विजाड्यांधकारं च, हरतु = स्वतत्त्वसाक्षात्कार वृत्तीद्धबोधेन बाधतां प्रार्थनायांलोट्।

अथवा। गङ्गाशब्देन गङ्गेव कर्मोपासनज्ञानविषयककाण्डत्रयात्मक मार्गत्रयप्रवृत्ता श्रुतिरुच्यते, तस्याः पूर इव पूरो नित्यनैमित्तिककाम्य कर्मविषय-प्रवर्तनारूपो व्यापारः, तेन प्रचलिताः = अनादिकालादारभ्यप्रवृत्ताः जटा इव दुर्विवेकाः संहतास्तादात्म्याध्यासादहंममेत्यभिमतिविषया जीवोपाधयः, ताभ्यो निमित्तभूताभ्यः स्रस्ताइव निकृष्टां दशामापन्नाः, भोगीन्द्राः = वैषयिकसुखलवप्राप्त्यैव कृतकृत्यंमन्या जीवाः, तान् बहुतरजन्मसञ्चितसुकृतपरिपाकवशात् तथाविधानालोच्य, भीतां = त्रस्तां, अतएव विवेकवैराग्यादिसाधनसम्पत्या गुरूपसदनपूर्वक श्रवणमनननिदिध्यासनपरिपाकेन सच्चिदानन्दाद्वयं ब्रह्म आलिङ्गन्तीमिव तद्भावमापन्नां,

*स्खलितादिति ग्र० पा०

ज्ञानातिरिक्तोपायेन नचलतीत्यचलं = अज्ञानं, तस्य तनयामिव प्रथमजां बुद्धिं, सस्मितमानन्दाविर्भावपुरस्सरं स्वैकरस्यमापन्नां वीक्षमाणः = तत्साक्षित्वेन प्रकाशमानः प्रधानभूतबुद्धिस्थैर्यादेव प्रशान्तरूपत्वात्प्रणतप्रायां देहेन्द्रियादि-जनतांलीलापाङ्गवदनायाससाध्यैरध्यस्तत्वानुसन्धानैः, नन्दयन् आनन्दरूपे स्वात्मनि प्रविलापनेनाऽऽनन्दरूपतामापादयन्, परमानन्दमूर्तिः = निरतिशयानन्दस्वरूपः, शिवः "शिवमद्वैतंचतुर्थंमन्यन्त" इति श्रुत्या विराडादि पादत्रय प्रविलापनेन परिशेषितस्तुरीयः परमात्मा, चन्द्रमौलिः = चन्द्रसदृशचरम साक्षात्कारवृत्तिप्रधानः सन्, नः मोहध्वान्तं = अज्ञानान्धकारं हरत्वित्यर्थः। अत्र परमानन्दमूर्तिरित्यनेन निरतिशयाऽऽनन्दरूपं ब्रह्मैव प्रत्यगभेदाल्लब्धमानन्दावाप्ति रूपं प्रयोजनमिति सूचितम्। मोहध्वान्तं हरत्वित्यनेन चाऽनर्थनिवृत्तिरूपं तत्सूचितम्। तेनैवचाज्ञातं जिज्ञास्यमानं ब्रह्मविषयं इति सूचितम्। जटास्त्रस्तभोगीन्द्रभीतामित्यनेन च वैराग्यादिसाधन सम्पन्नोऽधिकारी, अर्थादितद्ग्रन्थस्य विषयप्रयोजनाभ्यां सह प्रतिपाद्यत्वोपेयत्व लक्षणसम्बन्धश्च सूचितः। उत्तरत्रापि यथायथमेतद्दर्शयिष्यते।।१।।

इदानीं ग्रन्थस्य निर्विण्णनिष्कामविवेकि समाराधितेश्वरप्रसाद लब्धसद्गुरु संप्रदायाधिगत स्वानुभवसिद्धवेदान्ततात्पर्यार्थनिबन्धत्वं परमपुरुषार्थलक्षण दृष्ट-फलत्वादनितरशास्त्रसाधारणत्वं च जिज्ञासूनां प्रवृत्तिविशेषसिद्ध्यर्थमर्थाद्दर्शयन् "आचार्यवान् पुरुषो वेद" आचार्यद्धैव विद्या विदिता साधिष्ठं प्रापत् "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्याद्यनेक श्रुतिभिः सद्गुरूपसदनसेव-नादिनियमपूर्वक श्रवणादिभिरेव वेदान्तार्थावगतिः फलाय, न मेधाविनोपि स्वयमेव ग्रन्थपरिशीलनादिभिरिति नियमं च सूचयन् "श्रेयांसि बहुविघ्नानि" इतिप्रवादात्प्रकृत-ग्रन्थसमाप्त्यादिप्रतिबन्धकविघ्नबाहुल्यशङ्कया सर्वविघ्नोच्छेदक्षमं श्रीगुरूनमस्कारा-वृतिरूपंमङ्गलान्तरमाचरति स्मारं स्मारमित्यादि श्लोकद्वयेन-

मू०।। स्मारंस्मारं जनिमृतिभयं जातनिर्वेद वृत्ति
ध्र्यायंध्यायं पशुपतिमुमाकान्तमन्तर्निषण्णम्।
पायंपायं सपदि परमानन्दपीयूषधारां
भूयोभूयो निजगुरुपदाम्भोजयुग्मं नमामि।।२।।

स्मारमिति।। जनिः = जन्म, मृतिः = मरणं, ताभ्यामाद्यन्तभूताभ्यामैहिका

मुष्मिकदुःखजातमनादौ संसारे पुनः पुनरनुभूतं [१]छत्रिन्यायेनोपलक्ष्यते तस्माद्भयं = त्रासं, स्मारंस्मारं = पुनः पुनरतिशयेन स्मृत्वा [२]आभीक्ष्ण्ये णमूल् [३]"नित्यवीप्सयोः" इतिद्विर्वचनं। जाता = उत्पन्ना, निर्वेदवृत्तिः = अहो महासङ्कटात्कथंविमुच्येयमिति चिन्ता यस्य स तथोक्तः। ततस्ततदुत्पन्न वैराग्याद्विविदिषया संन्यस्य गुरूक्तमार्गेण ज्ञानाधिकारसिद्धये चित्तशुद्ध्यर्थं, अन्तः = हृदयपुण्डरीके, निषण्णं = उपविष्टं, उमाकातं = ब्रह्मविद्यात्मकपार्वती प्रियमीश्वरं ध्यायंध्यायं = पुनः पुनरतिशयेन ध्यात्वेत्यर्थः। अतएव कैवल्योपनिषदि "न कर्मणा न प्रजया" इत्यादिना सन्न्यासं विधाय "हृत्पुण्डरीकं विरजंविशुद्धं" इति प्रस्तुते हृदयपुण्डरीके-

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्।।

इति तमः परनिर्गुणब्रह्मतत्त्वाधिगमे दर्शितोमासहायत्वादिविशेषणकस-गुणेश्वरध्यानं हेतुरिति दर्शितम्। ततो गुरुपसदनपूर्वकश्रवणेन सपदि = तत्कालमेव, परमानन्दलक्षणां, पीयूषधारां = अमृतझरीं, पायंपायंपुनः पुनरतिशयेन पीत्वा करतलामलकवत् साक्षादनुभूयेत्यर्थः। भूयोभूयः = पुनः पुनः निजस्य = अबाधि-तात्मतत्त्वस्य, गृणातीति गुरुः, व्याख्याचातुर्येण प्रत्यक्षमुपदर्शयितुः श्रीगुरोः, पदाम्भोजयुग्मं = पादारविन्दद्वयं नमामि प्रह्वीभूयाऽऽश्रयामि। अत्र आद्यवीप्सया पुनः पुनः सांसारिकमहाभयानुसन्धानजन्योत्कटविषयदोषदर्शनमेव फलपर्यव-सायिनिर्वेदहेतुः, (*प०टि०)न कोमल कण्टकायमानं कादाचित्कमल्पमिति, द्वितीयया निरन्तराभ्यस्तमेवेश्वर ध्यानंसद्योज्ञानाय, न व्यापारान्तरान्तरितमिति, तृतीयया निरन्तर स्वप्रकाश निरतिशयानन्दात्मकमेव ज्ञानफलं न कर्मफलवत्कादाचित्कं सातिशयमिति,

(१) छत्रिन्यायश्च यथा छत्र्यछत्रिषु एकसार्धवाहत्वे लक्षणया छत्रिव्यपदेशस्तथा ऐहिकामुष्मिकसुखाभासेष्वपि जन्ममरण जन्याभ्यामाद्यन्ताभ्यां दुःखाभ्यां साहचर्याद्दुःख व्यपदेश इति।।

(२) आभीक्ष्ण्ये इति।। इदं हि सूत्रमुत्तर कृदन्तस्यान्ते स्थितम्। पौनः पुन्ये द्योत्ये पूर्वकाले धातोर्णमुल् स्यात् चात् क्त्वा चेति तदर्थः।

(३) नित्येति। इदं तद्धितस्यान्ते स्थितं पौनः पुन्य रूपाभीक्ष्ण्ये वीप्सां च द्योत्ये पदस्य द्विवचनं स्यादितितदर्थः।। (*परिमल टिप्पणी)

चतुर्थ्या च "यावदायुस्त्रयो वन्द्या वेदान्तो गुरुरीश्वरः।" इति स्मृतेरादेहपातं 'सदैव गुर्वधीनेन भाव्यं न यावच्छ्रवणमेव' इति नियमाः सूचिताः।।२।।

इदानीं शिष्याणामनायासेन शास्त्रावगाहनसिद्धये विस्तरेण निरूपयिष्यमाणमपि सर्ववेदान्त तात्पर्यार्थं संग्रहेण दिदर्शयिषुः तत्वंपदार्थौ तटस्थस्वरूपलक्षणाभ्यामुपक्षिप्य वाक्यार्थं प्रत्यक्ब्रह्मैक्यलक्षणं च प्रदर्श्य, स एवाऽज्ञातः शास्त्रस्य विषयः सद्गुरुकृपयाज्ञातश्च प्रयोजनमिति सूचयंस्तमेव गुरुं पुनः प्रणमति, यस्मादिति-

मू०।। यस्माद्विश्वमुदेति यत्र निवसत्यन्ते यदप्येति य
त्सत्यज्ञानसुखस्वरूपमवधिद्वैतप्रणाशोज्झितम्।
यज्जागृत्स्वपनप्रसुप्तिषु विभात्येकं विशोकं परं
प्रत्यग्ब्रह्म तदस्मि यस्य कृपया तन्देशिकेन्द्रं भजे।। ३।।

यस्मात् = निरस्तद्वैतजातान्मायाशबलात् सच्छब्द वाच्याद्ब्रह्मणः विश्वं कृत्स्नंस्थूलसूक्ष्ममूर्तामूर्तरूपं हिरण्यगर्भादि चतुर्विध भूतग्रामान्तं जगत्सर्ग काले रज्जौ सर्पइव, [१]मरुमयूखेषु सलिलमिव, व्योम्नि गन्धर्व नगरमिव अत्यन्तमसम्भाव्यमुदेति = आविर्भवति, स्थितिकाले च यत्र = यस्मिन्नेवाधिष्ठानभूते निवसति=तिष्ठति, अन्ते = प्रलयकाले च, यत् = ब्रह्म, अप्येति = तिरोभावेन यद्भावमेवाप्नोतीत्यर्थः। अनेनाऽभिन्ननिमित्तोपादानभावेन जगज्जन्मादिकारणत्वं ब्रह्मणस्तटस्थलक्षणं, तद्विशिष्टश्च तत्पदस्य वाच्यार्थो दर्शितः। तस्य स्वरूपलक्षणमाह-यत्सत्यज्ञानसुखस्वरूपमिति। सत्यं = बाध्यविलक्षणम्, ज्ञानं = जडविलक्षणम्, सुखं = दुःखविलक्षणं च स्वरूपं यस्य तत्तथोक्तम्। अवधिः = देशकृतपरिच्छेदः, द्वैतं = वस्तुकृतपरिच्छेदः, प्रणाशः = कालकृत-परिच्छेदः, तैरुज्झितं = वर्जितम्, तथाच त्रिविधपरिच्छेदशून्य सच्चिदानन्दस्वरूपत्वं ब्रह्मणः स्वरूपलक्षणं, स एव तत्पदस्य लक्ष्यार्थ इति दर्शितम्। त्वंपदार्थं लक्षयति-यदिति।। इन्द्रियजन्यज्ञानोपलक्षितावस्था जागृत, तत्संस्कार संस्कृतमनः परिणामविषयज्ञानोपलक्षितावस्था स्वपनः = स्वप्नं, विलीनान्तःकरणानिद्रावस्था प्रसुप्तिः सुषुप्तिः, तासु यत् विभाति = अवस्थात्रयविशिष्टतया प्रतीयत इत्यर्थः। तथाचाऽवस्थात्रयवैशिष्ट्यं प्रत्यगात्मनस्तटस्थलक्षणं, तद्वांश्च त्वंपदवाच्यार्थ इति दर्शितम। एकं = विभिन्नासु व्यावृत्तासु, अतएव मिथ्याभूतास्ववस्थासु

(१) मरुमयूखेषु = मरुभूमिस्पृष्टकिरणेषु।

तत्साक्षित्वेनाऽनुवर्तमानं अद्वितीयं, अतएव विशोकं = विगतदुःखं आनन्दरूपमित्यर्थः। परम् = अवस्थात्रयान्मिथ्याभूताज्जडात् सत्यस्वप्रकाशतयाउत्कृष्टं, अनेन सच्चिदानन्दाद्वयत्वमेवप्रत्यगात्मनोऽपि स्वरूपलक्षणं, स एव त्वंपदलक्ष्यार्थ इति दर्शितम्। वाक्यार्थं दर्शयति-प्रत्यग्ब्रह्मेति। (प०टि०)पराग्भ्यो देहेन्द्रियादिभ्यः प्रातिलोम्येनाऽञ्चति = प्रकाशत इति वा, स्वस्वरूपतिरोधायकत्वात् प्रतिकूलमेव स्वाध्यस्ताऽविद्यादिकमनक्ति = प्रकाशयतीति वा, प्रकर्षेण त्यजति = देहेन्द्रियाद्यध्यासमितिवा, प्रत्यक् = शोधितंजीवतत्वं, तदेव त्रिविधपरिच्छेदराहित्यलक्षणबृहत्वाद्ब्रह्म, स एवाऽस्य शास्त्रस्य विषयः, तत्तादृशं = ब्रह्म यस्यश्रीगुरोः कृपयाहमेव 'अस्मि' इत्यपरोक्षानुभवाभिलापेन स्वस्यनित्यसिद्धब्रह्मभावाभिव्यक्ति लक्षणं प्रयोजनं सूचितम्। तं = तादृशं जनकाऽध्यापककर्मोपासनोपदेष्टृगुरुभ्योऽत्यन्तश्रेष्ठत्वाद्देशिकेन्द्रं, भजे = सेवे। श्रीगुरुकृतस्य परमपुरुषार्थप्रापकज्ञानदानोपकारस्य निष्कृतिमपश्यंस्तच्चरणारविन्दयोर्वाङ्मनः कायैः प्रह्वीभूय आत्मानं [१]समर्प्याऽऽदेहपातं तद्दास्यमङ्गीकरोमीत्यर्थः।।३।।

इत्थं मङ्गलं शास्त्रार्थसंग्रहं च विधायेदानीं, "सर्वे वेदा यत्पदमामनन्ति" "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन, दानेन, तपसा" इत्यादिश्रुतिसिद्धं सर्वकर्मणां ज्ञानोपयोगं [२]"अथातो ब्रह्मजिज्ञासा" इति सूत्रस्थाऽथशब्दार्थाऽऽनन्तर्याऽपेक्षितसाधनचतुष्टयरूपाण्यधिकारिविशेषणानि च दर्शयंश्चिकीर्षितं प्रतिजानीते, अधीतेति-

मू०।। अधीतेज्यादानव्रतजपसमाधाननियमै
विंशुद्धस्वान्तानां जगदिदमसारं विमृशताम्।
अरागद्वेषाणामभयचरितानां हितमिदं
मुमुक्षूणां हृद्यं किमपि निगदामः सुमधुरम्।।४।।

---

(१) आदेहपातम् = देहपातपर्यन्तम्। आदेहपातं तद्दास्यमङ्गीकरोमि न च आङ् मर्यादावचने। १-४-८९।। अनेनाङ् कर्मप्रवचनीयत्वात्तद्योगे पञ्चम्ययाङः परिभिः।। २-३-२०।। इति सूत्रेण पञ्चम्युचिता तथा चादेहपातादिति यथाऽऽ पाटिलि पुत्राद्वृष्टोदेवः इति वाच्यम्। आङ्गमर्यादाभिविध्योरिति सूत्रेणाव्ययीभावे कृते समासे तत्सिद्धत्वादाबाल्यं हरिभक्तिरिति यथा।

(२) यतो न मूर्तामूर्तलक्षणस्य सोपाधिकस्य वस्तुनो ज्ञानात्सोपासनकर्म सकाशाद्वा निर्विशेषभावापत्ति लक्षणमोक्ष उपपद्यतेऽतो यथोक्तोपायतो मोक्षासम्भवाद्धेतोरथ चतुष्टयसाधनसम्पत्त्यनन्तरं प्रकृष्ट जिज्ञासापूर्वकं गुरुमुखाच्छ्रवणादि लक्षणो विचारः कर्तव्य इति सूत्रार्थः। (ब्र०मी०अ०१पा०२सू०१)

अधीतं = गर्भाधानाद्युपनयनान्तसंस्कारानन्तरं गुरुकुलवासादिनियमपूर्वकं काले साङ्गवेदाध्ययनं, इज्या: = काम्यवर्ज्या: श्रौतस्मार्तयज्ञा:। दानानि = बहिर्वेदि विशिष्टदेशकालपात्रेष्वन्न गोभूहिरण्यादेर्विधिना प्रतिपादनानि, व्रतानि = वानप्रस्थोचितानि कृच्छ्रचान्द्रायणादीनि, आश्रमत्रयोचितसर्वव्रतानि वा [१]जप: = वाचिको, मानसश्च मन्त्रावर्तनादिरूप:, समाधानं = उपास्य देवतायां चित्तस्थैर्यं, नियमा: = बाह्याभ्यन्तरेन्द्रियनियमनानि। एतै: विशुद्धं = निर्दोषं, स्वान्तं = मनो येषान्ते तथोक्ता: अनेन कर्मणां चित्तशुद्धिद्वारा ज्ञानोपयोगोदर्शित: तथाच स्मृति:-

कषायपक्ति: कर्माणि ज्ञानं तु परमागति: ।
कषाये कर्मभि: पक्वे ततो ज्ञानं प्रवर्तते ।।इति।।

गौतमोप्याह- "गर्भाधानपुंसुवनसीमन्तोन्नयनं जातकर्मनामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणी संयोग: पंचानांयज्ञानामनुष्ठानमष्टकापार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था:। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्ध: सौत्रामणीति सप्तहविर्यज्ञसंस्था:। अग्निष्टोमोत्यग्निष्टोम उकथ्य: षोडशी वाजपेयोऽति रात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्था:। इत्येते चत्वारिंशत्संस्कारा: अष्टावात्मगुणा: दया सर्वभूतेषु, क्षान्ति, अनसूया शौचमनायासो, माङ्गल्यमकार्पण्यमस्पृहेति। यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च, स ब्रह्मण: सायुज्यं प्राप्नोति" इति।।

इदं = प्रत्यक्षादिप्रमाणदृश्यं जगत्, असारं = न विद्यते सारो नित्य: सत्योवा उपादेयांशो यस्य तत्तथा, विमृशतां = श्रुतियुक्त्याऽऽप्तोपदेशानुभवैर्विचार्य निर्धारयतां। अनेन नित्यानित्यवस्तुविवेकसम्पदुक्ता। राग: = ऐहिकामुष्मिकभोगतदुपायेच्छा। द्वेष: = परानिष्टचिन्तनं। अनेनेहामुत्रार्थफलभोगविराग उक्त:। न विद्यते भयं यस्मात्कस्यचित्तदभयं, तथाविधं चरितं वाङ्मन: कायचेष्टितं येषां। विधिना कर्माणि सन्न्यस्य सर्वभूतेभ्योऽभयं दत्वा तदनुकम्पया भैक्षचर्यादिव्यापारेष्वप्यप्रमादेन प्रवर्तमानानामित्यर्थ:। अनेन शमादिसम्पदुपलक्षिता। शमदमोपरतितितिक्षा श्रद्धासमाधानानि शमादय:। उक्तलक्षणसम्पन्नानां

(१) भूयो-भूयो मन्त्रपदानां स्फुटोच्चारणरूपो वाचिको जप: तत्काल एवं मन्त्रपदानां मनसार्थानुसंधानं मानसो जप:। इति तयोर्भेद इत्यर्थ:।

मुमुक्षूणां = "प्रदीप्तशिरा इव जलराशिं [१]विविक्षुः" इति पञ्चपादिकोक्तलक्षणोत्कट-सच्चिदानन्दाद्वयस्वात्मलाभरूप मोक्षेच्छाशालिनां पुरुषधौरेयाणां परमपुरुषार्थोपायत्वाद्धितं = पथ्यं, सुमधुरं = श्रोतृणां शब्दतोऽर्थतश्च सुखकरं। अत एव हृद्यं = मनः प्रियं। किमपि = सद्गुरूसम्प्रदायाधिगतश्रुतितात्पर्यप्रकाशकत्वादश्रद्दधानेष्वतिगोप्यमिदं प्रकरणं। निगदामः = स्फुटोक्तिभिः प्रकाशयामः। [२]"अस्मदोद्वयोश्च" इतिबहुवचनं। अनेन, "अथातोब्रह्मजिज्ञासा" इति शास्त्राद्यसूत्रस्थाऽथशब्दार्थानन्तर्येण योग्यत्वात्साधनचतुष्टयसम्पत्तिरेवावधित्वेनापेक्ष्यते, न वेदाध्ययनमात्रं धर्मजिज्ञासायामिवेति सूचनेन धर्मब्रह्मजिज्ञासयोर्भिन्नाधिकारिकत्वमपि दर्शितं बोध्यम्।।४।।

इदानीं सूत्रस्थब्रह्मजिज्ञासापदस्य "आत्मा वा अरेद्रष्टव्यः श्रोतव्यः" इत्यात्मदर्शनोद्देश्यकश्रवणविधिमूलकत्वात्साकाङ्क्षत्वाच्च प्रकृतिप्रत्ययार्थाऽऽन्तरालिकविचारलक्षणायाः, कर्तव्येति पदाध्याहारस्य चावश्यकत्वे तेन 'मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः 'इत्यर्थलाभात् "तृप्तिकामेन भोजनाय पाकः कर्तव्यः" इति वाक्येन यथा पाकफलत्वं भोजने भोजनफलत्वं च तृप्तौ तथा विचारफलत्वं ज्ञाने, ज्ञानफलत्वं च मोक्षे स्फुटतरमवगम्यत इति मोक्षस्य ज्ञानफलत्वं सूत्रयता बन्धस्याऽऽध्यासिकत्वमप्यर्थाद्दर्शितं, बहुतरश्रुतिस्मृतिपर्यालोचनेनाऽप्ययमेवार्थः सिद्ध्यतीति विषयसद्भावाच्छास्त्राऽऽरम्भसार्थक्यं प्रदर्शयति-

मू०।। ज्ञात्वा देवं सर्वपाशाऽपहानिः
नाऽन्यः पन्थाश्चेति भूयोवचोभिः।
ज्ञप्तेः साक्षान्मुक्तिहेतुत्वसिद्धा
वध्यासत्वं बन्धनस्याऽर्थसिद्धम्।।५।।

ज्ञात्वादेवमिति।। "ज्ञात्वा देवं सर्वपाशाऽपहानिः क्षीणैः केलशैर्जन्म मृत्युप्रहाणिः"। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। "तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय" "ज्ञात्वातं मृत्युमत्येति नान्यः पन्था विमुक्तये" 'इति' शब्द आद्यर्थे, इत्येवमादिभिः भूयोवचोभिः = बहुतरैः श्रुतिस्मृतिवाक्यैरित्यर्थः। तेन "ज्ञानादेव तु कैवल्यम्" "स एनमविदितो न भुनक्ति" "यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽऽशुचिः। न स तत्पदमाप्नोति संसारं चाधिगच्छति।। यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः। स तु

(१) विविक्षुरिति।। प्रवेशार्थकविशधातुप्रकृतिसनान्तात्कर्तरि सनाशंसभिक्ष उः इति सूत्रेण उः।।
(२) अस्मदोद्वयोश्च। एकत्वे द्वित्वे च विवक्षितेऽस्मदोवहुवचनं वा स्यात् वयं ब्रूमः इति यथा।

तत्पदमाप्नोति यस्माद्भूयो न जायते।।" "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति"।। "स यो हवै तत्परमं ब्रह्मवेद ब्रह्मैव भवति" "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां तथामनुष्याणाम्" इत्यादयः परःशतमागमाः, "ज्ञात्वा मां शान्तिमृच्छति" ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्।।" इत्यादिस्मृतयः अनुभवमूलक विद्वद्वचनानि चानुसंधेयानि। एतैः प्रमाणैः [1]ज्ञप्तेः=आत्मतत्वज्ञानस्य, साक्षात् = अव्यवधानेन, मुक्तेः = आत्यन्तिकबन्धनिवृत्तेस्तदुपलक्षितपरमानन्दावाप्तेर्वा, हेतुत्वस्य = कारणत्वस्य व्यंजकत्वस्य वा, सिद्धौ = निश्चये सति, बन्धनस्य = अविद्याकामकर्मदेहेन्द्रियादिलक्षणस्य परिच्छेदपारवश्यदुःखहेतुत्वाद्बन्धन तुल्यस्य संसारस्य अध्यासत्वम् = अध्यस्यत इत्यध्यासः, कर्मणिघञ्, तस्य भावस्तत्त्वं शुक्तिरजतादिवदारोपितत्वम्, अर्थसिद्धम् = सत्यस्य ज्ञाननिवर्त्यत्वानुपपत्तिप्रसूताऽर्थापत्तिप्रमाणेनैव सिद्धं = निश्चितं, तत्फलंचाऽद्वितीयब्रह्मात्मैक्यलक्षणविषयप्रयोजनसिद्ध्या शास्त्रारम्भसिद्धिरिति भावः।।५।।

ननु, ज्ञानादेव मोक्ष इत्यसङ्गतं, मोक्षो हि नाम नित्यनिरतिशयानन्दावाप्तिर्वास्यात्? आत्यन्तिकाऽनर्थनिवृत्युपलक्षितात्मस्वरूपाऽवस्थितिर्वा? आद्ये तस्य स्वर्गानतिरिक्तत्वम्। अभिहितं हि श्रुत्यैव स्वर्गलक्षणम्-"यन्न दुःखेन [2]संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम्" इति।। "सः स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्" इति सूत्रयन् भगवान् [3]जैमिनिरपिनित्यनिरतिशयानन्दरूपत्वात्सर्वाभिलाषविषयं स्वर्गमङ्गीचकार।। 'नच यत्कृतकं तदनित्यं' इति व्याप्तिमूलकानुमानेन "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयते" इति श्रुत्या च तस्याऽनित्यत्वं शङ्क्यम्।

(१) ज्ञप्तेरात्मतत्वज्ञानस्याव्यवधानेनात्यन्तिकबन्ध निवृत्ति मोक्ष इति पक्षे मुक्तेर्हेतुत्वस्येत्यस्य कारणत्वस्येत्यर्थः। आत्यन्तिकबन्धनिवृत्त्युपलक्षित परमानन्दावाप्तेर्मोक्ष इति पक्षे तु हेतुत्वस्येत्यस्य व्यञ्जकत्वस्येत्यर्थो बोध्यः।। मोक्षस्यात्मस्वरूपतया नित्यत्वेन जन्यत्वाभावाद्यथाश्रुतार्थानुपपत्तेरिति भावः।।

(२) सम्भिन्नं सम्मिश्रमित्यर्थः।।

(३) काम्यप्रकरणे विश्वजिता यजेतेति विधिः श्रूयते। काम्यप्रकरणपठितत्वेन तस्य नित्यत्वाभावात्प्रत्यवाय परिहारफलस्याप्यभावात् प्रवृत्यर्थं किंचित्फलं कल्पनीयं श्रुतौ फलाश्रवणात्। इति शंकायां सः स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वादिति सूत्रं प्रणीतं भगवता जैमिनिना। सः विश्वजिता यागेन साध्यः स्वर्गो भवितुमर्हति स्वर्गस्य सर्वान् प्रत्यविशिष्टत्वात्सर्वेषामिच्छाविषयत्वादिति यावत्। तथा च विश्वजिद्यागस्य पुत्रादिफलकत्वेऽपुत्राद्यर्थिनां तत्र प्रवृत्तिर्न स्यात् स्वर्ग फलकत्वे तस्य सर्वेषामिच्छाविषयतया सर्वेषां तत्र प्रवृत्तिरुपपद्यत एवेति स्वर्ग एव फलत्वेनकल्पितुमुचितमिति जैमिनि सूत्रार्थः।

(१)श्रुतिविरोधे सामान्यतो दृष्टानुमानस्याऽनुदयात्। तद्यथेहेत्यादिश्रुतेश्च। कर्मोपासनाङ्गभूतात्मप्रशंसार्थत्वेन स्वार्थे तात्पर्याभावात्। अस्तु वा स्वर्गाऽतिरिक्तकर्मफलस्याऽनित्यत्वे तात्पर्यम्। तथाहि सति "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" अपाम सोमममृता अभूम" "न स्वर्गाल्लोकाच्च्यवन्ते" इत्येवमादीन्यन्यान्यपि श्रुतिवाक्यानि, "कर्मणैवहि संसिद्धिमास्थिता जनकादयः" इत्यादिस्मृतिवचनानि च कर्म फलनित्यत्वपराण्यनुकूलानि। द्वितीयेपि प्राग्जन्मसंचितपुण्य पापेष्वेतद्देहारम्भकातिरिक्तस्य स्वर्गनरकादि भोगेनैव निश्शेषं क्षपितत्वात्, प्रारब्धफलानां भोगेन क्षपणात्, नित्यनैमित्तिककर्मानुष्ठानेन काम्यनिषिद्धवर्जनेन प्रामादिकदोषाणां प्रायश्चित्तादिना परिहारेणच भाविदेहारम्भककर्मणोऽप्यसंभवात्, अन्तरेणापि ज्ञानं तादृशस्वरूपावस्थितिलक्षणो मोक्षः सिद्ध्यतीत्याशङ्कां निराकरिष्यन् दर्शितं बन्धमिथ्यात्वमर्थापत्तिस्फुटीकरणेनोपपादयति–

मू०।। सत्यं भावं न वित्तिर्व्यपनुदति यतः कर्मनाश्यो घटादि–
मिथ्याभूतं च कर्म क्षपयति न तथा वित्तिघात्यं यतस्तत्।
इत्थं सिद्धे विभागे श्रुतिशिखरगिरा वित्तिघात्यः प्रतीतो–
बन्धो मिथ्येति सिद्धे न तदपहतये कर्मजातं समर्थम्।। ६।।

सत्यमिति।। वित्तिः = यथार्थज्ञानं, सत्यम् = अनारोपितं, भावं = भावपदार्थम्, न व्यपनुदति = ननिवर्तयति। (२)(पा०टि०)वृत्तिज्ञानप्रागभावस्य प्रतियोगिनाश्यत्वात्तद्वारणाय भावमिति। यतो = यस्मात्कारणात्, घटादिः = व्यावहारिकसत्यभावः, कर्मनाश्यः = मुद्गरप्रहारादिक्रिययैव नाशार्हो लोकेप्रसिद्धः, न ज्ञाननिवर्त्यः। तथा कर्म = लौकिकं वैदिकं च, मिथ्याभूतं = कल्पितं, न क्षपयति = ननाशयति।

(१) श्रुतिविरोधे सामान्यतो दृष्टानुमानस्यानुदयादिति। यन्नदुःखेन सम्भिन्नमित्यादि श्रुत्याऽक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादि श्रुत्या च स्वर्ग पदार्थस्य नित्यत्व प्रतिपादनात्तद्विरोधे दृष्टसामान्यस्यादृष्टविशेषविषयानुमानस्य कार्यकारणाभिन्नलिङ्गकस्य वा सामान्यतोदृष्टानुमानस्यानुत्थान प्रसङ्गादिति भावः।

(२) वृत्तिज्ञानप्रागभावस्येति/अत्रापि वृत्तिपदं व्यर्थं स्व स्वरूपज्ञानंस्य प्रागभावाभावेन तत्र व्यभिचारशंकानुत्थानात्। मंदोत्प्रेक्षितस्वरूपज्ञान प्रागभावभ्रान्तिनिवृत्त्यर्थं वृत्तिपदं चेन्न मंदस्यापि तत् प्रागभावमिव तेन तन्निवृत्युत्प्रेक्षाऽभावात्। तेनापिस्वरूप ज्ञानस्य श्रुत्यादि बलेन नित्यत्वावधारणान्नहि तदुत्पत्तिमंतरातत्प्रागभावनिवृत्तिः सम्भवति। तस्माद्वृत्तिपदं विवक्षितज्ञानस्वरूप प्रचयार्थमेवेति वरीयान् पंथा।।

यतः = यस्मात्कारणात्, तत् = मिथ्याभूतं शुक्तिरजतादि, वित्तिघात्यं = ज्ञानैक-बाध्यं प्रसिद्धं लोके। इत्थं = अमुनाप्रकारेण, विभागे = वारिवह्न्योरिव स्वभावभेदे सिद्धे = प्रमाणैर्निश्चिते सति, श्रुतिशिखरगिरा = श्रुतयो वेदाः "तेषांतंहत्रीन् गिरिरूपानविज्ञातानिव दर्शयांचकार" इति श्रुतौ पर्वताकारेण वेदानां दर्शितत्वोक्तेः वेदान्ताशिशखराणीव शिखराणि, तत्सम्बन्धिन्या गिरा प्राग्दर्शितवाक्यकदम्बलक्षणया, वित्तिघात्यः = ज्ञानबाध्यः सन्, प्रतीतः = निश्चितोऽविद्यादिद्वैतलक्षणः, बन्धः = मिथ्यैव, जीवतो देवदत्तस्य गृहाऽसत्वं बहिस्सत्वाऽभावेऽनुपपद्यमानं बहिस्सत्वमिव, भङ्गुरस्य यागादेर्देहान्तरभोग्यस्वर्गसाधनत्वश्रुतिरान्तरालिकम-पूर्वमिववा, श्रुतंबन्धस्यज्ञाननिवर्त्यत्वं श्रुतिरेव वा तस्य सत्यत्वेऽनुपपद्यमानं मिथ्यात्वमर्थापयतीति भावः। इति = दर्शितरीत्या बन्धमिथ्यात्वेसिद्धे, तस्य = बन्धस्य, अपहतये = आत्यन्तिकोच्छेदाय, कर्मजातं अग्निहोत्रप्राणोपासनादि बाह्यमानस-सर्वकर्मबृन्दं, न समर्थं न क्षमं, तथाच प्रयोगः बन्धः न कर्मनाश्यः, मिथ्यावात् रज्जुसर्पादिवत् इति।।

(१)नच स्वाप्नमुद्गरादिप्रहारक्रियया मिथ्याभूतस्वाप्नघटादेनाशदर्शनादनै कान्तिकत्वंशङ्क्यम्। स्वप्ने घटवन्नाशस्यापि जाग्रत्संस्कारसंस्कृतान्तःकरण परिणामरूपत्वेन तस्मिन्नुद्बुद्धसंस्काराद्यतिरेकेण मुद्गरप्रहारादेरन्वयव्यति-रेकासंभवादहेतुत्वे तज्जन्यताप्रतीतेरारोपपौर्वापर्यमात्रनिबन्धनत्वात्। (२)अत एव स्वप्ने नष्टस्य क्वचित् पुनरुन्मज्जनप्रत्ययः पुत्रवधादेश्च जागरे "न मे पुत्रोहतः" इति बाधश्चोपपद्यते। जाग्रद्घटादेर्वस्तुतोर्मिथ्याभूतस्य मुद्गरप्रहारनाश्यत्वेपि परेषां

(१) ननु-बंधो न कर्मनाश्यः मिथ्यात्वादित्यत्रानुमाने हेतोरनैकान्तिकत्वं स्वाप्नघटादेः स्वाप्नीयमुद्गर प्रहारादिना मिथ्याभूतेन नाश्यत्वदर्शनादिति न च शंकनीयं तादृङ् नाशस्यापि जाग्रतसंस्कारसंस्कृतमनः परिणामत्वेन समकालीनत्वेन च मुद्गरप्रहारादिजन्यत्वासम्भवात्। तयोरन्वयव्यतिरेकभानस्यापि स्वप्न जनकीभूतोद्बुद्धसंस्कारान्वयव्यतिरेकेणैवोपपत्तौ तद्व्यतिरेकेणासम्भवात्। ननु स्वाप्नीय घटतन्ना-शयोरन्वयव्यतिरेकासम्भवेन कार्यकारणभावानुपपत्तौ घटनाशस्य कथं मुद्गरप्रहारादि जन्यताप्रतीतिरिति चेदाह। आरोपित जाग्रत संस्कारबलेन प्रतीयमानं यद्घटाद्यारोपे पौर्वापर्य्यंतन्निबन्धनत्वादारोपनिष्ठभ्रान्ति सिद्ध पौर्वापर्य्यनिमित्तकत्वात् घटादिनाशनिष्ठ जन्यता प्रतीतेरतो न व्यभिचार शंकावकाशं इतिभावः।

(२) अतएव। स्वाप्न प्रपंचस्य जाग्रत्कालीनोद्बुद्धसंस्कारोद्भूत भ्रान्तिमात्रत्वादेव स्वप्ने नष्टस्य पुनः क्वचिज्जाग्रदादावुन्मज्जनप्रत्ययः जीवन प्रत्यय उपपद्यते भ्रान्ति सिद्धस्यारोपितत्वेन मिथ्यात्वेन व्युत्थितस्य जाग्रत्कालीनबाधेन बाध सम्भवात् तथा च तादृङ्नष्टस्य पुनरुन्मज्जन प्रत्ययस्य वा स्वाप्नीय पुत्रवधादेश्च जागरितीय जीवन प्रत्ययेन न मे पुत्रो हत इति बाधश्चोपपद्यते।।

मिथ्यात्वासम्प्रतिपत्तेर्व्यभिचारोद्भावनाऽसम्भवात्।। अस्तुवा कारणीभूताऽज्ञान-निवृत्यधीननिवृत्तिलक्षणाऽऽत्यन्तिकनाशस्यैव साध्यघटकत्वं, मुद्गरप्रहारादिना च घटादेः सूक्ष्मावस्थापत्तिरूपतिरोभावमात्रं, नात्यन्तिकविनाशः। अन्यथा नष्टघटादेः ज्ञानं न स्यात्, सदसतोः सम्बन्धायोगादित्यन्यत्र विस्तरः।।

अयंभावः- ''ये हि जनाः पुण्यकृतः स्वर्गलोकं यन्ति तेषामेतानि रूपाणि नक्षत्राणि इति श्रुत्या स्वर्गित्वेन प्रसिद्धानां नक्षत्राणां पातदर्शनेन, कृतकत्वहेतुकानुमानेन, नित्यस्य साधनापेक्षानुपपत्तिप्रसूतार्थापत्त्या, च ''तद्यथेह कर्मचितोलोकः क्षीयते एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयते'' ''प्लवाह्यते अदृढा यज्ञरूपाः अष्टादशोक्तमवरं येषु कर्म, एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति'' ''दूर[१]मेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता'' ''[२]अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पंडितं मन्यमानाः। दंद्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः'' ''न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।'' ''नाऽस्त्य कृतः कृतेन'' ''अमृतत्वस्य तु नाशास्ति वित्तेन'' इत्यादिश्रुतिभिः ''ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति'' इत्यादिस्मृतिभिश्च स्वर्गादिः कर्मफलस्यानित्यत्वे निश्चिते ''यन्नदुःखेन संभिन्नं,'' ''अपामसोमम्''

(१) एते = वक्ष्यमाणस्वरूपे दूरं, अत्यन्तं विपरीते = स्वरूपतो विलक्षणे, विषूची = विषूच्यौ नानागती भिन्नफले। के त इत्यत आह।। अविद्येति या कर्मकाण्ड प्रसिद्धाऽविद्या अभ्युदयसाधनं कर्म।। चकारः परस्पर-समुच्चयार्थः। विद्या = मोक्षसाधनं तत्त्वज्ञानम्। एवमविद्यात्वविद्यात्वरूपेण ज्ञाता पण्डितैर्विरूद्धस्वरूपतया निश्चितेत्यर्थः। क० व० २-४

(२) अविद्यायामन्तरे वर्तमाना अविद्यातत्कार्यनिरूपिताभिमानवन्तो मूढ़ा = अविवेकिनोधीरा लौकिक प्रज्ञावन्तो वयमिति स्वात्मानं विजानन्तः पण्डितं शास्त्रीय प्रज्ञावन्तं चात्मानं मन्यमानाः, दन्द्रम्य-माणाः = अत्यन्तं कुटिलामनेकरूपां गतिमिच्छन्तः, परियन्ति = नानाविधमनर्थं प्राप्नुवन्ति। शेषं स्पष्टम्।। क० २-५।।

एते = शास्त्रप्रसिद्धाः यज्ञरूपाः यदाश्रयतया यज्ञो निरूप्यते ते यज्ञरूपाः यज्ञकर्तारः प्लवाः = प्लवतुल्या यथाहि क्षुद्रनदी तरणार्थं तृणकाष्ठादिभिर्निर्मिताः प्लवाख्यास्तरणसाधनविशेषा न समुद्रपरपारगमयितुं समर्थाभवन्ति तद्वदमी यज्ञकर्तारोपि न भवाब्धिपरपारं मोक्षाख्यं गमयितुं समर्था इत्यर्थः। यतोऽदृढाः स्वल्पविघ्नेनापि प्रतिहताः सन्तः स्वर्ग्यमपि प्रापयितुमक्षमाः के ते इत्यत आह। अष्टादशेतिहोत्रध्वर्युब्रह्मोद्गातृप्रतिप्रस्थाता ब्राह्मणांच्छंदसि प्रस्तोतृ मैत्रावरुण अच्छावाक् नेष्टा अग्नीध्र प्रतिहर्तृग्रावस्तुन्नेतृपोतृ सुब्रह्मण्या इति षोडश ऋत्विजः पत्नी यजमानश्चेत्यष्टादशसंख्याकाः येष्वुक्ताष्वष्टादशसु उक्तं = शास्त्रेणकथितं, अवरं = उपासनावर्जितं केवलं कर्म वर्तते इति शेषः।। ये मूढाः = अज्ञाः एतदुपासनारहितं कर्मश्रेयो मोक्ष साधनमिति मत्त्वा हर्षं प्राप्नुवन्ति। ते उक्तकर्मिणः पुनरेव किञ्चित्कालं स्वर्गे स्थित्वाभूय एव जरामृत्युं जरासहितं मरणं प्राप्नुवन्ति इत्यर्थः।। मु० १ ख० २ म० ७।।

इत्यादिश्रुतेः, ''आभूतसंप्लव स्थानममृतत्वं हि भाष्यते'' इति स्मृत्युपदर्शितदिशा आपेक्षिकनित्यत्वपरत्वमेव। अक्षय्यमितिश्रुतिरपि न स्वर्गस्याऽक्षय्यत्वमाह, किन्तु सुकृतस्य, तत्तु न स्वतः पुरुषार्थः।।

न च 'यदा यदा सुकृतं तदा तदा सुखम्' इतिनियमोऽस्ति, सुखस्य देशकालदेहविषयविशेषादिनिमित्तांतरसापेक्षत्वेन तेषामेकैकाऽसमवधानेसुकृते सत्यप्यनुदयात्। न वा सुकृतस्याऽक्षय्यत्वमपि सम्भवति। फलनाश्यत्वनिश्चयात्, जन्यभावस्यविनाशनियमात्। ''अतोन्यदार्तम्'' इत्यात्मातिरिक्तस्य नश्वरत्वश्रुतेश्च। तस्मादसावर्थवादो लक्षणया चिरस्थायिफलत्वप्रतिपादनेनकर्मप्ररोचनार्थो न बहुतरप्रमाणविरुद्धमर्थं प्रसाधयितुं क्षमते। नच भवदुदाहृतवचनानामपि कर्मोपासना-ऽङ्गभूतात्मप्रशंसार्थत्वान्नस्वार्थे प्रामाण्यमिति वाच्यम्। औपनिषदस्यात्मनो-ऽन्यकर्मशेषत्वासंभवात्। नह्यशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमात्मतत्वं कर्माङ्गभावं भजते। प्रत्युत कर्तृत्वाद्यध्यासविरोधिज्ञानविषयत्वात्कर्मजातमुपमृद्नाति। तथाच सूत्रम्, (१)''उपमर्द चेति'' ''कर्मणैव हि संसिद्धिम्'' इतिस्मृतिस्तु चित्तशुद्ध्यादिद्वारा ज्ञानोपायतया मोक्षे कर्मणामावश्यकत्वं दर्शयन्ती नोपेयं ज्ञानं प्रत्याचष्टे। नापि संचितागामिकर्मणां भोगानारम्भाभ्यामेवेष्टसिद्धिः। अनेककोटिजन्मसंचितानां स्वर्गादिष्वभुक्तफलानामपि बहुतरजन्मारम्भककर्मराशीनां संभवात्। नच तत्तद्देहार्जितकर्मणां तत्तद्देहभोग्यकर्मभिर्यावद्देहपातं प्रतिबद्धानां तत्तद्देहावसाने प्रतिबन्धापगमे विनिगमनाविरहेणसर्वेषामेव फलारम्भावश्यकत्वात्संचित-कर्माऽनवशेष इति वाच्यम्।

कदाचित्सुकृतं कर्म कूटस्थमिह तिष्ठति।
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते।।

इति वचनाद्विकुण्डलोपाख्यानादावष्टमादिजन्मसंचितसुकृतेन स्वर्गतिस्मरणाच्च, स्वर्गादिभूमिष्वभोग्यानामनेकमनुष्यादिदेहारंभककर्मणां संभवात्।।

''कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम्।
सप्तजन्मसु विप्रः स्याद्धनाढ्यो वेदपारगः।।''
''श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्।
चण्डालमृतपानां च ब्रह्महा योनिमृच्छति।।''

(१) उपमर्दञ्च।। कर्माधिकार हेतोः क्रियाकारकफल लक्षणस्य समस्तस्य प्रपञ्चस्याविद्याकृतस्य विद्यासामर्थ्यात्स्वरूपोपमर्दं यत्रत्वस्य सर्वमात्मैवेत्यादयो वेदान्ताः समामनन्ति तस्मादपि विद्यायाः स्वातन्त्र्यं स्वफलं प्रतीतिभावः।।

इतिस्मृतेरेकैकस्याऽप्यनेकविचित्रजन्मारम्भकस्य सुकृतदुष्कृतकर्मणः संभवाच्च। श्रुतिरपि "तद्यइह रमणीयचरणा अभ्याशोह यत्ते रमणीयां यौनिमापद्येरन् ब्राह्मणयोनिंवा, क्षत्रिययोनिं वा, वैश्ययोनिं वा, अथ य इह कपूयचरणा अभ्याशोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा, सूकरयोनिं वा,चण्डालयोनिं वा, अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति, जायस्वम्रियस्वेत्येतत्तृतीयं स्थानम्" इति सानुशयानामवरोहादि दर्शयति। प्रपंचितं चैतद्भाष्यकृद्भिः- (१)"कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च," इत्यत्र। भोगेन स्वर्गभोग्य-पुण्यनाशेऽवशिष्टकर्मवानेव चन्द्रमण्डलादवरोहतिः, प्रत्यक्षश्रुतिस्मृतिप्रमाणानुरोधा-द्यथागतमार्गपर्वणातदन्येनचेतिसूत्रार्थः। किंच, एवं सति विधिनिषेधशास्त्रानधिकारिणां श्वसूकरादीनां संचितकर्मानवशेषाद्भोगेन प्रारब्धक्षपणाच्च अनायासेनैव मुक्तिः स्यादिति यत्किंचिदेतत्। तस्मात् "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेतथा," इत्यादिस्मृतेः, एतं हवाव न तपति, किमहं साधु नाकरवं किमहं पापमकरवमिति" इत्यादिश्रुतेश्च सर्वकर्मोच्छेदक्षमं ज्ञानमेव मोक्षसाधनमितिसिद्धम्।।६।।

---

(१) कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च।। ब्र० सू० अ० ३ पा० १ सू ९।। येन कर्म वृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षपिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसम्पर्काद्विलीयते। सवितृकिरण संयोगादिव हिमकरकाः। ततः कृतात्यये कृतस्येष्टादेः फलोपभोगेन क्षये सति सानुशया चन्द्रादिलोकीयभोगप्रदकर्म व्यतिरिक्तेन धर्माधर्मलक्षणापूर्वेण जातमात्रस्य सुखदुःखादिभोगात्मक कार्यानुमित सत्वेन सह वर्तमाना एव पुण्यात्मानः पुरुषाः पुनरवरोहन्ति पुनरिहलोके भोगाय कर्मकरणाय चोत्पद्यन्ते कुतः।। दृष्टस्मृतिभ्यामिति।। तद्य इह रमणीयचरणा इत्यादिश्रुतिस्तथा वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्यकर्मफलमनुभूय ततः शेषेण विशिष्ट देश जातिकुलरूपायुः श्रुतवृत्तवित्त सुखमेधसोजन्मप्रतिपद्यन्ते इत्यादि स्मृतिश्च ताभ्यां प्रमाणाभ्यामवगम्यते इति।। कथमवरोहन्ति।। यथेतमनेवं चेति।। यथेतंयथागतं धूमाद्यध्वना यथेतं यथागतं तथैतेमध्वानं पुनरायान्तीत्युक्ता पुनरनेवं चेति वचनात् धूमादिरूप पितृयान मार्गस्थरात्र्यादिकं श्रुत्या पुनरिहागमनेनोक्तमभ्रादिकमुक्तं ततश्च सूत्रकारेणोक्तमनेवं चेति यथागतं विपर्येण च पुनरायान्ति पुनरागमनप्रतिपादकश्रुतिश्च। तस्मिन् यावत्सम्पातमुषित्वाऽथैतमे वाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा औषधिवनस्पतयस्तिलमाषा इति जायन्ते। अतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीय चरणा रमणीयां योनिमापद्यन्ते इति श्रुति बोध्यः। यद्वा यथेतं यतो मनुष्ययोनितोगतास्तामेव पुनरापद्यन्ते पाप कर्मोद्भवे तु विपर्येण पश्वादि योनिं वापद्यन्ते इति सूत्रार्थः।।

ननु बन्धस्याविद्यकत्वे सिद्धे दर्शितं ज्ञानैकनिवर्त्यत्वं सिद्ध्येत, तदेव तावदसिद्धम्। अविद्या हि भावरूपा ब्रह्मचैतन्यमात्राश्रयविषया तद्भेदाभेदसत्वासत्व-निरवयवत्वसावयवत्वादिना दुर्निरूपा त्रिगुणासर्वजगज्जननशक्तिमती सिद्धान्त्यभिमता। नचेदृशीमिमामभ्युपगच्छन्त्यन्ये तैर्थिकाः। तथाहि - मिथ्याज्ञानवासनामूलो बन्ध इति कणभक्षाक्षचरणाः। प्रकृतिपुरुषाविवेकमूल इति साङ्ख्यपातञ्जलाः। कर्ममात्रमूल इति भाट्टप्राभाकराः। (१)तथान्येप्यन्यदन्यन्मूलमिच्छन्ति। तत्कथमविद्यैव बन्धमूलमिति शङ्कां परिहरन् कल्पितस्य कर्मानिवर्त्यत्वं सदृष्टान्तसफलमुपपादयति-

मू०।। आविद्यो ह्येषबन्धो विरमति न विना वेदनं कर्मजालै-
र्मालोद्भूताऽहिरस्तं व्रजति किमु नमस्कारमन्त्रौषधाद्यैः।
एवं निश्चित्य नागस्त्वचमिव विधिना कर्मबन्धं विधूय-
ज्ञानोपाये गुरुश्रीचरणमभिगतः सेवामानो यतेत।।७।।

आविद्य इति।। एषः= देहेन्द्रियादिलक्षणः, कारानिगलादिवत्परिच्छेद-पारवश्यदुःखहेतुत्वेन बन्धनसादृश्याद्बन्धः, आविद्यः = दर्शितभावरूपाज्ञाननिदानः। हिशब्दः प्रमाणप्रसिद्धिद्योतनार्थः। प्रमाणानि च प्रत्यक्षानुमानार्थापत्त्यागमस्मृतयः। तत्र प्रत्यक्षं तावत् 'अहमज्ञः', मामहं न सम्यग्जानामि, नाहं ब्रह्म जानामि इत्यसंदिग्धाऽविपर्यस्तं सार्वजनीनं दुरपह्नवं। नचेदं ज्ञानसामान्याभावविषयं, सति ज्ञाने प्रतियोगिसत्तया, असति च धर्मिप्रतियोगिज्ञानरूपाऽभावग्रहकारणाभावेनाऽऽत्मनि ज्ञानसामान्याभावासिद्धेः, मामहमिति स्फुरत्येवाऽऽत्मनि तद्विषयकाऽज्ञानाऽनुभवाच्च। नचात्मनिश्चयत्वप्रमात्वसाक्षात्कारत्वाद्यवच्छिन्न प्रतियोगिताकाभाव एव विषयः, (२)विपरीतव्युत्पन्नस्य नैयायिकादेस्तथानुभवदर्शनादिति वाच्यम्। प्रतियोगिनि निश्चयत्वाद्यनुल्लेखात्। नैयायिकादेरपि पटुतरेण वेदान्तिना जल्पकथादौ निगृहीतस्य

(१) तथाऽन्येबौद्धजैनप्रभृतयोऽन्यदन्यन्मूलं विज्ञानादिमूलमित्यर्थः।।

(२) विपरीतव्युत्पन्नस्यनैयायिकादेरिति। ज्ञानादिगुणकः कर्त्ताभोक्ता चात्मा न तु तद्व्यतिरिक्तो-ज्ञानस्वरूपोऽकर्त्रादिरूपश्चात्मास्तीति विपरीत निश्चयवतो नैयायिकादेस्तथाऽनुभवोऽस्त्येवेति न च वाच्यम्।। विपरीतप्रत्ययवासना दार्ढ्येण, यथोक्त विपरीततयाऽऽत्मज्ञानजन्य संस्कार प्रावल्येन स्वरूपगोचर बुद्धेः प्रतिबन्धात् यथा समवाय सिद्ध्या जातिगुणयोः स्वाश्रय द्रव्येण तादात्म्यसम्बन्धस्य स्वीकार्यत्वेपि जातिगुणयोः स्वाश्रयेण (तादात्म्यबुद्धेः) समवाय एव सम्बन्ध इति विपरीत प्रत्ययदार्ढ्येण तयोर्द्रव्येण तादात्म्यबुद्धेः प्रतिबन्धान्नैयायिकादेर्जातिगुणयोः समवाय एव सम्बन्ध इत्यभिमन्यते। तद्वन्मनोमात्रग्राह्यो ज्ञानादिगुणश्चात्मेति विपरीत प्रत्यय दार्ढ्येण तद्विपर्ययस्वरूपः शुद्धः स्वयंप्रकाश ज्ञानस्वरूपश्चात्मेति बुद्धेः प्रतिबन्धात्तथाभूतमप्यात्मानं गृहीतुमशक्नुवन् सन्नात्मानमहं न जानामीत्यभिमन्यन्त इति युक्तंभातीतिभावः।

स्वसाक्षिकस्तादृशाज्ञानानुभवो दुरपह्नवः। सदैव नाहं ब्रह्म जानामीति च तस्यास्त्येवाज्ञानानुभवः, मामहं न जानामीति तु विपरीतप्रत्ययवासनादार्ढ्येन प्रतिबन्धाद्भासमानमपि जातिगुणादेर्द्रव्यतादात्म्यमिवोल्लिखितुमशक्नुवन् भ्रान्त्या न जानामीत्यभिमन्यते इति युक्तम्। किंच मामहं न जानामीति प्रत्ययो न प्रागभावविषयः, प्रागभावानभ्युपगमात्, अभ्युपगमेपि [१]तस्य प्रतियोगिसामग्री-व्यङ्ग्यत्वेन तदसमवधानदशायां ग्रहणायोगात्। सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य प्रागभावे केनाप्यनभ्युपगमाच्च। तत्तद्व्यक्तित्वेन प्रतियोग्युपस्थितिस्तु भाविज्ञानस्य विशेषतो ग्राहकमानस्याप्रसिद्धेर्नकस्यापिसंभवति। नच प्रतियोगितावच्छेदकविशिष्ट-प्रतियोग्यनुपस्थितावभावग्रहः सम्भवतीति।

नाप्यत्यन्ताभावविषयः घटज्ञानेन 'मम घटाज्ञानं नष्टं' इति सर्वानुभवस्य, विदुषांब्रह्मज्ञानेनअज्ञाननाशानुभवस्य, ''ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।'' ''नष्टो मोहः स्मृतिर्लब्धा।'' इत्यादिस्मृतीनां चात्यन्ताभावविषयत्वायोगात्, तस्य (अत्यन्ताभावस्य) त्वया नित्यत्वाभ्युपगमात्। इत्थंचाधिकरणात्मकम-भावमभ्युपगच्छद्भिः सांख्यप्राभाकरादिभिरपि नाशानुभवोपपादनाय भावरूपाऽज्ञानं बलादङ्गीकरणीयम्, आत्मनो नाशायोगादिति सिद्धा सर्वद्वैताध्यासहेतुर्मूलाविद्या। अनयैव दिशा 'घटं न जानामि, पटं न जानामि' इति प्रत्ययेन घटपटाद्यवच्छिन्नचैतन्या-श्रितानि तत्तत्प्रातिभासिककार्योपादानानि घटपटादिप्रत्ययनाश्यानि तूलाज्ञानापरपर्यायाण्य-वस्थाज्ञानान्यपि सिद्ध्यन्ति। तथाच प्रयोगः- द्वैतात्मको बन्धः अविद्याप्रकृतिकः, दुर्निरूपस्वभावत्वात्, शुक्तिरूप्यवत् इति। नचाप्रयोजकता, कार्येषुभेदाभेदसत्वासत्व-निरवयवत्वसावयवत्वादिना दुर्वचत्वस्य तथाविधकारणमन्तरेणायोगात्। [२]अनभ्युपगमे तु कार्यकारणयोरैकरूप्यनियमभङ्गेन मृत्पिण्डात्स्वर्णघटपटाद्युत्पत्तिप्रसङ्गात्। उपपादयिष्यते च कार्यस्य दुर्निरूप्यत्वम्। अर्थापत्तिरपिनिर्विकारासङ्गस्यात्मनो जगत्कारणत्वं श्रूयमाणं ब्रह्मावारकसविकाराज्ञानमन्तरेणानुपपद्यमानं बन्धस्याविद्य-कत्वमर्थापयतीति प्रागपि दर्शितैवार्थापत्तिः। आगमाः खल्वपि ''सोऽविद्याग्रन्थिं विकिरतीह सोम्य'' ''अविद्यायामन्तरे वर्तमानाः'' ''दूरमेते विपरीते विषूची अविद्या या च विद्येतिज्ञाता ''न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव।'' ''त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि'' ''सोहं

(१) तस्य प्रागभावस्य प्रतियोग्यात्मक यज्ज्ञानं तस्य ज्ञानस्य यत्सामग्रीकारण कलापस्तदसमवधानदशायां तदनुपस्थितिदशायामित्यर्थः।

(२) अनभ्युपगमे तु = तथाविधकारणपूर्वकत्वानङ्गीकारे तु।

मन्त्रविदेवास्मि नात्मवित्'' ''अनृतेन हि प्रत्यूढाः'' इत्यादयः सहस्रशः प्रसिद्धाः।। स्मृतयश्च- ''तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै ज्ञानात्मने नमः।।'' ''अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।'' ''विभेद जनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति।।'' इत्याद्याः सहस्रशः प्रसिद्धा इति भावरूपमावरणविक्षेपशक्ति-मदखिलद्वैतमूलमज्ञानं सिद्धम्। तच्च (१)धर्मिग्राहकमानेनैव ज्ञाननिवर्त्यं मिथ्याभूतं सिध्यतीति प्रमाणसिद्धस्य बाध्यत्वानुपपत्तिर्न शङ्कनीया।।

अथवा साक्षिप्रत्यक्षवेद्यमेवाज्ञानम्, प्रमाणोपन्यासस्तु तस्य ज्ञानाभावत्व-वारणायेति बोध्यम्। प्रसाधितस्यफलमाह- विरमतीति। वेदनम् = अधिष्ठानतत्व-साक्षात्कारं बिना, कर्मजालैः = जालवद्बन्धहेतुभिः कर्मभिः, न विरमति = न समाप्यते। (२)''व्याङ्परिभ्योरमः'' इति परस्मै पदम्। कर्मणां मुक्तिहेतुत्वं दूरं, प्रत्युत बन्धहेतुत्वगेवेति भावः। उक्तमर्थमर्थान्तरन्यासेनद्रढयति मालेति।। मन्दान्धकारे पुष्पमालायामुद्भूतो भ्रान्तिकल्पितः अहिः = सर्पः, नमस्कारमन्त्रौषधाद्यैः = व्या-वहारिकसर्पनिवर्तनोपायैः, अस्तम् = अदर्शनं, व्रजति किम्? नव्रजतीत्यर्थः। 'उ' इति निपातः। तेन सर्पनिवर्तकोपायत्वेन क्लृप्तैरपि मन्त्रादिभिर्मिथ्यासर्पो न निवर्तते, किंवाच्यमक्लृप्तैः कर्मभिर्बन्ध इति भावः। कर्मणामेव मोक्षहेतुत्वे संन्यास-विधायकश्रुतिवैयर्थ्यमपि स्यादिति दोषान्तरं सूचयन् प्रसाधितस्य फलं दर्शयति एवमिति।। एवं = उक्तप्रकारेण, कर्मणां, मोक्षाहेतुत्वंनिश्चित्य = वैराग्यादि-सम्पन्नोधिकारी, नागः = सर्पः। त्वचं = जीर्णकञ्चुकमिव कर्मबंधम् = नित्यनैमित्तिक काम्यकर्मात्मकं बन्धहेतुं, विधिना = शास्त्रोक्तप्रकारेणैव, विधूय = संन्यस्य, गुरोः = वेदान्त-तत्वोपदेशेन सद्यः शिष्याज्ञाननिबर्हणक्षमस्य साक्षात्कृतब्रह्मतत्वस्य परमहंसपरिव्राजकाचार्यस्य, श्रीमच्चरणं = पादाम्बुजद्वयमभिगतः = अभिमुखंप्रपन्नः सन्, 'न विद्यतेभीर्भयं यस्मात्तदभि' इति चरणविशेषणंवा। तमेव गुरुं वाङ्मनः कायैः सेवमानः = परिचरन् सन् ज्ञानोपाये = साक्षात्कार-साधनश्रवणादौ, यतेत = यत्नवान् भवेदित्यर्थः।

(१) धर्मि ग्राहकमानेनैवेति।। अज्ञानलक्षणधर्मस्य धर्मिणोऽधिष्ठानस्य ब्रह्मणः साधकं। यच्छ्रुत्यात्मकं शब्दप्रमाणं तेनैवेत्यर्थः।।

(२) व्याङ्परिभ्योरमः इति परस्मैपदं।। वि आङ् परिभ्यः परस्याः क्रीडार्थकरमुधातोः परस्मैपदं स्यादित्यर्थः।। अ०अ० १ पाद ३ सूत्र ८३)

ननु न कर्मणां संन्यासो न्याय्य:, "यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" "वीरहा वा एष देवानां योऽग्निमुद्वासयते" "आचार्यायप्रियं धनमाहृत्य प्रजातन्तुं माव्यवच्छेत्सी:" "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमा:" "त्रिभि: ऋणवाञ्जायते" इत्यादि श्रुतिभि:, "नियतस्य तु संन्यास: कर्मणो नोपपद्यते। मोहात्तस्य परित्याग: तामस: परिकीर्तित:।।" "यज्ञदानतप: कर्मनत्याज्यं कार्यमेव तत्। न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोश्नुते।" इत्यादिस्मृतिभिश्च नित्यनैमित्तिक कर्मत्यागस्य निषिद्धत्वात्। सन्यासशास्त्रं तु कर्मानधिकृतविधुरादिविषयं, काम्यकर्मत्यागविषयं, सर्वकर्मफलत्यागविषयंवा। तथाचोक्तंभगवता- "काम्यानां कर्मणां न्यासं सन्यासं कवयो विदु:। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा:।" इति।। न च सन्यासमन्तरेणश्रवणाद्यसंभवात्तदावश्यकत्वं। गृहस्थादेरपि कर्मानवरुद्धकाले श्रवणादे: कर्तुं शक्यत्वात्। प्रतर्दनादेगार्हस्थ्यदशायामेवश्रवणादे:, जनकयाज्ञवल्क्याजातशत्रुप्रभृतीनां गृहस्थानामेव ब्रह्मनिष्ठत्वस्यच श्रवणादितिचेत्, मैवम्।। छान्दोग्ये "त्रयो धर्मस्कन्धा:" "इत्याश्रमत्रयंप्रस्तुत्य" सर्वएतेपुण्य-लोकाभवन्ति, ब्रह्मसंस्थोऽमृतत्वमेतीति" गृहस्थाद्याश्रमित्रयस्य पुण्यलोकावाप्तिरेव, ब्रह्मसंस्थशब्दितसन्यासिन एवामृतत्वमिति विस्पष्टमभिधानात्।।

न च ब्रह्मसंस्थशब्दो यौगिक: कथं सन्यासिनमेव विशिष्याभिदध्यादिति वाच्यम्। ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्निष्ठत्वमभिधीयते। तच्च त्रयाणामाश्रमिणां न संभवति, तेषां स्वाश्रमविहित कर्माननुष्ठाने प्रत्यवाय:श्रवणात् परिव्राजकस्य तु विधिना सर्वकर्म सन्यासान्न प्रत्यवाय, शमादिसहितं ब्रह्मनिष्ठत्वमेव तस्य स्वाश्रमानुरूपं कर्मेति। तथाचाहु:- "आसुप्तेरामृते: कालं नयेद्वेदान्तचिन्तया। दद्यान्नावसरं कंचित्कामादीनां मनागपि" इति।। "त्रयो धर्मस्कन्धा:" इत्यादिना धर्ममात्राधिकृतत्वेन प्रस्तुतानां त्रयाणामाश्रमिणां "सर्व एते पुण्यलोकाभवन्ति" इति निरवशेषं परामृश्य पुण्यलोकभाक्त्वेन विनियुक्तानां निराकाङ्क्षाणां न पुनर्ब्रह्म-संस्थशब्देन परामर्श: संभवतीति परिशेषादाकाङ्क्षितत्वाच्च संन्यासिन एव परामर्श:। एतेन गृहस्थादीनामपि श्रवणादिसंभवप्रत्याशा निरस्ता। आख्यायिकासु प्रतर्दन-प्रभृतिगृहस्थानां श्रवणादिदर्शनलिङ्गंतु (पू०टि०) प्राप्तिसापेक्षं न प्रापकशास्त्रविरुद्धं तेषां ज्ञानाधिकारं कल्पयितुं क्षमते। अन्यथा "गावो वै सत्रमासत" इत्यादिलिङ्गाद्गवादीनामपि कर्माधिकारकल्पना प्रसङ्गात्। तथाचोक्तं वार्तिके- "त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासत:। जिज्ञासोरेव चैकात्म्यं त्रय्यन्ते स्वधिकारिता"।। इति।।

अस्तुवा जन्मान्तरे जनकादिभिः संन्यासपूर्वकं श्रवणाद्यनुष्ठितमेव प्रतिबन्धकवशात्तु तदाज्ञानं नाभूत्, इह जन्मनि तु तेषांप्रतिबन्धकापगमात् गार्हस्थ्येऽपि सकृच्छ्रवणमात्रेण ज्ञानमुत्पन्नमिति कल्पनं। तथाच स्मृतिः- "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।" इति। "अनेकजन्मसंसिद्धस्ततोयातिपरांगतिम्।" इति च। तस्मात्सन्न्यासो दुरपह्नवः। तथा "न्यास इतिब्रह्मा, ब्रह्माहि परः, परोहि ब्रह्मा तानिवा एतान्यवराणि तपांसि, न्यास एवाऽत्यरेचयत्" "वेदान्तविज्ञान-सुनिश्चितार्थाः संन्यासयोगाद्यतयश्शुद्धसत्वाः।" "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।" "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति।" "त्यजतैव हि विज्ञेयं त्यक्तुः प्रत्यक्परं पदम्।" इत्यादयो विविदिषासन्न्या-सविधायिन्यः, "एतद्धस्मवै तत्पूर्वंविद्वांस आहुः ऋषयः कावषेयाः किमर्था-वयमध्येष्यामहे किमर्थावयं यक्ष्यामहे एतद्धस्मवै तत्पूर्वे विद्वांसोऽग्निहोत्रं नजुहुवांचक्रिरे" "एतं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाऽथ भिक्षाचर्यं चरंति।" "एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज" इत्यादयो विद्वत्सन्न्यासपराः, तत्राऽपि काश्चित् "ब्रह्मचर्यं समाप्य गृहीभवेत्, गृहाद्वनीभूत्वा प्रव्रजेत्" इति क्रमिकसन्न्यासविधिपराः, अन्याश्च "यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा, यदहरेव विरजेत्तदहरेव प्रव्रजेत्" "खलु वेदार्थं योविद्वान् सोपनयादूर्ध्वं सतानि प्रागवा त्यजेत्पितरं पुत्रमग्न्युपवीतं कर्म कलत्रं कुटीचको ब्रह्मचारी कुटुंबं विसृजेत् त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्याऽऽत्मानमन्विच्छेत्" इत्याश्रमक्रमं विना स्मार्तसन्न्यासोत्तरं चोत्कटवैराग्योदयोत्तरकालमेव पारमहंस्य-विधिपराश्च श्रुतयो द्रष्टव्याः।।

नचाऽऽसां विधुरादिविषयत्वं न्याय्यम्। "अथपुनरव्रती वा व्रतीवा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निकोवा" इति तेषां पृथक् सन्न्यासविधानात्।। भगवतापि- "नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाऽधिगच्छति।" इत्यादिना विविदिषासन्न्यासः, "योगारूढस्य तस्यैव शमः कारणमुच्यते।" "सर्वकर्माणिं मनसा सन्न्यस्यास्ते सुखं वशी।" "नैव तस्य कृतेनार्थो नाऽकृतेनेह कश्चन।" इत्यादिनाविद्वत्सन्न्यासश्च दर्शितएव।। बृहस्पतिरपि-संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः।" इति, अङ्गिराश्च- "प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेद्वा गृहादपि. वनस्थः प्रव्रजेद्विद्वानातुरो वाऽपि दुःखितः।"

इति, मनुरपि- "प्राजापत्यां निरुप्येष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य गृहस्थः प्रव्रजेद्गृहात्।।" इति व्यासोपि- "ब्रह्मचर्येण कालं वा कुर्यात्संकल्पपूर्वकम्। वानप्रस्थो वापि भवेत्परिव्राडथवेच्छया।।" इति, संन्यासं दर्शयति।। तस्माद्बहुतरश्रुतिस्मृतिविरोधात् "कुर्वन्नेवेह कर्माणि" इति श्रुतिवचनं, "नियतस्य तु" इत्यादिभगवद्वचनं चाऽविरक्तविषयं मन्दविरक्तविषयं वेति निश्चीयते। अतएव चाऽविरक्तस्य चित्तशुद्ध्यर्थं फलत्याग सहितं कर्मानुष्ठानं "काम्यानां कर्मणाम्" इत्यादिना भगवता प्रसिद्धसन्न्याससाम्येन स्तूयते। "दुःखमित्येव यत्कर्म" इत्यादिनाप्ययमेवार्थः स्फुटीकृतः "त्रिभिः ऋणवाञ्जायते" इति श्रुतिस्तु पश्ववदानविधिशेषाऽर्थवादान्तर्गता न स्वतंत्रब्रह्मचर्यादिसन्न्यासविधिविरुद्धमृणत्रयसद्भावं साधयितुं क्षमत इति सुरेश्वरवार्तिके प्रपञ्चितमिति सर्वतो दिग्विजयः।।७।।

इत्थमनेकश्रुतिस्मृतिपर्यालोचनेन सन्न्यासे, मोक्षस्य ज्ञानामात्राधीनत्वे च प्रसिद्धेपि, (१)सद्गुरुसंप्रदायाभावाज्जात्यन्धगजदर्शनन्यायेन कतिपय श्रौतस्मार्तार्थ-वादादिनिरीक्षणेनैव भ्रान्त्या मोक्षसाधनं निश्चितवतां भार्यापुत्रादिषु रागदार्ढ्यात्सन्न्यासम-सहमानानां कर्ममीमांसकैकदेशिभर्तृप्रपंचभास्करप्रभृतीनां मतं प्रमाणविरोधाद्धेयमिति प्रदर्शनायताननूद्यदूषयन्स्वमतं निगमयति केचिदित्यादिश्लोकत्रयेण-

मू०।। केचित्कर्मैव काम्योज्झितमुदितपदप्राप्त्युपायं प्रतीता-
स्तच्चोपास्तिं च मुक्तौ मिलितमथ परे साधनं सङ्गिरन्ते।
अन्येतु ज्ञानकर्मोभयमिति मतिभिःस्वाभिरुत्प्रेक्षमाणाः
ज्ञानादेवेति वाक्याद्वयमिह सहसा नाऽनुमन्यामहे तान्।।८।।

केचिदिति।। केचित् = भाट्टैकदेशिनः प्राभाकराश्च, काम्योज्झितं = फलाभि सन्धिरहितं काम्यकर्मवर्जनसहितं वा, कर्मैव = नित्यनैमित्तिक कर्मैव, उदितस्य = उक्तस्य निर्दुःखाऽऽत्मस्वरूपाऽवस्थितिलक्षणस्य, नित्यनिरति-शयसुखाभिव्यक्तिलक्षणस्य वा, पदस्य = मोक्षस्य, प्राप्तौ उपायं = साधनं, प्रतीताः = निश्चितवन्तः। अथपरे = भर्तृप्रपंचभास्करप्रभृतयः, तत् = कर्म च,

(१) जात्यन्धगजदर्शनन्यायेनेति।। यत्र तत्त्वानभिज्ञ मूर्खाणां परस्पर कलहस्तत्रायमवतरति। अन्धैर्निर्धारितोगजोंधगजस्तस्यदर्शन न्याय इति मध्यमपद लोपगर्भः षष्ठीतत्पुरुषसमासः।। यथा बहुभिरन्धैरन्धपुरुषोपदेशाज्जायमाना गजावयवेषु कर्णपृष्ठपुच्छजङ्घादिषु गजवुद्धिस्ततः परस्परविवादश्चेत्थं भूतो गज इतितद्वदित्यर्थः।। भुवनेश लौकिक न्यायसाहस्री पृष्ठ ३९।।

उपास्तिं = प्राणाद्युपासनं च, मिलितं = समप्राधान्येन दर्शपूर्णमासवत्परस्परसमुच्चितं मुक्तौ साधनं नैकैकमिति, संङ्गिरन्ते = प्रवदन्ति। अन्ये = तदेकदेशिनस्तु ज्ञानमभ्युपगच्छन्तोपि सन्न्यासाद्बिभ्यतो ज्ञानं कर्मचोभयं मिलितं मुक्तौ साधनमिति, सङ्गिरन्त इत्यनुषज्यते। नैतेषामपराधः, सत्संप्रदायाभावाद्भवत्येवेदृशी भ्रान्तिरिति दर्शयति- मतिभिरिति।। यतः स्वाभिरेव मतिभिर्वेदार्थमुत्प्रेक्षमाणाः, न रहस्याऽभिज्ञ गुरुप्रदर्शितमार्गेणेत्यर्थः।

तत्राद्यानामित्थमुत्प्रेक्षा-भगवता जैमिनिना, [१]"अथातो धर्मजिज्ञासा" इति धर्मं प्रमाणस्वरूपसाधनफलैर्जिज्ञास्यत्वेन प्रक्रम्य, [२]"चोदनालक्षणोऽर्थो धर्मः" इति प्राधान्याद्विध्युपलक्षितवेदप्रमाणको धर्म इति प्रतिपाद्य, [३]"तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्यतन्निमित्त्वात्" "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां" "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इत्यादिना कृत्स्नस्य वेदस्य प्रवृत्तिनिवृत्तिविषयधर्माधर्मयोरेव प्रामाण्यमिति दर्शितम्। तेन वेदान्तेषु ये कर्तृत्वादि-विशिष्टाऽऽत्मप्रतिपादकभागास्तेषां यागादिकरणकभावनाक्षिप्तकर्तृविशेष-परत्वात्फलविशेषभोक्तृविवेकपरत्वेनाधिकारनिर्वाहकत्वाद्वा, यागादिविषय-कनियोगान्वितात्मबोधकत्वाद्वा, भवतु प्रामाण्यं, येत्वसंगोदासीनात्मपरत्वेन भवदभिमतास्ते कार्याभिधानासामर्थ्यात्कथं प्रमाणम्। किंच, न सिद्धार्थे शब्दप्रामाण्यम् [४]आद्यव्युत्पत्तिविरोधात्। तथाहि-प्रयोजकवृद्धस्य, घटमानयेति शब्दं श्रुत्वा प्रयोज्य वृद्धस्तमानयति, तत्पश्यन्बालो नूनमेतत्कृतं घटानयनरूपं कार्यं तज्ज्ञानहेतुकं,

---

(१) अथातोधर्मजिज्ञासेति।। यतो वेदाध्ययनमर्थबोधपर्यवसायी "स्वाध्यायोऽध्येतव्यः" इति विधिनाबोधिताध्ययनमात्रान्नफलपर्यवसायी ज्ञानोत्पत्तिरतोऽथ वेदाध्ययनानन्तरं धर्मजिज्ञासा धर्मस्य तत्प्रतिपादक वेदस्य साङ्गस्य विचारः कर्तव्यः इति।। पू० मी० अ० १ पा० १ सू०१।।

(२) चोदनालक्षणोऽर्थो धर्मः।। चोदना विधिवाक्यं तदेव लक्षणं प्रमाणं यस्मिन् स तथा अर्थः स्वनान्तरीयदुःखापेक्षयाधिकदुःखाजनकः पदार्थ स एव धर्म इत्युच्यते। वेद प्रतिपाद्यत्वे सति स्वर्गादिवलवदिष्टार्थसाधनो धर्मः, इति धर्मलक्षणं निष्पन्नं भवति। अथ चार्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ चातिव्याप्तिस्तद्व्यवच्छेदाय वेदप्रतिपाद्येति वेद शब्देन चात्र कर्मकाण्डात्मको विधिरूपो ग्राह्यस्तथा च न ब्रह्मादावति व्याप्तिः। तावत्युक्ते श्येनादावति प्रसक्तिस्तन्निरासायार्थ इति श्येनादेस्तु फलतोऽनर्थ हेतुत्वान्नतत्रातिव्याप्तिरिति भावः।। पू अ०१ पा०१ सू०२।।

(३) तद्भूतानां क्रियार्थेनेति।। तत् तत्र विध्युद्देशक वाक्ये भूतार्थानां सिद्धार्थानां क्रियार्थेनपदेन समाम्नाय उच्चारणमर्थस्य पदार्थस्य विध्यर्थान्वितस्वार्थ बोधकत्त्वात्।

(४) आद्यव्युत्पत्तिविरोधात्।। प्रयोजक वृद्धस्य "घटमानय" इत्यादि शब्दोच्चारणानन्तरं प्रयोज्य वृद्धकर्तृकंघटाद्यानयनादिदर्शनात्तत्समीपस्थबालस्य या व्युत्पत्तिरवापोद्वापाभ्यां घटादिपदानां कार्यान्विते घटादौ शक्तिग्रहस्तद्विरोधान्न सिद्धार्थे शब्दस्य प्रामाण्यमित्यर्थः।।

तज्ज्ञाने च शब्दातिरिक्तं कारणं नोपलभ्यते इति शब्दस्य विशिष्टकार्ये बोध निर्वाहकं सम्बन्धमवधारयति। ततः कालान्तरे "घटं नय, गामानय" इत्यादि-वाक्येभ्यस्तत्तत्कार्याणि निरीक्ष्याऽऽवापोद्वापयोर्घटादीनां व्यभिचारेपि कार्यस्या-व्यभिचारात्कार्यान्वितघटादौ पदानां शक्तिमवधारयतीति कार्य एव शब्दप्रामाण्यमिति षष्ठश्लोकाऽवतरणिकोपदर्शितदिशा कर्मणामेव मोक्षहेतुत्वं, तत्रोपदर्शित श्रुतिस्मृतिविरोधस्तु सिद्धार्थे प्रामाण्यसिद्ध्यधीन इत्यकिंचित्करः, अतो वेदोषरास्तेवेदान्ता इति।

द्वितीयानामप्येवमुत्प्रेक्षा– कार्यपरैव श्रुतिः, तस्याः पूर्वोभागो यागादि शारीरक्रियापरः, उपनिषद्भागस्तूपासनात्मकमानसक्रियापरः, तथा च यथा तत्रतत्र प्राणाद्युपास्तिषु स्फुटं विधिप्रत्ययः श्रूयते, तथैवात्मविद्यास्वपि "आत्मेत्येवोपासीत" "आत्मानमेव लोकमुपासीत" "स म आत्मेति विद्यात्", "द्वे विद्ये वेदितव्ये", "विद्धित्वमेतं निहितं गुहायां" इति बहुशो विधिः श्रूयते। तस्माद्यत्रापि तत्त्वमस्यहंब्रह्मास्मीत्यादौ स न श्रूयते तत्रापि 'इत्युपासीत' इति पदे अध्याहृत्य प्रसङ्ख्यानापरपर्यायमुपासनं ज्ञानधारात्मकं विधीयते। तेषां चोपासनानां "तेनोभौ कुरुतो यश्च एतदेवं वेद यश्च नवेद" इति "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इत्यादिश्रुतिभिः कर्मसमुच्चयो दर्शितः। "नहास्य कर्म क्षीयते" इति श्रुत्या विद्यासहितकर्मफलक्षयप्रतिषेधात् समुच्चितस्य मोक्षहेतुत्वमपि संभवत्येवेति।।

अथ तृतीयानामप्येवमुत्प्रेक्षा — भवतु सिद्धार्थेपि शब्दः प्रमाणम्। तथाप्य-धीतसाङ्गवेदो विचारपूर्वकमधिगतवेदार्थः कर्मस्वधिक्रियत इति तावदविवादम्। तत्रौपनिषदात्मतत्त्वस्यापि वेदार्थत्वाविशेषात्तन्निर्णयवतः कर्माधिकारेऽर्थाज्ज्ञान-कर्मसमुच्चयः सिद्धः। किंच काण्वा माध्यंदिनाश्च "कुर्वन्नेवेह कर्माणि जिजीवेषच्छत७ समाः" इत्यादिना यावज्जीवानुष्ठेयत्वेन कर्म, "असुर्यानाम ते लोकाः इत्यादिना च अविद्वन्निदापूर्वकं ज्ञानं च प्रस्तुत्य "अन्धं तमः" इत्यादिना तयोः प्रत्येकं मोक्षहेतुतां निन्दित्वा "विद्यां चाविद्यां च" इत्यादिना समुच्चितयोः तयोरमृतत्वहेतुत्व-मामनन्ति। "उभाभ्यामेव पक्षाभ्यां यथाखे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः" इति स्मृतिरप्यत्रानुकूलेति। तदेतन्मतत्रयमतिमन्दमितिदर्शयति ज्ञानादेवेति।। "ज्ञानादेव तु कैवल्यम्" इत्यादिप्राग्दर्शितश्रुतिस्मृतिनिकरविरोधात्, वयं = परमहंसपरिव्राजकाः, इह = मोक्षसाधनतत्वपरीक्षायां, तान् = वा दिनस्तत्पक्षान्वा,

नानुमन्यामहे = नाभ्यनुजानीमः। सहसेत्यनेन साक्षाज्ज्ञानसमकक्षतयाकर्मणां मोक्षहेतुत्वानभ्युपगमेपि चित्तशुद्धिद्वारा ज्ञानाङ्गत्वेनत्वङ्गीकुर्म एवेति दर्शितम्।

अयंभावः- न तावत्कार्यान्विते शक्तिग्रह इति नियमः। "चैत्र! पुत्रस्ते जातः" "धनं ते नष्टम्" इत्यादिवाक्याच्चैत्रादेर्मुखप्रसादमालिन्यलिङ्गाभ्यां सुखदुःखहेतुज्ञानमनुमाय तत्र शब्दं कारणं गृह्णता बालेन सिद्धेपि पुत्रजन्मधननाशादौ शब्दस्य सम्बन्धग्रहसंभवात्। कार्यस्यतादृशस्थले व्यभिचारेणाऽऽवापोद्वापाभ्यां घटादिपदानामपिलाघवाच्छुद्धघटादौशक्तिपरिच्छेदः सम्भवत्येवेति गौरवपराहतो निष्प्रमाणकश्च कार्यान्वितशक्तिवादः। किंच "ब्राह्मणो न हन्तव्यः" इत्यादौ रागतः प्राप्ता ब्राह्मणवधप्रवृत्तिर्निषिध्यते, न तु किंचित्कार्यमुपदिश्यते। 'नीलमिदं न तु रक्तं' इत्यादिलौकिकवाक्येष्वप्यनुभवसिद्धसिद्धार्थबोधो न बिना बाधकमपलापयितुं शक्यः। तथा "चोदनालक्षणोऽर्थोधर्म" इत्यनेन धर्मोविधिप्रमाणक इति प्रतिपादिते तद्भूतानामित्यादिसूत्रैरपि 'विधिसन्निहितसिद्धार्थबोधकपदानां विध्येकवाक्यतया प्रामाण्यम्, सिद्धसाध्यसमभिव्याहारे सिद्धस्य साध्यार्थत्वौचित्यात्' इत्येतावदेव प्रतिपाद्यते, न कृत्स्नो वेदः कार्य एव प्रमाणमिति, आम्नायस्य क्रियार्थत्वादित्यादावप्येषैवगतिरिति नत्वदुत्प्रेक्षितं जैमिन्यभिमतम्।

किंच।। किमिदं कार्यं नाम? "घटमानय" इत्यादिवाक्यश्रवणे 'मामसौ घटानयनविषये नियुङ्क्ते, ममेदं कार्यम्' इति प्रत्ययोदयाल्लोके पुरुषाभिप्रायरूपं, वेदे तु पुरुषाभावादपूर्वमेव तत् कल्प्यत इति चेत् न।। प्रवृत्तिसामान्यहेतुत्वेन क्लृप्तेष्टसाधनत्वकृतिसाध्यत्वज्ञानादेव वैदिकेपि प्रवृत्तिसिद्धौ पदार्थान्तरकल्पनवैयर्थ्यात्। कल्पितेपि तस्मिन् विधिशतेनापि विरक्तप्रवृत्त्य दर्शनेन विश्वजिदादौ फलकल्पनानुरोधेन च स्वरूपतस्तज्ज्ञानस्य (१)वात्यावद्बलात्पुरुषप्रवर्तकत्वाऽयोगेन कृतिसाध्यत्वेन-तज्ज्ञानस्येष्टसाधनत्वाक्षेपस्य च तवापि सम्मतत्वात्। अत एव नश्वरस्य यागादेः कालान्तरीय स्वर्गादिसाधनत्वानुपपत्त्या द्वारत्वेनावश्यकल्प्यमपूर्वं विधि लिङ्गादिवाच्य-त्वेनैव कल्प्यत इत्यप्यपास्तम्। तथा कल्पनेपि प्रवृत्यसिद्धेः। फलदातुरीश्वरस्याज्ञा-परिपालनोल्लङ्घनप्रभवहर्षकोपात्मकमायावृत्तिभ्यामेव राजसेवादाविव कालान्तरीय फलोपपत्तेरपूर्वकल्पनाऽनावश्यकत्वाच्च। अनयैव दिशा शाब्दीभावनापि निरसनीया। इष्टसाधनत्वकृतिसाध्यत्वयोःपरस्पराक्षेपकत्वे लिङ्वाच्यत्वे च विनिगमनाविरहात्परस्पर

(१) वात्यावदित्यर्थः।। यथा वायुः स्ववेगेन तृणादीन्देशान्तरं प्रति बलात्प्रेरयति तद्वद्विधेः स्वरूपतस्तज्ज्ञानस्य वा प्रवर्तकत्वायोगादि इत्यर्थः।

व्यभिचार दर्शनेनाक्षेपकत्वासंभवाच्च, लिङ्वाच्यत्वे अनुभवानुरोधेन धात्वर्थान्वये च तावतैव यागादौ प्रवृत्तिसिद्धेर्नैकिंचिद्वाक्यं कार्यपरमिति "वेदोषरा वेदान्ताः" इत्यादिप्रलापो दौर्भाग्यमात्रविलसितम्।

एतेन महावाक्येषु "इत्युपासीत" इति पदाध्याहारेणोपास्तिपरत्ववादिनोपि निरस्ताः। किंच तथासति पञ्चाग्न्यादिविद्यावत्संसारिणि असंसारि रूपकल्पनेनाप्युपास्तिसंभवादलौकिक ब्रह्मसद्भावे तदुपास्तौ च तात्पर्यकल्पने वाक्यभेदप्रसङ्गाद्वेदान्ता न ब्रह्मणि मानंस्युः। अपि च, वस्तुतो जीवस्य संसारिणउपास्तिकृतासंसारिभावस्ताम्रादौ रसौषधप्रयुक्तस्वर्णादिभाववत्कालान्तरेअपेयात्।। किंच, तलवकारिणामुपनिषदि "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुमासत" इत्युपास्यस्य विषयस्यब्रह्मत्वंबहुशः प्रतिषिद्धमित्यध्याहारक्लेश मूलघात्येव। ज्ञानधारात्मकप्रसंख्यानं विधीयते इत्यप्ययुक्तम्। ज्ञानस्य विषयप्रमाणमात्रतंत्रत्वेन विध्यनपेक्षत्वात्। यद्धि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तु शक्यं तत्र विधेर्व्यापारः, ज्ञानं तु सतोर्विषयप्रमाणयोर्ननिषेधसहस्रेणापि वारयितुं शक्यम्, असतोश्च न विधिसहस्रेणापि जनयितुं शक्यमित्यशक्यविषये सागरतरणादाविव श्रूयमाणोपि विधिः शिलायां क्षुरतैक्ष्ण्यवत् कुण्ठीभवतीत्यविवक्षितः, साधनेषु यत्नविशेषकर्तव्यता पर्यवसितो वा। अतएव प्राणाद्युपास्तीनामेव कर्मसमुच्चयो, न ब्रह्मविद्यायाः।।

यच्च वाजसनेयिनः काण्वाश्च कर्मब्रह्मविद्ये प्रस्तुत्य समुच्चयं दर्शयन्तीत्युक्तम्, तदपि न। तथासति "ईशावास्यमिदं सर्वम्" इत्युपक्रान्तब्रह्म विद्याङ्गत्वेन "तेन त्यक्तेन भुञ्जीथाः" इति सन्न्यासविधिविरोधात्। त्यक्तेन इति हि भावेक्तो न तु कर्मणि, निरुपपदश्च त्यजिः सर्वत्यागलक्षणं सन्न्यासमेवाह तथा च सर्वत्यागेन सन्नयासेनात्मानं भुञ्जीथाः = पालयेथा इत्यर्थः। एवंहि रागप्रतिषेधपरो "मागृधः कस्यस्विद्धनम्" इतिवाक्यशेषोप्यनुकूलः। कर्मणि क्तप्रत्यय इति पक्षस्तु भाष्यकृद्भिरेव निरस्तः। तथाच भाष्यम् "एवमीश्वरात्मभावतया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो, न कर्मसु। नहि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसंबन्धिताया अभावादात्मानं पालयति, तस्मात्त्यागेनेत्ययमेवार्थः" इति।। अतएव "कुर्वन्नेवेह" इत्याद्यविद्वद्विषयम्, अविदुषामामरणंकर्मानुष्ठानंविना प्रत्यवायासंबन्धो न संभवतीत्यर्थकंसत्कर्मनिष्ठापेक्षया ब्रह्मनिष्ठाया आधिक्यपरं, ततोऽनात्मविन्निन्दापूर्वकं प्रस्तुता ब्रह्मविद्या, "तत्र को मोहः कः शोक

एकत्वमनुपश्यतः, स पर्यगाच्छुक्रम्'' इत्यन्तेन ''तरति शोकमात्मवित्।'' ''तस्मात्तत्सर्वमभवत्'' इति श्रुत्यन्तरसिद्धशोकतरणसार्वात्म्यफलेन समापितेति। ''विद्यां चाविद्यां च'' इति मन्त्रो न परब्रह्मविद्यायाः कर्मसमुच्चयपरः, किन्तु प्राणाद्यपर विद्यायाः। अतएव चात्र मृत्युं तीर्त्वेत्यादेः स्वाभाविकं कर्मज्ञानलक्षणं मृत्युं तीर्त्वा देवतात्मभावलक्षणममृतमश्नुत इत्यर्थः। तथा ''संभूतिंच विनाशंच'' इतिमन्त्रोपि व्याकृताऽव्याकृतोपासनसमुच्चयपरएव, अतस्तत्रानैश्वर्यलक्षणं मृत्युं तीर्त्वा प्रकृतिलयलक्षणममृतमश्नुत इत्यर्थः।।

यदितूभयत्रापि ब्रह्मविद्याया एव कर्मादिसमुच्चयो विवक्षितः स्यात्तदा ''पूषन्नेकर्षे'' इत्यादिना उत्तरत्र मार्गयाचनमप्यसंगतं स्यात्। ब्रह्मविदो ''न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते'' इति गतिप्रतिषेधात्।। नन्वेवं सत्यकाण्डे मन्त्राभ्यां कर्मोपासनसमुच्चयविधानस्य कः प्रसङ्ग इति चेत्। शृणु। ''ईशा वास्यम्'' इति मन्त्रे विरक्तस्य निवृत्तिलक्षणो मुख्यो वेदार्थः ससन्न्यासज्ञाननिष्ठारूप उक्तः। तदुत्तरमन्त्रे चाविरक्तस्य जिजीविषोः कर्मनिष्ठात्मकः प्रवृत्तिलक्षणोऽमुख्यः। तत्र प्रवृत्तिलक्षणस्य प्रपंचार्थमुत्तरत्र प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तं, निवृत्तिलक्षणस्य तु बृहदारण्यकमित्यन्यत्र प्रपंचितं, निष्ठाद्वयमिह संक्षेपेण दर्शयितुं पंचभिर्मन्त्रैर्ज्ञाननिष्ठा, अवशिष्टेन कर्मनिष्ठोक्तेति निर्मथितार्थ इति।। यदपि समधिगतवेदार्थः कर्मण्यधि-क्रियत इति तदपि न। असङ्गोदासीनसच्चिदानन्दरूपं निष्प्रपञ्चमात्मानं निश्चितवतः कार्माधिकारायोगात्। व्यवस्थापयिष्यते च काण्डयोर्भिन्नाधिकारिकता। अतः कर्मोपयुक्तमन्त्रब्राह्मणभागमात्रार्थज्ञानवतः कार्माधिकारः। अन्यथा अर्थज्ञानस्य दृष्टार्थत्वासंभवादिति। अनयैव दिशा उपासनज्ञानसमुच्चयवादिनोपि निरसनीयाः। उपासनस्यापि मानसक्रियात्वादिति।।८।।

इत्थं नित्यनैमित्तिककर्मणां प्रत्यवायपरिहारमात्रफलकत्वमभ्युपेत्य, साक्षाज्ज्ञान-समुच्चयेन च मोक्षहेतुत्वं निरस्तं। वस्तुतस्तु तयोः पितृलोकादि फलान्तरे विनियोगात्त-द्भोगाय शरीरारम्भस्यावश्यकत्वादपि तन्न संभवतीति सूचयन् साक्षात्परंपरया वा ज्ञानोपयोगं च दर्शयन् उक्तमर्थं निगमयति-

मू०।। पैत्रो लोकोऽधिगम्यः क्रतुभिरधिगतो विद्यया देवलोको
यद्वा चेतःकषायक्षपणमिह तयोः स्मार्तमेवाऽस्तु साध्यम्।
यज्ञेनेत्यादिवाक्याद्भवतु विविदिषा तत्फलं वेदनं वा
ज्ञानादेवाऽमृतत्त्वं न हि शशकवधूः सिंहपोतं प्रसूते।।९।।

पैत्र इति।। क्रतुभिः= नित्यनैमित्तकयज्ञादिकर्मभिः, पैत्रः = अर्यमादि पितृदेवता-संबन्धी, लोकः = भोगभूमिविशेषः, अधिगम्यः = प्राप्यः, अधिगतः = "कर्मणा पितृलोकः" इत्यादिश्रुत्या निश्चितः। तथा विद्यया = उपासनात्मक- मानसक्रियया, देवलोकः = देवानामिन्द्रादिहिरण्यगर्भान्तानां लोकः, अधिगम्य इत्यनुषज्यते। "विद्यया देवलोकः" इत्यादिश्रुत्या तत्क्रतुन्यायानुगृहीतया तत्तदुपासनात्तत्तद्देवताभावेन तत्तल्लोकावाप्तिरिति निर्ज्ञातमित्यर्थः। इत्थं विहितत्वमात्रबुद्ध्यानुष्ठितयोः कर्मोपासनयोः फलमुक्त्वा ईश्वरार्पण बुद्ध्याऽनुष्ठितयोः तयोः फलमाह - यद्वेति।। तयोः = विद्याकर्मणोः, स्मार्त = "कषायपक्तिः कर्माणि ज्ञानं तु परमागतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते।।" इति स्मृतिबोधितं, चेतः कषायक्षपणं-चेतसः = चित्तस्य; कषायाणाम् = बहुतरजन्मपरंपराहितोत्तरजन्मादिहेतुभूत-दृढतररागद्वेषादि संस्काराणां, क्षपणं = नाशनमेव, साध्यं = फलमस्तु। एवकारो मोक्षफलत्वमात्रव्यवच्छेदाय।।

अथवा। यज्ञेन इत्यादिवाक्यात् = "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इतिश्रुतिवाक्यात्, विविदिषा = सन्न्यासपूर्वकश्रवण-प्रवृत्तिफलोपहितोत्कटज्ञानेच्छा, वेदनं = मोक्षजनकतत्त्वज्ञानं वा, तत्फ-लम् = तेषां नित्यनैमित्तकयज्ञादिकर्मणां "सर्वेवेदा यत्पदमामनन्ति" इतिश्रुत्यनुसारात्सं-* योगपृथक्त्वन्यायेनसर्वकर्मणां वा, फलमस्त्वित्यनुषज्यते।। "विविदिषंति" इत्यत्रहि "विद्लृज्ञाने" इत्यस्माद्धातोरिच्छायां सन् प्रत्ययंः, तत्र (प०टि०) यदि यज्ञेनेत्यादिपदैः करणत्वेनोपस्थापितानां कर्मणां प्रधानीभूतसन् प्रत्ययार्थेच्छायामन्वयस्तदा विविदिषा फलमिति पक्षः। यदितु प्रकृत्यर्थे ज्ञानेऽन्वयस्तदा ज्ञानमेव फलमिति पक्षः। अश्वेन ग्रामं जिगमिषतीत्यादिवाक्ये प्रकृत्यर्थगमनेऽश्वस्य करणत्वेनान्वयबोध-दर्शनादिति भावः। न केवलं मानाभावः, अपि तु कर्मणामसामर्थ्यादपि न मोक्षहेतुत्वमित्यर्थान्तरन्यासेन दर्शयन्नुपसंहरति- ज्ञानादेवेति।। अमृतत्वं = अमर-णधर्मात्मस्वरूपत्वलक्षणं, अमृतवदतिमधुरतराभिव्यक्तपरमानन्दात्मस्वरूपलक्षणं वा कैवल्यं, ज्ञानादेव, न साधनान्तरात्। कर्मणां च कारकत्वादागन्तुक-नश्वरफलहेतुत्वमेव न नित्यसिद्धपरमानन्दात्मव्यञ्जकत्वं, बिना ज्ञानं कर्मसहस्रेणापि विस्मृतकण्ठचामीकरलाभादर्शनात्, बिनापि कर्म ज्ञानमात्रेण तद्दर्शनाच्चेति भावः।

* एकस्योभयार्थत्वे संयोगपृथक्त्वन्यायः। यथा "खादिरो यूपो भवति" "खादिरं वीर्यकामस्य" इत्यत्र खादिरस्य तन्यायेनोभयार्थत्वं तथा कर्मणां विविदिषासंपादकत्वं, तत्प्रकरणविहिततत्फलनिष्पादकत्वं च।।

शशकः = दीर्घकर्णक्षुद्रमृगः, तस्य वधूः = शशी, सिंहपोतं = मृगेन्द्रार्भकं न प्रसूते हि।। यथा शुष्कपर्णादिचलनमात्रेणापि पलायनपरा क्षुद्रतरा शशकवधूर्मत्तेभकुम्भदलनक्षमं बाललीलसिंहडिम्भं जनयितुमसमर्था, तथा क्षुद्रफलहेतुत्वात्क्षुद्रतरं कीर्तनाद्यल्पापराधेनापि विहन्यमानं कर्म नाऽनादिसिद्धबन्धस्य मोक्षे समर्थ। किन्तु ''तस्य ह न देवाश्च ना भूत्या ईशते'' इति श्रुतेः स्वोत्पत्त्यनन्तरं ब्रह्मादिभिरपि प्रतिबन्धुमशक्यं ज्ञानमेव समर्थमित्यर्थः।। ९।।

ज्ञानकर्मणोर्भिन्नाधिकारिकत्वं दर्शयितुमुभयत्रापि परस्परविरुद्धान्यधिकारिविशेषणानि दर्शयन् समुच्चयवादिनमुपहसति-

मू०।। अर्थी दक्षो द्विजोऽहं बुध इति मतिमान् कर्मसूक्तोऽधिकारी
शान्तो दान्तः परिव्राडुपरमपरमो ब्रह्मविद्याऽधिकारी।
इत्थं भेदे विवक्षन् समुदितमुभयं मुक्तिहेतुं, सुशीतं
नीरं वैश्वानरं चोभयमहह तृषोच्छेद्कामः पिबेत्सः।।१०।।

अर्थी इति।। अर्थी = स्वस्ववर्णोचितवृत्त्युपार्जितक्रतुनिर्वाहक्षमद्रव्यसम्पन्नस्तत्तत्कर्मफलाभिलाषुकश्च, दक्षः = स्वशरीरेण ऋत्विगाद्यावर्जनेन च कर्मनिर्वर्तनसमर्थः, द्विजः = त्रैवर्णिकः, बुधः = नियमेन वेदानधीत्याऽऽचार्याज्जैमिनीयतंत्रदर्शितन्यायैर्निर्णीतकर्मकाण्डार्थः, इति शब्द आद्यर्थकः, तेन विशिष्टाश्रमवयोवस्थादेशकाल निमित्तादिसम्पन्नताप्युपलक्षणीया। इति मतिमान् = उक्तविशेषणकलापविशिष्टोऽ(१)हमित्यभिमन्यमानः।। शान्तः = अरागद्वेषः, दान्तः = निगृहीतसमनस्केन्द्रियकलापः, परित्यज्य सर्वं व्रजतीति परिव्राट् विधिवदधिगतपारमहंस्यः, उपरमः =श्रवणदेहधारणाऽनुकूलव्यापारेतरव्यापारनिवृत्तिः, स एव परमः = उत्कृष्टो अनुष्ठेयो यस्य स तथोक्तः।। तथाच स्मृतिः-

''नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च।
शीलं तपो दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः''।।इति।।

ईदृशः पुरुषधौरेयः, ब्रह्मविद्याधिकारी।। इत्थम् = उक्तप्रकारेण अधिकारिभेदे ज्ञानकर्मोभयं; समुदितं = परस्परसमुच्चितं, मुक्तिहेतुं = मोक्षसाधनं, विवक्षन् = वक्तु- मिच्छन्, सः पूर्ववादी, तृषोच्छेदकामः = पिपासोपरमलिप्सुः सन् सुशीतम् = अत्यन्तशीतलं, नीरं = जलं, वैश्वानरं = ज्वलनं च, उभयं

(१) कर्मसु नित्यनैमित्तिक काम्यलक्षणेषु अधिकारी साङ्गानुष्ठानेऽसति बाधके फलस्वामी उक्तः पूर्वतन्त्रे षष्ठाध्याये उक्तः प्रतिपादितः।। अहमित्यभिमन्यमानः। इत्यस्यपाठस्याग्रेऽयं पाठः।।

समुदितं = परस्परमिलितं, पिबेत्।। संभावनायां लिङ्।। विरोधानभिज्ञस्य मूढस्य तदपि सम्भावितमित्यर्थः।'अहह' इति खेदे।। यथा शिशिरजले वह्निमेलनमशक्यं तदा बह्नाशप्रसङ्गात्, तृषोपशमे च वह्नेरनुपयोगः, प्रत्युत दाहकत्वात्, तथा कर्मणामपि ज्ञानसहभावो दुष्करः, ज्ञानस्य कर्मोपमर्दकत्वात्, ज्ञानफले च कर्मवैयर्थ्यं, प्रत्युत बन्धहेतुत्वादिति भावः।।१०।।

ननुभवतु ज्ञानमात्रनिबन्धनो मोक्षः। ज्ञानेऽपि हि व्यवस्थां नपश्यामः। तथाहिप्रकृतिपुरुषविवेकज्ञानं मोक्षहेतुरिति साङ्ख्यपातञ्जलाः। षोडशानां सप्तानां वा पदार्थानां साधर्म्य वैधर्म्यादिज्ञानप्रयुक्तं बुद्ध्यादि चतुर्दशगुणविशिष्टात्मविषयं साक्षात्कारज्ञानं तथेति गौतमकणादाः। पशुपाशपत्यादिविवेकज्ञानं तथेति पाशुपताः। कार्यकारणांऽशांऽशिप्रभृतीनां भेदाभेदाभ्युपगमादविरुद्धसप्रपंचनिष्प्रपंचोभयरूप-प्रत्यग्भिन्नाभिन्नब्रह्म साक्षात्काररूपं तथेपि भर्तृप्रपंच प्रभृतयः। असंगाद्वितीयकूटस्थ-सच्चिदानन्दरूपस्वात्मब्रह्मसाक्षात्काररूपं तथेत्यौपनिषदाः। तथान्येपि वादिनोऽन्य-थान्यथा ज्ञानानि परस्परविरुद्धानि तत्साधनानि चाऽऽमनन्ति। तेषु कतमद्धेयं कतमदुपादातव्यमिति न निर्णयः। नचाभ्यर्हितत्वादौपनिषद-दर्शनावलम्बनमेवोचितमिति युक्तम्। तत्रापि शब्दादपरोक्षज्ञानोदयाभ्युपगमाच्छाब्दसंशयायोगाच्च व्युत्पन्नस्य महावाक्यश्रवणे ब्रह्मसाक्षात्कारः सम्पन्न इति न पुनः संसारानुवृत्तिः स्यात् इष्टापत्तावनुभवविरोधो विचारादिवैफल्यं चेत्यनाश्वास एवेत्याशङ्कांपरिहरन्विचार-मवतारयति-

मू०।। ज्ञानं चाप्यद्वितीयस्वरससुखघनानन्तंचिन्मात्ररूप-
ब्रह्मात्मैकत्वबोधः स भवति सुमतेस्तत्त्वमस्यादिवाक्यात्।
देहाद्यध्यासदार्ढ्याच्छ्रुतमपि सहसा नैव संभावनीयं
ब्रह्मत्वं स्वस्य तस्मान्नयगुरुवचनैः साधु मीमांसनीयम्।।११।।

ज्ञानंचेति।। न विद्यते सजातीयं विजातीयं स्वान्तर्गतं वा द्वितीयं यस्मात्तदद्वितीयं, अतएव स्वयमेव रसः सारोऽनुभवनिष्ठैर्निरंतरमास्वादनीयो वा यस्य तत्स्वरसं। राहोः शिर इति वद्भेदोपचाराद्बहुब्रीहिः, कर्मधारयो वा। सुखघनं = निरन्तर निरतिशयानन्दात्मकं; अनंतं = दैशिककालिक वास्तवपरिच्छेदशून्यं; यच्चि-न्मात्रं = स्वप्रकाशज्ञानैकस्वभावं तदेव ब्रह्म च आत्मा च शोधिततत्त्वं; पदार्थो, तयोरेकत्वबोधः = भेदभ्रममात्रविरोध्यखण्डा कारकं ज्ञानं, तदेव

सकलश्रुतितात्पर्यविषयार्थावगाहित्वात् व्यावहारिकवस्तुगोचरप्रमाणाविषय विषयत्वेनमानान्तराबाध्यत्वाच्चज्ञानं = सर्वानर्थनिबर्हणक्षमं तत्त्वज्ञानं, न तु सत्व-पुरुषान्यताख्यात्यादिरूपं स, तादृशो बोधः, सुमतेः = अतिपरिशुद्धचित्तस्या-ऽनेकजन्मकोटिसंचितसुकृतपरिपाकाज्जन्मान्तरानुष्ठितश्रवणादिजन्यसंस्कार-दार्ढ्याच्चातिदुरूहमप्यात्मतत्त्वं सकृदुपदिष्टमेव करतलामलकवदपरोक्षयितुं समर्थस्य मुख्याधिकारिण इत्यर्थः। तत्त्वमस्यादिवाक्यात् = सद्य एवाखण्डे वस्तुनि गृहीततात्पर्यकाद्भवति।। वाक्यादपरोक्षज्ञानं मुख्याधिकारिणएवोत्पद्यत इत्यर्थः।। अयंभावः अनुभवविरोधो विचारवैयर्थ्यं च मुख्याधिकारिण आपाद्यते? उत मन्दमध्यमाधिकारिणोः? नाद्यः, न हि [१]दुरदृष्टशतपराहतस्य तवेव श्रुतब्रह्मतत्त्वस्य तस्य नाहं ब्रह्मेत्यनुभवो यथापूर्वं संसारानुवृत्तिर्विचारापेक्षा वास्ति, प्रपंचितश्चायमर्थो भगवद्भिर्भाष्यकारैः "नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्" इत्यादिना। द्वितीयेत्वाह- देहादीति।। मन्दमध्यमाधिकारिणोस्तु बहुतरभव-परंपराभ्यस्तद्वैतवासनाप्रचयदृढीकृताऽन्तःकरणेदेहेन्द्रियपुत्रमित्रादिष्वहं ममेति तादात्म्यसंसर्गाध्यासलक्षणविपरीतभावनादार्ढ्यात् श्रुतमपि = शब्दादपरोक्षीकृतमपि स्वस्य ब्रह्मत्वं कदाप्यविज्ञातमणिस्वरूपस्य पुरुषस्य काचखण्डसहस्राकुलप्रदेशे मन्दविद्युत्सम्पातनिरीक्षितमणिस्वरूपमिव नैव सम्भावनीयम्।। शक्यार्थे अनीयर्। संभावयितुमेव न शक्यं, किंपुनरवधारयितुमित्यर्थः।

तत्रेत्थमसंभावना भवति-'अशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमपरिच्छिन्नस्वप्रकाशं नित्यमुक्तसच्चिदानन्दैकरसं ब्रह्मैव त्वम्' इत्युपदिशन्ति वेदान्ताः, अहन्तु क्षुत्पिपासाद्याकुलं विशिष्टमातापितृजन्यत्वाद्ब्राह्मणत्वादिविशिष्टं परिच्छिन्न-मिन्द्रियाधीनजन्यज्ञानाश्रयं सुखदुःखरागद्वेषादिसंकुलं कर्मपरवशं बद्धमात्मानं निरन्तरमेव प्रत्यक्षमनुभवामि। न चायं भ्रम इति शक्यं वक्तुं। सर्वजनसाधारणत्वात्, अनादौ संसारे कदाचिदपि बाधादर्शनाच्च। किंच चक्षुरादीनि बाह्यद्वैतविषयाण्येव

(१) दुरदृष्टशतपराहतस्य।। दुष्टं च तदेवादृष्टं च तद्दुरदृष्टं तस्यशतं तस्य ज्ञानप्रतिबन्धक पाप्मनोजन्मान्तरानुष्ठितस्य शतसंख्यातस्य या पराहतिरिह जन्मनि जन्मान्तरे वाऽनुष्ठित सत्कर्मवशान्नाशः सोस्ति यस्य स तथा तस्योत्तमाधिकारिणः शुद्ध चित्तस्य गुरुमुखाच्छ्रुतं ब्रह्म तत्त्वं येन तस्येत्यर्थः। तवेवेति व्यतिरेक्युदाहरणं यथा तव वेदान्त श्रवणेपि ज्ञानं नोपजायते, तथा तस्योत्तमाधिकारिणोऽहं, ब्रह्माहमस्मीति महावाक्याज्ज्ञानं नोपजायते इति न हि सम्भवति किन्तु जायत एव हि सम्यगनुभवो यथा पूर्वं च तस्य संसारानुवृत्तिरपि न हि सम्भवति। सकृच्छ्रवणमात्रेणैव ज्ञानोत्पत्तौ पुनर्विचारापेक्षापि नास्तीति भावः।।

मानान्यवधारितानि, तन्मूलान्यनुमानादीन्यपि तत्समानयोगक्षेमाण्येव, कर्मोपासन-काण्डश्रुतिरपि विशिष्टाधिकारिदेशकालसाधनफलकबहुविधकर्मपरा द्वैतविषयिण्ये-वोपलभ्यते। न चैषां बहुतरप्रमाणानामुपनिषन्मात्रावलंबनेनाऽप्रामाण्यं शक्यं कल्पयितुं। किंच गुरुदैवतशास्त्रादिरूपद्वैतापलापे श्रवणादिसिद्धिरपि न स्यादित्युपजीव्यविरोधः, प्रत्यवायप्रसङ्गश्च।। यदि च प्रत्यक्षादिविरुद्धार्थेष्वपि वेदप्रामाण्यं, तदा "आदित्यो यूपः", "यजमानः प्रस्तरः" इत्यादिषु गौणीवृत्तिर्नकल्प्येत, भेदप्रत्यक्षस्याऽप्रामाण्यं च कल्प्येत। नचैवं न्याय्यं, तस्माद्वेदान्ता अन्यपराः काममप्रमाणानि वा सन्तु नाऽकस्माज्जगदपलापोयुक्त इति।।

इत्थमेवेदमतिदुरूहमात्मतत्त्वं शतश उपदिष्टमप्यसंभावयन्तो बहवो दर्शनान्तराण्येव प्रतिपेदिरे। अपरेतु स्वयंमूढाः परानपि मोहयन्तो वेदान्तानेव कदर्थयन्ते।। अपरेतु संशयिता वाताहतनौरिव डोलायन्ते। यथाहुर्वृद्धाः – "अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिनाम्। योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः।।" इति।। एवमेव मुमुक्षवो मन्दमध्यमाधिकारिण आत्मतत्त्वज्ञानप्रत्याशया त्यक्तसर्वकर्माणः असंभावनादिदोषवशाच्च ज्ञान निष्ठामप्यलभमाना अन्तराले मा विनश्येयुरिति परमकृपालुना भगवता बादरायणेन, भगवत्पादादिभिश्च विचारात्मकं शास्त्रं प्रणीतम्। अतस्तद्दर्शितन्यायैः सद्गुरूपूर्वकविचारादेव तत्त्वनिर्णयो नान्यथेति निगमयति-तस्मादिति।। तस्मात् = आत्मतत्त्वस्य जगद्विलक्षणस्य सहसा संभावयितुमशक्यत्वात्, नयैः = बादरायणभगवत्पादादिदर्शितन्यायैः तत्संप्रदायाभिज्ञसद्गुरुवचनैश्च, मुमुक्षुणा स्वस्य ब्रह्मत्वं साधु = निपुणतरं निर्णयावधि मीमांसनीयम् विचारणीयम्। पक्षप्रतिपक्षपरिग्रहेणेत्यर्थः। मानेर्जिज्ञासार्थात् "मान्वध" इत्यादिना स्वार्थसनन्ताद्विधावनीयर्। तत्र (पृ०टि०) यद्यस्मिन्नेव जन्मनि प्रतिबन्धापगमस्तर्ह्यैहिकमेव विचारफलंज्ञानं, यदि तु बलवत्प्रतिबन्धकमिह जन्मनि ना पैति तदा आमुष्मिकमपि भवति। "तद्धास्य विजिज्ञौ" इति विजिज्ञा = वित्तीतिः, नवकृत्वोऽभ्यस्तान्म-हावाक्योपदेशाच्छ्वेतकेतोरिहैव, ज्ञानोदयश्रवणात् "गर्भएवैतच्छयानो वामदेव एवमुवाच" इति जन्मान्तरे कृतश्रवणस्य वामदेवस्य गर्भे ज्ञानोदयश्रवणाच्च। तथाच सूत्रम् - "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्।" इति।। ११।।

इत्थं समर्थितं विचारमवतितारयिषुस्तदङ्गभूतां विप्रतिपत्तिं वादिमतोपन्यासमुखेन दिदर्शयिषुरादौ त्वंपदार्थे तां दर्शयति देहमित्यादिश्लोकद्वयेन–

मू०।। देहं केऽपि वदन्ति खानि तु परे प्राणान्मनश्चापरे
बुद्धिं च क्षणिकां स्थिरामत परे केचिच्चितं निस्सुखाम्।
आत्मानं जडचित्स्वभावमपरे चिद्वज्जडं चेतरे
सत्यज्ञानसुखाद्वितीयमपरे तत्राऽस्य को निश्चयः।।१२।।

देहमिति।। केऽपि = पामराः चार्वाकविशेषाश्च 'गौरोऽहं स्थूलोहं जानामि' इति स्थौल्यगौरत्वाद्याधारे देह एव ज्ञानसुखाऽहंतादिपरामर्शात् प्रत्यक्षविरुद्धेऽर्थे प्रमाणान्तराप्रसरादनभ्युपगमाच्च देहं = उपचयापचयधर्मिणं स्थूलदेहमेवाऽऽत्मेति वदन्ति। परे = तदन्ये चार्वाकाः, 'काणोऽहं बधिरोऽहं, अद्राक्षमश्रौषमिति' काणत्वबधिरत्वादिधर्मिष्विन्द्रियेषु तथावमर्शात् खानि = इन्द्रियाण्येवात्मेति वदन्तीति सर्वत्रानुषज्यते। तुशब्दः पूर्ववाद्यपेक्षयैषां किंचिदन्तर्मुखत्वात्किंचिद्विशेषप्रदर्शनार्थः। अपरे = तेभ्योऽप्यन्ये, सत्यपि देहे मृतशरीरे तादृशावमर्शादर्शनान्निद्रादिसमये लीनेष्वपीन्द्रियेषु प्राणक्रियोपलब्ध्या जीवतीति व्यवहारदर्शनान्मूर्च्छिते प्राणक्रियासंशये जीवनसंशयाच्च प्राणानेवात्मानं वदन्ति।। ततोऽप्यपरे = सत्स्वपि देहेन्द्रिय प्राणेषु मनः प्रणिधानाप्रणिधानयोर्ज्ञानसुखादेरुदयानुदयव्यवस्थादर्शनात् "अन्यत्र मनाअभूवं नादर्शं, अन्यत्र मना अभूवं नाश्रौषम्" इति श्रुत्यापि तदनुवादान्मन एवात्मेति वदन्ति। परे = वैनाशिकास्तु, पराभिमतमनसः सुषुप्तौ विलयेपि जीवनदर्शना-द्वाह्यत्वाच्चेत्यत्वाच्चात्मत्वायोगाच्चित्तचेत्योभयाकारपरिणामिनीं तदुभयविषयां क्षणिकां बुद्धिं विज्ञानमेव आलयविज्ञानधाराभिधामात्मेति वदन्ति। अथ अनन्तरं, परे भास्करादयः आत्मनः क्षणिकत्वे प्रत्यभिज्ञानविरोधाद्बन्धमोक्षोपपादनासंभवा-च्छास्त्रवैफल्यापत्तेर्धारायादुर्निरूपत्वाच्च, स्थिरां = नित्यां, बुद्धिं = विज्ञानमयकोशं कर्तृत्वादि धर्मविशिष्टं मनसोप्यान्तरमात्मेति वदन्ति। तेभ्योऽप्यन्ये केचित् = साङ्ख्य-पातंजलादयः, [1]सुखदुःखादीनामात्मधर्मत्वे आत्मनः सविकारत्वापत्तेर-निर्मोक्षानित्यत्वयोः प्रसङ्गाद्गुणपरिणामरूपत्वमेव, आत्मात्वसंगोदासीनचिन्मात्ररूपः, तस्य प्रकृतिगुणाविवेकाद्भोक्तृत्वलक्षणो बन्धः, विवेकज्ञानाच्च मोक्ष इति कल्पयन्तो निस्सुखाम् = अनानन्दरूपामहंकारादिप्रकाशानुमेयां चितं = ज्ञानमात्मेति वदन्ति। तेभ्योऽप्यपरे भाट्टाः, कर्तृत्वादीनां प्राकृतत्वेऽन्यकृतेनान्यस्य भोगे व्यवस्थानुपपत्तेः, कृतहान्यादिप्रसङ्गाच्चात्मन एव कश्चिज्जडांशः कर्तृत्वसुखदुः खाद्याकारपरिणामी, अपरोबोधांश इति कल्पयन्तो जडचित्स्वरूपमात्मानं वदन्ति। इतरे = प्राभाक-रनैयायिकादयः, आत्मनः सांशत्वे घटादिवदनित्यतां प्रसज्जयन्तो ज्ञानस्य गुणत्वं

(१) सुखदुःखादीनां गुणपरिणाम रूपत्वमाहुरिति योजना।

प्रकल्प्य चिद्वज्जडम् = चिद्वंतं = समवायेन ज्ञानविशिष्टं स्वतस्त्वाकाशादिवत् जडमात्मानं वदन्ति। इत्येते जगत्सत्यत्वनानात्ववादिनां पक्षाः। अपरे = परमहंसपरिव्राजकाः, सत्यं = कालत्रयाबाध्यम्, ज्ञानं = स्वपर-स्फूर्तावन्यनिरपेक्षं यत्सुखं तदेव वस्तुतो द्वितीयस्य मिथ्यात्वादद्वितीयमात्मेति वदन्ति। तत्र = तेषु दर्शितपक्षेषु, अस्य = विविदिषोः को निश्चयः 'क' इत्याक्षेपे, विनाविशेषदर्शनं निश्चयो न संभवतीत्यर्थः।। १२।।

इत्थं त्वंपदार्थे प्रत्यगात्मनि वादिनां विप्रतिपत्तिं प्रदर्श्य परिमाणादितद्धर्मेष्वपि तां दर्शयति-

मू०।। आहुः केचिदणुं शरीरसदृशं केचिद्विभुं तं परे
ते तं मानसगोचरं तदपरे नित्याऽनुमेयं जगुः।
अन्ये चिद्विषयं परेतु परमस्वज्योतिराभ्यन्तरं
सत्येवं श्रुतियुक्तिभिर्विविदिषोर्युक्तो विचारो मुहुः।। १३।।

आहुरिति।। केचित् = पाशुपतपाञ्चरात्राद्यागमानुसारिणः, आत्मनो विभुत्वे देहभोगादिव्यवस्थानुपपत्तिं, मध्यमपरिमाणत्वे सावयवत्वानित्यत्वाद्यापत्तिं च मन्यमानास्तमात्मानमणु = परमाणुपरिमाणं आहुः। ततोऽपि केचिदार्हतादयः अणुत्वे सर्वशरीरव्यापिशैत्याद्यनुपलब्धि प्रसञ्जयन्तः शरीरसदृशं = दीपप्रभावत्संकोचविकासाभ्यां तत्तद्देहसमानपरिमाणं तमाहुः। परे = नैयायिकादयः, तथात्वेऽनित्यतामापादयन्तो वियदादिवद्विभुं = सर्वमूर्तद्रव्यसंयोगक्षमं परममहापरिमाणं तमाहुरिति परिमाणेविप्रतिपत्ति ग्राहकविषयेऽपि तामाह- ते इति।। ते = [१]पूर्वोक्तास्त्रयो वादिनः, तं = आत्मानं, मानसस्य = मनः करणकप्रत्यक्षस्य, गोचरं = विषयं जगुरित्यपकृष्यते। धातुभेदो विप्रतिपत्तिविषयभेदद्योतनार्थः। तेभ्योऽपरे = सांख्यादयो नित्यानुमेयं कदाप्यापरोक्ष्यरहितं सत्वगुणप्रधानबुद्धितद्वृत्तिप्रतिफलनाधीनविषयप्रथानुमेयं जगुः। अन्ये = वैनाशिकाः चिद्विषयम् = चिच्चासौ विषयश्च चिद्विषयः तं स्वलक्षणक्षणिकविज्ञानप्रकाश्यं जगुः। अथवा अन्ये = प्राभाकराः, चिद्विषयम् = चितः चिन्मात्रस्य विषयं सर्वज्ञानप्रकाश्यमित्यर्थः। सर्वस्मिन्नपि ज्ञाने 'आत्मा, ज्ञानं, विषय' इति त्रिपुटी भासते। विषयः कर्मतया, आत्मा आश्रयतया ज्ञानभास्यौ। ज्ञानं तु स्वप्रकाशमेव। सर्वमपि ज्ञानमाश्रयांशे स्वांशेचाऽपरोक्षमेव। विषयांशेत्वनुमित्यादि

(१) पूर्वोक्तास्त्रयोपीति।। अणुपरिमाणवादिनः पाशुपतपाञ्चरात्राः मध्यम-परिमाणवादिन आर्हताः विभुपरिमाणवादिनो नैयायिकाश्चेति त्रयोपीत्यर्थः।।

नानारूपमिति जगुः। परेतु = औपनिषदाः, परमं = भासकत्वेन प्रसिद्धसूर्यचन्द्राग्नितारेभ्योप्युत्कृष्टं स्वयमेव द्योतते नान्यापेक्षं स्फुरणैकस्वभावत्वात्, अन्नमयादिकोशपंचकविवेके आनन्दमयकोशादप्याभ्यन्तरं परमप्रेमास्पदं स्फुरणैकरस्येन परिशिष्यमाणं वस्त्वात्मेति जगुः। एवं = दर्शितप्रकारेण स्वरूपपरिमाण ग्राहक विषयविप्रतिपत्तौ श्रुतितात्पर्यसंशये च सति, विविदिषोः = पूर्वोक्ताधिकारिणः, श्रुतियुक्तिभिः = श्रुतिगतोपक्रमादितात्पर्यग्राहकलिङ्गैर्गतिसामान्यज्ञानायपर्यालोचितनानाशाखोपनिषद्भिः साक्षात्कृतब्रह्मतत्त्वकुशलतराचार्यपरंपरोपदर्शितस्वानुभवानुकूलयुक्तिभिश्चेतिवा, मुहुः = आब्रह्मसाक्षात्कारोदयं पुनः पुनः, विचारः = श्रुतितात्पर्यपर्यालोचनलक्षणो वस्तुतत्त्वपरीक्षालक्षणश्च युक्त एव। श्रवणादेरवघातादिवत् दृष्टार्थत्वादाफलोदयमावृत्तेर्न्यायसिद्धत्वान्नवकृत्वस्तत्त्वमसीत्युपदेशाभ्यासदर्शनाच्चेति भावः।। १३।।

इत्थं त्वंपदार्थे विप्रतिपत्तिप्रदर्शनपुरस्सरं विचारमवतार्य तत्पदार्थेऽपि तथा तमवतारयति–

मू०।। एवं विश्वस्य हेतुं प्रकृतिमभिदधुः केऽपि केचित्पराणू–
नीशेनाधिष्ठितांस्तान् कतिचन कतिचिन्नश्वरं ज्ञानमेव।
अन्ये शून्यं *विरिंचिं कतिचन समयं केऽपि केचिद्यदृच्छां–
कर्माऽन्ये ब्रह्म मायाशबलितमपरे सोऽपि तस्माद्विमृश्यः।।१४।।

एवमिति।। एवं = पूर्वोक्तप्रत्यगात्मानमिव, विश्वस्य = कृत्स्नस्य जगतः, हेतुं = उपादानकारणं, केऽपि = कापिलाः, प्रकृतिं = सत्वरजस्तमोगुणानां साम्यावस्थालक्षणां महदादिमहाभूतान्तत्रयोविंशतितत्त्वात्मकविकारपरिणामिनीं प्रधानाख्यां मूलप्रकृतिं, अभिदधुः = उक्तवन्तः। ततोऽपिकेचित् = वैनाशिकविशेषा आर्हताश्च, पराणून् = पृथिव्यादिभूतचतुष्टयपरमाणून्, अविद्यादिनिमित्तचक्रपरिवर्तनात् शरीराद्याकारेण बाह्यविषयाकारेण च संहन्यमानान् तथा अभिदधुः। कतिचन = पातञ्जलाः कणादगौतमीयाश्च, सा च प्रकृतिः, ते च परमाणवस्तान्, ''पुमांस्त्रिया'' इत्येक[१]शेषः। ईशेन = सर्वज्ञेश्वरेण, अधिष्ठितान् = कार्योन्मुखतया प्रवर्तितान् यथाक्रमं हेतूनभिदधुः। पातञ्जला ईश्वराधिष्ठितां प्रकृतिं, कणादगौतमीयास्तु तथाविधान् परमाणूनित्यर्थः। कतिचित् = विज्ञानवादिनः, नश्वरं = क्षणिकं, ज्ञानं = विज्ञानमेवान्तरं असद्बाह्याकारेण परिणममानं तथेत्यभिदधुः। एवकारस्तन्मते

*स्वभावमित्यपि पाठः।
(१) स्त्रियासहोक्त्या पुमान् शिष्यते।

विज्ञानमेव स्वलक्षणंवस्तु घटत्वाद्याकारास्त्वपोहरूपा अलीका एवेति द्योतनार्थः। अन्ये = माध्यमिकाः क्षणिकविज्ञानमपि पूर्वापरकालास्पर्शि वर्तमानक्षणेप्यसदेवेति मन्यमानाः शून्यमलीकमेव[१]सांवृतजगदारोपाधिकरणं तथाभिदधुः कतिचन = हैरण्य-गर्भाः, विरिंचिं = हिरण्यगर्भं तथाऽभिदधुः। पाठान्तरे कतिचन = लोकायतिकाः, स्व-भावं = बीजादिस्वरूपमेवाङ्कुरादिजननसमर्थमन्वयव्यतिरेकाभ्यां दृष्टमिति बीजादेर-ङ्कुराद्युत्पादकत्वमग्न्यौष्ण्यवत्स्वभाव एव। क्षित्यादीनांतु चतुर्णां परिणामिस्वभावानां यथादर्शनं स्थैर्यमेवेति न कर्त्रपेक्षेत्यभिदधुः। केऽपि = कालवादिनो मौहूर्तिकाः, तत्तदार्तवफलपुष्पादीनां कालान्तरे जन्मादर्शनात्समयं = कालमेव, तथाभिदधुः। ततोऽपि केचित् = अनीश्वरवादिनः, यदृच्छाम् = आकस्मिकत्वापरपर्यायामत-कर्यहेतुकतामभिदधुः। अन्ये = कर्ममीमांसकाः, कर्म = विहित- निषिद्धाचरणजन्यं जीवादृष्टमेव तथाऽभिदधुः। अपरे = औपनिषदाः गुणत्रयवत्या सकलकार्यवासनासंभृ-तया अनिर्वचनीययानन्तशक्त्या मायया तादात्म्यात् शबलं = नानावर्णमिव सर्वज्ञं सर्वशक्तिसंपन्नं वस्तुतः सच्चिदानन्दाद्वयप्रत्यग्रूपं ब्रह्मैव केशलोमादेर्जीवत्पुरुष-शरीरमिव भुजङ्गादेः रज्ज्वादिस्वरूपमिववाऽभिन्ननिमित्तोपादानकारणमित्यभिदधुः। तस्मादित्थं वादिवाक्यैर्विप्रतिपन्नत्वात्सोपि = जगद्धेतुरपि विविदिषुणा विमृश्यः = विचारणीय एवेत्यर्थः। [२]"ऋदुपधाच्चाक्लृपिचृतेः" इति क्यप्।। १४।।

इत्थं जिज्ञासासूत्राक्षिप्तविचाराङ्गविप्रतिपत्तौ प्रदर्शितायां सिद्धान्ती सर्ववादिविजयेन स्वमतप्रतिष्ठापनाय सन्निहिततत्पदार्थव्यवस्थापनमुखेनोपक्रममाणः सर्वजगदभिन्ननिमि-त्तोपादानकारणत्वोपलक्षिते सच्चिदानन्दाद्वयप्रत्यक्स्वरूपे श्रौते ब्रह्मणि सर्ववेदान्त-समन्वयप्रदर्शिनेन समस्तशास्त्रार्थ संग्रहरूपामुत्तरत्रिसूत्रीमर्थतः संगृह्णन् प्रतिजानीते-

मू०।। यस्मादुत्पत्तिगुप्ती क्षतिरपि जगतां (प०टि०) यच्च शास्त्रैकयोनिः
सर्वज्ञं मायया यत् सहजसुखसदद्वैतसंवित्स्वरूपम्।
तत् ब्रह्म स्वप्रकाशं श्रुतिशिखरगिरां सैवतात्पर्यभूमिः
स्वात्माऽसौ यं विदित्वा जनिमृतिजलधिं निस्तरन्तीह सन्तः।। १५।।

यस्मादिति। यस्मात् = अभिन्ननिमित्तोपादानभूतात् ब्रह्मणः सकाशात्, जगतां = हिरण्यगर्भादिचतुर्विधभूतग्रामान्तानां वियदादिपुरुषान्तानां वा समस्तकार्याणां,

(१) अत्र च संवृणोति तत्त्वमिति संवृत्तिरविद्या तस्याइदमिति सांवृतम्।।

(२) क्लृपि चृति भिन्नादृदुपाधाद्धातोः क्यप् स्यात्।

उत्पत्तिः = तादात्म्येनाविर्भावः, गुप्तिः = पालनं; क्षतिः = कारणमात्रपरिशेषात्मातिरोभावोपि तद्ब्रह्मेति। ''जन्माद्यस्य यतः'' इति सूत्रदर्शितं लक्षणं प्रतिज्ञा च। एवमुत्तरत्रापि बोध्यम्। सूत्रे आदिपदेन स्थितिभङ्गयोरेव ग्रहणं 'यतः' शब्देन ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।'' इति श्रुतिदर्शितमूलकारणाधीनजन्मादित्रयस्यैव प्रत्यभिज्ञानात्। न यास्कोपदर्शितावान्तरकारणाधीनानां 'अस्ति, जायते, वर्धते, विपरिणमते, अपक्षीयते, नश्यति, इत्येतेषांभावविकाराणामिति प्रदर्शनायउत्पत्तिगुप्ती क्षतिरितित्रितयोपादानं मूलकारणलाभार्थम्। सूत्रे 'यतः' इति तसिलान्तपदादेव (१)''जनिकर्तुः प्रकृतिः'' इत्यनुशासनादुपादानत्वे लब्धे स्थितिभङ्गयोरुपादानं लक्षणत्रयप्रदर्शनायेति केचित्। अन्ये तु निमित्तमात्रेपि पंचम्यनुशासनाल्लयाधारत्वोक्तिरुपादानत्वलाभाय, स्थितिहेतुत्वोक्तिस्तु चेतनत्वलाभायेति त्रितयलब्धमभिन्ननिमित्तोपादानकारणत्वमेव लक्षणमित्याहुः। वस्तुतस्तु लक्षणं लक्ष्यपरिचयार्थम्। नचाद्वितीयं लक्ष्यमध्यारोपापवादाभ्यां कार्यजातस्य मिथ्यात्वनिर्णयमन्तरेण परिचेतुं शक्यमिति तदुपयोगितया त्रितयोपादानम्। यथाचैतत्तथा तटस्थलक्षणपरीक्षायां दर्शयिष्यते। नचैतदचिन्त्यरचानात्मकसकलजगद्विरचनमचेतनैः प्रधानादिभिः शक्यमिति सर्वज्ञं सर्वशक्तिसंपन्नं श्रुत्युक्तं ब्रह्मैव कारणं सिद्ध्यतीति भावः।

आस्तांजगद्विरचनात्कारणस्य सर्वज्ञत्वादिसिद्ध्यतीति, सृज्यैकदेशभूतसर्वार्थावद्योतनक्षमसमस्तविद्यास्थानोपबृंहितऋग्वेदादिलक्षणशास्त्रस्य पुरुषनिश्वसितवदनायासेन प्रकाशनमेव कारणे सार्वज्ञ्यादिसाधयितुं क्षममित्येतदर्थकं (२)''शास्त्रयोनित्वात्'' इतिसूत्रमर्थतः संगृह्णाति यच्चेति। चकारोऽप्यर्थे। यत् = शास्त्रात्मकैककार्यजनकं सदपि सर्वज्ञमिति सम्बन्ध इत्यर्थः। अथवा-(३)''जन्माद्यस्य यतः'' इतिसूत्रेण तन्मूलश्रुत्या च कार्यलिङ्गकानुमानमेवकारणे

---

(१) जनिकर्तुः प्रकृतिः।१-४-३०।। जनेः कर्ता जनिकर्ता जन्यर्थस्य जन्मनः कर्ता जायमानस्तस्य प्रकृतिः कारणं हेतुस्तत्कारकं सदुपादानसंज्ञं भवति, हिमवतो गंगा प्रवहति यथा तथायत इति।।

(२) शास्त्रयोनित्वादिति।। शास्त्रस्य महतो ऋग्वेदादेरनेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म तस्मात्सर्वज्ञं ब्रह्मेति मन्तव्यमन्यथा तादृक्शास्त्रकर्तृत्वानुपपत्तेरिति सूत्रार्थः।। ब्र० सू० उ० मी० अ० १ पा० १ सू० ३)

(३) जन्माद्यस्य यतः। जन्मोत्पत्तिरादिरस्येति तद्गुण संविज्ञान बहुव्रीहिः। जन्मस्थिति भङ्गं समासार्थः। जन्मनश्चादित्व श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। अस्य प्रत्यक्षादि सिद्धस्य नामरूपाभ्यां व्याकृतस्य मनसाऽप्यचिन्त्यरचनात्मकस्य जगतो जन्मस्थिति भङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेष इत्यर्थः।। (शा० मी० अ०१ पा०१ सू०२)

प्रमाणं दर्शितं। तच्च प्रधानाऽदिनार्थान्तरितमित्याशङ्क्य सूत्रस्यार्थान्तरमाह-'यच्चेति। यत् = ब्रह्म, शास्त्रं = श्रुतिरेकमेव योनिः = प्रमाणं यस्य तत्तथोक्तं। पुरः स्फूर्तिकतत्पुरुषानुरोधात् स्वात्मेति मुख्य विशेष्यानुसाराच्च पुंलिङ्गनिर्देशः। वेदैकप्रमाणकमित्यर्थः। "नावेदविन्मनुतेतं बृहन्तं।" "तंत्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिभिरितरप्रमाणागोचरत्वोक्तेः, साक्षाद्बोधनसमर्थायाः श्रुतेर्लिङ्गद्वारा बोधकत्वकल्पने प्रयोजनाभावादनुवादरूपत्वेनाप्रामाण्यापत्तेश्च। किंच, कार्यं हि कारणास्तित्वमात्रेलिङ्गं, न तु प्रधानमेव, ब्रह्मैवेतिवा तद्विशेषेपि, बहु-भिस्तार्किकैरन्यथान्यथा कल्पनात्, विशेषाध्यवसानहेत्वभावाच्चेतिभावः। ननु श्रौतं ब्रह्म वा कथं कारणं? "अस्थूलमनण्वह्रस्वमदीर्घ" "न तस्य कार्यं कारणं च विद्यते" "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्" इत्यादिश्रुतिभिस्तस्यसर्व-धर्मशून्यत्वप्रतिपादनात्। यदि च तथाविधमपिसृष्टिवाक्यप्रामाण्यात् दुग्धादिवद्दध्यादि-भावेनजगदाकारेण परिणमेत् तर्हि कृत्स्नपरिणामे जगद्व्यतिरेकेण ब्रह्मासत्वप्रसङ्गः; एकदेशेनपरिणामे निरवयवत्वप्रतिपादकश्रुतिव्याकोपः, उभयथाप्यनित्यत्व प्रसङ्गश्चेत्यत आह-माययेति।।

"मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।।

इत्यादिश्रुतेर्मायायाश्च दुर्घटघटनापटीयस्त्वादित्यर्थः। अयं भावः (१)यदिकार्यजातं कारणसमसत्ताकमभ्युपगतं स्यात्तदा स्यादयं दोषः। मिथ्याभूतं तु तद्रज्ज्वादौ सर्पादिवदज्ञानादविकृतेऽपि वस्तुन्यध्यस्यमानं वस्तुतोनाधिष्ठानं स्पृशतीति न तद्दूषयितुं क्षमते। अद्वितीयवस्तुन एव श्रूयमाणजगत्कारणत्वनिर्वाहाय कल्प्यमाना माया (२)धर्मिग्राहकमानादुपजीव्यानुसाराच्च मिथ्याभूतैव सिद्ध्यतीति न तत्कृतेन जगत्कारणत्वेन ब्रह्मणो विकारित्वं। तथा च भाष्यम्- "यत्र हि यदध्यासस्तद्कृतेन गुणेन दोषेण वाऽणुमात्रेणापिसनसंबध्यते" इति।। तर्हि वस्तुतः किंरूपंतद्ब्रह्मेत्याकांक्षायां

(१) यदि कार्यजातं कारणसमसत्ताकं विवर्त्तोपादान कारणेन समसत्ताकमभ्युपगतं स्यात्तदा कार्यसमसत्ताकत्वेन कार्यवत्कारणस्याप्यनित्यत्वापत्ति लक्षणो दोषः स्यान्नतु तथास्त्यतो नोक्तदोषावकाशः इतिभावः।।

(२) धर्मिग्राहकमानादुपजीव्यानुसाराच्च। धर्मिणोऽधिष्ठानभूतस्य विवर्तोपादानस्य ब्रह्मणो ग्राहकं यच्छब्दात्मकं वेदलक्षणं प्रमाणं तस्मात्तथोपजीव्यस्य जगति प्रतीयमानानिर्वचनीयत्वादिग्राहकप्रत्यक्ष प्रमाणस्यानुसाराच्च समानयोः कार्यकारण भाव इति नियमस्य परिणाम पक्षे स्वीकाराच्च त्रिगुणात्मकस्य जगतः तथाविधेन कारणेन भवितव्यमिति जगत्कारणत्वेन सिद्धायाः मायाया अपि मिथ्यात्वमेवेति भावः।।

यतो वेत्याद्युपक्रान्तजगत्कारणत्वनिगमनपरात् "आनंदो ब्रह्मेतिव्यजानात्" इतिवाक्याद्ब्रह्मवल्लीगतात् "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्राच्च सच्चिदानन्दाद्वयस्वरूपमिति। स्वरूपलक्षणमाह-यदिति। सहजं = स्वाभाविकं, नित्यमित्यर्थः। तथाविधंयत्सुखं = परमानन्दस्तदेव मिथ्याभूतसर्वप्रपञ्चबाधावधित्वात्सत् = सत्यं, अत एव नविद्यतेद्वैतं यस्य तदद्वैतं च, निरावरण स्फूर्ति स्वाभाव्यात्संवित्स्वरूपं ज्ञानस्वरूपं यत्तत् ब्रह्मेति संबन्धः।।

ग्राहकविप्रतिपत्तिनिराकरणायाह- स्वप्रकाशमिति।। भारूपत्वादेव दीपस्य दीपान्तरवत्स्वपरप्रकाशे ज्ञानान्तरनिरपेक्षमित्यर्थः। उक्तरूपेब्रह्मणि सर्व वेदान्तानांतात्पर्यपर्यवसानप्रदर्शनपरं (१)"तत्तुसमन्वयात्" इति सूत्रमर्थतो व्याचष्टे-श्रुतीति श्रुतयः = वेदाः, तेषां "तं हत्रीन् गिरिरूपानविज्ञातानिव दर्शयांचकार" इतिश्रुत्यन्तरे पर्वताकारेण प्रदर्शितत्वप्रसिद्धेः शिखराणीव शिखराणि वेदान्तास्तत्संबन्धिनीनां तद्रूपाणां वा गिरां सर्ववेदान्तवाक्यानामित्यर्थः, सैव = पूर्वोक्तं ब्रह्मैव, "शैत्यं हि यत् सा प्रकृतिर्जलस्य" इति (२)वत्सर्वनाम्नो विशेष्यानुसारेण स्त्रीलिङ्गता। तात्पर्यभूमिः = ऐदंपर्यविश्रान्तिस्थानम्। ननु भवतु तथाविधं ब्रह्म, किं नस्तेनेत्याशङ्क्य पुरुषार्थपर्यवसायिवाक्यार्थं दर्शयतिस्वात्मेति।। असौ = पूर्वोक्तं, ब्रह्म, = स्वात्मैव न तटस्थमित्यर्थः। यं = स्वतस्सिद्धब्रह्मभावं, स्वात्मानं, विदित्वा = श्रवणाद्युपायैः साक्षात्कृत्य, सन्तः = शान्त्यादिसम्पन्ना अधिकारिणः जनिमृतिजलधिं = जननमरणोपलक्षितानाद्यनन्तदुःखसमुद्रम्, इह = अस्मिन्नेव जन्मनि, ज्ञानोदयसमकालमेवेत्यर्थः। निस्तरंति = नितरां तरंति। जीवन्मुक्तां भूत्वा पुनः संसारं नाप्नुवन्तीत्यर्थः।।१५।।

अत्र मायाशबलं सार्वज्ञ्यादिसंपन्नं ब्रह्मैव जगत्कारणं, तच्च वस्तुतः सच्चिदानन्दाद्वयमेव, स्वप्रकाशमेव, सर्वश्रुतीनां तत्रैव तात्पर्यम्, तदेव च प्रत्यगात्मेति पञ्चार्थाः प्रतिज्ञाताः। जीवन्मुक्तिश्च दर्शिता। तान्क्रमेणोपपादयितुं पञ्चविंशतिश्लोकैर्विरुद्धवादिमतानि दूषयिष्यन् प्रथममष्टौवादिनः सामान्यतो निरस्य विजयस्थानं स्वसिद्धान्तमवलम्बते-साङ्ख्यैरित्यादिना।।

(१) तत्तुसमन्वयात्।। ब्र०सू०अ०१ पा०१सू०४।। तद्ब्रह्म सर्वज्ञं सर्वशक्तिजगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथं, समन्वयात्। तु शब्दः पूर्वपक्षव्यावृत्यर्थकः सर्वेषुवेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि तस्माज्जगत्कारणं ब्रह्मैव निश्चयेतव्यं नान्यदिति भावः।।

(२) सर्वनाम्नस्तत्पदस्य विशेष्यानुसारेण भूमिरिति पदानुसारेणेत्यर्थः।

मू०।। साङ्ख्यैः प्रख्यापितं न क्षममिह जगतां निर्मितौतत्प्रधानं
हेतुर्नैतादृशेऽर्थे प्रभवति गदितस्तार्किकैरीश्वरोऽपि।
नाणुः काणादबौद्धक्षपणकभणितो नापि निस्साक्षिशून्यं
तस्मादास्माकमेव श्रुतिगदितपरब्रह्मसिद्धं निदानम्।।१६।।

साङ्ख्यैरिति।। इह = अस्यां मनसाप्यचिन्त्यरचनात्मिकायां, जगतां = सर्व कार्याणां, निर्मितौ = निर्माणे, साङ्ख्यैः = कापिलपातञ्जलैः, प्रख्यापितं = यथा घटशरावादयो भेदामृदात्मतयाऽन्वीयमानः मृदात्मकसामान्यपूर्वका लोके दृष्टास्तथा सर्व एव बाह्या आध्यात्मिकाच्च भेदाः सुखदुःखमोहात्मतया अन्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति। यत्तु तथाविधं सामान्यं तत्त्रिगुणं प्रधानमचेतनं चेतनस्य भोगमोक्षप्रयोजनार्थं महदादिविकारात्मना परिणमत इति स्वकपोलकल्पनयैव प्रसिद्धिं नीतमित्यर्थः। प्रधीयतेऽस्मिन् प्रलयेसूक्ष्मावस्थापन्नं महदादिविकारजातमिति; प्रधानं = सत्वरजस्तमसां साम्यावस्थालक्षणंतत्त्वं, न क्षमं = न समर्थं। लोकेह्यल्पतरमपि गृहप्रासादादिशिल्पं कुशलतरैरेव प्रेक्षावद्भिर्निर्मीयमाणं दृष्टं, नाचेतनैः। किमङ्गयन्मनसाप्यचिन्त्यरचनात्मकैकैकवस्तुस्वभावं जगदित्यर्थः। भवतु तर्हि [1]क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, केवलासङ्गचिद्रूपोऽन्यादृशोवा, क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदित्याद्यनुमानैः सिद्धः प्रधानस्य परमाण्वादेर्वा प्रवर्तनेनाधिष्ठाताकेवलनिमित्तकारणं तथेति वदतः पातञ्जलगौतमकाणादतांत्रिकपाशुपतान्प्रत्याह- हेतुरिति।। एतादृशे = जगन्निर्माणलक्षणेऽर्थे, तार्किकैः = श्रुतिनिरपेक्षतर्कैरेव जगत्कारणं कल्पयद्भिरुक्तवादिभिः, गदितः = उक्तः, हेतुः = केवलनिमित्तकारणभूत ईश्वरोऽपि, न प्रभवति नसमर्थो भवति। वक्ष्यमाणयुक्तेरन्यथान्यथाप्यनुमानसंभवात्, तर्काप्रतिष्ठानात्परस्परविप्रतिषेधाद्विशेषावधारणहेतु श्रुत्यननुसाराच्चेति भावः तदुत्प्रेक्षितोपादानान्यपि दूषयन्नन्यानपि निरस्यति - नेति।। कणादस्य छात्राः काणादाः, बौद्धाः बुद्धस्य शिष्याः सौत्रान्तिकवैभाषिकमतानुसारिणः, क्षपणकाः = आर्हतास्तैः यथापटादयस्तन्त्वादिभिरवयवैरारभ्यन्ते, एवं तन्त्वादयोऽपि स्वावयवैरंश्वादिभिः, तेऽपि ततोपि न्यूनैः कार्पासावयवैरिति क्रमेणावयवपरंपरा निरवयवेषु परमाणुषु विश्राम्यतीति

(१) क्लेशैरविद्यास्मितारागद्वेषाभिनिवेशाख्यैः पंचभिस्तथा शुक्लकृष्णमिश्रभेदात्त्रिविधैः कर्मभिर्जात्यायुर्भोगात्मकेन विपाकेन चापरामृष्टोऽसम्बद्ध आशयेन विपाकादि जन्यसंस्कारविशेषेण चासम्बद्धः पुरुषविशेष ईश्वरः इति। योगदर्शन पा०१ सू०२४

भूतचतुष्टयपरमाणव एव सर्गादौ द्व्यणुकादिक्रमेण महापृथिव्यादीनारभन्त इति काणादगौतमीयैः परमाणव एव क्षणिकाः अनियतस्वभावा बाह्याभ्यन्तरवस्त्वाकारेण संहन्यन्त इति सौत्रान्तिकीयादिभिश्च, भणितः = उक्तः, अणुः = परमाणुः, जातोवेकवचनं। एतादृशेऽर्थे न प्रभवतीत्यर्थः। दध्यङ्कुरादावारम्भादर्शनान्महत एव महदुपादानत्वदर्शनाच्च परमाण्वसिद्धेः, अभ्युपगमेपितेषां मेलनासंभवादेर्वक्ष्य-माणत्वात् क्वचिद्वृक्षादिभ्यः शाखाद्यवयवोत्पत्तिदर्शनात्परिमाणभेदेपि प्रत्यभिज्ञया द्रव्यभेदासिद्धेरवयवावयविनोः कार्यकारणभावे विनिगमनाविरहाच्चेति भावः।

अस्तु तर्हि शून्यमेव जगद्धेतुः, मृत्पिण्डबीजादीनां पूर्वावस्थोपमर्देन शून्यतापत्तावेव घटाङ्कुरादिजन्मदर्शनात्।। यथाहुः- "नानुपमृद्य प्रादुर्भावात्" इति, शून्यवादिमतं निरस्यति— नापीति।। निर्गतः साक्षी साधको यस्य तन्निःसाक्षि, शून्यमपि न प्रभवति। अयंभावः - सर्गादौ शून्यं ससाक्षिकं निस्साक्षिकं वा हेतुरुच्यते? आद्ये शून्यसाधकसाक्षिणः सत्वात्सर्वशून्यासिद्धिः। द्वितीयेऽपि सर्वप्रमाणागोचरीभूतं साक्षिणाप्यभास्यमानं शून्यमेव न सिद्ध्यति, दूरेतस्य कारणत्वं। बीजावस्थोपमर्देपि बीजाङ्कुरोभयानुगतमृदादिस्वरूपानुपमर्देन तस्यैव घटाङ्कुराद्यने-कावस्थोपादानत्वसंभवेन दृष्टान्तासंप्रतिपत्तेश्च। वस्तुतस्तु- न बीजादिस्वरूपस्यापि शून्यतापादनमुपमर्दः। संस्काररूपेण सर्ववस्तूनां सत्वोपगमात्। किन्त्वङ्कुराद्यवस्थया तिरोभावमात्रमिति वक्ष्यते। अतः परिशेषात्प्रामाणिकत्वाच्च स्वमतं निरूढमित्याह- तस्मादिति।। आस्माकं = अस्माकं परमहंसपरिव्राजकानां नित्यापरोक्षानुभवसिद्धं "तस्येदम्" इत्यणि "तस्मिन्नणि च युष्माकास्माकौ" इत्यस्माकादेशः। श्रुतिगदितं = सकलोपनिषद्भिस्तात्पर्येण प्रतिपादितं; परं = उत्कृष्टं, यद्ब्रह्म तदेव निदानं = जगतामादिकारणं, सिद्धं = निरूढमित्यर्थः।। १६।।

इत्थं सामान्यतो निरस्तेष्वपि वाद्यान्तरेषु केषांचिन्मुमुक्षूणां मन्दमतित्वादस्वतन्त्र-प्रज्ञानां, "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्" इत्यादिश्रुतिभिः कपिलादीनां माहात्म्यख्यापनात्तच्छिष्यपरंपरासु तेषां सर्वज्ञत्वादिप्रसिद्धेर्विस्तृतानां बहुतरतर्कोपबृंहितानां तद्ग्रन्थानां चदर्शनात्तद्दर्शितमोक्षोपायेऽपि भ्रमात्प्रवृत्तिः स्यात्, तथा सत्यन्धगोलाङ्गुलन्यायेन तदवलम्बने श्रौतसन्मार्गपरिभ्रंशात्पुरुषार्थाद्व्याहन्येरन्निति बादरायणभगवत्पादाद्याचार्यपरंपरादर्शिततर्कैरेवतन्मतानि विशेषतोऽप्याभासयिष्यन् प्रधानमल्लनिबर्हणन्यायेन कापिलं मतमादौ निरस्यति- नाचैतन्यादित्यादिश्लोकद्वयेन।।

मू०।। नाचैतन्यात्प्रधानं प्रभवति चलितुं तन्निसर्गक्रियं चेत्
नित्यं सर्गप्रसङ्गो नियतिरपि यतः सर्गपूर्वा न पूर्वम्।
बन्धो निर्हेतुकः स्यात्कथमथ न भवेद्बन्धमोक्षाव्यवस्था
निःसौख्यंनापि मोक्षंस्पृहयति मतिमान्कापिलं तेनदुष्टम।। १७।।

नाचैतन्यादिति।। गुणसाम्यांवस्थालक्षणं प्रधानं सर्गादौ चलनेन साम्यावस्थातः प्रच्युतं सन्महदादिविकारं जनयेत्। तच्च चलितुमेव तावन्न प्रभवति = न समर्थं भवति।। कुतः? अचैतन्यात् = स्वतश्चैतन्यशून्यत्वाच्चेतनान्तरानधिष्ठितत्वाच्च। लोके हि मृत्सुवर्णाद्यचेतनं चेतनान्तराधिष्ठितमेव कार्योन्मुखप्रवृत्तिकं दृष्टं, दृष्टानुसारिणीह्यन्यत्रकल्पनेत्यर्थः। ननु यथा वत्सविवृद्धये गवाद्युधसः क्षीरमचेतनमेव प्रवर्तते, यथा वा नद्यादिजलं लोकोपकाराय स्वयमेव स्यन्दते, तथा प्रधानमचेतनमपि पुरुषस्य भोगापवर्गसिद्धये स्वतएव प्रवर्तिष्यते इतिचेन्न पयः प्रवृत्तेर्धेनुस्नेह-वत्सचोषणादिचेतनव्यापारसापेक्षत्वेन जल स्यन्दनादेर्निम्नप्रदेशादिनिमित्तान्तर सापेक्षत्वेनोभयत्रापि सर्वान्तर्यामिपरमेश्वराधीनत्वश्रुतेश्च दृष्टान्तासिद्धेः।। ननु सत्वं लघु प्रकाशस्वभावं, तमस्तु गुरु आवरणस्वभावं तयोरान्तरालिकं लघुत्वा-द्वह्निज्वालावदूर्ध्वंजिगमिषतः सत्वस्य, गुरुत्वादधः पिपतिषतस्तमसश्च विष्टंभकं रजश्चलनस्वभावं, तच्चस्वभावाच्चलत्सत्वतमसी चालयतीत्यन्यथासिद्धा प्रधानस्य कार्योन्मुखी प्रवृत्तिरित्याशङ्क्याह- तदिति। तत् = प्रधानं, निसर्गक्रियं = स्वाभाविक-चलनविशिष्टंचेदभ्युपगम्येत तर्हि विरामे कारणाभावान्नित्यं = अनवरतमेव, सर्गस्य = सर्गः प्रसङ्गः = चलनस्वभावेनरजसा सदैव चाल्यमानैर्गुणैः प्रतिक्षणं कार्यारंभेप्रलयासिद्धिः गुणसाम्यावस्थालक्षणप्रधानासिद्धिश्चेत्यर्थः।।

ननु प्राणिकर्मवशाद्व्यवस्थाभविष्यति। पूर्वसर्गभोग्यानां कर्मणां प्राणिभिः भोगेन क्षपणादेतत्सर्गभोग्यानांचापरिपाकेन फलानौन्मुख्यादन्तरालेऽर्थसिद्धः प्रलयः।। सर्गादौ च कर्मणां परिपाके सतिनिमित्तसद्भावात्प्रधानप्रवृत्तौ अर्थसिद्धः सर्ग इत्याशङ्क्याह- नियतिरिति।। नियतिः = प्राक्सर्गसंचितं धर्माधर्मलक्षणप्राण्यदृष्टमपि, सर्गपूर्वा = पूर्वसृष्टिसिध्यधीना। तत्सिद्धिः पूर्वं न संभवति। सिद्धायां हि प्रधानप्रवृत्तौ महदादिक्रमेण शरीरारंभेअदृष्टसिद्धिः, तत्सिद्धौ च प्रधानप्रवृत्तिरित्यन्योन्या-श्रयानवस्थादिदोषप्रसङ्गात्। कर्मणोप्यचेतनत्वाविशेषात्तदुपयोगपरिपाकाद्य-भिज्ञचेतनाधिष्ठानं बिना फलौन्मुख्यप्रवर्तकत्वयोरसिद्धेः। इदन्तु कर्मणां प्रंधानप्रवृत्तिहेतुत्वमभ्युपगम्योक्तम्। वस्तुतस्तु साङ्ख्यनये धर्मेणाऽधर्मकृतस्सुखा-

त्मकसृष्टिप्रतिबन्धोऽपनीयते, एवमधर्मेणाऽपिधर्मकृतो दुःखात्मकसर्गप्रतिबन्धोऽपनीयते, प्रतिबन्धापगमे च स्वयमेव प्रधानमुच्चावचसर्गे प्रवर्तते। यथाहुः- ''निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्'' इति। निमित्तं धर्माधर्मादि, प्रकृतीनां मूलप्रकृतेः महदादिप्रकृतिविकृतीनाञ्चाऽप्रयोजकं स्वस्वकार्यसर्गे, किन्तु वरणस्य = प्रतिबन्धकस्य, भेदः = भङ्गः, ततः = निमित्ताद्भवति, क्षेत्रिकवत् = यथाक्षेत्रकारी केदारं केदारान्तरोदकेन पिप्लावयिषुरपो न पाणिनाऽऽकर्षति किन्तु वरणं तासां भिनत्तितद्वदिति पातञ्जलसूत्रार्थः। तथाच प्रलयेपि प्रतिबन्धकापनयहेतुधर्माधर्मयोः सत्वात्सदैव सर्गप्रसङ्गो दुरपह्नवः। किंचासङ्गोदासीनेषु पुरुषेषु वास्तवस्याध्यासिकस्य वा प्रकृतिसंगस्यानभ्युपगमात् निर्हेतुकः, असंबंधहेतुकोवा बन्धोवाच्यः। आद्ये तस्यानागन्तुकवह्नयौष्ण्यवद्वस्तुस्वभावत्वापत्या साधनसहस्रैरपि निवर्तयितुमशक्यत्वादनिर्मोक्षप्रसङ्गइत्यभिप्रेत्याह- बन्धइति।। निर्हेतुकः = कारणनिरपेक्षः। द्वितीयेप्याह - कथमिति।। अथ = अनन्तरं, द्वितीयपक्षे बन्धमोक्षयोरव्यवस्था = विशेषाभावः, कथं नभवेत्? असंबंन्थेपि प्रकृतेर्बन्धहेतुत्वे मुक्तात्मनामपि बन्धप्रसङ्गः। यदिचाऽसंबद्धेनापि प्राकृतेन विवेकज्ञानेन मोक्षोऽभ्युपगम्येत तर्हि यस्यकस्यचिद्विवेकज्ञानेन सर्वमोक्ष प्रसङ्गः असंबद्धत्वाविशेषात्। यदि च बुद्धिगतावेव बन्धमोक्षौ पुरुषेषु व्यपदिश्येते, तर्हि मुक्तपुरुषेष्वपि व्यपदिश्येयातामिति भावः। यत्तु वदन्ति (१)''दृष्टामयेत्युपेक्षकएको-दृष्टाहमितिविरमत्यन्या। सति संयोगेपि तयोः *प्रयोजनं नास्ति सर्गस्य''।। इति, प्रयोजकं भोगापवर्गलक्षणं मुक्तात्मनां नास्तीत्यर्थ इतिच, तत्परस्पराभिप्राय-प्रयोजनाभिज्ञचेतनयोः स्यात्, न निर्विकाराचेतनयोः, निष्पन्नेऽपि घटे कुलालचक्रभ्रम्यादिदर्शनादिति भावः।।

कपिलाभ्युपगतमुक्तेरपुरुषार्थत्वाच्छास्त्रवैफल्यंचेत्यभिप्रेत्याह- निःसौख्यमिति।। मतिमान् = प्रेक्षावान्, निःसौख्यम् = अनानन्दं पाषाणादिभावकल्पं तदभिमतं मोक्षं, न स्पृहयति नेच्छति, तथाच मोक्षार्थी पुरुषः शास्त्रे न प्रवर्तेतेतिभावः।। ईप्सितमात्रस्यैव (२)''स्पृहेरीप्सितः'' इति संप्रदानत्वादीप्सित तमत्वविवक्षायां

(१) तत्परस्परेति।। मयेयंदृष्टाऽतोनास्याः प्रवृत्या किञ्चिन्मत्प्रयोजनमस्तीत्येको मुक्तपुरुष उपेक्षक उदासीनः।। प्रकृतिस्त्वहमनेन दृष्टान्तोनास्य मत्सकाशात्किंचित्प्रयोजनमस्तीति मुक्तपुरुषं प्रति भोगापवर्गजननानुकूलव्यापाराद्विरमति उपरमते इति।। यत्तदुदासीनता कृतकार्यताज्ञानमपीत्यर्थः।।
(२) स्पृहेरीप्सितः।। स्पृहयतेः प्रयोग इष्टः सम्प्रदानं स्यादिति सूत्रार्थः। अ०१ पा०४ सू०३६।।
*तयोः संयोगेपि सर्गस्य जनने प्रयोजनं = प्रयुज्यते अनेनेति व्युत्पत्त्या सहकारिकारणं नास्तीत्यर्थः।

कर्मत्वमेवेति मोक्षमिति द्वितीयाप्रयोगः।। आत्यन्तिकदुःखनिवृत्तिरूपत्वात् स्पृहयिष्यतीतिचेन्न। आत्मनो ही सुखरूपत्वे सर्वदुःखप्रहाणेर्निर्विशेषस्वप्रकाशसुख-रूपात्मपरिशेषात्तादर्थ्येन दुःखाभावं स्पृहयेत्। असुखरूपत्वे तु तस्य लोष्टादिवत्स्वतः प्रेमविषयत्वासंभवान्न किंचिदात्मार्थं स्पृहयेत्, किंपुनर्दुःखाभावं। किंचात्मनः त्वया नित्यानुमेयत्वाभ्युपगमेन स्वात्मनः परात्मनश्चाऽविशेषात्परस्मिन्निव नात्मन्यपि दुःखमनुभवितुं शक्यमिति न तदभावं स्पृहयेदिति सर्वथा कापिलं मतं निर्युक्तिकं निष्प्रयोजनं चेत्याह- कापिलमिति।। कपिलेन प्रोक्तंकापिलं शास्त्रं, तेन = उक्त-दोषनिवहेन; दुष्टं = दोषयुक्तम्, तथाचानुपादेयमिति भावः।।१७।।

इत्थमभ्युपेत्य पराभिमतौ भोगमोक्षौ तत्सिद्धयेसर्गादौ प्रधानप्रवृत्तिर्मोक्षशास्त्रे प्रेक्षावत्प्रवृत्तिश्च न संभवतीत्युक्तं, इदानीं तयोरप्यनुपपत्तिरिति दर्शयति-

मू०।। किञ्चाऽकर्तैव भोक्ता यदि तव कृतहानाकृताभ्यागमः स्या-
त्कीदृग्भोगोऽप्यसङ्गेऽनतिशयिनि भवेत्तेन भोग्यस्य कोऽर्थः।
कीदृक्कस्याविवेकः कथमत स भवेद्भोगहेतुर्विवेकः
कस्य स्यात्तेन किं स्यादिति हि विमृशतो दुर्वचं ब्रह्मणोऽपि।। १८।।

किंचेति।। यद्यकर्तैव सन् पुरुषः कर्मफलानां भोक्तेत्यभ्युपगम्येत, प्रकृतिश्च कुर्वाणाप्यभोक्त्रीतिः, तदाकृतस्य हानं वैफल्यं अकृतस्य कर्मणः फलाभ्यागमः स्यात्, तथाच धर्माधर्मशास्त्रवैफल्यप्रसङ्गः। [१]उपलक्षणं चैतत्। [२]तेन देहातिरिक्तात्मासिद्धिप्रसङ्गः, यज्ञदत्तापराधे देवदत्तादिदण्डप्रसङ्गः, अन्यस्मिन् भुञ्जानेऽन्यस्य तृप्त्यादिप्रसङ्गश्च बोध्यः। ननु न वयं कर्तृत्वप्रयुक्तंभोक्तृत्वम-भ्युपगच्छामः, कर्मणां गुणप्रवृत्तिप्रतिबन्धनिरासार्थत्वस्योक्तत्वात्। किन्तु शक्तिकृतं।

(१) उपलक्षणंचैतदिति।। एतत्कर्तृभूतायाः प्रकृतेर्भोगाभावेनाकर्तुश्च पुरुषस्य भोगाभ्युपगमेन कृतहान्यकृताभ्युपगमप्रसङ्गेन धर्माधर्मयोः स्वकर्तृ प्रकृतिं प्रति भोगाऽप्रदानेन वैफल्यप्रसक्ति-स्तथा च धर्माधर्मयोर्वैफल्यं तयोरव्यवस्थायास्तथा कर्मफलःप्रदातुरीश्वरस्य चासिद्धेरुपलक्षणम्। विनापिकरणेन धर्माधर्मयोः पुरुषं प्रति भोगप्रदत्वेऽकरणत्वाविशेषात्सर्वमपि कर्म सर्वं प्रतिभोगं जनयेत्ततश्च देवदत्तीय कर्म तं प्रत्येव भोगं जनयति नान्यं प्रतीतिनियमंलक्षण व्यवस्थानुपपत्तिः।। तद्वद्भोगान्यथानुपपत्तिकल्प्यादृष्टासिद्धौ तत्फलप्रदातृतया सर्वज्ञस्येश्वरस्याप्यसिद्धिश्चेति भावः।।
(२) तेनेति।। धर्माधर्मयोर्यथोक्तव्यवस्था स्वीकारेणेह जन्मन्यननुष्ठित कर्मणो जातमात्रस्य बालस्य सुखदुःखादिभोगानुपपत्ति कल्प्यादृष्टकर्तृतया देहातिरिक्तात्मा सिद्धिर्दोषस्तथा प्रकृतिकृत कर्मणा पुरुषस्य भोग स्वीकारे देवदत्तकृतापराधेन यज्ञदत्तस्य राजदण्डाद्यापत्तिश्च दोषस्तथा यज्ञदत्त भुजिक्रियाया देवदत्तस्य तृप्तिप्रसङ्गश्च दोष इतिभावः।।

दृक्शक्तिमत्वात्पुरुषो भोक्ता, सर्गशक्तिमत्वाच्च गुणा भोग्याः, तयोर्भोक्तृ-भोजकशक्त्योर्वैयर्थ्यं माभूदित्यौत्सुक्यात्प्रवृत्तौ भोक्तृभोक्तव्यरूपयोस्तप्य-तापकयोरभिमानलक्षणसंबन्धादर्थसिद्धो भोगस्तापलक्षणइत्याशङ्क्याह-कीदृगिति।। असङ्गे = वस्तुतो गुणसंबंधशून्ये, अतो निर्विकारत्वाच्च अनतिशयिनिगुणसंबन्ध-प्रयुक्तातिशयानाधारे, पुरुषे तापलक्षणो भोगोपि कीदृक्, वक्तुमेवाऽशक्य इत्यर्थः।।

ननु रजसा सत्वेतप्यमाने सत्वानुसारी पुरुषोऽपि तप्यत इवेति भोक्तृत्वमुपचर्यत इतिचेन्न। नह्युपचारमात्रेणभोक्तृतासिद्धिः। नह्यग्निर्माणवक इत्युपचारमात्रान्माण-वकोदहतिप्रकाशयतिवा। किंच, प्रधानं पुरुषस्य भोगार्थं प्रवर्तमानं स्वार्थमपि कंचिदुद्दिश्यैव प्रवर्तेत, भृत्यदारादीनां स्वार्थपुरस्कारेणैव राजाद्युपभोगाय प्रवृत्तिदर्शनात्। नच भोक्तृशक्तिहीनस्य तस्य कश्चित्स्वार्थः संभवतीत्यभिप्रेत्याह-तेनेति। तेन = पुरुषभोगेन, भोग्यस्य = प्रधानस्य कः अर्थः स्वार्थः येन प्रवर्तेतेति शेषः। चेतनस्य प्रवृत्तिरेव स्वार्थनिबन्धना नाचेतनस्येति यद्युच्येत, तर्हि प्रयोजनोद्देशेन प्रवृत्तिरपि चेतनस्यैवेति भोगमोक्षार्थं प्रधानप्रवृत्तिरित्यसङ्गतमेवेति भावः। [१]एतेनौत्सुक्यनिवृत्त्यर्थं प्रवृत्तिरित्यपि निरस्तम्। औत्सुक्यस्यापि चेतनधर्मत्वात्। ननु प्रधानपुरुषयोः [२]पङ्वन्धयोरिव प्रत्येकं प्रवृत्त्यसामर्थ्येप्यनाद्यविवेकप्रयुक्त-परस्पराविवेकलक्षणसंबन्धादेकतामिवापन्नयोः प्रवृत्तिर्भोगश्च सेत्स्यतीत्याशङ्क्याविवेकं निरस्यति-कीदृगिति। अविवेकः कीदृक् = किंप्रकारः,। किंविवेकज्ञानाभावः? उतैकय ज्ञानं? उत तत्संस्कारः? नाद्यः, साङ्ख्यैरभावाख्यतत्त्वान्तरानभ्युपगमात्। अधिकरणात्मकाभावस्य विवेकज्ञानोत्तरमपिसत्वे नानिर्मोक्षप्रसङ्गाच्च। नद्वितीयः, भिन्नयोरैक्यज्ञानस्य सद्विषयत्वासंभवादन्यथाख्यात्यनभ्युपगमाच्च। अनिर्वचनीयैक्य-सिद्धावस्मन्मतप्रवेशापत्तेः। परैर्भ्रान्त्यात्मकविशिष्टज्ञानानभ्युपगमाच्च। अतएव न तृतीयः। अनुभवं विना संस्कारायोगादितिभावः। [३]अस्तुवान्यादृशस्तथापितस्याश्रयो दुर्निरूप इत्याह-कस्येति। अविवेकः प्रकृतेः, उत कार्याणां, उत पुरुषस्य धर्मः। नाद्यौ। अचेतनानां चेतनधर्मविवेकाविवेकाश्रयत्वाप्रसिद्धेः। नतृतीयः। निर्विकारा-सङ्गचिन्मात्रस्वरूपस्याविवेकाख्यधर्मसंबन्धायोगात्। अविवेकान्तरात्तदुक्तावनवस्था-द्यापत्तेः। अनयैवदिशा बुद्धितद्धर्मैरहंममेत्यभिमानलक्षणः संबन्धोपि निरसनीयः।

(१) एतेनेति।। अचेतनस्य स्वपरार्थोद्देशेन प्रवृत्त्यसम्भवप्रदर्शनेनेत्यर्थः।।

(२) पङ्वन्धयोरिवेति पाठस्याग्रे प्रत्येकं इति पाठः।।

(३) अन्यादृशेति।। उक्तप्रकारत्रितयविलक्षणः प्रकृतिपुरुषयोः परस्परभिन्नतया प्रतीतिप्रतिबन्धको धर्मविशेषोऽविवेक इत्यर्थः।।

अविवेकाभ्युपगमेऽपि तस्य भोगप्रयोजकता = न संभवतीत्यभिप्रेत्य पृच्छति- कथमिति।। अथ = अनन्तरं अभ्युपगमेपीत्यर्थः। सः = अविवेकः भोगहेतुः = तापनिमित्तं, कथं = केन प्रकारेण भवेत्। [१]अयोग्ये तेन भोगजननायोगादन्यथाऽभोग्येपि भोगापत्तेरिति भावः। अविवेकोक्तदोषान्विवेकेऽपि दर्शयति- विवेकः कस्यस्यादित्यादिना।। पराभिमतविवेकज्ञानस्य मोक्षहेतुत्वं निरस्यति- तेनेति। पुरुषे आध्यासिकस्य वास्तवस्य वा ज्ञाननिवर्त्यबन्धस्याऽनभ्युपगमाद्गुणानां च नित्यत्वान्मोक्षाऽसंभवाद्विवेकज्ञानवैफल्यमिति भावः।। इति = उक्तप्रकारेण, विमृशतः = विचारयतः, साङ्ख्यदर्शनं सर्वज्ञस्य ब्रह्मणः = हिरण्यगर्भस्यापि, दुर्वचं = दुरुपपादं, किमन्यैर्मन्दमतिभिरितिभावः। इत्थं कापिलदर्शनस्य बहुतरतर्कगाढत्वशङ्का निरस्ता। शिष्यपरंपरासु कपिलस्य सर्वज्ञत्वसिद्धत्वादिप्रसिद्धिस्तु कणादगौतमबुद्धार्हतादिष्वपि तुल्या। नचैषां सिद्धानामैकमत्यं, नवा कस्यचिद्विशेषावधारणे प्रमाणमस्ति। ब्रह्मकारणत्वैकात्म्यादिपरप्रत्यक्षश्रुतिविरुद्धार्थवादित्वं च सर्वेषां समानं। "ऋषिं प्रसूतम्" इति श्रुतिस्तु सगरपुत्राणां प्रतप्तुर्भगवदवतारस्य माहात्म्यख्यापनपरा, नावैदिककपिलस्य। नचायमेव स इतिभ्रमितव्यं। तस्येश्वरत्वेनेश्वरनिराकरणव्याघातात्। अतोन्यएवासौ। श्रुतिसामान्यमात्रं तु कपिल इति। एवं कणादगौतमादिष्वपि बोध्यम्। भवति चान्या मनुव्यासादिमाहात्म्यख्यापनपरा श्रुतिः- "यद्वै किं चन मनुरवदत्तद्भेषजं" "स होवाच व्यासः पाराशर्यः" इत्याद्या। मनुना च-

"सर्वभूतेषु चात्मानं सर्वभूतानिचाऽऽत्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।"

इति श्रौतं सार्वात्म्यदर्शनं प्रशंसता तद्विरुद्धनानात्मदर्शनं कपिलादिसम्मतं निन्द्यत इति गम्यते। व्यासेनापि महाभारते-

"बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु।" इति सन्दिह्य,
"बहवः पुरुषा राजन् साङ्ख्ययोगविचारिणाम्"।

(१) अयोग्येतेनेति।। भोगायोग्येभोगानधिकरणे निर्विकारेऽसङ्गेप्यात्मनि तेनाविवेकेन भोगोत्पादनासंभवात् अन्यथा = भोगानधिकरणेपि भोगोत्पादनस्वीकारेऽभोग्येपिभोगप्रयोजकीभूतविषयाभावेपि भोगापत्तेः = इष्टवनितादिविषयाभावेपि पुरुषस्य भोगप्रसक्तेस्तथा खपुष्पादेः सकाशादपि भोगापत्तेर्योग्यतानपेक्षत्वस्योभयत्राप्यविशेषादित्यर्थः।।

इति परेषां मतमुपन्यस्य तन्निरासायोक्तं-

"ममान्तरात्मा तव च ये चान्ये देहसंस्थिताः।
सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित्क्वचित्॥
विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः।
एकश्चरति भूतेषु स्वैरचारी यथा सुखम्॥"

इति श्रौतमैकात्म्यमेव दर्शितम्। एवमन्यैरपीति तदेवानवद्यम्॥ १८॥

इत्थं निरस्ते कापिलसमये, योगिमाहेश्वरकणभक्षाऽक्षचरणानां प्रकृतत्याद्यधिष्ठातृकेवलनिमित्तकारणेश्वर वादोप्यद्वितीयात्मपरिशेषपर्यवसिताऽभिन्ननिमित्तोपादानकारणत्वरूपश्रौतपक्षप्रतिपक्षत्वाद्विशेषतो निरसनीय एवेति तन्निरासायाहनेश इत्यादिश्लोकद्वयेन-

मू०॥ नेशोऽधिष्ठातुमीशोऽतनुकरणगुणस्तार्किकाणां प्रधानं
स्याच्चेत्तन्वक्षवत्त्वं सुचरितदुरितोद्भूतभोगप्रसङ्गः।
दुःखाढ्यं कुर्वतोऽस्य प्रसरति विषमाचारनैर्घृण्यदोषः
कर्मेप्सोश्चक्रकाऽवस्थितिहतिविफलत्वाऽन्यथासिद्धयःस्युः॥ १९॥

नेशइति॥ तार्किकाणां = तर्कप्रधानानुमानेनैव कारणतत्वं निरूपयतां योगिप्रभृतीनां, अतनुकरणगुणः = तनुः = शरीरं, करणानि = बाह्याऽऽभ्यन्तरेन्द्रियाणि, बाह्योपकरणानि च, गुणः = तत्तत्कार्यानुकूलेच्छाप्रयत्नादयस्तद्रहितश्चैतन्यमात्रस्वभावोऽन्यादृशो वा, ईशः = पराभिमतेश्वरो निरवयवं रूपादिहीनत्वादप्रत्यक्षं च प्रधानं, परमाणुनामप्युपलक्षणमेतत्। अधिष्ठातुं = कार्यानुगुणतया प्रवर्तयितुं, नेशः = न समर्थः। शरीरकरणोपकरणसंपन्नश्चेतनोऽहि कुलालादिः मूर्त सावयवं रूपादिमन्मृदादिचक्षुरादिनोपलभ्य हस्तादिना स्पृष्ट्वा घटादिभावं नयतीति दृष्टम्। भवदभिमतेश्वरस्तु तद्विपरीतस्तद्विपरीतमुपादानं नोपलब्धुं स्प्रष्टुं वा क्षमत इत्यर्थः॥ ननु यथा देही देहेन्द्रियादिकं विनैवसाधनांतरेणाऽधिष्ठायव्यवहरति, तथेश्वरोपि प्रधानाद्यधिष्ठास्यतीत्याशङ्कामुद्भाव्याऽनिष्टप्रसञ्जनेन परिहरति-स्याच्चेदिति। तनुः = शरीरं अक्षाणि = इन्द्रियाणि, तनूनि = सूक्ष्माणि इन्द्रियाणि वा, तैस्तुल्यंतद्वत् तद्भावस्त[1]न्वक्षवत्त्वं प्रधानादेः स्यादितिचेत्तर्हि सुचरितेन = पुण्येन,

(१) तन्वक्षवत्त्वं प्रधानादेः स्यादिति चेत्। प्रधानादेर्जैविकशरीरेन्द्रयादि तुल्यत्वं यदिस्यात्तथा च शरीरान्तरादिमन्तरेणैव शरीराद्यधिष्ठातुर्जीवस्यतैरेव देहादिमत्वात्पुण्यपापादिभाक्त्वमिवेश्वरस्यापि प्रधानादिनैवशरीरादिमत्त्व स्वीकारे तस्यापि देहवत्पुण्यपापादि फलभाक्त्वमपिस्यादिति भावः॥

दुरितेन = पापेन च उद्भूतस्य भोगस्य जीव ईश्वरेपि प्रसङ्गो दुर्वारः। भोगदर्शनाद्धि देहिनो देहेन्द्रियाऽधिष्ठातृत्वं कल्प्यते। तद्वदीश्वरस्य प्रधानाधिष्ठातृत्वकल्पने तत्कल्पकभोगोप्यवश्यं कल्प्येतेति भावः।। अथवा अस्तु कुलालादेरिवेश्वरस्यापि देहेन्द्रियादिकं काहानिस्तत्राह-स्याच्चेदिति।। ईश्वरस्य तन्वक्षवत्वं देहेन्द्रियादिमत्वं स्याच्चेत् = अभ्युपगम्येत यदि, तर्हि संसारिवदेव सुकृतदुष्कृतफलभोगप्रसङ्गः। देहेन्द्रियादेर्भोगायतनत्वादितिनियमादिति भावः। किंचेश्वरः करुणानिधिर्वीतरागः स्वतन्त्रः प्राणिदुःखनिदाने सर्गे न प्रवर्तेत। प्रवर्तमानश्च पराधीनः? स्वार्थरागी वा? स्यात्। तत्राद्ये तस्य प्रवर्तयिताऽन्यस्तस्याप्यन्य इत्यनवस्था, अस्मदादिसाम्यं च स्यादिति। द्वितीयावलम्बने तत्राप्याह-दुःखाढ्यमिति। दुःखाढ्यदुःखबहुलं जगत्कुर्वतः, अस्य = आनुमानिकेश्वरस्य कांश्चिद्देवादीन् स्वभावसुखिनः करोति, नारकानतिदुःखिनो, मानुषादीनुभयस्वभावानिति निष्कारणमेव विषमस्याचरणं विषमाचारः, निर्घृणस्य भावो नैर्घृण्यं निर्दयत्वं चेति दोषः प्रसरति। तथाचानीश्वरता प्रसङ्गः, क्लेशकर्मेत्यादिभवदुक्तलक्षणव्याहतिश्चेति भाव;। प्राणिकर्मसापेक्षत्वान्नोक्तदोष इत्यत आह-कर्मेप्सोरिति।। सर्गादौ प्रवृत्तिवैषम्यव्यवस्थाहेतुत्वेन कर्मेप्सोः = प्राणिकर्माण्यपेक्षमाणस्य तस्याऽभ्युपगमे इति शेषः, चक्रकं = अचेतनस्य स्वतः प्रवृत्त्ययोगात्कर्मेश्वरेण फलारम्भाय प्रवर्तनीयं, कर्मणाचेश्वरः प्रवर्तनीय इति लक्षणया चक्रवत्परिवर्तनात्मा अन्योन्याश्रयः। अथवा-सर्गादिकाले परिपाकात्कर्मेश्चरप्रवर्तकं वाच्यम्। अन्यथा प्रलयारम्भकालेपि तस्य तथात्वापत्ते,ः परिपाकश्च परिणामलक्षणोगुणानां प्रवृत्त्यधीनः गुण, प्रवृत्तिरीश्वराधीना, स च कर्माधीन इत्यनेकेषां परिवर्तनाच्चक्रकं। अथवा-कर्मणेश्वरप्रवृत्तिः, तया प्रधानस्य प्रवृत्तिः, तया महदादिक्रमेण शरीरादिनिष्पत्तिः, तया कर्मनिष्पत्तिः, कर्मणाचेश्वर-प्रवृत्तिरिति चक्रकं। पूर्वसर्गार्जितकर्मभिरुत्तरोत्तरसर्गप्रवृत्तिरितिचेन्न। पूर्वसर्गस्यापिदोष-साम्यादसिद्धेः। यदि च विनैव मानं पूर्वपूर्वसर्गाद्यभ्युपगम्येत, तर्ह्यवस्थिति-हतिः = अनवस्थेत्यर्थः। तथाचाऽन्धपरंपरान्यायापत्तिरित्यर्थः।

न च बीजाङ्कुरवददोष इति युक्तं। बीजाङ्कुरयोरन्वयव्यतिरेकस्यप्रत्यक्ष-सिद्धत्वेनाऽनवस्थायाः प्रामाणिकत्वात्, कर्मेश्वरप्रधानादीनामनुमानकल्प्यत्वेन वैषम्यात्, एवमीश्वरस्य कर्मप्रवर्तने कर्मान्तरसापेक्षत्वेप्यनवस्था बोध्या। विफलत्वं निष्फलता। यदि च कर्मप्रवर्तने कर्मान्तरनिरपेक्ष एव ईश्वरः प्रवर्तत इति (१)क्लृप्तविपरीतमपि

(१) क्लृप्तविपरीतमिति।। क्लृप्तात्कर्मसापेक्ष एव ईश्वरः प्रधानादि प्रवृत्ति हेतुरित्यस्माद्विपरीतं कर्मान्तरनिरपेक्ष एव ईश्वरः कर्मप्रवृत्तिहेतुरित्येतद्यदि स्वीक्रियेदित्यर्थः।

स्वीक्रियेत, तर्हि प्रधानप्रवर्तनेपि कर्म निरपेक्षः स्यादिति कर्मसापेक्षत्वकल्पन-वैफल्यमित्यर्थः। अथवा-लोकेकर्माधीनानामपि पुरुषाणां स्वारसिकप्रवृत्तेः स्वार्थोद्देशेनैव दर्शनादीश्वरस्य च स्वार्थाऽनभ्युपगमात्प्रवृत्तिवैफल्यम्। दयालोः स्वार्थोद्देशं विनापि प्रवृत्तिर्दृष्टेति चेन्न। तस्यापि परदुःखदर्शनजन्यस्वदुःखनिवृत्तेः स्वार्थत्वात्। ईश्वरस्य च तथात्वकल्पने दुःखित्वप्रसङ्गः। अथवा-कर्मभिरीश्वरः प्रवर्त्यते, तेन प्रधानमिति कल्पनातः कर्मणामेव प्रधानप्रवर्तकत्वकल्पनंलघीयः* (१)"तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किन्तेन" इति न्यायात्। तथाचेश्वरकल्पनावैफल्य मित्यर्थः। यदितु कश्चिद्ब्रूयान्नवयमनुमानेनेश्वरं कल्पयामः, किन्त्वागमग्रन्थ विशेषसिद्धं तं वदाम इति। स वक्तव्यः। कथं तेषामागमानां प्रमाण्यं श्रुति मूलत्वेनेति चेन्न। (२)प्रत्यक्षश्रुतिविरुद्धागममूलश्रुति कल्पनायाः पूर्वतंत्रे निरासात्। यदितु सर्वज्ञेश्वर वचनत्वादेव प्रामाण्यं, तदा आगमप्रामाण्ये सर्वज्ञेश्वरसिद्धिः, तत्सिद्धौ चागमप्रामाण्यसिद्धिरित्यन्योन्याश्रय इति।। एतेनपञ्चरात्राद्यागमबलाद्वासुदेवा-ख्यादीश्वरात्सङ्कर्षणाख्यजीवस्य, ततश्च प्रद्युम्नाख्य मनसः, ततोऽनिरुद्धाख्याऽहंकार-स्यचोत्पत्तिमभ्युपगच्छन्तः सात्वता अपि परास्ताः। "न जायते म्रियते वा विपश्चित्" इत्यादिश्रुतिविरोधात्। अभिनवोत्पन्नजीवस्यप्राक्संचितसुकृताद्यभावेनशरीराद्यसंभवात्। चैतन्यस्यापरिणामिनोवास्तवोपादानत्वाऽसंभवात्परिणामित्वेत्वनित्यत्वापत्तेश्चेति। श्रौतेश्वरकारणतापक्षेप्यधिष्ठानानुपपत्त्यादयो दोषास्तुल्या इति चेन्न। (३)श्रौतेश्वरस्या-ऽनिर्वचनीयसर्वशक्तिसम्पन्नमायाशबलत्वेन सर्वशक्तिमत्वात्। किंच, न वयमनुमानबलेन कारणं व्यवस्थापयामः। किन्तु श्रुतिबलेन। श्रुतिर्हि रूपादिविषये चक्षुरादिवत्स्वविषये निरपेक्षं प्रमाणं। यस्तु श्रुतिसिद्धार्थे कथंचिद्दृष्टार्थानुसारोऽप्य-वलम्ब्यते तत्सुहृद्भावमात्रेण। केवलानुमानं तु दृष्टसाधर्म्य मात्रावलम्बनं न किंचिद् दृष्टविपरीतं कल्पयितुं क्षमते। यथाहुराचार्यवाचस्पतिमिश्राः "आगमानपेक्षितमनुमानन्तु

(१) तद्धेतोरेवेत्यस्यस्थाने तद्धेतुर्हेतोरेवेति पाठं परिकल्प्य। तत्पदेन प्रधान प्रवृत्तिहेतुरीश्वर एव ग्राह्यस्तथा च प्रधानप्रवृत्ति हेतुभूतेश्वर प्रवृत्तेर्हेतुभूतं कर्मैव प्रधानप्रवृत्तिहेतुरस्तु किमीश्वरेणेत्यर्थो बोध्यः। यथाश्रुतपाठे तु तद्धेतोरीश्वर प्रवृत्तिहेतोः कर्मण एव प्रधान प्रवृत्ति हेतुत्वमस्तु किं मध्यवर्तिनेश्वरेणेत्यर्थो बोध्यः।।

(२) प्रत्यक्षश्रुतीति वर्तमान समयेऽध्ययनादिविषयतामापन्नाया श्रुतिस्तत्तद्वेदीयोपनिषत्। तद्विरुद्धं यदागमं कपिलादिप्रणीतंशास्त्रं तस्य वैदिकत्व सिद्धये तन्मूलभूतश्रुतिकल्पनाया इत्यर्थः।।

*ईश्वर प्रवर्तन हेतु कर्म तदेव प्रधान प्रवर्तनहेतुरस्तु।

(३) श्रौतेश्वरकारणतापक्षेपीति।। जगतोऽभिन्ननिमित्तोपादानकारणमीश्वर इति पक्षेपि कर्मपिक्षायाः अवश्यंभावित्वेन सांख्यपक्षोक्ताश्चक्रिकाऽनवस्था विफलत्वादयो दोषास्तुल्या एवेत्यर्थः।।

दृष्टसाधर्म्येण प्रवर्तमानं दृष्टविपर्यये तु तुषादपि विभेतितराम्" इति।। अन्यथा-सिद्धिः= आवश्यकमायाशबलब्रह्मणैव जगन्निर्माणसिद्धिः।। अयं भावः।। धर्माधर्मसापेक्षत्वमीश्वरस्य वदता धर्माऽधर्मयोः प्रमाणान्तराप्रसरादवश्यं श्रुतिरेव मानमित्यभ्युपगन्तव्यम्। तथाचार्धजरतीयन्यायायोगाज्जगत्कारणेपि सैव मानमित्य-भिन्ननिमित्तोपादानब्रह्मसिद्धौ तेन परकल्पितेश्वरप्रधानादेरन्यथासिद्धिरिति। अत्रसाङ्ख्ययोगिनां श्रुतिविरुद्धः प्रधानकारणवाद ईश्वरताटस्थ्यं च निरस्तम्। पुरुषनानात्वं त्वग्रे निरसिष्यते। यस्तु श्रुत्यविरुद्धांशः पुरुषस्याऽसङ्गचिद्रूपत्वं, अष्टाङ्गयोगादिकं च तदभ्युपगम्यत एवेति बोध्यम्।।१९।।

नन्वसङ्गोदासीनचिद्रूप ईश्वरः प्रधानस्याऽमूर्तस्याधिष्ठानेऽस्त्वसमर्थः नित्यज्ञानेच्छाकृतिमान् सर्वमूर्तद्रव्यसंयोगी तु मूर्तैः परमाणुभिः पृथिव्यादीन् सृजतीति युक्तमिति कणभक्षाऽक्षचरणयोः पक्षमपि विशेषतः परीक्ष्य निरस्यति-सर्वज्ञ इत्यादिश्लोकद्वयेन-

मू०।। सर्वज्ञः सर्वलिप्सुः सकलकृतियुतो नित्यमीशो यदिस्या-
त्सर्वं कार्यं सदास्यादुदयभृतिलया यौगपद्येन च स्युः।
बाह्योपादानवत्स्यात्तनुकरणधियां विश्वसर्गे व्यपेक्षा
निस्तर्कं चानुमानं कृतिरपिहियतश्चेष्टयाऽर्थं विधत्ते।। २०।।

सर्वज्ञइति।। यदि ईशः पराभिमतईश्वरः, नित्यम्अनवरतमेव, सर्वज्ञः = सर्व-विषयकैकज्ञानवान्, सर्वलिप्सुः = सर्वविषयकैकेच्छावान्, सकलकृतियुतः = सर्वजननानुकूलैकयत्नवान् स्यात्तदा सर्वंकार्यं सदैवस्यात्, तथाच नियतकालफल-पुष्पोद्गमादिव्यवस्था नस्यादित्यर्थः। सहकार्यन्तरासमवधानान्नदोष इति चेन्न। नित्यसहकारिणां सदैव समवधानाज्जन्यानान्तु तदुत्पत्तेरप्यापाद्यमानत्वेन दोषसाम्यादन-वस्थापत्तेश्च। किंचैकस्याएवेच्छायाः सिसृक्षारिरक्षिषासंजिहीर्षारूपत्वादमोघत्वाच्च समस्तकार्याणामुदयः = उत्पत्तिः, भृतिः = स्थितिः, लयः = ध्वंसश्च, यौग-पद्येन = एकक्षणावच्छेदेनैवस्युः। किंचैकैकवस्तुसिसृक्षा तत्तद्वस्तूत्पत्तिक्षणातिरिक्तयोः अनाद्यनन्तयोः पूर्वोत्तरकालयोः कदापि विषयाऽसमवधानान्मोघैव, क्षणमात्रं च सा सफलेत्य संभावितकल्पने गगनेऽपि कदाचित्कुसुमादयकल्पना स्यात्। एवं संजिहीर्षायामपीति। नित्येच्छाभ्युपगमे दोषान्तरसमुच्चयार्थश्चकारः। प्राणिकर्मवशेन व्यवस्थोक्तिस्तु प्रागेव निरस्ता। किंच, क्षित्यादिकं सकर्तृकमित्याद्यनुमानेनेश्वरः सिध्यन् जीवत्पुरुषकेशलोमादिदृष्टान्तसंभवाल्लाघवाच्चोपादानाऽभिन्न एव सिध्यतु,

किमन्यादृशेन। यदि च कुलालादिदृष्टान्तमेवावलंब्य बाह्योपादानसापेक्ष एवानुमीयते, तर्हि तद्वदेवेश्वरस्यापिकार्यनिर्माणे शरीराद्यपेक्षापि स्यादित्याह-बाह्येति।। बहिर्भवं बाह्यं, कर्तृव्यतिरिक्तमित्यर्थः, उपादानंचपरपरिभाषया समवायिकारणं परमाण्वादि, तस्येव तद्वत्, तनोः = शरीरस्य, करणानाम् = इन्द्रियाणां, धियः = परपरिकल्पित-मनसः, फलोपहितेच्छाकृत्यादिजनकतावच्छेदकवैलक्षण्यशालिजन्यज्ञानस्य वा विश्व-सर्गे = द्वयणुकादिकार्योत्पादने, विशिष्टा अपेक्षा व्यपेक्षा = (१)इच्छास्यात्तथासति प्रागुक्तदोषइतिभावः।।

नन्वनुमानेन कर्तृत्वमात्रेणेश्वरः सिध्यति। कर्तृत्वं चोपादानगोचरा-ऽपरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति धर्मिग्राहकमानेन लाघवतर्कसहकृतेन नित्यज्ञानेच्छाकृतय एव सिद्ध्यन्ति न शरीरादयइत्याशङ्क्याऽप्रयोजकत्वेनानुमानमेव निरस्यति-निस्तर्कमिति।। "क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्" इत्यनुमानं निस्तर्कं = व्यभिचारशङ्कानिवर्तनक्षमतर्कशून्यम्। न चकर्तृत्वेन (कार्यत्वेन) सामान्यकार्यकारणभावभङ्गापत्तिरेवानुकूलतर्क इति वाच्यम्। सकलसाधारणस्यैकस्य कार्यत्वस्य दुर्वचत्वेन सामान्यकार्यकारणभावे मानाभावात्। तथाहि-न तावत्कार्यत्वं प्रागभावप्रतियोगित्वं। प्रागभावाऽनभ्युपगमात्। अभ्युपगमेऽपिविनाश्यभावत्वं प्रागभावत्वं, विनाशित्वंध्वंसप्रतियोगित्वं, जन्याभावत्वं ध्वंसत्वं, जन्यत्वं च प्रागभावप्रतियोगित्वमिति (२)चक्रकापत्तेः। नापि कारणनियतपश्चाद्भावित्वं (卐) तत्।। कारणत्वस्य कार्यनियतपूर्ववृत्तित्वरूपत्वेनेतरेतराश्रयात्। नाप्युत्पत्तिमत्वं, उत्पत्तिश्चासतः सत्वमाद्यक्षणसंबन्धोवेति युक्तं। कारणसहस्रेणाप्यसतः सत्वायोगादा-द्याऽसिद्धेः, क्षणानां दुर्लक्ष्यत्वेनानुगतव्यावर्तकधर्मशून्यत्वेन च द्वितीय-स्याप्ययोगात्। तस्माद्दण्डनियतपश्चाद्भावित्वं घटे दण्डकार्यत्वमित्येवं *प्रातिस्विकरूपेण कथंचिद्भिन्नं भिन्नमेव तन्निर्वाच्यम्। तच्चाऽननुगमान्न कार्यतावच्छेदकम्। अन्यतमत्वादिनाकथंचिदनुगमेप्यसंदिग्धाव्यभिचारकलघुभूतघटत्वा-

---

(१) तथासति।। विश्वसर्गे जन्येच्छादीनां सहकारिकारणतया स्वीकारे सति तेषामपि कार्यत्वेन तत्कारणतया त्विच्छान्तरादीनां स्वीकारे आत्माश्रयाद्यनवस्थान्तो दोषः स्यादितिभावः।।

(२) चक्रकापत्तेरिति।। कार्यत्वस्य स्वसिद्धये प्रागभावापेक्षा प्रागभावस्य च स्व स्वरूपसिद्धये प्रध्वंसापेक्षा तस्य च स्वसिद्धये स्वलक्षणघटकीभूतकार्यत्वापरपर्यायजन्यत्वापेक्षा पचिलक्षण चक्रकापत्तेर्न प्रागभावप्रतियोगित्वं कार्यत्वमिति भावः।।

(卐) तत् = कार्यत्वम्।

* प्रातिस्विकरूपेण = भिन्न-भिन्न रूपेण।

दिविशेषधर्मावच्छिन्नं प्रति कुलालादेः प्रातिस्विकरूपेणैवकर्तृत्वकल्पतेः न गुरुभूतसन्दिग्धसव्यभिचारकसामान्यधर्मस्यकार्यतावच्छेदकत्वम्। किंच कार्यत्वस्यैव कार्यतावच्छेदकत्वे आत्माश्रयापत्तेः। ज्ञानेच्छाप्रयत्नेष्ववच्छेदकत्वेन शरीरस्या-न्वयव्यतिरेकसिद्धा कारणता नित्यज्ञानेच्छा-कृतिस्वीकारे भज्येतेति प्रतिकूलतर्काणां सत्वाच्चानुमानमेव दुर्लभमिति भावः। ननु यत्नं विना कुलालादेर्घटादिजन-कत्वाऽयोगात्कार्यमात्रे यत्नस्य कारणता आवश्यकी कार्यत्वं चातिरिक्तमेवाऽखण्डं कार्यतावच्छेदकं। तथाच क्षित्याद्यनुकूलयत्नस्य जीवेष्वसंभवादीश्वरस्तदाश्रयः सेत्स्यतीत्याशङ्क्याह-कृतिरिति।। कृतिः = यत्नोऽपि, हि = यस्मात्कारणाच्चेष्टया अर्थ कार्यं, विधत्ते = जनयति न साक्षादित्यर्थः। तथाच न कृतिः कार्यमात्रे कारणं, किन्तु चेष्टात्वाऽवच्छिन्नंप्रत्येव, चेष्टात्वं च शरीरजन्यतावच्छेदकः क्रियात्वव्याप्यजातिविशेषः। (१)नचोत्क्षेपणत्वादिना सांकर्यं।। साङ्कर्यस्य जातिबाधकत्वाऽनभ्युपगमात्। अखण्डोपाधिर्वा चेष्टधातुशक्यतावच्छेदक इति भावः। इत्थं च चेष्टाऽननुविधायिनि मेघच्छायादौ यत्नाऽदर्शनादीश्वरस्य च क्षित्यादिजननानुकूलशरीरचेष्टानभ्युपगमाद्दर्शितानुमाने चेष्टाजन्यत्वं द्रव्यत्वादिपक्ष-धर्मावच्छिन्नसाध्यव्यापकत्वात्तदववच्छिन्नसाधनाऽव्यापकत्वाच्चोपाधिरित्यपि बोध्यम्।।२०।।

इत्थं तार्किकाणामीश्वरकारणतावादं निरस्य परमाणुकारणतावादमपि निरस्यति-

मू०।। कस्मादण्वोः क्रियास्यात्कथमथ मिलितौ निष्प्रतीकौकथं वा
कार्यं ताभ्यां तृतीयं किमिति च न महत्पारिमाण्डल्यतः स्यात्।
तेभ्यः कस्मान्महान्स्यात्किमिति पुनरसावेव नित्यो न तेस्या
न्नित्यश्चाणुः कथं वा निरवयव इति ब्रूह्यसत्कार्यवादिन्?।। २१।।

कस्मादिति।। हे असत्कार्यवादिनकारणात्मना प्रागुत्पत्तेरसदेव कारणा-दत्यन्तभिन्नं कार्यमुत्पद्यत इत्यभ्युपगच्छन् इति नैयायिक वैशेषिकयोस्तन्त्रेण सम्बोधनम्।

(१) न चोत्क्षेपणादिना सांकर्यमिति।। वाय्वादिनोर्ध्वोत्क्षिप्तफलादौ चेष्टात्वं विहायोत्क्षेपणत्वं वर्तते। देवदत्तादिनां शरीरप्रसरणादौ तूत्क्षेपणत्वं विहाय चेष्टात्वं च वर्तत इति परस्परात्यन्ताभाव समानाधिकरणे वर्तमानयोश्चेष्यत्वोत्क्षेपणत्वयोरेकस्मिन् देवदत्तादि शरीरोत्क्षेपण क्रियायां समावेश सम्भवात्साङ्कर्यमिति बोध्यम्।।

त्वम् अस्मिन्नाक्षेपनिवहे ब्रूहिं = उत्तरमिति शेषः। एषा हि तयोः प्रक्रिया- परमाणवः किल दोधूयमानाः कंचित्कालमनारब्धकार्याः यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणाश्चाऽवतिष्ठंते। तेतु सर्गादौ जीवाऽदृष्टवशादीश्वरेच्छया परस्परं संयुज्यद्व्यणुकादिक्रमेण कृत्स्नकार्यद्रव्यमारभन्ते। परमाण्वादिकारणगतरूपादिगुणाश्च क्रमेण द्व्यणुकादौ स्वसमानजातीयं गुणान्तरमारभन्ते। परमाणुद्व्यणुकगतेऽणुत्वह्रस्वत्वे तु न परिमाणान्तरमारभेते। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्व- नियमेनाणुजन्यस्याणुतरत्वप्रसङ्गात्। किन्तु परमाणुद्वित्वसङ्ख्यया द्व्यणुकेऽणुत्वह्रस्वत्वे, द्व्यणुकत्रित्वसङ्ख्यया च त्र्यणुके महत्वदीर्घत्वे चेति जायेते। परमाणवस्तु नित्या निरवयवाश्चेति। तां क्रमेण दूषयिष्यन् संयोगस्य क्रियाधीनत्वात्परमाणुष्वाद्यक्रियैव तावन्न संभवतीत्यभिप्रेत्याह-कस्मादिति। अण्वोः = परमाण्वोः, क्रिया = संयोगानुकूलं चलनं सर्गादौ कस्माद्धेतोः स्यात्। किं प्रयत्नवदीश्वरसंयोगात्? उताऽदृष्टवदात्म- संयोगात्? उत-मूर्तद्रव्यान्तरनोदनाख्य संयोगात्? उत वेगादिवशात्? नाद्यः, निरस्तत्वात्। न द्वितीयः, प्रलयारम्भकालेऽपि सर्गप्रसङ्गात्। न तृतीयः, प्रलये परमाण्वतिरिक्तमूर्तद्रव्यानभ्युपगमात्, परमाण्वंतरसंयोगस्यापिक्रियापेक्षत्वेनान्योन्या- श्रयचक्रकानवस्थानां प्रसङ्गात्। न चतुर्थः, प्रलयाऽऽद्यक्षणमारभ्य यावत्सर्गं प्रतिपरमाणु क्रियावेगपरम्पराकल्पनाया अप्रामाणिकत्वादतिगौरवग्रस्तत्वाच्च। किंच, पूर्वप्रलयोऽपि परमाणुपर्यन्तमवयवविभागाद्वाच्यः।। तत्रापि परमाणुक्रियैव कारणं इति दोषसाम्याद्विभागासिद्ध्याऽदृष्टस्य सुखदुःखान्यतरपर्यवसायित्वनियमेन तदननुकूल- प्रलयस्याऽदृष्टहेतुकत्वानुपपत्तेश्चप्रलयस्याप्यसिद्धिः परमतेस्यादिति "दोधूयमाना" इति रिक्तंवचः।।

क्रियाभ्युपगमेऽपि परमाण्वोः संयोगो न सिद्ध्यतीत्याह-कथमिति। अथ = अनन्तरम्, क्रियाभ्युपगमेपीत्यर्थः। निष्प्रतीकौ = निरवयवौ, अणू इति विभक्तिविपरिणमेनाऽनुषज्यते। किमेकदेशेन? उत कात्स्न्येंन? नाद्यः। एकदेशाभ्युपगमे निरवयवत्वभङ्गापत्तेः। न द्वितीयः। कात्स्न्येंन संयोगे उपचयासंभवेन द्व्यणुकस्यापि परमाणुत्वापत्तेः। संयोगस्याऽव्याप्यवृत्तित्वनियमभङ्गापत्तेः, निश्छिद्रे एकस्मिन् अपरस्य प्रवेशाद्यसंभवेन कात्स्न्येंन संयोगस्यानुभवानारोहाच्च। तत्तद्दिगवच्छेदेन कल्पितप्रदेशे संयोग इति चेन्न। कल्पितस्य कार्यनिर्वाहकत्वे मायावादाभ्युपगमापत्तेः। संयोगाभ्युपगमेऽपि तृतीयद्व्यणुकोत्पत्तिर्दुरुपपादेत्याशयेनाह-कथं वेति। वा शब्दः

शङ्कान्तरद्योतकः, ताभ्यां परमाणुभ्यां भिन्नं तृतीयं द्व्यणुकं कथं स्यादित्यनुकृष्यते। कार्यकारणयोस्तादात्म्यातिरिक्तसंबन्धस्य दुरुपपादत्वादितिभावः। अवयवावयविनोः समवाय एव सम्बन्ध इति चेन्न। तस्य संबन्धिभ्यां भेदे (१)ताभ्यामसम्बद्धस्य संयोगस्य संबन्धत्वादर्शनात्संबन्धिव्यवस्थानुपपत्तेश्च तस्य सम्बन्धान्तरं, तस्यापि संबंधान्तरं वाच्यमित्यन्योन्याश्रयचक्रकानवस्थानां प्रसङ्गात्। अभेदे (२)तदभिन्नाभिन्नस्य तदभेदावश्यकत्वात्परमाणुद्वयस्याप्यैक्यापत्तिरिति दूरापास्ता तृतीयद्व्यणुकसिद्धिः, अपसिद्धान्तश्च। किंच, (३)अत्यन्तभिन्नयोः कुण्डबदरयोरिव संयोगएव संबन्धो न्याय्यः। स च पूर्वसिद्धयोः क्रियाधीन एवेति (४)सम्बन्धोत्पत्त्यनुपपत्तिः। (५)किंच, समवायस्योभयसम्बन्ध्याश्रितत्वे एकतरविनाशान्नाशापत्तिः। एकाश्रयत्वे सम्बन्धत्वानुपपत्तिः। सम्बन्धो हि सम्बन्धिभ्यां भिन्नस्तावाश्रितश्चेति तल्लक्षणहानात्। किंच प्रत्यवयवमवयवी कात्स्न्र्येन सम्बद्धः? उतैकदेशेन? आद्ये कर्णाद्यवयवेपि कृत्स्नागौरस्तीति दोहनादिप्रसङ्गः। मूर्तद्रव्यस्यैकस्यैकत्र कात्स्न्र्येन सतोऽन्यत्र तथावर्तितुमशक्यत्वात्प्रत्यवयवमवयविभेदप्रसंगश्च। द्वितीये अवयवेष्वेकदेशेन वर्तितुमवयवान्तरं, तत्रापि वर्तितुमवयवान्तरमपेक्षणीयमित्यनवस्था प्रसङ्गो, मेरुसर्षपयोः समानपरिमाणप्रसङ्गश्च। अनयैव दिशायथायोगं द्रव्ये समवायेन गुणोत्पत्तिः, कारणगुणानां कार्यगुणारम्भकत्वं च निराकरणीयम्। अभ्युपगमेऽपि परमाणुद्व्यणु-कयोरणुत्वह्रस्वत्वे परिमाणान्तरारम्भके न भवतः, त्र्यणुकादीनां महत्वदीर्घत्वे तथा भवत इति वैषम्यस्यदुरुपपादत्वात्। द्व्यणुकस्य महत्वप्रसङ्गस्त्र्यणुकस्याणुतरत्व प्रसङ्गो वा दुर्वारइत्यभिप्रेत्याहकिमितीत्यादिना।। परिमण्डलानि = परमाणवः तेषां भावः पारिमाण्डल्यं तत्परिमाणं, तस्मात् द्व्यणुकंपरमाण्वपेक्षया महत् किमिति तस्मात् *नचाणुतरत्वप्रसङ्गः, परमाण्वपेक्षयाऽणुतरत्वस्याऽप्रसिद्धस्याऽऽपाद-

(१) ताभ्याम्।। परमाणुभ्यामसम्बद्धस्य समवायस्य द्विपरमाणुभ्यां सम्बन्ध शून्यस्य द्व्यणुकासमवायिकारणीभूतपरमाणुद्वय संयोगस्य सम्बन्धत्वादर्शनादित्यर्थः।।

(२) तदभिन्नाभिन्नस्य तदभेदावश्यकत्वादिति।। अनुयोग्यात्मैकैकपरमाण्वभिन्नेन समवायेनाभिन्नस्य तथाभूतस्यापर परमाणोरनुयोग्यात्मकाद्यपर परमाण्वभेदस्यावश्यकत्वात्परमाणुद्वयस्याप्येकत्वा-पत्तिश्चेत्यर्थः।।

(३) अत्यन्तभिन्नयोरवयवावयाविनोरित्यर्थः।।

(४) सम्बन्धोत्पत्त्यनुपपत्तिरिति। सम्बन्धीभूतस्य पूर्वमसिद्धतया तयोः सम्बन्धस्योत्पत्त्यसम्भव इत्यर्थः।।

(५) कार्यकारणयोर्भेद इति तार्किकपक्षे दोषान्तरमाह किञ्चेति।

*नोत्पद्यत इति शेषः। परमाणुपरिमाणादेव द्व्यणुके परमाणुपरिमाणापेक्षया महत्परिमाणं कुतो नोत्पद्यत इत्यर्थः।

यितुमशक्यत्वात्। नित्ये परममहत्त्वे मानाभावेन परिमाणजन्यतावच्छेदकस्य वैजात्यस्यैवमहत्वरूपवत्तद्व्याप्यत्वाद्वाद्व्यणुक परिमाणेपि तस्यानिवारणात्, अवयवोपचयेपि परिमाणानुपचयस्यानुभवविरुद्धत्वाच्चेति भावः। अनुभवविरुद्धस्याप्यभ्युपगमे त्र्यणुकेपि महत्वं न स्यादित्याशयेनाहतेभ्य इति।। तेभ्यो = द्व्यणुकेभ्यो जायमानस्त्रुटिर्महान् कस्मात् स्यात्। अणुजन्यस्याणुतरत्वप्रसङ्गस्य दुर्वारत्वात्। द्व्यणुकापेक्षयाऽणुतरत्वस्य परमाणौ प्रसिद्धत्वात्।।

अयं भावः-न तावत् द्वित्वत्रित्वादिसङ्ख्यायाः परिमाणहेतुत्वं संभवति। प्रलये शरीराद्यभावेन जीवानामपेक्षाबुद्ध्यसंभवेन द्वित्वोत्पत्त्यसंभवात्। भगवदपेक्षाबुद्धेश्चानादेर्द्वित्वोत्पादकत्वाभ्युपगमेद्वित्वस्योत्पत्तिकालाऽपरिचयादनादित्वापत्तौ(प०टि०)परमाणुद्वित्वादेःजन्यत्वाजन्यत्वाऽतिरिक्ततृतीय विधापत्तेश्च। नाशानापत्तेश्च, अपेक्षाबुद्धिनाशस्य द्वित्वादिनाशहेतुत्वाभ्युपगमाद्भगबद्बुद्धेर्नाशायोगात्। अतो द्व्यणुकादिपरिमाणमेव तत्र हेतुरिति बलादभ्युपगन्तव्यमित्यणुतरत्वप्रसङ्गो (१)दुर्वारएवेति। किंच, प्रत्यक्षसिद्ध त्रुटिरेवनित्योस्तु, किं परमाणुकल्पनयेत्याहकिमिति। असौ = त्रुटिरेव, ते = तव नित्यः किमिति न स्यात्। यदि तु चाक्षुषद्रव्यस्य सावयवत्वानित्यत्वनियमात्तस्यावयवाः कल्प्येरंस्तर्हि मूर्तद्रव्यस्यापि तथात्वनियमात्परमाणोरप्यनित्यत्वसावयवत्वे स्यातामित्याह-नित्यश्चेति। अणुः = परमाणुर्वा, नित्यः निरवयवश्च कथमिति सम्बन्धः। अष्टौ दश वा दिशः सम्बद्धमूर्तस्य परमाणोरपि तावन्तोऽवयवा अवश्यमपेक्षणीया इति सावयवत्वस्य दुर्वारत्वादित्यर्थः।। अत्राऽसत्कार्यवादिन्निति संबोधनेनसकलशिष्टपरिगृहीतसत्कार्यवादविरुद्धबौद्धाद्यभिमताऽसत्कार्योत्पत्तिस्वीकारेणापि कणादादेरनुपादेयवचनता सूचिता। यथाहुः सांख्याः-"शक्तिमद्धिकारणम्, शक्तिश्च कारणनिष्ठा कार्यस्य सूक्ष्मावस्थैव, तथाच शक्त्यात्मना मृदादौ सत एव घटादेराविर्भावाय कारणान्तराणि, नासतः सत्वाय, असतोह्युत्पतत्त्यभ्युपगमे सर्वत्राऽसत्वाविशेषात्सिकतादिभ्योऽपितैलादिनिष्पत्तिप्रसङ्गात्। नचासत्वात्कारणेनासंबद्धं तेनोत्पादयितुंशक्यमिति कारणोपादानवैयर्थ्यप्रसङ्गाच्च। किंच, असतउत्पत्तिः सती चेत् कारणानां वैयर्थ्यम्, असती चेत्तस्या उत्पत्तिरन्या तस्या अप्यन्येत्यनवस्था। पटादिरूपा चेत्पट उत्पत्तिरित्यनर्थान्तरम्। आद्यक्षणसम्बन्धोऽपि सम्बन्धिसिद्ध्यधीन इति स्वरूपतः

(१) पूर्वोक्तन्यायेनैव द्व्यणुकस्यापि परमाणुभ्यामभेदप्रसक्त्या परमाणुद्वाभ्यां द्व्यणुक आरभ्यत इति सिद्धान्तहान्यापत्तिश्च दोष इति भावः।

कारणे सदेव पटाद्याविर्भवतीति सिद्धम्'' इति।। वस्तुतस्तु सत आविर्भावाय कारणकलापोपादानमिति मतेपि, आविर्भावः सन्वा? असन्वा? आद्ये सामग्र्युपादानवैयर्थ्यम्, द्वितीयेत्वसत्कार्याभ्युपगमस्स्यादिति दोषसाम्यान्न सांख्याभिमतो घटादेः स्वतस्सत उत्पादनलक्षणस्सत्कार्यवादस्साधुः। किन्तु यथेदानीं घटादिकं ब्रह्मसत्तयैव सत्, एवमुत्पत्तेः प्रागपि। न हि कारण ब्रह्मसत्तातिरेकेण कार्ये पृथक्सत्तास्ति ''वाचारंभणं विकारो नामधेयम्'' ''तत्सत्यं स आत्मा'' ''सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद'' इत्यादिश्रुतिभ्यः। आविर्भावतिरोभावौ तु मायामयस्यानिर्वचनीयावेवेति तत्त्वम् ।।२१।।

इत्थं अर्धवैनाशिकानां वैशेषिकादीनां समये निरस्ते हैतुकत्वाविशेषात् सर्ववैनाशिकबौद्धराद्धान्तं निरसितुमवसरः। चत्वारः किल बुद्धस्य शिष्याः- सौत्रान्तिकः, वैभाषिकः, योगाचारः, माध्यमिकश्चेति। तत्र बुद्धेनाऽऽद्ययोर्बाह्यार्थेष्वभिनिवेशमालोक्य तदाशयानुसारेणैव सर्वशून्यतालक्षणे तत्त्वे तयोर्बुद्धेरवताराय बाह्यार्थवादमभ्युपेत्य राद्धान्तोऽभिहितः। तृतीयस्य त्वीषत्परिपक्वचित्तस्य विज्ञानमात्रास्तित्ववादेन, चतुर्थस्य मुख्याधिकारिणस्तु साक्षादेव शून्यवाद उपदिष्टः। यथाऽऽहुः-

देशना लोकनाथानां सत्वाशयवशानुगाः।।
भिद्यन्ते बहुधा लोके ह्युपायैर्बहुभिः पुनः।।

गंभीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्नाऽपि देशनाऽभिन्ना शून्यताद्वयलक्षणा।।'' इति।।

देशनाः = उपदेशाः, लोकनाथानां = बुद्धानां, पूजायां बहुवचनम्। गांभीर्यं = गूढाभिप्रायता, उत्तानता = स्फुटोक्तिरित्यर्थः। तत्र सौत्रान्तिकमते आन्तरे विज्ञाने घटपटाद्याकारवैचित्र्यस्यानुभाविकस्य तत्तदर्थसादृश्यातिरिक्तस्य दुर्वचत्वात्, असति च बाह्यार्थे ज्ञानेऽर्थसादृश्योदयाऽसंभवात्तन्निमित्तभूतो बाह्यार्थो विज्ञान (१)वैचित्र्यादनुमीयते, नत्वसौ प्रत्यक्षः, वैभाषिकमते तु असति विज्ञानस्य बाह्यार्थसम्बन्धे तदाकारत्वासंभवात्, सति च प्रकाशसम्बन्धे बाह्यार्थप्रकाशस्याऽवर्जनीयत्वात्प्रत्यक्षगोचरोऽपीति तयोर्मतभेदे क्षणिकबाह्यार्थवादप्रक्रियाणामेकरूपत्वात् द्वयोर्मतमेकीकृत्यमूलशैथिल्योपपादनपूर्वकं निरस्यति बाह्यमित्यादिश्लोकत्रयेण-

(१) अनुमीयत इति। घटाकारप्रत्ययसंतति विषयपूर्विका प्रत्ययवैचित्र्यात्पटादिप्रत्ययसंततिवत्।।

मू०।। बाह्यं भोग्यं प्रजल्पन्क्षणिकमणुचयं भोक्तृ संघातमन्तः
स्कंधानां पंचकञ्चेदृशमिति सुगतः पृच्छ्यतां वेदबाह्यः।
किन्ते मानान्तरेण प्रमितमिदमुत प्रौढिरेषा त्वदीया
किं वा मोहात्प्रलापः किमथ जड़ जगद्विप्रलिप्सा कुबुद्धे।। २२।।

बाह्यमिति।। खरस्नेहोष्णतेरणस्वभावानां पार्थिवादिचतुर्विधपरमाणूनां भूतभौतिकलक्षणः भोग्यसंघात एकः, रूपविज्ञानवेदनासंज्ञासंस्कार-संज्ञकपञ्चस्कन्धीरूपोभोक्तृ संघातोऽन्यः, खराः = कठिनाः तत्स्वभावाः पार्थिवपरमाणवः, स्निग्धाः आप्याः, उष्णतास्वभावास्तैजसाः, ईरणं = चलनं, तत्स्वभावा वायवीयाः, तेषामाद्यः संघातः। कर्मकरणव्युत्पत्तिभ्यां सविषयाणीन्द्रियाणि रूपस्कन्धः, विषयाणां ब्राह्यत्वेपीन्द्रियसम्बन्धाद्देहारम्भकत्वाच्च आध्यात्मिकत्वम्। अहमित्याकारकमालयविज्ञानम्, इन्द्रियजन्य (१)निर्विकल्पकज्ञानानि च विज्ञानस्कन्धः। सुखदुः खानुभवो वेदनास्कन्धः। डित्थः, कुण्डली, श्यामो, ब्राह्मणः, इत्यादिरूपः (२)सविकल्पकप्रत्ययः संज्ञाविषयकत्वात्संज्ञास्कन्धः, रागद्वेषमोहधर्माधर्ममदमानादयः संस्कारस्कन्धः। तत्रस्वमात्रगोचरनिर्विकल्पकज्ञानधारात्मकमालयविज्ञानं आशयः, चित्तं, आत्मेति च गीयते। तद्भिन्नं चैत्तिकं। बुद्धिबोध्यं वक्ष्यमाणाऽ(३)भावत्रयातिरिक्तं सर्वं क्षणिकं। "यत्सत् तत्क्षणिकं यथा विद्युदादि सच्चेदं सर्वम्" इत्यनुमानाच्च तस्यक्षणिकत्वम्। अनयारीत्या बहिर्भवं वाह्यं = भूतभौतिकजातं, क्षणिकं = स्वोत्पत्तिकालेतरकालाऽस्पर्शनं, अणुचयं = धान्यराशिवत्परमाणुपुञ्जरूपं, भोग्यं = भोगविषयं प्रजल्पन्, तथा अन्तः = अध्यात्मं, ईदृशं = बाह्यवदेव क्षणिकं दर्शितं स्कन्धानां पञ्चकं भोक्तृसंघातं च प्रजल्पन्, वेदबाह्यः = वेद-विरुद्धार्थप्रलापी, वेदद्वेष्टा च सुगतः = बुद्धः तच्छिष्यः सौत्रान्तिको वैभाषिकश्च, निपुणैः उभयवादिवचनसारपरीक्षाकुशलैः मध्यस्थैः इति = वक्ष्यमाणरीत्या, पृच्छ्यतां। अन्यद्वारा संवादस्तस्य साक्षादसंभाष्यत्वद्योतनार्थः। तथाचोक्तम्-

(१) निर्विकल्पक-ज्ञानानीति।। अक्षसन्निपातानन्तरमविविक्तसामान्य विशेषविभागं सम्मुग्धवस्तुमात्रगोचरमालोचनं निर्विकल्पकज्ञानम्।। तदुक्तम्।। अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्ध वस्तुजम्। न विशेषो न सामान्यं तदानीमनुभूयते। तयोराधारभूता तु व्यक्तिरेवावगम्यते।। इति बौद्धाः।।

(२) अभिलापसंसर्ग योग्यावभासः सविकल्पकं ज्ञानमिति।।

(३) अभावत्रयातिरिक्तमिति। प्रतिसंख्यानिरोधाप्रतिसंख्यानिरोधावकाशश्चेति त्रिविधाभावातिरिक्तमिति।।

(१)"हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इति।

पुराणेषु च तेषामसंभाष्यत्वं प्रसिद्धम्। प्रमाणमूलकत्वाभावाद्भ्रान्त्यादिमूलकत्वाच्च सर्वथा अनादरणीयं तद्दर्शनमिति सूचयन् सनिन्दोपहासं प्रश्नप्रकारमेव दर्शयति-किमित्यादिना। । हे जड = अज्ञ! हेकुबुद्धे! = निष्कारणमेव परानिष्टोपायोपदेष्टृत्वात्कुत्सितबुद्धे, स्वहिताऽनभिज्ञत्वे सति परहितविघातित्वं सम्बोधनद्वयतात्पर्यार्थः। इदम् = "क्षणिकं परमाणुसंघातात्मकञ्च जगत्" इत्यादिरूपं परमरहस्यं ते = तव, कर्तुरिव, शेषत्वविवक्षायां षष्ठी, त्वयेत्यर्थः। मानान्तरेण = प्रसिद्ध प्रत्यक्षादिमानातिरिक्तमानेन प्रमितं किं? किमितिप्रश्ने। नचाऽस्मिन्विषये प्रत्यक्षंक्रमते, तस्यसन्निकृष्टार्थग्राहित्वात्। क्षणिकपरमाणूनां सन्निकर्षपर्यन्तं स्थित्यसंभवात्, अयोग्यत्वाच्च। नाप्यनुमानं, तस्य सहचारग्रहाधीनत्वात्, क्षणिकयोश्च युगपदुभयग्रहणाऽसंभवेन सहचारस्य दुर्ग्रहत्वात्। अतएव नोपमानादीनां प्रसरः, तेषां त्वया प्रमाणत्वाऽनभ्युपगमाच्च। अतोऽलौकिकेन केनचिन्मानेन सप्तमेन्द्रियकल्पेन तत्समधिगतंवाच्यं। तच्चाऽप्रसिद्धमिति भावः। पुरुषवचनस्य प्रमाणमूलत्वबाधे रागमोहद्वेषाऽन्यतममूलत्वमेव पर्यवस्यतीति क्रमेण प्रश्नव्याजेन दर्शयति-उतेत्यादिना। उतेति पक्षान्तरे। एषा = पूर्वोपदर्शिता कल्पना त्वदीया प्रौढिः = बुद्धिवैभवख्यापनं "सर्वप्रमाणविरुद्धमपि अहमेवं व्यवस्थापयामि स्वतन्त्रप्रज्ञत्वात्" इति, तर्हिस्वख्यातिपूजालाभादिरागमूलकत्वमेवेति भावः। *तदप ह्नवेत्वाह-किञ्चेति। मोहात् प्रमाणवस्तुतत्वापरिज्ञानाद्भ्रान्त्या बालिशानामिव प्रलापः = अनर्थकं वचः, त्वदीय इतिविपरिणामेनसम्बध्यते। तदपह्नवेप्याह-किमथेति। जगत् वेदेन श्रेयसे नीयमानमालोक्य निर्निमित्तादेव द्वेषात्तद्विघाताय तस्य विप्रलिप्सा = विप्रलंभेच्छा दस्यूनामिवाऽसन्मार्गोपदेशेन प्रतारणेत्यर्थः। सर्वेष्वपि पक्षेषु अनुपादेयवचनतैव, ना चाऽपरः प्रकारोऽस्तीति भावः ।।२२।।

इत्थं वैनाशिकमते मानमूलत्वाभावं दोषमूलकत्वंचोक्त्वा मानविरोधमपि दर्शयति-संघीभावइत्यादिद्वाभ्याम्-

(१) हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्।। अर्वाग्दृष्टिर्नैकृतिकः स्वार्थ साधनतत्परः। शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृत इति।। उक्तलक्षणानित्यर्थः। शब्दस्तोममहनिधि पृ. ९८२ वकारादिनामावल्याम्।।

*उक्तरहस्वबोधकवचनस्य रागमूलकत्वस्य गोपने कृतेतु

मू०।। संघीभावः कथंवा चलनविरहिणां भङ्गुराणामणूनां
संघोऽनन्यः कथंवा विषयपदमियात्कश्च संघं विधत्ते।
स्कंधाना सन्निपातः कथमिव कियतां भोक्तृता काच धारा
कस्य स्तां भोगमोक्षौ वद जड सफलं केन वा दर्शनं ते।। २३।।

संघीभाव इति।। वैशेषिकमतनिरासोक्तयुक्त्या हेत्वसंभवात् चलनविरहिणां = क्रियाशून्यानां, भङ्गुराणां = क्षणिकत्वात्क्रियोत्पत्तिपर्यन्तमनवस्थायिनां अणूनांकथं = केनप्रकारेण वा भूतभौतिकदेहाद्यात्मना संघीभावः। यदा स्थायिष्वप्यणुषु क्रिया न संभवतीत्युक्तं तदा किंवक्तव्यं क्षणिकेष्विति भावः। किञ्च, परमाणुसंघो घटादिः परमाणुभ्य अन्यः? अनन्योवा? आद्ये वैशेषिकमतोक्तदोषः अपसिद्धान्तश्चेत्यभिप्रेत्य द्वितीयं निरस्यति-संघ इति। परमाणुभ्योऽनन्यः = अभिन्नः संघः समुदायः, विषयपदम् = इन्द्रियगोचरतां कथमियात् = प्राप्नुयात्, महदुद्भूतरूपादिमद्रव्यस्यैव चक्षुर्योग्यत्वात्, परमाणुषु महत्त्वाऽभावादयोग्यत्वात्। केशानां दूरेऽप्रत्यक्षाणामपि तत् समुदायस्य प्रत्यक्षता दृष्टेति चेत्, न। तेषां प्रत्येकमपि समीपे प्रत्यक्षत्वेनाऽयोग्यत्वाभावात्। दोषवशाददर्शनन्तु नाऽयोग्यत्वापादकम्। नचायोग्यानां संघातो योग्यः, वायुसङ्घातस्य चाक्षुषत्वप्रसङ्गात्। किञ्च, अचेतनानां परमाणूनां तृणपूलधान्यराश्यादिवच्चेतनाधीन एव संघीभावो वाच्यः। चेतनश्च कर्ता त्वया नेष्यत इति संघाताऽसिद्धिश्चेत्याह-कश्चेति। त्वन्मते भूतभौतिकादिसंघं च कःविधत्ते? नकोऽपीत्यर्थः। ननु द्वाभ्यां लोके कार्यस्य कारणाधीनाऽऽत्मलाभलक्षणः प्रतीत्यसमुत्पादो दृश्यते हेतूपनिबन्धतः, प्रत्ययोपनिबन्धतश्च। हेतोरेकस्य बीजाद्यात्मकपूर्वसंघातस्य अङ्कुरादिफलोपधानलक्षण आद्यः। प्रत्ययानां कार्यारम्भाय परस्परोपसर्पणशीलानामनेकेषां भूतचतुष्टयपरमाण्वाऽऽकाशकालधातूनां एककार्योपधानलक्षणसम्बन्धो द्वितीयः। तथाहि-हेतूपनिबन्धतो वटाङ्कुरे कुटजाद्यङ्कुरवैलक्षण्यम्, प्रत्ययोपनिबन्धाच्च पार्थिवपरमाण्वादिषड्विधकारणप्रयुक्ताः काठिन्यस्नेहपरिपाकनिर्गमनसावकाशत्वपरिणामा अङ्कुरादावुपलभ्यन्ते। तत्र बीजाङ्कुरादीनां "अहमेनं निर्वर्तयामि, अहमनेन निर्वर्तितः" इति ज्ञानाभावेऽप्यन्वयव्यतिरेकाभ्यां परस्पराधीनत्वदर्शनात् तावतैव सर्वकार्यसिद्धेर्नचेतनकर्त्रपेक्षाऽस्ति। तथाच बुद्धसूत्रम् "उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता" इति। तथागतानां = बौद्धानां कारणे सत्येव कार्योत्पाद इत्यन्वयात् कारणाभावे

च कार्यानुत्पाद इति व्यतिरेक मात्राद्वा एषां, दधातीति धर्मः = कारणाम्, ध्रियत इति धर्मः कार्यम्, तेषां धर्मताकार्यकारणभावलक्षणा स्थितैव न कर्तारमन्तरेण क्षतेति तत्सूत्रार्थः। तथा च संघाते न कर्त्रपेक्षा इति चेत्, न। हेतुप्रत्ययानामङ्कुराद्यनुकूलाप्रवृत्तिः अन्यनिरपेक्षा वा स्यात्? सापेक्षावा?। आद्ये प्रवृत्त्यनुपरमप्रसङ्गात्प्रलयसुषुप्त्याद्यसिद्धिः। द्वितीये चेतनाधीनत्वानभ्युपगमादनवस्था। किञ्च, पूर्वपूर्वसङ्घाताः नियमेन स्वसदृशानेवोत्तरोत्तरसंघातानुत्पादयेयुः? विसदृशानेव वा? अनियतस्वभावान्वा?। आद्ये बीजादङ्कुरस्य, ततः काण्डस्य, ततस्ततः पत्रपुष्पादीनां च विसदृशानामनुत्पादप्रसङ्गः। [१]द्वितीये सर्वभावानां प्रतिक्षणमत्यन्तवैलक्षण्यप्रसङ्गः, उत्पन्नमात्राद्बीजादङ्कुरकाण्डपत्रपुष्पादेरुत्पत्तिप्रसङ्गः, व्युत्क्रमेणाऽप्युत्पत्तिप्रसङ्गः, वटादिवीजेभ्यः कुटजाङ्कुराद्युत्पादप्रसङ्गश्च। तृतीये च मनुष्यादि पुद्गलो द्वितीयादिक्षणेषु देवो मनुष्यो हस्ती वा स्यादिति सर्ववस्तुष्वनाश्वासप्रसङ्गः। तस्मात्साधनानां नियतकालप्रवृत्तिहेतुः तत्फलसहकारिस्वरूपाभिज्ञः चेतनः जगद्धेतुरवश्यमभ्युपगन्तव्यः।

ननु पञ्चस्कन्धीसन्निपातेन चित्ताभिज्वलने भोक्तुस्सद्भावात् तस्यैव अविद्यादिक्रमेण भूतभौतिकसंघाते कर्तृत्वसंभावाच्च नायं दोषइत्याशङ्क्याऽऽह-स्कन्धानामिति। पञ्चस्कन्धानां सन्निपातः = संघातोऽपि कथमिव = केनप्रकारेणेव, तादृशदृष्टान्तोऽप्यप्रसिद्धः किंपुनर्दार्ष्टान्तिकमिति द्योतनाय इवकारः। यतस्तस्यापि संघातत्वाविशेषात् कर्त्रन्तराधीनता वाच्या। तथाच तस्य तादृशकर्त्रन्तराधीनत्वेऽनवस्था, [२]स्वाधीनचित्ताऽभिज्वलनाधीनत्वे त्वन्योन्याश्रय इतितस्याप्यसिद्धिः, स्थायिनः कर्तुरनभ्युपगमादिति भावः। किञ्च, स्कन्धसंघातस्य संघातिभ्योऽत्यन्तभिन्नस्य भोक्तृत्वम्? उतस्कंधानामेव? उतसंघातान्तर्गतस्यैकस्य? आद्ये अतिरिक्तावयविस्वीकारादपसिद्धान्तो वैशेषिकमतोक्तदोषप्रसङ्गश्च। द्वितीये नानाभोक्तृणां ऐकमत्यासंभवाच्छरीरमुन्मथ्येत। तृतीयेतु निर्धारणहेत्वभावदोष इत्यभिप्रेत्याह-

(१) द्वितीये चेतनानधीनत्वानभ्युपगमादिति।। अचेतनानां बीजादीनामङ्कुराद्यनुकूला प्रवृत्तिरन्यसापेक्षेति पक्षे बीजादि प्रवृत्तेश्चेतनाधीनत्वानङ्गीकारात्त्वयाऽचेतनाधीना सेति वक्तव्यं स्यात्। तथा च तस्यापि बीजादि प्रवर्तकस्याचेतनत्वेन बीजादिप्रवृत्त्यनुकूलास्वप्रवृत्तिः किं बीजाद्यधीनोत वस्त्वन्तराधीनावेति।। आद्येऽन्योन्याश्रयो दोषः। द्वितीये तस्याप्यचेतनत्वात्तत्प्रवृत्तेरपि अन्याधीनत्वे वक्तव्ये सः किं बीजादिरुक्तेभ्योन्यः। आद्येचक्रिका, द्वितीयेऽनवस्थेति भावः।

(२) स्वाधीनचित्ताभिज्वलनाधीनत्वेऽन्योन्याश्रय इति। स्वयं पंचस्कन्धसंघातात्मककर्ता तदाधीनं यच्चित्ताभिज्वलनं तदाधीनत्वे कर्तुर्द्वयोः परस्परापेक्षणादनवस्थान्योन्याश्रय इत्यर्थः।।

कियतामिति। किंसङ्ख्यापरिच्छिन्नानां भोक्तृत्वमित्यर्थः। नन्वालयविज्ञानधारैव स्वप्रकाशकत्वादात्मा भोक्ता च, सच संतानात्मना सदैवाऽनुवर्तमानः कारणकलापं प्रकाशयन्नधिष्ठास्यतीति कर्ता च, इत्यस्तिनिर्धारणहेतुरित्याशङ्क्याह-काचेति। आलयविज्ञानधारा च का = किंक्षणिकविज्ञानेभ्योऽन्या? अनन्यावा?। आद्ये स्थाय्यात्मैव नामान्तरेणाऽभ्युपगत इत्यस्मन्मतप्रवेशः। द्वितीये क्षणिकविज्ञानानां पूर्वोत्तरकालाऽस्पर्शित्वात्परस्परवार्तानभिज्ञानामैकमत्यस्य दुःसंपादतया भोगेच्छया तत्साधनसंघातनिर्मातृत्वाऽनुपपत्तिरित्याशयः। किञ्च, यद्भोगार्थः संघातस्स्यात्स नास्ति स्थिरो भोक्ता इति भोगो भोगार्थ एव स्यादिति नान्येन प्रार्थयितव्यः स्यात्। तथा मोक्षोऽपि मोक्षार्थ एवेति नान्येन मुमुक्षुणा भवितव्यं स्यादित्याशयेनाह-कस्येति। भोगो मोक्षश्च कस्य स्तां न कस्यचिदित्यर्थः। तथाच त्वच्छास्त्रवैफल्य-मपीत्याहवदेति। हेजड = निर्बुद्धे? ते = तव, दर्शनं = शास्त्रम्, केन वा फलेन सफलं। न तावद्भोगेन, तदसंभवस्योक्तत्वात्। भोगविरोधितया क्लेशसंयम-पारिव्राज्याद्युपदेशाच्च। नापि मोक्षेण, मोक्षपर्यन्तमात्मावस्थानाऽभ्युपगमेऽपसिद्धान्तात्, मोक्षस्यदुःखनिवृत्तिरूपत्वे क्षणिकदुःखानां स्वरसभङ्गुरत्वेन साधनोपदेशवैयर्थ्यात्, अन्यादृशत्वेऽक्षणिकत्वाच्चेति भावः ।।२३।।

नन्वविद्यासंस्कारविज्ञाननामरूपषडायतनस्पर्शवेदनातृष्णोपादानभव-जातिजरामरणप्रभृतीनामितरेतरनिमित्तनैमित्तिकभावेन संततं परिवर्तनादर्थाक्षिप्तस्संघात इति सर्वदोषपरिहारः। तथाहि-क्षणिकेषु परस्परभिन्नेषु पृथिव्यादिधातुषु स्थायित्वैकत्वसुखत्वदेहत्वमनुष्यत्वमातृपितृत्वादिबुद्धिः, अहंममेत्यादिबुद्धिश्च असद्विषयत्वादविद्या, सैव संसकारानर्थस्य मूलकारणम्, ततश्च रागद्वेषमोहास्संकारा उत्पद्यन्ते। तेभ्य आस्रवसंज्ञिताऽदृष्टद्वारा गर्भस्थस्याद्यं ज्ञानमुत्पद्यते। ततः देहारंभकपृथिव्यादिचतुष्टयं नामाश्रयत्वान्नाम। ततः शुक्रशोणितात्मकं सितरक्तरूपं। देहस्य कललबुद्बुदावस्थे वा नामरूपे। ततो देहनिष्पत्तौ भोगसंपादकानि पृथिव्यादिचतुष्टयरूप विज्ञानात्मकषड्विधायतनसंबन्धात् षडायतनानीन्द्रियाणि। तेषां विषयसंबंधः स्पर्शः। ततः सुखादिर्वेदना। ततः पुनर्विषयतृष्णा। ततः प्रवृत्तिरुपादानम्। ततो भवहेतुत्वाद्भवो धर्माधर्मौ। ततः पुनः पञ्चस्कंधी रूपं भोगायतनं जातिः। तत्परिपाको जरा। ततो मरणम्। एवं शोकपरिवेदनादुः-खदौर्मनस्यमदमानादयोऽपि बोध्याः। तदेतेषु परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमावर्तमानेषु अर्थादुपपन्नो द्विविधस्संघातः। वस्तुतः क्षणिकेष्वपि

भोक्त्रादिषु स्थायित्वबुद्ध्या भोगमोक्षयोः पुरुषप्रवृत्तौ शास्त्रसाफल्यं चेत्याशंक्याह-

मू०।।नाविद्यादिप्रवृत्तेर्द्विविधसमुदयस्ते यदैकैकसन्ना
नश्यन्नुत्पादने न प्रभवति किमरे हेत्वसंबन्धि कार्यम्।
तच्चेन्निर्हेतुकं स्यात्करणविफलता स्वप्रतिज्ञाविरोधौ
त्रैविध्यं चाप्यभावे कथमिति वितथोबुद्धबंधोः प्रलापः।। २४।।

नेति।। दर्शितानामविद्यादीनां परस्परं हेतुफलभावेन निरंतरं प्रवृत्तेः, बाह्याध्यात्मिकभेदेन उपदर्शितः द्विविध समुदयः = संघातो न संभवति। यत् = यस्मात्, ते = अविद्यादयः; एकैकस्मिन्कार्ये उत्पादिते, सन्नाः अव-सन्नाः = विनष्टाः। तथाचोत्पत्तिमात्रनिमित्तत्वान्नोत्पन्नानांसंघीभावेक्षमन्त इत्यर्थः। अयं भावः-यत्खलु हेतुपनिबद्धं कार्यं तदन्यानपेक्षहेतुमात्राधीनत्वादुत्पद्यताम्। संघातस्तु प्रत्ययोपनिबद्धो नानाहेतुसमवधानाधीनः कथं घटताम्? नच विनष्टै-रचेतनैश्च प्रत्ययैर्विनश्यतां मेलनं स्थापनं वा सुकरम्। किंच, अविद्यादयः संघातमाश्रित्यात्मानं लभमानाः कथं तस्यैव निमित्तं स्युः। पूर्वं पूर्वसंघातस्य उत्तरोत्तरसंघातं प्रति निमित्तत्वाभ्युपगमाच्चाविद्यादीनां निमित्तनैमित्तिकत्वकल्पना-वैफल्यमपीति।। अभ्युपेत्यापि क्षणिकानामविद्यादीनां निमित्तत्वमिदमुक्तम्, वस्तुतस्तु तदेव न संभवतीत्याह-नश्यन्निति।। पूर्वक्षणेनश्यन् = विनाशग्रस्तः कार्यस्योत्पादने न प्रभवति = नसमर्थो भवति।। निमित्तविनाशाभ्युपगमेन हेतोः कार्यसंबंधाभावा-त्तदनुकूलव्यापाराभावाच्चेति भावः।

ननु कार्योत्पत्तौ कारणस्याऽव्यवहितप्राक्कालसत्वमेवोपयुज्यते, न कार्यकालसत्वमपि, तदा कार्यस्य सिद्धत्वेन तत्सिद्ध्यर्थं कारणसत्ताया अनुपयोगात्। नापि व्यापारसिद्ध्यर्थ तदुपयोगः। स्वोत्पत्तेरेवास्य व्यापारवत्त्वसंभवात्। यथाहुः- "भूतिर्येषांक्रिया सैव कारकं सैव चोच्यते" इति।। तत्राह-किमिति।। "अरे" इति नीचसंबोधने। अरे बौद्ध! हेत्वसंबन्धि = कारणानुपरक्तं कार्यं किम्? नकिञ्चिदित्यर्थः। मृत्सुवर्णकारणका घटरुचकादयो हि मृत्सुवर्णाद्यात्मानोऽनुभूयन्ते। यदि च कारणानुपरक्तं कार्यं स्यात्कथं तेषां तदात्मनाऽनुभवः। न च कारणसादृश्यमेवानुभूयते न तादात्म्यमिति युक्तम्। भेदानुल्लेखेनानुभवस्य सादृश्यविषयत्वायोगात्। किंच, (१)अनुगतधर्माभावे सादृश्यासिद्धिः, अनुगतधर्माभ्युपगमे

(१) अनुगतधर्माभावे इति।। कार्यकारणोभयानुगतस्यैक धर्मस्य संस्थानादिलक्षणस्याभावे इत्यर्थः।।

च तदेव कारणं कार्यकालावस्थायीति सिद्धमक्षणिकत्वम्। अपि च, उत्पत्तिविनाशौ वस्तुनः स्वरूपभूतौ? उत धर्मौ? वस्त्वन्तरभूतौ वा? आद्ये उत्पत्तिविनाशयोर्यौगपद्यं, वस्तुत्पत्तिविनाशशब्दानां पर्यायत्वं च स्यात्। द्वितीये धर्म्यसंबन्धे धर्मत्वायोगाद्वस्तुनः क्षणिकत्वहानिः। तृतीये वस्तुन उत्पत्तिविनाशाभ्यामसंस्पर्शाच्छाश्वतत्वप्रसङ्गः। यदि च दर्शनादर्शने उत्पत्तिविनाशौ, तथापि तौ द्रष्टृधर्मौ न वस्तुधर्माविति वस्तुनः शाश्वतत्वमेव। ननु पूर्वापरभावमात्रदर्शनाद्धेतुफलभावः कल्प्यते, वस्तुतस्तु तयोः कार्यकारणयोः संबंधस्य दुर्निरूपत्वान्निर्हेतुकमेव कार्यमुत्पद्यत इत्याशंक्याह– तदिति।। तत् = कार्यं, निर्हेतुकं = कारणशून्यमेव स्याच्चेत् = उत्पद्येत यदि तर्हि घटादिकार्ये करणानां दण्डचक्रमृत्पिण्डादीनां साधनानां विफलता = नैष्फल्यं, कुलालादेर्विनापिदण्डादिभिर्घटादि सिद्धिप्रसङ्गश्च। तथा "चतुर्विधान्हेतून्प्रतीत्य चित्तचैत्ता उत्पद्यन्ते" इति परेषां प्रतिज्ञा सूत्रं च विरुध्येत। आलंबन प्रत्ययः, समनंतरप्रत्ययः, अधिपतिप्रत्ययः, आलोकादयश्चेति चतुर्विधा हेतवः कार्यं प्रति अयन्ते अनुकूलीभवन्तीति प्रत्यया इत्युच्यन्ते। यथानीलाकारस्य ज्ञानस्य नीलादालंबनशब्दितविषयान्नीलाकारता, समनन्तर प्रत्ययादव्यवहितपूर्वोत्पन्न-विज्ञानाद्बोधरूपता, नीलरूपाकारतैव न रसगंधाद्याकारतेत्यधिपतिवन्नियामकाच्च-क्षुरादेर्नीलादिप्रतिनियताकारता, आलोकादिभ्यश्च स्पष्टतेति चतुर्विधकारणानि प्राप्य चित्तं नीलादिज्ञानं, चैत्ताः चित्तसंबंधिनस्सुखादयश्चोत्पद्यन्त इति हि तदर्थः।। निर्हेतुककार्योत्पादाभ्युपगमेत्वत्प्रतिज्ञाविरोधश्चेत्यर्थः। यदितूक्तप्रतिज्ञानिर्वाहाय कारणस्य फलकालावस्थानमिष्येत तदापि "क्षणिकास्सर्वसंस्काराः" इति प्रतिज्ञा विरोध इत्युभयतस्पाशा रज्जुः।।

किंच, बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं च, तदपि त्रयं प्रतिसंख्या-ऽप्रतिसंख्यानिरोधावकाशं चेत्यनेन ज्ञानविषयभूतमभावत्रयातिरिक्तंजन्यं क्षणिकं च, "अमुमहं नाशयिष्यामि" इति वस्तुप्रतिकूलाबुद्धिः प्रतिसंख्या, तत्पूर्वको वस्तुनाशः प्रतिसंख्यानिरोधः, तदन्यो ध्वंसस्त्वप्रतिसंख्यानिरोधः, आवरणाभाव-स्त्वाकाशमिति त्वत्प्रतिपादितमभावत्रैविध्यमपि दुरुपपादमित्याशयेनाह–त्रैविध्यमिति।। अभावे = निर्विशेषत्वादसत्वाच्च निरुपाख्ये, त्रैविध्यं = त्रिप्रकारतापि कथं? = केन प्रकारेण? अवस्तुनः कारणाद्यसंबन्धादुत्पत्तिवैलक्षण्याद्यसंभवात्, संभवे च निरुपाख्यत्वासत्वयोर्हानादित्यर्थः। किंचाद्यनिरोधौ क्षणिकवस्तुनः? संतानस्य वा? स्याताम्। नाद्यः क्षणिकस्य पुरुषबुद्धिपूर्वक मुद्गरप्रहारादिपर्यन्तमनवस्थानात्,

पूर्वोक्तयुक्तिभिर्निरन्वयनाशाऽसंभवेन सर्वावस्थाऽन्वयिवस्तुपरिशेषे शून्यतालक्षण-निरुपाख्यत्वाऽसिद्धेश्च। नद्वितीयः। हेतुफलभावेनाऽविच्छिन्नसंतानिनामेव संतानतया अन्त्यसंतानिविनाशादेव संताननिरोधो वाच्यः, तत्र यद्यन्त्यः किञ्चित्फलमारभेत, तर्हि संतानाऽविच्छेदः। अन्त्यत्वाऽनुपपत्तिश्च। यदि नारभेत तर्हि तस्याऽसत्वप्रसङ्गः। अर्थक्रियाकारित्वाऽतिरिक्तसत्वस्य परैरनभ्युपगमात्। तदसत्वे च (पा०टि०) तत्पूर्वपूर्व-संतानिनामप्यर्थक्रियाकारित्वाऽभावात्(पा०टि०)संतानमात्राऽसत्वापत्तौ, कस्य निरोधः? न चाऽन्त्येन विसदृशकार्योत्पादने पूर्वसंतानविच्छित्तिरिति युक्तम्। असत्यनुगते स्थायिनी सादृश्यवैसादृश्ययोर्दुरुपपादत्वस्योक्तत्वात्। एतेन परेषां श्रवणमननयोगाभ्या-सादिजन्यतत्वज्ञानेन अविद्यादिनाशाऽधीनमोक्षप्रत्याशापि निरस्ता। अविद्यादेः स्वरसभङ्गुरत्वसाधननिरोध्यत्वयोर्विप्रतिषेधात्। नाप्याऽऽवरणाभाव एवाकाशः। शब्दाश्रयत्वेन तस्य भावत्वनिश्चयात्। अपिच, आवरणाऽभाव एव आकाशश्चेत्, एकस्मिन्सुपर्णे उत्पतति सुपर्णान्तरस्योत्पिपतिषो(पा०टि०)र्निरवकाशत्वप्रसङ्गः। यत्रावरणाभावस्तत्रोत्पत्तिष्यतीति चेत्, ये नाऽऽवरणाभावो विशेष्यते तत्तर्हि वस्तुभूतमेवाऽऽकाशम्, नावरणाऽभावमात्रम्। अभावस्य निषेध्यनिषेधाऽधिकरणो-भयनिरुप्यत्वादिति भावः। किं च। आत्मनोऽपि क्षणिकत्वे पूर्वानुभूतस्मरणानुपपत्तिः। अन्यानुभूतस्याऽन्येन स्मरणेऽतिप्रसंगात्, सादृश्याऽसंभवात्, बाल्येऽनुभूतस्य स्थाविरे (पा०टि०)सादृश्याभावेऽपि स्मरणात्, स्वात्मनि स एवाहमन्यस्तत्सदृशोवेति संशयासंभावाच्च। निष्प्रमाणको निर्युक्तिको निरर्थकश्च क्षणभंगवाद इत्युपसंहरति-इतीति।। निंद्यवचनो बंधुशब्दः, "कुत्सितानि कुत्सनैः" इति समासः। बुद्ध-बंधोः = शिष्टैर्गर्हितस्य बुद्धस्येत्यर्थः। प्रलापः = क्षणिकवाददिलक्षणोन्मत्तप्रलापसदृश-वाक्यसंदर्भः। वितथः = अनृतः, विवेकिभिरनुपादेय इति यावत्।।२४।।

इत्थं बाह्यार्थवादिवैनाशिकमते निरस्ते विज्ञानवादी प्रत्यवतिष्ठते-"अभिमत एवास्माकं बाह्यार्थवादिमतनिरासः। नहि वस्तुतस्सुगतस्य बाह्यार्थवादोऽभिप्रेतः। किन्तु विज्ञानैकस्कन्धवादस्य बुद्धावारोहाय परिकल्पितः। तथाहि न तावद्बाह्यार्थास्संभवन्ति, ते हि परमाणवो वा तत्समूहा वा द्वयोरप्य(पा०टि०)योग्यत्वदुर्निरूपत्वाभ्यां निरासात्। किंच, विज्ञानं बाह्यार्थे कमतिशयं जनयत्तं प्रकाशयेत्। न (१)तावदिन्द्रियवज्ज्ञानम्,

(१) न तावदिन्द्रियज्ञानवज्ज्ञानमनवस्था प्रसङ्गात्।। यथा चक्षुरादीनीन्द्रियाणि स्वार्थगोचर ज्ञानजनक त्वेन स्वविषयार्थ प्रकाशकानीत्युच्यन्ते। तद्वद्विज्ञानमपि बाह्यार्थगोचर ज्ञानं जन्यत्सत्तत्प्रकाशकं भवतीत्युच्यते तदा विज्ञानस्य त्रिपुटीगोचरत्वाभ्युपगमात्त्रिपुट्यन्तरगतस्वात्मक ज्ञानगोचर ज्ञानान्तरं जनयत्सदेव तत्प्रकाशक भवेत्तथा च तत् तज्ज्ञानानां प्रकाशनाय ज्ञानान्तरमुत्पादनेऽनवस्थास्यादित्यर्थः।।

अनवस्थाप्रसङ्गात्। नापि प्राकट्यम्, अतीताऽनागतेष्वसंभवात्। नचातिशयानाधाने विषयव्यवस्था सिद्ध्यति। तस्मादतीतानागतवद्वर्तमानत्वेनाभिमतविषयेष्वप्यावश्य-कैर्वासनानुसारिभिरालय विज्ञान प्रसूत प्रवृत्ति विज्ञानाऽऽकारैरेव व्यवहारसिद्धेः कृतं बाह्यार्थेनेति''।। तदेतन्निराचिकीर्षुराह-

मू०।। नापोद्यं मानसिद्धं कथमिवविविधंज्ञानमर्थापलापे
बाधोऽर्थानां न दृष्टो बहिरिति च पदं न प्रसिद्धार्थमृच्छेत्।
वेद्या विज्ञानभेदाः कथमथ विविधा वासना वा कुतस्स्युः
किंच प्रागुक्तदोषाः क्षणिकचिति हतस्तेन विज्ञानवादः।।२५।।

नापोद्यमिति।। मानेन = प्रत्यक्षादिप्रमाणेन, सिद्धं = प्रमितं स्तंभकुंभादि बाह्यवस्तु, नापोद्यम् = शकयार्थे ''शकि लिङ्च'' इति चकारात् ''वदः सुपि कयप्च'' इति कृत्यः अपवदितुमशकयमित्यर्थः। अपलापोह्युपलंभकप्रमाणाभावाद्वा? उपलंभाऽभावाद्वा उपलंभस्यान्यविषयत्वाद्वा?। नाद्यौ, चक्षुरादे स्तेनार्थोपलंभस्य च विश्वजनीनत्वात्। नापि तृतीयः। (१)बाधाद्यभावेप्यर्थोपलब्धेरन्यविषयत्वे (पृ०टि०)स्वगोचरत्वेऽप्यनाश्वासात्। नच विज्ञानविषययोर्भेदग्राहकाभावः, ''अहमिदं जानामि'' इति साक्षिणाज्ञातृज्ञानज्ञेयानां भेदग्रहात्। न (२)चात्र विप्रतिपत्तिः (पृ०टि०)बहिर्वदवभासत इति (३)वत्करणं कुर्वतो भवतोऽप्यनुभवसिद्धत्वात्। ननु बाह्यार्थस्य परमाणुतदन्यत्वादिना दुर्निरूपत्वात्तदभ्युपगन्त्रापि घटाकारं पटाकारं ज्ञानमित्यनुभवानुरोधेन ज्ञाने विषयाकारत्वस्यावश्यं वाच्यत्वात्, विषयाकारस्य च ज्ञानेनैवावरोधेन व्यवहार सिद्धौ पृथग्विषयकल्पनवैयर्थ्यमित्याशंकयाह-कथमिवेति।। अवयवान्यत्वाऽनन्यत्वादिना दुर्वचत्वेनार्थापलापे ज्ञानमपि कथं विविधं नानाकारम्। इवेति प्राग्वत्, तदपि किम् अवयवाकारं? अवयव्याकारं? गुणक्रियासा-मान्याकारमेकमनेकं वा? आकाराणामपि ज्ञानाद्भेदोऽभेदो वा? इति विकल्पसाम्यात्, ज्ञाने मूर्तधर्मस्थौल्याद्य-योगाच्चेत्यर्थः। यथाह शून्यवादे कीर्तिः-

''तस्मान्नार्थेन विज्ञाने स्थूलाभासस्तदात्मना।
एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न संभवः'' इति।।

(१) बाधाद्यभावेपि।। अयं घट इति ज्ञान विरोधिनो नायं घटः किन्तु मृत्पिण्ड एवेति ज्ञानस्यात्र घटो नास्तीति बाधज्ञानस्य वाऽसत्त्वेपि घटोऽयमिति ज्ञानस्य बाह्यघटान्यविज्ञानात्मकान्तरघटगोचरत्व स्वीकारे विज्ञानस्यापि स्वान्यविषयत्वापत्त्या स्वस्य स्वविषयत्वेऽनाश्वासात्स्वस्यापि ग्राहकाभावेन बाह्यघटादिवदसत्वप्रसङ्गः स्यादिति भावः।।

(२) अत्र = भेदे (३) वत्करणम् = बहिर्वदवभासत इति वच्छब्दोच्चारणम्।

तस्मादुक्तविकल्पाऽसहत्वान्न बाह्यार्थेनापि विज्ञाने स्थूलत्वाऽवभासस्संभवति। एकस्मि(प०टि०)न्नानाकार विरोधाद्बहूनां मिथो वार्तानभिज्ञत्वादमूर्तत्वाच्चेति तदर्थः। अथवा–ज्ञाने वैचित्र्यनिमित्तस्य बाह्यार्थस्यापलापे निर्निमित्तं विविधं = नानाकारं ज्ञानं कथमित्यर्थः। वासनास्त्वनुपदमेव निरसिष्यन्ते। अथवा–विविधशब्दः सादृश्यपरः। विविधं = अनेकार्थसदृशं ज्ञानं कथमित्यर्थः। ज्ञानस्य प्रतिविषयं व्यवस्थासिद्ध्यर्थं विषयसारूप्यमभ्युपगच्छता नोपजीव्यो विषयोऽपह्नोतुं शक्य इति भावः। अथवा– घटज्ञानं, पटज्ञानमिति विशेषणयोर्घटपटयोर्भेदो, विशेष्यज्ञानैक्यं चानुभूयते। तत्र विशेषणापलापे ज्ञानं विविधं = नानाविशेषणकम् अनुभूयमानं कथमित्यर्थः। एवं घटस्मरणं घटप्रत्यक्षमिति विशेषणाभेदेऽपि ज्ञानभेदोऽनुभूयते, तदपि कथमिति योजनीयम्। ननु यद्येन सहैवानुभूयते तत्ततोऽनतिरिक्तम्, यथा चन्द्रद्वित्वं। ज्ञानसहोपलंभनियताश्चार्थाः। यथाहुः–

"सहोपलंभनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाऽद्वये।।" इति।।

इति चेन्न। रूपादीनामालोकसहोपलंभनियमेऽपि भेददर्शनेन व्यभिचारात्। नन्वन्वयव्यतिरेकाभ्यां वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते। स्वप्नमायादिष्व–न्तरेणापि बाह्यमर्थं वासनावैचित्र्येण ज्ञानवैचित्र्यदर्शनात्। वासनामन्तरेण त्वर्थनिमित्तं ज्ञानवैचित्र्यं नाऽस्माभिरभ्युपगम्यते। तथाच स्वाप्नप्रत्ययसाम्याज्जागृत्प्रत्ययस्यापि असद्विषयत्वमेव। यथाहुः–

"अनादिवासनोद्भूतविकल्पपरिनिष्ठितः।
शब्दार्थस्त्रिविधो धर्मो भावाऽभावोभयाश्रयः।" इति।।

नीलपीतादिस्सद्धर्मः। नरविषाणत्वादिरसद्धर्मः। अमूर्तत्वादिः सदसद्धर्मः, विज्ञानस्य शशविषाणादेश्चामूर्तत्वमिति वक्तुं शक्यत्वादित्युत्तरार्द्धार्थ इति। तत्राह– बाध इति। स्वाप्नार्थानामिव जागृदर्थानां बाधो न दृष्ट इत्यर्थः। तथा च नासद्विषयकत्वे प्रत्ययत्वं वासनानिमित्तकत्वं वा प्रयोजकम्! अपितु बाध एव। अन्यथा जागृत्प्रत्ययस्य स्वाप्नप्रत्ययबाधकत्वाऽयोगादिति भावः। वस्तुतस्तु–स्वाप्नप्रत्ययस्यापि अनिर्वचनीयप्रातिभासिकार्थविषयकत्वान्न निरालंबनत्वमिति बोध्यम्। किंच, आन्तर एवार्थो बहिर्वदवभासत इति वदता, अवश्यं बहिः पदस्य किञ्चिदालंबनं वाच्यम्। नहि भवति देवदत्तः शशविषाणवदवभासत इति। तथा च बाह्यार्थो नापह्नोतुं शक्य इत्यभिप्रेत्याह–बहिरितीति। बाह्यार्थापलापे बहिरित्येतत्पदं प्रसिद्धमर्थं

नर्च्छेत् = न प्राप्नुयादित्यर्थः। चकाराद्गुरुशिष्यबोध्यबोधकवादिप्रतिवादिप्रभृतीनामत्यन्ताऽसत्वमभ्युपगच्छतः शास्त्रप्रणयने वादकथादौ च प्रवृत्यनुपपत्तिरित्यपि बोध्यम्। किंच, पूर्वोत्तरकालाऽस्पर्शिनां स्वमात्रसंवेदनेनोपक्षीणानां विज्ञानानां स्वोत्पत्तिविनाशपूर्वाऽपरीभावविज्ञानांतर संतानादिगोचरत्वासंभवात्तदुत्पत्तिविनाशपूर्वाऽपरीभाव बंधमोक्षादिप्रतिज्ञा निरालंबनैवेत्यभिप्रेत्याहवेद्या इति।। विज्ञान भेदाः = विज्ञानानां भेदाः, व्यावृत्तयः विच्छित्तयः वैलक्षण्यादीनि च कथं त्वया वेद्याः = ज्ञातुं शक्याः। तेषां क्षणिकत्वस्वमात्रगोचरत्वाभ्युपगमादित्यर्थः। अथवा-विज्ञान भेदा = विज्ञानानां भेदाः = विशेषाः नीलपीताद्याकाराः उक्तभेदादयश्च कथम्? लक्षणया केन वेदित्रा वेद्याः = ग्रहीतव्याः। न तावत्स्वेनैव, स्वात्मनि क्रियाविरोधात्। नाप्यन्येन, (प०टि०)साक्षिस्वीकारापत्तेरित्यर्थः।

ननु साक्षिभास्यत्ववादेऽपि तस्य साक्षिणोऽपि स्वात्मनि क्रियाविरोधादन्यवेद्यत्वमित्यनवस्था, अन्योन्याश्रयो वा। दीपस्य दीपान्तरेणेव विज्ञानस्य साक्षिभास्यत्वानुपपत्तिश्चेति चेन्न। अनागन्तुकप्रत्यक्चैतन्यैकरसेनिर्विशेषे स्वप्रकाशे साक्षिणि प्रकाशान्तरापेक्षाभावात्। मन्मते बुद्धिपरिणामस्यविज्ञानस्य चिद्रूपत्वाभावेऽपि स्वच्छत्वादुत्पत्तिसमकालमेव व्योमवत्सर्वगतचित्प्रतिबिंबग्राहितया स्फुरणमित्यदोषात्। तथाचोक्तं वार्तिके-

(प०टि०)"वियद्वस्तुस्वभावानुरोधादेव न कारकात्।
वियत्संपूर्णतोत्पत्तौकुंभस्यैवं दृशा धियाम्।।" इति।।

तस्माद्यथा छेत्ता छिदया छेद्यं व्याप्नोति, न तु छिदाम् स्वात्मानं वा छिदान्तरेण, नापि छिदैव छेत्री, तथा साक्षी विज्ञानेन प्रमेयं व्याप्नोति, न विज्ञानं स्वात्मानं वा विज्ञानान्तरेण, नापि विज्ञानं स्वयमेव *भासकमिति भावः। वासनावैचित्र्यात्प्रवृत्तिज्ञानवैचित्र्यमित्युक्तिं निराचष्टे-अथेति।। अथ = बाह्यार्थस्यज्ञानाकारत्वाभ्युपगमानन्तरमपि तद्वैचित्र्यहेतुभूता वासनाः कुतः = कस्मान्निमित्ताद्वा स्युः। तथाच वासनासिद्धौ ज्ञानवैचित्र्यसिद्धिः, तत्सिद्धौ च वासनासिद्धिरित्यन्योन्याश्रयः। अनादित्वेन परिहारे त्वप्रमाणमूलकत्वादंधपरंपरान्यायापत्तिरित्यवश्यं वासनासिद्ध्यर्थं बाह्यार्थोऽभ्युपेय इति भावः। अथवा-कुत इति सप्तम्यन्तात्सार्वविभक्तिकस्तसिः। कस्मिन्त्स्युरित्यर्थः। वास्यस्य स्थायिनोऽनभ्युपगमादसन्निहितभाविविज्ञानानां च वासयितुमशक्यत्वादित्यर्थः। अथवा-प्रथमान्तात्तसिः। कुतः = किं स्वरूपा

*भास्यमिति पाठः।

वासनास्स्युः। किं विज्ञानेभ्यो भिन्ना उत न? आद्ये विज्ञानैक स्कंधवादहानिः। द्वितीये त्वभेदे निमित्तनैमित्तिकभावानुपपत्तिः। आलयविज्ञानसंतानपतितमेवाऽसंविदितं ज्ञानं वासनेति चेन्न। तस्यापि चिरातीतस्याऽसतो वैचित्र्यनिमित्तत्वायोगात्। यत्तूक्तं विज्ञानेन बाह्येऽर्थे अतिशयाधानाऽसंभवात्प्रकाशानुपपत्तिरिति, तन्न। चित्प्रतिबिम्ब-ग्राहिवृत्त्या बाह्येऽर्थे आवरणभंगलक्षणस्य चिदुपरागलक्षणस्य वाऽतिशयस्याधानेन प्रकाशसंभवात्। अतीतानागतवस्तूनामपि सूक्ष्मरूपेणावस्थानाभ्युपगमेन तत्रापि ज्ञानेनाऽसत्वापादकाऽज्ञानाऽऽवरणनाशेन पारोक्ष्येण स्फुरणसंभवात्। उपपादयिष्यते चेदमुपरिष्टात्। भेदाभेदादिना दुर्वचत्वं च, सर्ववस्तूनां मायामयत्वात्, नत्वत्यन्तासत्वात्। अन्यथा विज्ञानानामपि भेदाऽभेदादिना दुर्वचत्वेनाऽसत्वप्रसक्तौ शून्यवादप्रसङ्गात्। किञ्च, विज्ञानस्य क्षणिकत्वात्सौत्रान्तिकमतोक्त दोषाऽनिर्मोकश्चेत्याह-किञ्चेति।। प्रागुक्ताः = पूर्ववादिमतनिरासार्थमुक्ताः-अभावग्रस्तानामुत्पादकत्वासंभवः, प्रतिज्ञाविरोधः, वस्तुनः शाश्वतत्वप्रसंगश्चेत्येवमादयो दोषाः क्षणिके चिति = विज्ञानेऽपि स्युरेवेत्यर्थः। स्थितिदर्शनोपवासाद्यर्थेषु तिष्ठनापश्यनापोषधमित्याद्यपशब्दप्रयोगादप्य-संगतं सुगतदर्शनमित्यनुक्तदोषसमुच्चयार्थश्चकारः। तेन = उक्तदूषणगणेन, विज्ञान-वादः = क्षणिकविज्ञानैकस्कंधवादः हतः = निरस्तः न पुनरुत्थातुं क्षमत इत्यर्थः।।२५।।

इत्थं क्षणिकविज्ञानवादिनां प्रतीत्यसमुत्पादः, क्षणिकभावाद्भावकार्योदयलक्षणो निरस्तः। इदानीं क्षणिकभावस्य निरपेक्षस्य कार्योत्पादकत्वे पुरुषप्रयत्नादि-सहकारिवैयर्थ्यात्, सापेक्षत्वे च क्षणस्याऽभेद्यत्वेनोपकृतत्वाऽनुपकृतत्वावस्थाद्वयासंभवा द्भवदुक्तदोषनिवहाच्च वैनाशिकैरर्थान्निरुपाख्यादभावादेव जगदुत्पत्तिरभ्युपगता, शून्यवादिनापि निरधिष्ठानमेवजगदारोपमभ्युपगच्छता अर्थात्तादृशाभावादेव सांव्यवहारिकजगदुत्पत्तिरभ्युपगतेति पूर्ववादिनां पक्षान्तरं शून्यवादिमतं चैकीकृत्य निराकरिष्यन्नाह-

मू०।। नाऽभावाद्भावजन्म क्वचिदपि कलितं निर्विशेषाद्विचित्रं
न स्यात्तेनानुविद्धेऽह्यसदसदिति च प्रत्ययस्स्यादशेषे।
केनाऽभावप्रथा ते किमिति न सकलं सर्वतस्स्यादभीष्टं
सर्वेषां स्यादयत्नं किमिति जड भवानात्मघाते प्रवृत्तः।। २६।।

नाभावादिति।। अत्यन्तासत अभावात् भावस्य = भावपदार्थस्य जन्म क्वचिदपि देशे काले वा न कलितम् = न दृष्टम्, न श्रुतं चेत्यर्थः। यद्य भावाद्भावोत्पत्तिस्स्याच्चिरविनष्टबीजेभ्यः शशविषाणादिभ्यश्च सदैवाङ्कुराद्युत्पादस्स्यात्।

नच तथादृश्यत इति भावः। किंच, बीजाद्युपमर्दस्य, मृत्पिण्डाद्युपमर्दस्य शशशृङ्गादेश्च निरुपाख्यस्य वैलक्षण्याभावादङ्कुरघटादीनां परस्परवैलक्षण्यं न स्यादित्याहनिर्विशेषा-दिति।। निर्विशेषात् = व्यावर्तकधर्मशून्यात्, घटाङ्कुरादिविचित्रं = परस्परव्यावर्तक गुणक्रियासामान्य विशिष्टं न स्यात्। कारणवैचित्र्यं विना कार्ये तदयोगात्। यदि * तूत्पलादौनैल्यादीवाऽभावेऽपि विशेषा अभ्युपगम्येरंस्तर्हि अभावत्वमेव भज्येतेति भावः। नच प्रतियोगिवैचित्र्यादेव वैचित्र्यहेतुत्वम्। तद्वैचित्र्येऽपि हेत्वन्वेषणादनवस्थाद्यापत्तेः, प्रतियोग्यभ्युपगमे शून्यवादहानाच्च। किंच, यद्येनान्वितं प्रतीयते तत्तस्यैव विकारः, यथा-कटकादयो हाटकस्य। तथाच सत्सदिति सदन्वित प्रतीतिगोचरस्य जगतस्सदेवोपादानं नासत्, तथासत्यसदन्विततत्वेनैव प्रतीतिप्रसङ्गा-दित्याहतेनेति।। तेन = अभावेन, अनुविद्धे = अन्विते अशेषे जगति 'घटोऽसन् पटोऽसन्' इत्येवं रूप एवं प्रत्ययस्स्यात्, नतु सन्सन्निति। नच तथा कस्यचित्प्रतीतिरस्तीति सदेवोपादानमित्यर्थः। ननु सतोवा कूटस्थस्य कथं कारणत्वम्? ऽसद्धि कार्यजनन स्वभावमतत्स्वभावं वा?। आद्ये समर्थस्याऽपेक्षाऽयोगाद्या-वदनेन कर्तव्यं तावत्सहसैव कुर्यात्। द्वितीये न कदापि कार्ये जनयेत्। कादाचित्कसहकारिसापेक्षत्वान्नायं दोष इति चेत्, न। सहकारिणामुपकारानाधायकत्वे वैयर्थ्यात्। तदाधायकत्वे उपकारस्यापि कार्यत्वात्तदाधानाय सहकार्यन्तरं तत्कृतोपकारान्तरं, तत्राप्यन्यदन्यदित्यनवस्थापातात्। उपकारस्यैवाऽन्वयव्यतिरेकाभ्यां कार्यहेतुत्वसंभवेन कूटस्थस्य कारणत्वभङ्गात्। उपकारलक्षणविकाराश्रयत्वे कौटस्थ्य भङ्गाच्च। यथाहुः-

(१)"वर्षातपाभ्यां किंव्योम्नश्चर्मण्यस्ति तयोः फलम्।
(२)चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः।।" इति।।

तस्मान्नसतोपिहेतुत्वसंभव इति चेन्न। कूटस्थस्याप्यनिर्वाच्याऽविद्यावृतस्य कामकर्मवासनादिसहकारिवैचित्र्याद्विचित्रजगदध्यासाधिष्ठानत्वलक्षणे विवर्तोपादानत्वे

---

* उत्पलादेरिति ग्र० पा०। ऽ तद्धिति ग्र० पा०।

(१) वर्षातपाभ्यां किमति।। ननु यथा वर्षातपाभ्यां व्योम्न उत्पद्यमान विकारेण सम्बन्धो नास्ति तद्वत्कूटस्थस्यात्मनोप्युपकारिभिर्निष्पाद्येनातिशय लक्षेणेनोपकारेण सम्बन्धो नास्ति। यद्वा वर्षातपयोर्यथा चर्मणि वर्षा तप जन्यार्द्रादिभाव लक्षणोपकारकाधारत्व लक्षणं फलं भवति तद्वत्सतोपि जगत्कारणस्य सहकारिकारण जन्योपकाराश्रयत्वमस्तीति चेदाह।

(२) चर्मोपमश्चेदिति।। यदि चात्मनश्चर्मण इवोपकाराश्रयत्वमस्ति तदा सोप्यात्मापि च विकारितया चर्मवदनित्यस्यात्।। यदि तु ख इव न किंचिदुपकारीजन्योपकार लक्षणातिशयाश्रयत्वमस्ति तदाऽऽत्माप्याकाशेव जगत्कारणं न स्यात् केवलस्य निर्विकारतयातज्जननासमर्थत्वादिति भावः।।

बाधकाभावात्। कथमन्यथा व्योम्नि तलमलिनताद्यध्यासः। नच तत्रोपकाराधाना-ऽसंभवः। उपकारस्याप्यनिर्वचनीयत्वात्। अतएव तत्प्रयुक्तकार्यमप्यनिर्वचनीयमेव। नच अविद्यादिभिरेवकार्यसिद्धौ कूटस्थस्य सतोऽन्यथासिद्धिरिति वाच्यम्। तथाविधस्यापि रज्ज्वादेरन्वव्यतिरेकाभ्यां सर्पाद्युपादानत्वदर्शनेन निरधिष्ठाना-ऽऽरोपासंभवात्। अविद्यादेः श्रौतकूटस्थकारणत्वनिर्वाहाय कल्पितत्वेनान्य-थासिद्ध्यभावाच्च।। किंच, ग्राहकाभावादलीकस्य प्रथैव न सिद्ध्यति, दूरापास्तं तस्य कारणत्वमित्यभिप्रेत्याह-केनेति। ते = तव अभावस्य प्रथा = प्रसिद्धिः केन? न तावत्प्रत्यक्षेण, अवस्तुन इन्द्रियसंबंधाऽयोगात्। अत एव सहचाराद्य-ग्रहान्नानुमानेनापि। नाप्यनुपलब्ध्या, तस्यास्त्वयामानत्वानभ्युपगमात्। नापि साक्षिणा, तदभ्युपगमे सर्वशून्यत्वभंगात्। क्षणिकविज्ञानानां च स्वमात्रगोचरत्वाच्छून्येन तेषां संबंधाऽघटनाच्चेत्यर्थः। निर्विशेषस्याप्यभावस्य विचित्रजगज्जननस्वाभाव्ये तस्य सार्वत्रिकत्वात्सर्वकार्याणां सर्वत्रोत्पत्तिस्स्यादित्याशयेनाहकिमितीति सकलं कार्यं सर्वतः = (प०टि०)सर्वत्र किमिति न स्यात्? एवं (प०टि०)सर्वदा (प०टि०)सर्वात्मकं च किमिति न स्यादित्यपिबोध्यम्। अतएव कृषीबलादेर्विनापि कृष्यादिप्रयत्नम-भीष्टसिद्धिस्स्यात्, अभावस्य सुलभत्वादित्याह-अभीष्टमिति।। अयत्नं = यत्नं विनापि सर्वेषां सर्वमभीष्टं सर्वदा स्यात्। तथा च कृष्यादिप्रवृत्तिर्नस्यादित्यर्थः किंच, सर्वशून्यता ज्ञानस्य फलं नैरात्म्यलक्षणा मुक्तिस्तवाभिमता। सा च न पुरुषार्थः। प्रत्युताऽनर्थ एव। नहि कश्चिदात्मनो नाशमसत्वं वा स्पृहयति। प्रत्युत तद्द्वेष्ट्येवेति शास्त्रस्य वैफल्यमनर्थार्थत्वं चेत्यभिप्रेत्योपहसतिकिमितीति।। अथवा, असन्मार्गोपदेशेन जगदनिष्टकारिणस्तवावर्जनीयमेव दुरन्तनरकाद्यनिष्टमिति खेदेनाह-किमितीति।। हे जड = स्वपरहिताहितानभिज्ञ, आत्मघाते = स्वनरकहेतावसन्मार्गोपदेशे भवान् किमिति प्रवृत्तः? अहो ते दुरदृष्टविलसितम्! बतेत्यर्थः; ।। २६।।

एवं मुक्तकच्छानां समये निरस्ते विवसनसमयः प्रसङ्गान्निरस्यतेतेह्येवमाहुः-जीवाऽजीवाऽऽस्त्रवसंवरनिर्जरबंधमोक्षाख्याः सप्तपदार्थाः। संक्षेपतस्तु जीवाजीवौ द्वावेव पदार्थौ। तयोरेव जीवास्तिकायः, पुद्गलास्तिकायः, धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्थिकायश्चेत्यपरः पञ्चधा विभागक्रमः।। अस्तिकायशब्दः पदार्थवाची। तत्र जीवास्त्रिविधाः-अर्हन्मुख्याः नित्यसिद्धाः, तच्छिष्यपरंपरासु मुक्ताः, सांप्रतिकबद्धाश्चेति। पृथिव्यादिचतुष्टयं स्थावरं जंगमञ्चेति षड्विधः पूयते गलति

चेति व्युत्पत्तेरुपचयापचयधर्मी पुद्गलास्तिकायः। [१]मोक्षमार्गप्रवृत्त्यनुमेयो धर्मास्तिकायः। संसारस्थित्यनुमेयस्त्वधर्मास्तिकायः। लोकाऽलोकाऽऽकाशभेदेन आकाशास्तिकायो द्विधा। आद्योऽधस्ताद्बद्धस्थानं, द्वितीय उपरिष्टान्मुक्तोपसृप्यः। पौरुषं ज्योतिर्विषये-ष्वास्रावयतीत्यास्रव इन्द्रियप्रवृत्तिः। आस्रवस्रोतः संवृणोतीति संवरः शमदमादिः। पुण्याऽपुण्याख्यसर्वकर्मनिर्जरणहेतुत्वान्निर्जरस्तप्तशिलाऽऽ रोहणादिः। बंधोऽष्टविधं कर्म। तत्राऽऽर्हतदर्शनान्नमुक्तिः, आर्हतदर्शनमप्रमाणं, नाना तीर्थकरदर्शितमार्गेषु कोविशेष इत्येवं विधनिश्चयत्रयहेतवः सन्मार्गप्रवृत्तिविघ्नश्चेति चतुर्विधं क्रमाज्ज्ञाना-वरणीयं, दर्शनावरणीयं, मोहनीयमन्तरायञ्चेति चतुस्संज्ञं श्रेयोविघातित्वाद्घातिकर्म।। मम वेदितव्यं तत्वमस्ति, तच्चैतन्नामकम्, अहमार्हतशिष्यपरंपरात्मकगोत्रप्रविष्ट इति त्रिविधज्ञानहेतवो यावत्ज्ञानोदयं जीवनसंपादकञ्चेति चतुर्विधं क्रमाद्वेदनीयं, नामिकं, गोत्रिकम्, आयुष्कं चेति चतुस्संज्ञं श्रेयोऽनुकूलत्वाद्घातिकर्मेत्यष्टविधं कर्म। विगलितसमस्तक्लेशतद्वासनस्याऽनावरणज्ञानस्य सुखैकतानस्या-ऽऽत्मनुपर्युपर्यलोकाकाशेऽवस्थानंमोक्षः। धर्माऽधर्मबलात्संसारे निमग्नस्य जीवस्य तत्वज्ञानात्तद्विच्छेदेन जलतुंबिकान्यायेन सततोर्ध्वगमनं मोक्ष इत्यन्ये। त एतेसप्तपदार्था अनैकान्तस्वभावा इति प्रतिपादनाय सप्तभंगीनयं नाम न्यायमवतारयंतितद्यथा-स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चाऽवक्तव्यश्च, स्यान्नास्तिचाऽऽवक्तव्यश्च, स्यादस्ति च नास्तिचाऽवक्तव्यश्चेति। एवं स्यादेकः, स्यादनेकः, स्याद्भिन्नः, स्यादभिन्न इति सर्वधर्मेषु विकल्पा बोध्याः। अस्माच्च न्यायात्सर्वाऽनैकांत्यसिद्धिः। सप्तचैकान्तभङ्गाः कथंकथं कदा कदा च प्रसरन्तीत्यपेक्षायामनन्तवीर्य आह-

"तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते।।
क्रमेणोभयवाञ्छायां प्रयोगः समुदायभृत्।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः।।
आद्यावाच्यविवक्षायां पञ्चमो [२]भङ्ग इष्यते।
अन्त्यावाच्यविवक्षायां पष्ठभंगसमुद्भवः।
समुच्चयेन युक्तश्च सप्तमो भंग उच्यते।।" इति।।

सदसदुभयैकान्ते भंगे अनिर्वाच्यत्वनियमभङ्गाय चतुर्थो भङ्गः। तेष्वेव

(१) मोक्षमार्गप्रवृत्यनुमेयो धर्मास्तिकाय इति।। अयं पुरुषः धर्मवान् मोक्षमार्ग प्रवृत्तत्वात्। अयं पुरुषः अधर्मवान् संसारमार्ग प्रवृत्तत्वात्।

(२) भग्ने इति पाठः

पक्षेषु तत्तद्वाद्युक्ताऽनिर्वचनीयत्वैकान्त्यभङ्गायोत्तरे भङ्गाः। सर्वत्र "स्यादिति" कथंचिदित्यर्थको निपातः सर्वथाऽनैकान्त्यद्योतनाय। तथा चाहुः-

"स्याद्वादः सर्वथैकान्त्यत्यागात्किंवृत्तचिद्विधेः।
सप्तभंगनयापेक्षो [१]हेयाऽऽदेयविशेषकृत्।।" इति।।

किंवृत्तिचिद्विधेः = किंशब्दनिष्पन्नकथंचिच्छब्दगोचरत्वात्, सर्वथा वस्त्वनैकान्त्यम्। तथाहि-यदि वस्त्वस्त्येव तर्हि सर्वदा सर्वत्र सर्वात्मनाऽस्त्येवेति न।। तदादित्साजिहासे स्याताम्, हानोपादानयोरशक्यत्वात्। अनैकान्त्ये तु कादाचित्के क्वाचित्के च ते उपपद्येते इति। तदेतन्निराचिकीर्षुराह-

मू०।। नैकोऽर्थः सप्तधा स्याद्भवति यदि भवेत्साप्तविध्यं च तद्व-
ज्जीवाजीवादयोऽर्थाःकिमिति च न तथास्याज्जगच्चाव्यवस्थम्।
संदेहस्स्याद्विरोधादवधृतिरथ ते बंधमोक्षाऽव्यवस्था
सर्वाऽनैकान्त्यवादो गतवसन! ततो भाति मत्तप्रलापः।। २७।।

नैकोऽर्थ इति।। एकः = अभिन्नः स्तंभकुंभादिरर्थः, अस्तित्वनास्तित्वादिविरुद्धधर्मैः सप्तधा = सप्तप्रकारः न स्यात्, एकत्र विरुद्धधर्माणामसमादेशात्। समावेशे च विरोधोच्छेदप्रसङ्गात्। परस्परविरोधेन धर्माणां मिथ्यात्व कल्पनेऽपि धर्मिस्वरूपस्य सदैकरूपस्यैव परिशेषाच्चानैकान्त्याभावात्। यत्परमार्थतोऽस्ति ब्रह्मतत्वं तदस्त्येव न नास्तीत्यपलपितुं शक्यम्। आत्माऽपलापे [२]अपलापस्याप्यसिद्धेः। व्यवहारे जगद्रूपमपि व्यावहारिकप्रमाणसिद्धमधिष्ठानब्रह्मसत्तयाऽस्त्येवेत्येकरूपमेव। न च तथासति क्वचिदस्ति क्वचिन्नास्तीति द्विविधव्यवहारानुपपत्तिः। सत एव वस्तुनो देश कालसंबंधविशेषमपेक्ष्य परिच्छिन्नरूपेण कल्प्यमानयोस्सत्वाऽसत्वयोर्वस्त्वसंस्पर्शेन तदैकरूप्याऽविरोधित्वात्। परमार्थदृष्टौ तु जगत्संभावनैव नास्तीति धर्म्यनिरूपणे कस्मिन्ननैकान्त्यमिति भावः। किंच, अनैकान्त्यवादिनः पदार्थेषु साप्तविध्यप्रतिपादनाऽनुपपत्तिः, तस्याप्यनैकान्त्यादिति स्वप्रक्रियाव्याघातश्चेत्यभिप्रेत्याहभवति यदीति।। यद्येकोऽर्थो विरुद्धसाप्तविध्यलक्षणाऽनैकान्त्यवान्भवति, तर्हित्वया पदार्थेषु विभागेन दर्शितं साप्तविध्यं च = सप्तप्रकारत्वमपि, तद्वत् = अनैकान्तिकं स्यादित्यर्थः। तथाच सप्तपदार्था इति

(१) अहेय इति पाठः।
(२) अपलप्तुरभावादिति शेषः।

प्रतिज्ञाविरोध इति भावः। अथवा, एकैकस्मिन्वस्तुनि विरुद्धं त्वदुक्तसाप्तविध्य-लक्षणमनैकान्त्यमपि तद्वत् = अनैकान्त्यं स्यात्। तथाच सर्ववस्तुष्वनैकान्त्य-नियमाऽसिद्धिरित्यर्थः। [१]अथवा, साप्तविध्यमनैकान्तिकं नवा? उभयथाप्यनैकान्त्य-नियमासिद्धिः, आद्ये आत्माश्रयादिश्चेत्यभिप्रेत्याह-भवतीति।। अत्र तद्वदिति मतुबन्तमात्माश्रयादिद्योतनाय बोध्यम्। किंचजीवाजीवादिस्वरूपमप्यनियतरूपं [२]चेत्परस्परसंकीर्णस्य तस्यनियतरूपेण विभागाऽनुपपत्तिश्चेत्यभिप्रेत्याहजीवाजीवादय इति।। अर्थाः = त्वदभिमतपदार्थाः, तथा = स्याज्जीवः, स्यादजीवइत्यादि भङ्गसंभवादनेकान्तस्वभावाः किमिति न भवेयुरिति विपरिणामेन संबंधः। अनियते च शास्त्रार्थे शिष्याणामनाश्वासात्प्रवृत्तिर्नस्यात्। कस्यचित्कथंचित्प्रवृत्तावपि धर्माधर्मयोस्तत्फलयोश्च सांकर्यादनर्था[प०टि०]वाप्तिरपि स्यादिति भावः। न केवलं शास्त्रार्थ एव शिष्याणामेव प्रवृत्यनुपपत्तिः। किन्तु कस्यापि क्वापि प्रवृत्यनुपपत्तिः अन्नादौ विषादौ च तृप्ति मरणसाधनत्वानैकान्त्य साम्यादित्याशयेनाऽऽह-स्यादिति।। अनैकान्त्ये जगत् = वस्तुमात्रं, अव्यवस्थं = हानोपादानोपयोगिसदसद्व्यवस्थाशून्यं स्यादित्यर्थः। तथाच स्याद्वादो "हेयाऽऽहेयविशेषकृत्" इत्येतद्विपरीतमिति भावः।

किंच, त्वदभिमतानैकान्त्यज्ञानं विरुद्धनानाकोट्यवगाहित्वात्संशयात्मकमेव स्यादित्याह-संदेह इति।। ते = तव, अवधृतिः = शास्त्रार्थनिर्णयत्वेनाभिमतं ज्ञानं कोट्यंशे विरोधात् = विरुद्धनानाकोट्यवगाहित्वादित्यर्थः। सन्देहः = संशयात्मकं ज्ञानं स्यात्-एकस्मिन्धर्मिणि विरुद्धनानाकोट्यवगाहिज्ञानं संशय इति तल्लक्षणयोगादित्यर्थः। तथाच तस्याऽप्रमात्वाच्छास्त्रस्याऽप्रामाण्यं स्यादिति भावः। न चानैकान्त्यस्य वस्तुयाथात्म्यत्वान्नतदवगाहने उक्तदोष इति युक्तम्। वस्तुनि विकल्पाऽसंभवेन तस्य वस्तुयाथात्म्यत्वासिद्धेः। तथाचोपहसितमाचार्यवाचस्पति-मिश्रैः = "तस्मात्स्थाणुर्वा पुरुषोवेति ज्ञानवत् सप्तत्वपञ्चत्वनिर्द्धारणस्य च फलस्य निर्द्धारयितुः प्रमाणस्य च, तत्प्रमेयस्य च सप्तत्वपंचत्वसदसत्वसंशये साधुसमर्थितं

---

(१) अथवा साप्तविध्यमनैकान्त्यं न वेति।। साप्तविध्येप्यनैकान्त्यता नियमानङ्गीकारे सर्ववस्तु साप्तविध्यात्मकमिति नियम भङ्गापत्तिदोषः।। तत् स्वीकारे साप्तविध्येपि साप्तविध्यमस्ति इति पक्षे साप्तविध्ये यत् साप्तविध्यमस्ति तत् किं स्वयमेवोत्तान्यदिति प्रथम पक्षे त्वात्माश्रयो दोषः द्वितीये त्वन्योन्याश्रय चक्रकानवस्थादयोदोष इति भावः।

(२) परस्परसंकीर्णस्येति।। जीवाजीवयोरपि अनैकान्त्यत्वे पक्षे जीवस्य जीवत्वं पक्षेचाजीवत्वं तद्वदजीवस्यापि पक्षेऽजीवत्वं पक्षे च जीवत्वमिति पाक्षिक जीवाजीवत्वमादाय परस्पर साङ्कर्यत्वं स्यादित्येवं परस्परसंकीर्णस्याजीवजीवभावापन्नस्य जीवाजीवपदार्थस्येत्यर्थः।

तीर्थकरत्वमृषभेण" इति।। अथवा, यदि विरुद्धकोट्यवगाहित्वेऽप्यनैकान्त्यज्ञानं प्रमास्यात्तदा स्थाणुर्वा पुरुषोवेति संशयोऽपि तथा स्यात्, स्थाणुपुरुषयोर्भेदस्याप्य नैकान्त्यादित्याशयेनाह–संदेह इति।। कोट्यंशे विरोधात्संदेहत्वेन सर्वानुभवसिद्धोऽपि प्रत्ययः अवधृतिः = वस्तुयाथात्म्यनिश्चयस्स्यादित्यर्थः। अपि च जैनैः शरीरपरिमाणो जीव इत्यभ्युपगमात्तथाविधस्य च सावयवत्वावश्यंभावान्मनुष्यदेहपरिमितस्य बाल्याद्यवस्थाभेदे हस्तिमशकादिदेह प्राप्तौ च (१)व्यापनसमागमनयोरवयवोपचया–ऽपचयावन्तरेणाऽसंभवादुपचिताऽपचितयोर्भेदादुत्पत्तिविनाशधर्मताप्रसक्तावभिनवोत्पन्नस्य निष्कारणोबंधः, विनष्टे च तस्मिन्नन्यस्य (२)निष्कारणो मोक्षश्चाऽव्यस्थितः कल्पितस्स्यादित्याशयेनाह–अथेति।। अस्त्येवाऽनैकान्त्यप्रयुक्ताऽव्यवस्था, तत्रेयमपराप्यव्यवस्थेति द्योतनार्थमथशब्दः।। निष्कारणयोर्बन्धमोक्षयोः, अव्य–वस्था = अस्थितिः, असंभव इत्यर्थः। अथवा, निष्कारणमेव बंधमोक्षकल्पने पूर्वमुक्तनामर्हदादीनां च बंधप्रसङ्गः, विनैव शास्त्रीयोपायं सर्वेषां मोक्षप्रसङ्गः, ततो बंधप्रसङ्गश्चेत्यव्यवस्था = अनियमस्स्यादित्यर्थः। तत्कल्पितपरमाणुकारणवादः, पदार्थविशेषाः, धर्माऽधर्मादयो मोक्षोपायादयश्च सर्वनैकान्त्यं समर्थयद्भिस्तैरेव पराहता नपृथग्दूषणार्हा इति स्वोक्तिव्याहतं सर्वप्रमाणविरुद्धं च जैनदर्शनमिति–दर्शयन्नुपसंहरतिसर्वेति।। हेगतवसन = दिगंबरेति निर्लज्जत्वोन्मत्तत्व–द्योतकं संबोधनं। ततः = उक्तदोषगणात्तव सर्वाऽनैकान्त्यवादो मदिरादिना मत्तस्य, ग्रहावेसादिना परवशचित्तस्येव वा प्रलापः = निरर्थकजल्पितं भाति सचेतसामिति शेषः। तथा च सर्वथाऽनुपादेय इत्यर्थः।। २७।।

इत्थं बाह्यदर्शनेषु निरस्तेषु वैदिकैकदेशी हैरण्यगर्भः प्रत्यवतिष्ठते। ननु "हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्" "नैवेहकिंचनाग्र आसीत्", "मृत्युनैवेदमावृतमासीत्" इत्यादिश्रुतिभिः "आदिकर्ता सभूतानां ब्रह्माग्रे समवर्तत" इत्यादिस्मृतिभिश्च हिरण्यगर्भस्यैव सर्वजगदादिकारणत्वमवगतमिति न भवदभिमतब्रह्मकारणत्वसिद्धिः। न च "यो ब्रह्माणं विदधाति पूर्वम्" "यो देवानां प्रभवश्चोद्भवश्च" इत्यादि मन्त्रेषु हिरण्यगर्भस्यापि जनकोऽन्यः श्रूयत इति वाच्यम्। "नैवेह किञ्चनाग्र आसीत्" "आदिकर्ता सभूतानाम्" इति

(१) व्यापनसमापनयोरिति पाठः

(२) निष्कारणो मोक्ष इति।। पूर्वानुष्ठितमोक्षसाधनस्य जीवस्य विनष्टे सति मोक्षान्वयासम्भवातदन्य एव तदनुष्ठित साधनसाध्यमोक्ष अन्वययोग्यो जीवः कल्पितः स्यात्तथा च तस्य तथाविधो मोक्षो निष्कारणमेव स्यादभिनवोत्पन्नत्वेनाननुष्ठितमोक्षसाधनत्वादिति भावः।।

ब्राह्मणस्मृतिवाक्याभ्यामितरनिरासे "सोमः पवते जनिता मतीनाम्" इति मन्त्रस्य सोमलतायायागद्वारा [१]सर्वदेवताप्यायकत्वात्तज्जनकत्वौपचारिकत्ववत्तेषा-मप्युपचारेणोपास्यदेवतान्तर प्रशंसार्थत्वात्। अतएवास्मदुदाहृतमन्त्रेषु आशीदितिपदं "सदेव सौम्येदमग्र आसीत्, ब्रह्मवा इदमग्र आसीत्" इत्यादौ भवदभिमते ब्रह्मणीव नित्यसत्तायास्त्रैकालिकत्वादतीतकालसंबंधोप्यस्तीति तन्मात्राभिप्रायं नातीतसत्वाभिप्रायम्। अर्चिरादिमार्गेण हिरण्यगर्भावाप्तिरेव हि तत्र तत्र ब्रह्मविदां श्रूयते। तच्च हिरण्यगर्भस्यैव परत्वेऽवकल्पते। अन्यथा दहरादि विद्यासु हिरण्यगर्भस्य कारणं ब्रह्मैवभवन्मते उपास्यमिति तत्क्रतुन्यायेनोपासकस्य कारणप्राप्तिरेव फलं वाच्यमिति हिरण्यगर्भाऽवाप्तये मार्गोपदेशः "प्रजापतेः सभांवेश्मप्रपद्य" इत्यादिमन्त्रलिङ्गञ्चाऽसंगतं स्यात्। तस्माद्धिरण्यगर्भ एव परः, तदुपास्तिपरश्च सर्वोवेदान्त इति।। तदेतन्निराकर्तुमाह-

मू०।। एवं हैरण्यगर्भाद्युदितमपि जगत्कारणं नाऽऽदरार्हं
यस्मात्कस्य प्रसूतिः श्रुतिभिरधिगता क्लृप्तमायुर्मितं च।
अस्य ज्ञानादियोगं गमयति च यतो ब्रह्मवाणी
तस्माद्ब्रह्मैव मायाशबलितमुचितं श्रौतमेकं निदानम्।। २८।।

एवमिति।। हिरण्यगर्भो हि (प०टि०) योगाद्यभिमतेश्वरवत्केवलनिमित्तकारणं वा? ब्रह्मवदभिन्ननिमित्तोपादानं वा? अस्मदभिमतसूक्ष्मभूतकार्यलिङ्गसमष्ट्युपाधिको वा? आद्ये योगादिमतनिरासदर्शितान् तनुकरणादिसापेक्षत्वनिरपेक्षत्वयोर्दोषानतिदिशति-एवमिति।। हैरण्यगर्भैः = हिरण्यगर्भोपासकैः. आदिपदात्कालस्वभावादिवादिपरिग्रहः। तैः, उदितम् = उक्तं हिरण्यगर्भादिरूपं जगत्कारणमपि, एवम् = (प०टि०)कापिल-वैशेषिकाद्युपदर्शितकेवलनिमित्तकारणवदेव नादरार्हम् = अनादरणीयं दूष्यमित्यर्थः। द्वितीये तु सत्य भूतप्रपंचाकारपरिणामित्वे सविकारत्वादनित्यत्वप्रसङ्गः। तृतीयेऽपि कार्योपाधेः जीवसमष्ट्यात्मनो जीवत्वमेवेति मूलकारणत्वानुपपत्तिः। जीवसमष्ट्यात्मत्वं तु तस्य "स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत" इति प्रश्नोपनिषदादौ प्रसिद्धम्। अतएव सर्वभूताधिपत्यं कारणत्वं च सापेक्षमेव त्वदुदाहृतमन्त्रे जातपदस्वारस्यादपि तस्याऽन्याधीनजन्मता। अन्यथा आसीदित्यनेन पौनरुक्त्यात्। किञ्च, बृहदारण्यकेऽपि "स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्" "सोऽबिभेत् स वै नैव रेमे" इत्यादिना सर्वदाऽस्यपापदाहभयादिश्रवणादपि न तस्य मूलकारणत्वम्।

(१) अप्यायकत्वात् = वृद्धिकत्वात्।।

अतएव "नैवेह किञ्चनाग्र आसीत्" इति न मूलकारणं प्रतिषिध्यते, "मृत्युनैवेदमावृतमासीत्" इत्युत्तरवाक्ये आवारणीयकार्यजातस्य, आवरकस्य मृत्योः हिरण्यगर्भस्य च सद्भावप्रतिपादनात्। तस्य च पिण्डघटोभयानुगतमृत्स्वरूपस्येवोभयानुगतकारणब्रह्मसत्ताया अनभ्युपगमे दुरुपपादत्वात्।

'स वै शरीरी प्रथमः स वै पुरुष उच्यते!
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत।।"

इति त्वदुदाहृतस्मृतावपि प्रथमः शरीरीति तस्य जीवत्वप्रतिपादनादादिकर्तृत्वमपि तदुत्तरकार्यपिक्षमेव। अत एव "यो ब्रह्माणम्" इत्यादि मन्त्राणां नोपचरितार्थत्वमित्यभिप्रेत्याहयस्मादिति।। यस्मात्कारणात् कस्य = हिरण्यगर्भाख्यस्य त्वदभिमतकारणस्य प्रसूतिः = अन्याधीनोत्पत्तिः "हिरण्यगर्भं जनयामास पूर्वम्" "हिरण्यगर्भं पश्यत जायमानम्" "स प्राणमसृजत" इत्यादिश्रुतिभिः अधिगता = निश्चितेत्यर्थः। न च मन्त्रार्थवादानामन्यार्थस्मरण प्रशंसार्थत्वात्पुरस्फूर्तिके स्वार्थे प्रामाण्यासंभवः। असति बाधके देवताधिकरणन्यायेन ज्ञानानां स्वतः प्रामाण्यादेव तत्सिद्धेः। किंच, हिरण्यगर्भस्यैव परत्वे।

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्।।"

इति प्राकृते प्रलये हिरण्यगर्भेण सह तत्पदप्राप्तानां सर्वेषां परमपदान्तरप्रवेशस्मृतिः, हिरण्यगर्भस्य द्विपरार्द्धपरिमिताऽऽयुष्ट्वस्मृतयश्च विरुद्धयेरन्नित्यभिप्रेत्याहक्लृप्तमिति।। तस्येत्यनुषज्यते।। तस्य = हिरण्यगर्भस्य आयुः = जीवनकालः मितम् = द्विपरार्द्धसंमितं, क्लृप्तम् = समर्थितं पुराणादिष्विति शेषः। चकारस्तत्पदस्य "तद्धैतल्लोकजिदेव" इत्यादिश्रुतिसिद्धकर्मफलत्वस्य तत्प्राप्तानां विरक्तानां दर्शितप्रवेष्टव्यपदान्तरसद्भावस्य च संग्रहार्थः। तत् = प्राणदर्शनं, ह = प्रसिद्धं, एतल्लोकजित् = हिरण्यगर्भभावप्राप्ति हेतुर्भवत्येवेति दर्शितश्रुतेरर्थः। यत्तु ब्रह्मविदामर्चिरादिमार्गेणगतिः श्रूयत इत्युक्तं, तन्न निर्विशेषब्रह्मविदः। "अथाऽकामयमानो योऽकामो निष्कामः आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" इति तत्प्राणानामुत्क्रमणस्यैव प्रतिषेधात्।. नच "न तस्मात्प्राणा उत्क्रामन्ति" इति शाखान्तरे पञ्चमीपाठानुरोधात्, शुकस्याऽऽदित्यमण्डले गमनस्मृत्यनुरोधाच्च तस्येतिषष्ठी संबंधविशेषे व्यवतिष्ठेतेति तस्मादुच्चिक्रमिषोः

ब्रह्मविदो जीवात्प्राणानोत्क्रामन्ति सहैव तेन यान्तीति श्रुतेरर्थः किं न स्यादिति वाच्यम्। ''कस्मिन्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वाप्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत'' इति जीवोत्क्रमणप्रतिष्ठादीनां प्राणाधीनत्वश्रवणेन शरीरादुत्क्रान्ताज्जीवात्पुनः प्राणानामुत्क्रान्तिप्रसक्त्यभावेन तस्य प्रतिषेद्धुमनर्हत्वात्। किंच, आर्तभागप्रश्ने ''यत्रायं पुरुषोम्रियत उदस्मात्प्राणाः क्रामन्त्याहो नेतीत्यत्र ''नेतिहोवाच याज्ञवल्क्यः'' इत्यनुत्क्रान्तिपक्षे परिगृहीते प्राणानुत्क्रमणे मरणानुपपत्तिशंकानिरासाय ''अत्रैव समवलीयन्ते, स उच्छ्वयत्याध्मायत्याध्मातोमृतः शेते'' इति वाक्यशेषात्स्पष्टमेवोच्छ्वयनादिधर्मिदेहावधिकैवोत्क्रान्तिः प्रतिषिध्यत इति प्रतीयते।

''सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः।
देवा मार्गे विमुह्यन्तिह्यपदस्य पदैषिणः।।''

इति स्मृतेश्च न ब्रह्मविदोऽर्चिरादिगतिः। शुकस्य सूर्याभिगमनं तु योगमाहात्म्यख्यापनाय सशरीरस्यैवेति तत्प्रकरणस्थसर्वभूतदृश्यत्वोपन्यासादवगम्यते। सविशेषब्रह्मविदां त्वनाप्तकामत्वात्सांकल्पिकपितृमात्राद्युपासनाफलोपभोगकामत्वाच्च तद्भोगायार्चिरादिगतिः, ततोऽपि कारणब्रह्मभावे भोगासिद्धेरनादिसिद्धेश्वरत्वस्योपास्तिफलत्वासंभवाच्च तेषां कार्यब्रह्मभावेनैव भोगोऽप्यर्थसिद्ध इति न तत्क्रतुन्यायविरोधः। अत एव न मन्त्रलिङ्गविरोधोऽपि। (१)''कार्यं बादरिरस्य-गत्युपपत्तेः'' इत्यधिकरणे दहराद्युपासकानामपि कार्यब्रह्मावाप्तेः सिद्धान्तितत्वादिति भावः। सर्गाद्यनुकूलज्ञानस्येश्वराधीनत्वश्रवणेन स्वतः सार्वज्ञ्याद्यभावादपि हिरण्यगर्भस्य न मूलकारणतेत्याहअस्येति।। यतो ब्रह्मवाणी = वेदवाक् ''योब्रह्माणं विदधाति पूर्वम्'' इत्येवमाद्या, अस्य हिरण्यगर्भस्य, ब्रह्मतः = मूलकारणेश्वरसकाशात् ज्ञानादियोगम् = वेदद्वारासृष्ट्यनुकूलज्ञानैश्वर्यशक्तिसंबंधं, गमयति = बोधयति। तथाच बाधकाभावेन सोमलतावैषम्यान्नोपचरितार्थत्वं युक्तमिति भावः। चकार उत्पत्ति समुच्चयार्थः ज्ञानादियोगमित्यस्यानन्तरं योज्यः। इत्थं हैरण्यगर्भमतं निरस्तम्। स्वभावादिवादास्तु युक्त्याऽऽभासादिमूलकाः प्रत्यक्षश्रुतिविरोधात्तत्तत्प्रसंगोक्त-

(१) कार्यं बादरिरस्यगत्युपपत्तेः।। कार्यं सगुणं ब्रह्मैतान् गमयत्यमानवः पुरुष इति बादरिराचार्यो मन्यते। कुतः।। अस्य कार्यस्यापरब्रह्मणो गतिर्गन्तव्योपपत्तेः प्रदेशकत्वेन प्राप्यत्वसम्भवात्। न परंब्रह्म गन्तव्यं तस्य व्यापकत्वेन प्रत्यगात्मत्वेन गतिकर्मत्व तत्कर्तृत्वानुपपत्तेरिति।।
(ब्र० सू० अ० ४ पा० ३ सू० ७)

युक्तिजालैश्च निरस्तप्राया एवेति न पृथङ्निरस्यन्ते। एवं निरस्तेषु वादिगणेषु विजयमुद्घोषियन्निव प्रकृतंश्रौतब्रह्मकारणवादं निगमयन्नुपसंहरतितस्मादिति।। तस्मात् = अविरोधात्, श्रौतम् = सर्वोपनिषत्तात्पर्यविषयीभूतम्, एकम् = अद्वितीय-सच्चिदानन्दात्मकं ब्रह्मैव, अनिवर्चनीयानन्तशक्तिमायाशबलितं जगतो निदानम् = आदिकारणं सिद्धं नान्यदित्यर्थः।।२८।।

इति तत्पदवाच्यार्थनिर्णयः।।

***

नमः शिवाय।। इत्थं बहुतरविरुद्धवादिमतनिरासपुरस्सरं लक्षण-स्वरूपप्रमाणैस्तत्पदवाच्यार्थं व्यवस्थाप्येदानीं त्वं पदार्थमपि वादिविप्रतिपत्ति-निरासमुखेनैव परिशोध्यदिदर्शयिषुः चार्वाकान् प्रथममास्कन्दति।। तत्र देहात्मवादिनस्तावदेवमाहुः-"अहमित्यनुभवे देह एव प्रथते, न देहान्तर्वर्त्यन्यः कुण्ड इव दधि। अत एव च 'अहंस्थूलो गौरो गच्छामि इच्छामि, जानामि, इत्याऽऽपण्डितपामरं स्थौल्यगौरतेच्छाज्ञानादेः सामानाधिकरण्यानुभवः नहि धर्मिभेदे धर्माणां सामानाधिकरण्यानुभवः। (प०टि०)नहि भवति 'मधुरं कुण्डं कंबुग्रीवादिमद्दधि' इति। लोहितस्स्फटिक इति धीस्तु स्फटिकलोहितद्रव्ययोः पृथक्करणे बाध्यते। नच नाहं मनुष्य इति कस्य चिद्बाधप्रत्ययोऽस्ति। विदुषामपि गच्छामि, तिष्ठामि, लंघयामि ब्राह्मणो मनुष्योऽहमित्याद्यनुभवात्। यद्यपि समस्तेषु व्यस्तेषु च पृथिव्यादिषु न चैतन्यं दृष्टम्। तथापि कायाकारपरिणतेषु भविष्यति, मदिराकारपरिणतेष्विव (१)किण्वादिषु मदशक्तिः, खदिरचूर्णादिसंवलिततांबूल इव च रागोदयः देहाधीनोपलंभनियमाच्च ज्ञानादेर्देहधर्मत्वम्। तथाचाहुः-चैतन्यविशिष्टः पुरुषः कायः' इति। तेषामन्यधर्मत्वे दृष्टहानिः, अदृष्टकल्पनाच स्यादिति देह एव आत्मा" इति।। तांश्चतुर्भिः श्लोकैः निराकरिष्यन्नादौ देहव्यतिरिक्तमात्मानं लिङ्गैः साधयति-

मू०।। कश्चिद्दुःखी स्वजन्मप्रभृति सुखयुतश्चापरः कस्य हेतोः
कस्मादाद्या प्रवृत्तिस्तनुरपि च कुतः किं नवेत्ति प्रमीतः
स्वाभाव्यं हेतुसाम्ये सममिति विदितं दीपबीजाङ्कुरादौ
वैषम्यं कर्मजन्यं यदि गदसि जनैः पूर्वमप्यांत्मसिद्धिः।।२९।।

कश्चिदिति ।। कश्चित्पुरुषः स्वजन्मप्रभृति = स्वोत्पत्तिकालादारभ्य

(१) किण्वं पापे सुराबीजे इति विश्वः।

दुःखी = दारिद्र्य रोग वियोगादि नानादुःखाश्रयः, अपरः = अन्यस्तु, सुखयुतः = आरोग्य संपत्त्यादि सुखयुक्त इति समानेऽपि मनुष्यदेहे वैषम्यं कस्य हेतोः? = कस्मात्कारणात्? [१]"षष्ठी हेतुप्रयोगे" इति हेतौ षष्ठी। तस्मिन्पापपुण्यातिरिक्तहेत्वसंभवात्तयोश्चास्मिन् जन्मनि क्रियमाणयोः पश्चाद्भावात्पूर्वजन्मसंबंध्यात्मा आवश्यक इति।। किञ्चप्रवृत्तिमात्रे इष्टसाधनता ज्ञानं हेतुरिति सर्वसिद्धम्। नच जातमात्रस्य शिशोः स्तनपानादिप्रवृत्ति-हेतुभूतमस्मिञ्जन्मनि प्रत्यक्षात्मकं तत्संभवति। अन्वयव्यतिरेकाऽग्रहणात्। स्मृतिरूपमनुमितिरूपं वा नानुभवव्याप्तिज्ञानादिजन्यसंस्कारमन्तरेणेति तद्धेतुसाधक-जन्मान्तरसंबंध्यात्मा आवश्यक इत्यभिप्रेत्यपृच्छति-कस्मादिति।। आद्या = प्राथमिकी शिशोः स्तन्यादौ प्रवृत्तिः कस्मात्? जन्मान्तरसंबंध्यात्मानमनभ्युपगम्य तद्धेतुनिरूपणासंभवादिति भावः। किंच, अचेतनानां भूतानां रथप्रासादादिसंघातात्मना परिणतिर्दृष्टाऽदृष्टान्यतरद्वारा तत्प्रयोजकतदुपभोक्तृ-पूर्वसिद्धचेतनाधीना दृष्टेति तद्वदेव देहाकारपरिणतेरपि तदुपभोक्तृपूर्वसिद्धचेतन प्रयोज्यत्वमावश्यकम्, अन्यथा देहाकार परिणतेरेवाऽसिद्धेरित्यभिप्रेत्य पृच्छति-तनुरपीति।। तनुः = शरीरमपि कुतः = कस्मात्प्रयोजकादित्यर्थः। तन्वाकारपरिणतेरसिद्धौ भूतेषु तदधीनचैतन्यलाभो दूरापास्त इति सूचनार्थश्चकारः। किंच, चैतन्यस्य भूतगुणत्वे रूपादिवत्परैरपि ग्रहण-प्रसङ्गः, भूतविशेषगुणानां सर्वान् प्रतियोग्यत्वात्। अपिच, मदिरावयवेषु मदशक्तिभेदवद्देहावयवेष्वपि विभिन्नचैतन्याभ्युपगमप्रसङ्गेन नानाचेतनानां नियतैकमत्यासंभवादेकपाशबद्धशकुनीनामिवाऽभिलषितदेशगमनाशक्तिः, युगपदनेकसिंधुराकृष्टकदलीकाण्डस्येव देहस्योन्मथनं वा स्यात्। तस्मान्न देहधर्मश्चैतन्यम्। यत्तूक्तं चैतन्यस्य देहाधीनोपलंभनियमाद्देहधर्मत्वमिति, तत्र व्यभिचारं दर्शयन्पृच्छतिकिन्न वेत्तीति।। प्रमीतः = मृतः पुरुषः, न वेत्ति = न जानाति, तत्र किं कारणमित्यर्थः। देहाकारपरिणतभूतानां तदानीमपि सत्वाज्ज्ञान-प्रसक्तेर्दुर्वारत्वात्। तथाच तादृशस्थले व्यभिचारान्न देहाकारपरिणतेर्ज्ञानहेतुतेतिभावः।

अभ्युपगम्यचेदमुक्तम्, अस्तुचैतन्यस्य देहाधीनोपलंभनियमः, तथापि रूपादीनामालोकाधीनोपलंभनियमेऽपि अन्यधर्मत्वदर्शनेन तदधीनोपलंभनियमस्य तद्धर्मत्वाऽसाधकत्वात्। ननु न सुखदुःखादिवैचित्र्येऽदृष्टं हेतुः, समानसामग्री-कैककुलालनिर्मितघटेषु क्वचिद्दुग्धादियोगः, क्वचिद्विगर्हितवस्तुयोग इति विनाप्यदृष्टं

(१) हेतु शब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।

वैचित्र्यवद्यदृच्छयैव तत्सिद्धेरित्याशंक्याह–स्वाभाव्यमिति।। स्वः भावः = धर्मः यस्य, तद्भावः स्वाभाव्यम् = असाधारणधर्मः, तत्संबंधो वा। तैलवर्त्यादिहेतुसाम्ये दीपाद्दीपान्तरे, बीजादङ्कुरादि द्वारापि बीजान्तरे, अङ्कुराद्बीजद्वाराऽङ्कुरान्तरे च जायमाने सममन्यूनाऽनतिरिक्तंदहनप्रकाशनसंस्थानसामर्थ्यादिस्वाभाव्यमिह लोके प्रमाणैर्विदितम्। यादृच्छिकवैषम्यकल्पने च सर्ववस्तूनामत्यन्तवैलक्षण्यम्, अव्यवस्थायां सर्वव्यवहारविलोपापत्तिश्चेत्यदृष्टवैचित्र्यमेव तद्धेतुरित्यर्थः। एककुलालनिर्मितघटेषु दुग्धादियोगवैषम्येऽपि, भोजकादृष्टवैषम्यमेव हेतुरिति, न यादृच्छिकत्वम्। अतो गत्यन्तराभावात्कर्मैव वैषम्यहेतुर्बलात्त्वयाऽपि वाच्यः, तथाचाऽऽस्मदभिमतसिद्धिरित्याहवैषम्यमिति।। उक्तसुखादिवैषम्यंविचित्रविहितनिषिद्धाचरणलक्षणकर्मजन्यं यदि गदसि = वदसि, तदा जनेः = एतज्जन्मनः पूर्वमपि देहान्तराऽधिष्ठानेनैतद्देहभोग्यविहितनिषिद्धाचरितुरात्मनस्सिद्धिर्दुवरित्यर्थः। एवं पूर्वदेहस्याऽपि भोगायतनत्वात्तद्भोग्यकर्माऽनुष्ठातुरात्मनस्ततोऽपि पूर्वं तथैव सत्वं वाच्यमित्यनादित्वमात्मनस्सिद्धम्। एवमागमादपि नित्यात्मसिद्धिरितिद्रष्टव्यम्। स्थौल्यगौरताचैतन्यादेस्सामानाधिकरण्याऽनुभवस्त्वन्योऽन्याध्यासात् 'अयो दहति, रक्तः स्फटिकः' इति प्रत्ययवद्भ्रान्त्यैव। [१]न च बाधाभावः, प्रदीपघटयोरिव प्रकाश्यप्रकाशकयोर्धर्मधर्मिभावाऽनुपपत्तिलक्षणयौक्तिकबाधसत्वात्। जागृद्देहाऽभिमानाऽभावेऽपि स्वप्ने, स्वाप्नदेहापगमेऽपि जागरे सोहमिति प्रत्यभिज्ञादर्शनात्, जातिस्मराणां तत्वज्ञानां च प्रत्यक्षेणाऽऽत्मनि देहातिरेकाऽनुभवात्, ग्रहावेशेनाऽभिभूतस्य व्यवहरतोऽपि प्रत्यभिज्ञाद्यदर्शनात्, आविष्टस्य ग्रहस्य परशरीरेणाऽपि व्यवहारभोगादिदर्शनाच्चाऽतिरिक्ताऽऽत्मसिद्धिरिति बोध्यम् ।। २९।।

ननु दर्शितलिङ्गै[२]र्देहातिरिक्तात्मन्यनुमानं मानं दर्शितं स्यात्, नच "अहं मनुष्यः" इत्यादिसार्वजनीनप्रत्यक्षविरुद्धेऽर्थेऽनुमानं क्रमते, वह्नाविवशैत्यस्य। भवदभिमतजातिस्मरतत्वज्ञयोश्चार्वाकेष्वदर्शनात्, इतस्त्वद्वचसि तत्तद्वाद्यभिमतसर्वज्ञवचसीव चार्वाकस्याऽनाश्वासाच्च [३]तदसिद्धेः ।। किञ्च, नाऽप्रत्यक्षं प्रमाणमस्ति,

---

(१) न च बाधाभावः। यतः स्थूलोगौरोऽहमनुभवामीति स्थूलगौरचेतनतासामानाधिकरण्यानुभवस्य नाहं स्थूल इत्यादि रूपो बाधोनास्त्यतो न यथोक्त सामानाधिकरण्यप्रत्ययस्य भ्रान्तित्वंयुक्तमिति न च वाच्यम् यौक्तिक बाधस्य सत्त्वात्।

(२) देहातिरिक्तात्मन्यनुमानमिति। देहः सात्मकः प्राणादिमत्वात् यन्नैवं तन्नैवं, देहः स्वभिन्न चेतनसम्बधवान् जडत्वे सति चेष्टाश्रयत्वात् यन्नैवं तन्नैवम्।।

(३) तदसिद्धेरिति।। जातिस्मरसर्वज्ञासिद्धेः। न तदनुभवेन देहातिरिक्तात्म सिद्धिरितिभावः।।

[1]अयोग्योपाधिशंकया देशकालान्तरे लिङ्गस्य व्यभिचारशङ्कयाचाऽनुमानप्रामाण्याऽयोगात्। [2]कृत्स्नैकदेशसादृश्यविकल्पने उपमानस्याऽपि तदयोगात्। तयोरप्रामाण्ये तदधीनशक्तिग्रहापेक्षस्य शब्दस्य दूरापास्तं प्रामाण्यम्। एवमर्थापत्त्यनुपलब्ध्योरपि व्याप्तिनिश्चयसापेक्षत्वात्तत्र च व्यभिचारादिशंकाया अवर्जनीयत्वादप्रामाण्यमेव। यथाहुः-

"देशकालादिरूपाणां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरति दुर्लभा" इति।।

अत्राऽनुमानग्रहणमन्येषामप्युपलक्षणम्। किञ्च, अनुमानादेः प्रत्यक्षमूलकत्वादर्थसंभावनाऽपि स्यात्, वेदस्यत्वपौरुषेयस्याऽर्थसंभावनाऽति दुर्लभेत्याऽऽशंकामपनयन्नाह-

मू०।। मानं प्रत्यक्षमेकं यदि, कथय कथं भाषितं ते प्रमाणं?
संभाव्यार्थं सदोषं यदि तदपि बली किं न वेदो विदोषः।
न ह्यध्यक्षं विनाक्षैर्नच तव सुगमा मानताऽध्यक्षमात्रे
ज्ञानं नान्यस्य बोद्धुं प्रभवति च भवांस्तेन मिथ्याप्रलापी।। ३०।।

मानमिति।। यदि प्रत्यक्षमेकमेव मानम् = प्रमाणं तर्हि ते = तव भाषितम् वाक्यं कथं प्रमाणम्? = श्रोतृणां प्रमाजनकम्। शब्दार्थसंबंधस्य प्रयोज्य प्रयोजकबृद्धव्यवहाराऽनुमेयत्वात्, अनुमानाऽप्रामाण्ये शक्तिग्रहाधीनशब्दप्रयोगस्य, ततः श्रोतुः पदार्थोपस्थितेश्चाऽसंभवादित्यर्थः। अथवा, उपमानाऽप्रामाण्ये परकीयज्ञाने स्वज्ञानसादृश्यग्रहाधीनशब्दप्रयोज्यताया ज्ञातुमशक्यत्वात्परबुबोधयिषया

(१) अयोग्यत्वोपाधिशंकयेति।। सुखदुःखादिवैचित्र्यहेत्वदृष्टाश्रयत्वादितिहेतोरयोग्यत्वोपाधिशंकया तथाऽस्वतन्त्रत्वहेतोस्तु देशकालान्तरे व्यभिचारशंकया। तथा हि अस्वतन्त्रत्वस्यहेतो राजगृहलक्षणदेशाद्देशान्तरे स्वगृहेस्थितराजभृत्यादौ यथोक्तचेतननियम्यत्व व्यभिचारशंकया तस्यैव च राजभृत्यादे राजसम्बन्ध वियोगकाले च तादृशसाध्यव्यभिचारशंकया देह; किंचिच्चेतन नियम्यः अस्वतन्त्रत्वात् अदृष्टवदित्यनुमानस्य प्रामाण्यायोगात् इति।

(२) कृत्स्नैकदेश सादृश्यविकल्पन इति।। कृत्स्न स्वरूपेण सादृश्यं दृष्टान्तदार्ष्टान्तिकयोर्विवक्षित मुतैकदेशेन वेति।। आद्येऽत्यर्न्तसादृश्यापरपर्यायस्य कृत्स्नस्यसादृश्यस्यापर्यवसानादुपमानोपमेयभावासम्भवादुपमान प्रामाण्यानुपपत्तिः। कार्यकारणभावानुपपत्तिश्च दोषः। द्वितीये तु यत्किंचिद्रूपेण सादृश्यापरपर्यायस्यैकदेशेन सादृश्यस्य जलाग्न्यादीनामपि भूतत्वादिरूपेण तन्तुघटयोरपि पार्थिवत्वादिरूपेण सम्भवात्तेषामपि परस्परं कार्यकारणभावः स्यात्तच्च विरुद्धमतो न तादृशसादृश्यंकार्यकारणभावस्य प्रयोजकं ततश्च नोपमानप्रमाणसिद्धिरिति भावः।।

शब्दप्रयोगासंभवादित्यर्थः। सादृश्यज्ञानस्यैव भाट्टमत उपमितित्वात्। एवमुपमानस्य शक्तिग्राहकत्वे तदसंभवादपि बोध्यम्। अथवा, नाऽप्रत्यक्षं प्रमाणमस्तीति त्वद्वाक्यं प्रमाणं? न वा? आद्ये आगतं प्रत्यक्षातिरिक्तशब्दप्रामाण्येन, अन्त्ये नाऽस्माद्वाक्यादर्थसिद्धिरित्युभयथाऽपि शब्दप्रामाण्यमव्याहतमित्यर्थः। एवं परकीयप्रश्नाद्यनुपपत्त्या जिज्ञासाद्यर्थापनयनेनापि शब्दप्रयोगाऽनुपपत्तेस्त्वद्भाषितं कथं प्रमाणमिति। प्रत्यक्षाऽतिरिक्ते प्रामाण्याभावोऽनुपलब्धिगम्यश्चेत्, अनुपलब्धिप्रामाण्यापत्तिः, तदगम्यश्चेन्मानान्तरासंभवादनिश्चये 'नाऽप्रत्यक्षं प्रमाणमस्ति' इति शब्दप्रयोगाऽनुपपत्तिश्चेति सर्वथाऽपि व्याहतत्वात्त्वद्वचनं कथं प्रमाणमिति च बोध्यम्। न चोपाधिशङ्कया व्याप्तिग्रहाऽनुपपत्तिः, व्याप्तिमनभ्युपगच्छतः उपाधेरुद्भावयितुमशक्यत्वात्। तदुद्भावकप्रमाणाभावे तदसमवधानेचोपाध्यप्रतिसंधानेऽनुमितेर्निर्बाधत्वात्। एवं व्यभिचारशंकाविरहदशायामपि। संजाता तु व्यभिचारशङ्का तर्केणैव निरसनीयेति पराक्रान्तमत्र तार्किकैरित्युपरम्यते। एवमुपमितावपि फलोन्नेयं भूयः सादृश्यधर्मज्ञानं हेतुरिति न विकल्पावसरः। नन्वनुमानादिभिरर्थसंभावनामात्रं जन्यते, तत्रैव च प्रामाण्याभिमानाद्व्यवहारसिद्धिरिति न मद्वचनं व्याहतमित्याशंकामपनुदन्वेदस्याऽसंभाव्यार्थत्वदोषमुद्धरतिसंभाव्यार्थमिति।। सदोषम् = भ्रमप्रमादविप्रलिप्साकरणाऽपाटवादिदोषग्रस्तं, तत् = त्वद्भाषितमपि यदि संभाव्यार्थम् = संभावनातूत्कटकोटिकस्संशयः, तद्योग्यार्थप्रतिपादकमिष्टमिति शेषः। तर्हि विदोषः = अपौरुषेयत्वादत्यन्तावहिताध्यापकपरंपराशिक्षाद्यङ्गोपरक्षितत्वाच्च निर्दोषः सर्वप्रमाणमूर्धन्यो वेदः संभाव्यार्थो न किम्? सदोषस्यापि संभाव्यार्थत्वे निर्दोषस्याऽवधार्यार्थतैवोचितेत्यर्थः।।

अयंभावः-सर्वज्ञानानां स्वार्थे निरपेक्षमेव प्रामाण्यं क्वचित्कारणदोषबाधकज्ञानाभ्यामपोद्यत इत्यवश्यं वाच्यम्। अन्यथा घटज्ञानप्रामाण्यं संवादिज्ञानान्तराधीनं, तस्याप्यन्याधीनमित्यंधपरंपराऽनवस्थापातात्प्रत्यक्षस्याऽप्यप्रामाण्यापत्तेः। एवं च वेदोत्थबोधे कारणदोषाभावाद्बाधकप्रमाणासंभवाच्च तत्प्रामाण्यमव्याहतम्। त्वद्वचनं तु दोषजन्यत्वादनुमानार्थापत्त्यागमादिबहुतरप्रमाणबाधितत्वाच्चाऽप्रमाणमेवेति। किञ्च, अनुमानाद्यप्रामाण्ये कारणासिद्धेः प्रत्यक्षमेव न सिध्येत् दूरे तत्प्रामाण्यमित्यभिप्रेत्याहनहीति।। हि = यस्मात्कारणात् अनुमानादिमात्रगोचरैः अक्षैः = इन्द्रियैर्विना, अध्यक्षम् = प्रत्यक्षं न सिध्यतीत्यर्थः। नचाक्षगोलकादेरेव प्रत्यक्षहेतुत्वम्। तस्य दूरस्थाऽर्थसंनिकर्षासंभवात्, (प०टि०)असन्निकृष्टग्राहकत्वेऽतिप्रसङ्गात्, (प०टि०)आलोका-

दिसहकार्यसंबन्धाच्चेति भावः। किंच, ज्ञानानां प्रामाण्यं प्रत्यक्षमनुमेयं वा? आद्येऽ(प०टि०)नुमित्यादिप्रामाण्यस्यापि प्रत्यक्षसिद्धत्वादपलापाऽसंभवः। द्वितीयेत्वनुमाना-प्रामाण्याद्ग्राहकाभावात्प्रत्यक्षेऽपि प्रामाण्यं न सिद्ध्यतीत्युभयथाप्यविशेष इत्यभिप्रेत्याह न चेति।। तव = चार्वाकस्य, अध्यक्षमात्रे = प्रत्यक्ष एवेति सावधारणा मानता = प्रमात्वम्, न सुगमा = ज्ञातुमशक्येत्यर्थः। अथवा, यद्यध्यक्षत्वं प्रामाण्ये प्रयोजकं स्यात्तदा त्वदभिमतं सिद्ध्येत्, न तु तथा, भ्रान्ताध्यक्षदर्शनात्। अतो निर्दोषज्ञान-कारणकलाप एव तत्प्रयोजको वाच्यः, स चानुमित्यादावप्यविशिष्ट इत्यभिप्रेत्याह न चेति।। तवाऽध्यक्षमात्रे = कृत्स्नप्रत्यक्षे, मानता न सुगमा = नाऽऽभ्युपगन्तुं शक्या, येनाध्यक्षत्वमेव प्रामाण्यप्रयोजकं स्यादित्यर्थः। किंच, प्रतिपन्नान्पुरुषा-नपहायाऽप्रतिपन्नविप्रतिपन्नसंदिहानाः प्रेक्षावद्भिः प्रतिपाद्यन्ते, नच परेषां प्रतिपत्त्यप्रतिपत्तिविप्रतिपत्तिसंदेहास्तव प्रत्यक्षगोचराः, किन्तु वचनलिङ्गादिगम्याः। पराभिप्रायमविज्ञाय शास्त्रप्रणयनं तून्मत्तप्रलपितप्रायमेवेत्यभिप्रेत्याह-ज्ञानमिति।। भवानन्यस्य पुरुषान्तरस्य ज्ञानम्, इच्छादेरप्युपलक्षणमेतत्, बोद्धुं न प्रभवति = न समर्थोभवति, कथं तद्बुबोधयिषया शब्दं प्रयुञ्जीत। यदि तु शब्दं न प्रयुञ्जीत, तर्हि मूकता प्रसक्तिः। चकारो भावीष्टाऽनिष्टज्ञाना-ऽसंभवात्प्रवृत्तिनिवृत्त्यनुपपत्तिश्चेति दोषान्तरसमुच्चयार्थः। तथाचोपहसितमाचार्य-वाचस्पतिमिश्रैः-"मानामभून्नास्तिकस्य जन्मान्तरम्, अस्मिन्नेव तु जन्मन्युपस्थितोऽस्य मूकत्वप्रवृत्तिनिवृत्तिविरहरूपो महान्नरकः" इति।। तेन = उक्तदोषकदंबेन, भवान् = चार्वाकः, मिथ्या-प्रलापी = निरर्थकप्रलपनशीलः, अनुपादेयवचन इत्यर्थः।। ३०।।

नैष्फल्यादपित्वद्दर्शनमनुपादेयं, विपरीतफलत्वाच्च सर्वथा हेयमेवति सूचयन्नाह-

मू०।। गौरः स्थूलो युवाऽहं पटुरिति च तनावात्मबुद्धिर्जनानां
स्वाभाव्यादेव सिद्धेत्यधिगमयदिदं निष्फलं दर्शनं ते।
वेदद्वेषात्प्रवृत्तं यदि बत न तरां द्वेषमूलं प्रमाणं
दैवान्नष्टस्त्वमेकः किमिति शठ! परान्हन्त हन्तुं प्रवृत्तः।। ३१।।

गौर इति।। जनानाम् = जनिमतां प्राणिनां जन्मप्रभृति गौरोऽहं स्थूलोऽहं, युवाऽहमिति स्थौल्यगौरतादि तनुधर्मसामानाधिकरण्येनाऽहंतावमर्शात्तनौ = देहे, आत्मबुद्धिः = आत्माऽभेदज्ञानमनाद्यविद्या प्रयुक्तात्, स्वभाव एव स्वाभा-

व्यम् = अन्योऽन्यधर्म धर्मिसंसर्गतादात्म्याध्यासः, तस्मात् सिद्धा उपायसहस्त्रैरपि दुरपह्नवानिरूढाऽस्त्येव, इति = अस्माद्धेतोः, इदम् = एतदेव देहात्मत्वम्, अधिगमयत् = बोधयत्, ते दर्शनम् = शास्त्रम्, निष्फलम् = अपूर्वार्थाऽप्रतिपादकत्वा-त्प्रयोजनशून्यम्। ननु श्रुतिस्मृतीतिहासादिभिर्धनिकवंचनाय लिप्सुपरिकल्पित-गाथाभिर्विप्रलब्धान्स्वर्गादिप्रत्याशया व्रतोपवास तपःसंयमादिषु बहुवित्तव्ययादिक्लेशेषु निमग्नमहाजनानुपलभ्य तेषां तत्क्लेशपरिहाराय वेदादिप्रामाण्यनिरासपूर्वकं चार्वाकदर्शनं प्रवृत्तम्, एतस्माच्च निश्चितनास्तिकयाः परलोकनिर्भयाः सर्वे जनास्स्वच्छन्दं रमन्तामिति। तथा च कथं नैष्फल्यमिति प्रलापं निरस्यतिवेदेति।। बतेति खेदे। यदि ते दर्शनं वेदद्वेषात्प्रवृत्तं, तर्हि द्वेषमूलं प्रच्छन्नशत्रुवचनमिव प्रमाणं न तरां = न भवत्येव। नैष्फल्यादेव न प्रमाणम्, तत्रापि द्वेषमूलं चेत्सुतरामित्यर्थः। नैष्फल्यद्वेषमूलत्वोपाधिभ्यामेकस्यापि दर्शनस्य भेदप्रकल्पनात्प्रकर्षप्रत्ययः देवदत्तः पूर्वं पटुः, इदानीं तु पटुतर इतिवत्, *"किमेत्तिङव्यय" इत्यामुप्रत्ययः। अयं भावः-स्वर्गनरकाद्यभावस्त्वया कथं निश्चितः? न तावत्प्रत्यक्षेण, तस्य भाविन्यप्रवृत्तेः! अनुमानादीनां च प्रामाण्यानभ्युपगमात्तदसाधकत्वात्। नापि मानाभावेन, श्रुत्यादि मानस्य प्रत्यक्षत्वात्। श्रुतेः कर्तुरस्मरणात्सर्वशिष्टानामनादित्वप्रसिद्धेश्चाऽपौरुषेयत्वात्। स्मृत्यादेश्च तन्मूलकत्वाद्दोष卐संभावनाऽयोगात्, (१)भोगलांपट्यप्रयुक्तवेद-प्रद्वेषमूलत्वाच्चाप्रमाणमेवेति। दुरन्तदुरितपराहतमतेस्तवैकस्य नरकपाताय नास्तिकयाद्यथेष्टाचरणे प्रवृत्तिरस्तु नाम। दुश्शास्त्रप्रणयनेन जगद्विनाशे प्रवृत्तिस्त्वत्यंतमनुचिता भूताविष्टकरे खड्ग इव कथं संपन्नेत्यनुशोचन्नाह-दैवादिति।। हेशठ = परवंचक, त्वमेको दैवात् = अनन्तदुरितपरिपाकलक्षणात्, तत्प्रयुक्तेश्वरापराधलक्षणाद्वा "एष ह्येवासाधु कर्म कारयति तं, यमधो निनीषति" इति श्रुतेः। नष्टः = दुरन्तनरकजन्मरणादिदुःखपरंपरार्णवपतितः सन्परानपि हन्तुं दुश्शास्त्रप्रणयनेन तादृशदुःखार्णवं प्रापयितुं किमिति प्रवृत्तः? हन्तेति खेदे। अहो ते दौर्भाग्यविलसितमिति भावः। तथाच श्रुतौ मृत्युवचनम्-"अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे" इति।। स्मृतिश्च-

* किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे (५-४-११) किम् एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुस्यान्नतु द्रव्यप्रकर्षे। किंतमाम, प्राह्णेतमाम, पचति तमाम्। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः।

卐सम्भावनायोगादिति पाठान्तरम् पाठः।।

(१) कारीरीपुत्रेष्ट्यभिचारादिफलस्य च कर्मावैगुण्ये प्रत्यक्षदर्शनाच्च धनिकजन वञ्चनायेत्यादिप्रलापा-नवकाशः त्वद्वचनं तु मानमूलत्वायोगात्।।

"देहाभिमानाद्यत्पापं न तद्गोवधकोटिभिः।
प्रायश्चित्ताद्भवेच्छुद्धिर्नृणां गोवधकारिणाम् ।।" इति ।।३१।।

सर्वजनानां देहाभिमानस्य दृढतरत्वात्तस्यैव च सर्वानर्थमूलत्वात्तत्परित्यागमात्रेण च मोक्षस्य करप्राप्तप्रायत्वात्तन्निरासाय "बहुकृत्वोऽपि पथ्यं वदितव्यम्" इति न्यायेन देहासारतां प्रतिपादयन्पुनश्चार्वाकमनुशोचति-

मू०।। रेतोरक्तप्रसूतं जडमशनचितं षड्विकारं त्वगस्थि
स्नायुक्रव्याऽऽन्त्रमज्जारुधिरमयमतिस्वल्पमाध्यामयाढ्यम्।
प्राणापाये मृदादिप्रतिममपि च बिट्कीटभस्माऽवशेषं
देहं तं मूढ! कस्मादहमिति मनुषे केन वा वंचितोऽसि।। ३२।।

रेतोरक्तप्रसूतमिति।। पितुर्मलेन रेतसा, मातृरक्तेन च कललबुद्बुदादिक्रमेण प्रसूतम्=उत्पन्नम्, जडम्=अचेतनम्, अशनेन=अभ्यवहृतेनाऽन्नेन चितम्=उपचयं प्राप्तम् जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीति यास्कोपदर्शित षड्भाव विकारान्वितम्, स्नायवः=शिराः, क्रव्यम्=मांसम्, आन्त्राणि=अन्न-पानमलमूत्रभस्त्रादीनि, मज्जा=अस्थ्यन्तर्गतो रसः, रुधिरम्=रक्तम्, एतन्म-यम्=एतत्प्रचुरं, विवेके तावन्मात्रमिति वाऽर्थः। अतिस्वल्पम्=देशतः कालतः वस्तुतश्च परिच्छिन्नम्, आधयः=मानसदुःखानि, आमयाः=शारीरदुःखानि तैः, आढ्यम्=संपन्नम्, तद्रोगस्थानमित्यर्थः। प्राणस्य=पञ्चवृत्तिक मुख्यप्राणस्य अपाये=उत्क्रमणेज्ञानादिव्यञ्जकचेष्टा शून्यत्वान्मृत्पिण्डादिवदचेतनम्।अपि च यत्श्वापदैर्भक्षणे विष्ठावशेषम्, उपेक्षितं कृम्याकारपरिणामित्वात्कीटावशेषम्, दाहे भस्मावशेषम्। इत्थं कारणतः, स्वरूपतः, उपष्टंभकतोऽवस्थाभेदतः, स्वगतविशेषतः, परिमाणतः, उपयोगतः, दृष्टान्ततः, परिशेषतश्चाऽत्यन्तासारत्वाद्विवेकिनाऽनात्मत्वेन निश्चेतुं शक्यमपि देहं=शरीरम्, हेमूढ=मूर्ख चार्वाक कस्मात्कारणादहमिति मनुषे=आत्मेत्यभिमन्यसे। केन वा=अहितरूपेण शत्रुणार्वंचितः अंधगोलांगूलन्यायेन प्रतारितोऽसि, अहो बत ते दौर्भाग्यविलसितमिति भावः ।।३२।।

एवं देहात्मवादे निरस्ते इन्द्रियात्मवादीं प्रत्यवतिष्ठते-"ननु माभूद्देह आत्मा, इन्द्रियाणि तु तथा स्युः, 'अहं पश्यामि, श्रृणोमि, रसयामि' इति दर्शनश्रवणा-दिव्यापारवत्स्विन्द्रियेष्वहंता(१)परामर्शात्। 'अहं सुखी, दुःखी, जानामि इति तत्रैव सुख दुःख ज्ञानाद्यनुभवाच्च। नच देहवदिन्द्रियाणामपि भौतिकत्वादचेतनत्वानुमानम्।

(१) अवमर्शादिति ग्र० पाठः।

"चक्षुर्होच्चक्राम तेहवाचमूचुस्त्वन्न उद्गायेति"। "वाङ्मनश्चक्षुः श्रोत्रं ते प्रकाश्याऽभिवदन्ति" इति तत्र तत्र प्राणसंवादे इन्द्रियाणामा[१]त्मत्वाऽवगमात्, श्रुतिप्रत्यक्षविरुद्धेऽर्थेऽनुमानाप्रसरात्। नापि बहूनामैकमत्याद्यसंभवात्प्रवृत्त्याद्यनुपपत्तिः, उपभोगलक्षणैकप्रयोजनवशेनैव सांख्यमते गुणानामिव, एकसार्थान्तर्गतपुरुषाणामिव वैकमत्योपपत्तेः" इति। तदेतद्विकल्प्य निराचष्टे-

मू०।। खानामात्मत्ववादे प्रतिनियतगतौ स्वामिनानात्वदोषा
देहोन्मन्थप्रसङ्गस्समुदितविषये त्वंधमूका म्रियेरन्।
उक्तिर्दृष्टश्रुतानामपि च न घटते नापि संघो निरूप्य
स्स्वप्नद्रष्टैव नस्याच्छयनमरणयोर्निर्विशेषाद्द्वयं स्यात्।। ३३।।

खानामिति।। प्रत्येकमिन्द्रियाण्यात्मानः? उतेन्द्रियसमुदायः? तत्राऽऽद्ये तावदाह-खानामिति। खानाम्=इन्दियाणाम्, आत्मत्ववादे चार्वाकविशेषाभिमते, प्रतिनियत-गतौ=प्रत्येकविषये प्रत्येकमिन्द्रियाण्यात्मेति पक्ष इत्यर्थः, स्वामिनानात्वदोषात्स्वामिनाम् अधिष्ठातृणामात्मनां, नानात्व दोषात्= समप्रधानानामनेकेषामैकमत्य[२]नियमाऽभावेन स्वस्वविषयोपभोगाय युगपद्विरुद्धदेशाकर्षणलक्षणदोषाद्देहस्योन्मथनप्रसङ्गे इत्यर्थः। न चैकप्रयोजनवशादैकमत्यम्, विरुद्धनानाप्रयोजनानामपि कदाचित्प्रसक्तेरवर्जनात्। गुणप्रधानभावे च विनिगमकाभावादुपभोक्तुरन्यस्याऽनभ्युपगमेन सांख्यमतवैषम्यात्। न चैकसार्थान्तर्गतपुरुषाणामपि यावज्जीवमैकमत्यनियमः, मेलननियमो वाऽस्ति। प्रयोजनभेदे वैमत्यविश्लेषादिदर्शनादिति भावः। द्वितीयेऽप्याहसमुदितविषयेत्विति। समुदितानि = मिलितानि खानि विषयः आलंबनं यस्य स तथा इन्द्रियसमुदाय एवाऽऽत्मेति पक्षेत्वित्यर्थः। चक्षुरादिष्वेकैकोपघातेऽपितद्घटितसमुदायभङ्गेना-ऽऽत्मोपघातादंधा मूकाश्च म्रियेरन् = न जीवेयुरित्यर्थः। उक्तपक्षयोः क्रमेण पुनर्दोषद्वयमाहउक्तिरित्यादिना। अपिचेति दोषान्तरकीर्तनाय। आद्य चक्षुषा दृष्टानां श्रोत्रेण श्रुतानां चार्थानात् उक्तिः = परंबोधयितुं शब्दप्रयोगोऽपि न घटते। वक्तुर्वागिन्द्रियस्य द्रष्टृ श्रोतृभ्यां भेदात्। न ह्यन्यदृष्टं श्रुतमसंवदन्स्तेनाऽन्यश्शक्नोति वक्तुम्। नचेन्द्रियाणामिन्द्रियान्तरेण संवादो वा प्रमितः। द्वितीयेप्याहनापीति। संघः = समुदायोऽपि समुदायिभ्योऽन्यत्वाऽनन्यत्वादिना न निरूपयितुं शक्य इत्यर्थः। पक्षद्वयसाधारण्येन दोषद्वयमाह-स्वप्नेति। सुषुप्तेरप्युपलक्षणमेतत्।

(१) चेतनत्वा इत्यपि पाठः।
(२) नियता इति पाठ।

स्वप्नसुषुप्त्योरिन्द्रियाणां लीनत्वादवस्थाद्वयं निस्साक्षिकं न भासेतैवेति भावः। तथाच श्रुतिः-[(१)]''यथागार्गि मरीचयोऽर्कस्याऽस्तं गच्छतस्सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति, ताः पुनः पुनरुदयतः प्रचरंत्येवं हैतत्सर्वं परे देवेमनस्येकीभवतीति स यथासौम्यवयांसि वासोवृक्षं संप्रतिष्ठन्ते एवं ह वैतत्सर्वं परे आत्मनि संप्रतिष्ठते'' इति च।। अत एवापरोऽपि दोष इत्याहशयनेति।। निद्रायां मरणेचेन्द्रियाणां मनसि विलयसाम्यान्मरणादिव शयनादपि सर्वेषां भयं स्यात्, इन्द्रियात्मवादे निद्रामरणयोर्विशेषाऽभावादित्यर्थः। मरणे प्राणोत्क्रमणसमयदुःखप्रतिसंधानाद्भयं न त्वात्मनाशसंभावनयेति चेन्न। (प०टि०)तादृशदुःखाऽनभिज्ञानामपि पश्वादीनां मरणाद्भयदर्शनात्, तादृशदुःखाभिज्ञानामप्यविनाश्यात्मदर्शिनां तददर्शनात्। देहविनाशप्रतिसंधानाद्भयमिति चेन्न। परदेहनाशप्रतिसंधाने तददर्शनात्। तस्माद्देहादावपि आत्मत्वाभिमानादेव तद्विनाशप्रतिसंधानाद्भयमित्यवश्यं वाच्यत्वादिन्द्रियात्मवादेऽपि न्यायसाम्याच्छयनाद्भयं दुर्वारमिति भावः। प्राणसंवादार्थवादस्तु प्राणोपास्तिप्ररोचनार्थः, करणाभिमानि देवताविषयत्वेनापि सूपपादः। इन्द्रियधर्मसामानाधिकरण्येनाऽहंताऽवमर्शस्त्वध्यासादुपपादयिष्यत इति न किञ्चित्त्वदभिमतसाधकम् ।।३३।।

माभूदिन्द्रियाणामात्मत्वम्, प्राणस्य तु स्यात्। तस्य कार्यकारण *संघातविधारकत्वेनाऽधिष्ठातृत्वसंभवात्। श्रुतौ ''मामोहमापद्यथा, अहमेवैतत्पंचधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि'' इति प्राणवचनात्। ''तदेतदमृतं सत्येन छन्नं, प्राणो वा अमृतं नामरूपे सत्यम्'' इति बृहदारण्यके कार्यकरणसंघातेऽमृतत्वात् प्राण आत्मेति प्रतिपादितत्वाच्च। इहाप्युत्तरत्रेन्द्रियाणामैकैकोत्क्रमणेन परीक्षानन्तरं ''मातेव पुत्रान् रक्षस्व'' इति तस्यैव कार्यकरणसंघातरक्षकत्वश्रवणाच्च। नचाऽसति बाधके श्रुतेस्तदधिष्ठातृदेवताविषयत्वकल्पनं युक्तम्। प्राणोत्क्रमणाऽनुत्क्रमणयोर्मरणजीवनव्यवहारेण तस्यैव जीवत्वौचित्याच्च। जीवापाये हि मरणं श्रूयते ''जीवाऽपेतं वाव किलेदं म्रियते न जीवो म्रियते'' इति।। प्राणानां प्रियतमत्वं च सर्वानुभवसिद्धं, प्रियतमस्य चाऽऽत्मत्वं श्रूयते ''प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा''इति। तस्मात्प्राण एव आत्मेति केचित्, तान्प्रत्याह-

(१) गार्ग्य इति ग्र० पा०

*स्थूललिङ्गदेह समुदायस्येत्यर्थः।

मू०।। प्राणो नाऽऽत्मा जडत्वादशनसिततया वृत्तिलाभात्सुषुप्ता
वेतस्मिन्त्संचरत्यप्यहमचल इति प्रत्ययादम्मयत्वात्।
स्रष्टा स्वोत्क्रान्तयेऽस्याऽऽमरणमपि धृतेर्जीवशब्दाभिधेय
स्तस्मादन्योऽस्ति रक्षन्स्वनिलयममुना दीप्तिमानेकहंसः ।। ३४।।

प्राण इति।। आदौ पञ्चभिर्हेतुभिः प्राणास्याऽनात्मत्वं प्रसाध्योत्तरार्धे त्रिभिर्हेतुगर्भैर्विशेषणैरतिरिक्तात्मसद्भावः प्रसाध्यते। प्राणः = पञ्चवृत्तिर्मुख्य प्राणाःनाऽऽत्मा जडत्वात् = अचिद्रूपत्वात्। तच्चास्य वालाकिप्रश्ने "तमेतैर्नामभिरामन्त्रयांचक्रे बृहन्पान्डरवासः सोमराजन्निति स नोत्तस्थौ" इति श्रुत्यैवाचेतनत्वोपपादनात्, भौतिकत्वाच्च। एवमचेतनत्वोपपादनगर्भाणि हेत्वन्तराण्यप्याह-अशनेत्यादिना। अशनेन = अन्नेन रज्जुस्थानीयेन सिततया बद्धतया, षिञ्बंधने कर्मणिक्तः। तथाच श्रुतिः-"प्राणाः स्थूणा, अन्नं दाम" इति। प्राणो बलं वत्सत्वेन परिकल्पितस्य मुख्यप्राणस्य स्थूणा बंधनशंकुः, अन्नं तु दाम, कण्ठरज्जुस्थानीयमिति तदर्थः। किंच, सुषुप्तौ जीवस्य परस्मिन्नप्ययः श्रूयते-"स्वमपीतो भवति" इति। प्राणस्तु तदा नाप्येति तस्य तदा विशेषेण वृत्तिलाभदर्शनात्, कथमन्यथा निद्रालोः सशब्द श्वासवेगोपलब्धिः, अतो नात्मतेत्याह-वृत्तिलाभादिति।। "प्राणाग्नय एवएतस्मिन्पुरे जाग्रति" इति तदा तस्य विशेषवृत्तिलाभश्रवणाच्चेति भावः। किं च, सदा प्राणे संचरत्यपि '(पं०टि०)नाहं चलस्वभावः' इति सर्वजनानुभवादपि तस्य तथात्वमित्याहएतस्मिन्निति।"मुखनासि-काभ्यां प्राणःस्वयं प्रातिष्ठेत" इत्यादिना प्राणानां चलस्वभावत्वश्रवणात्। "निष्कलं निष्क्रियं शान्तम्" इत्यात्मनो निष्क्रियत्वश्रुतेश्चेति भावः। अम्मयत्वात् = अब्विकारत्वात् "आपो मयः प्राणः" इति तस्य जलोपष्टंभ्यत्वप्रतिपादनादित्यर्थः। तथाचो-क्तबाधकहेतुभिः प्राणोपास्ति प्रकरणानुरोधाच्च "अहमेवैतद्व्राणम्" इति प्राणवचनमुपास्तिविधिशेषभूतमधिष्ठातृदेवता विषयम्, अधिष्ठात्रधिष्ठेययोरभेदो-पचारादित्यवश्यमभ्युपेयम्। अत एव बृहदारण्यकवचनमपि कार्यकरणसंघातविधार-कत्वेन प्राणस्य श्रैष्ठ्यादुपास्यत्वाच्चाऽऽत्मत्वोपचारादापेक्षिकामृतत्वेन स्तुतिपरं न परमार्थत आत्मत्वपरम्। अन्यथा "स एष इह प्रविष्ट आनखाग्रेभ्यः" "प्राणन्नेव प्राणो नाम भवति," "यःप्राणेन न प्राणिति", "प्राणेषु हृद्यन्तर्ज्योतिः" इत्यादि पूर्वापरवाक्यविरोधाऽऽपत्तेः। "अप्राणोह्यमनाः शुभ्रः" इत्यादिश्रुतिविरोधाच्चेति भावः। यदुक्तं प्राणोत्क्रमणाऽनुत्क्रमणाभ्यां मृतो जीवतीति व्यवहारात्तस्याऽऽत्मतेति तत्परिहरन्नभिमतं साधयतिस्रष्टेति।। स्वोत्क्रान्तयेस्वस्य = उपाधिवशाज्जीवभावापन्नस्य,

उत्क्रान्तये = देहाद्देहान्तरप्रदेशगमनाय, अस्य = उपाधिभूतप्राणस्य स्रष्टाऽन्योऽस्तीति संबंधः। तथाच श्रुतिः-"कस्मिन्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि, कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति। एतेनोत्क्रमणादिव्यवहारः प्राणोत्क्रमणस्य जीवोत्क्रमणनिमित्तत्वादन्यथासिद्ध इति दर्शितम्। अत एव "जीवापेतं वाव किलेदं म्रियते" इति श्रुतिरपि प्राणातिरिक्तजीवविषयेति दर्शितमेव। जीवशब्दस्य "(१)जीवप्राणधारणे" इति धातुनिष्पन्नतया तदर्थपर्यालोचनेऽपि प्राणादन्य आत्मा सिद्ध्यतीत्याहआमरणमिति।। मरणं मर्यादीकृत्य अस्य = प्राणस्य, धृतेः = धारणा-न्निमित्ताज्जीवशब्देनाऽभिधातुं योग्य इत्यर्थः। तथाचैकस्यैव धारणे कर्तृत्वकर्मत्वविरोधात् धार्याद्धर्ताऽन्यः सिद्ध्यतीति भावः। अपिशब्दः "न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" इति विस्पष्टकाठकश्रुतिप्रदर्शनार्थः स्वप्नाऽवस्थानिरूपणप्रस्तावे "प्राणेन रक्षन्नवरं कुलायं बहिःकुलायादमृतश्चरित्वा। स ईयते अमृतो यत्र कामं हिरण्मयः पुरुष एकहंसः" इति श्रुतौ कर्तृकरण-व्यपदेशभेदान्मन्त्रिणीव न्यस्तराज्यभरस्य राज्ञः प्राणे न्यस्तदेहरक्षणभरस्य जीवस्य देहकुलायाभिमानत्यागलक्षणतद्बहिर्भावेन स्वप्ने स्वेच्छाविहारलिङ्गाच्च स प्राणादन्य इत्याह-रक्षन्निति।। अमुना = प्राणेन स्वप्नसुषुप्तिकाले स्वनिलयम् = स्वगृहस्थानीयं शरीरं रक्षन् = (२)पालयन्, "लक्षणोहेत्वोः क्रियायाः" इति प्रथमासामानाधिकरण्येऽपि शत्रादेशः। उक्तहेतूननूद्य साध्यं निर्दिशति-तस्मादन्य इति।। तस्मात् = प्राणादन्य इत्यर्थः। तस्य स्वरूपमाह-दीप्तिमानिति।। स्वात्मज्योतिषैव दीप्तिमान्स्वयं ज्योतिरित्यर्थः। एकएवाऽवस्थात्रये हन्ति = संचरतीति वा, एकः = अद्वितीय एव साक्षात्कृतस्सन् हन्ति नाशयति समूलं बंधमिति वा, एकस्यैवौपाधिकमोद-प्रमोदादिसुखलवानां पक्षपुच्छादिभावनिरूपणेन पक्षिविशेषाकारेण व्यपदेशार्हत्वाद्वा एक हंसः = परमात्मेत्यर्थः। प्राणे परमप्रेमास्पदत्वानुभवस्तु देहेन्द्रियादाविवा-ऽध्यासादुपपादयिष्यते ।।३४।।

ननु माभूत्प्राणस्याऽऽत्मता, मनसस्तुस्यात्, तस्याऽस्मिन्संघातेस्वातन्त्र्यात्। तत्समवधानाऽसमवधानयोर्ज्ञानाद्युत्पत्त्यनुत्पत्तिव्यवस्थादर्शनाच्च। "कामस्संकल्पो-

(१) जीवतीति जीवः, जीवधात्वार्थः प्राणधारणम्। प्रत्ययार्थ आश्रयः, तथाच प्राणधारणानुकूलव्यापाराश्रयो जीवः। एतेन प्राणव्यतिरिक्तो जीवात्मा जीव इति पदेन सूचितः।।

(२) लक्ष्यते चिन्ह्यते येन तत् लक्षणम् = जनको हेतुः, धात्वर्थविशेषणं चैतत्। लक्षणे हेतौ चार्थे वर्तमानाद्धातोः परस्य लटः शतृशानचावादेशौ भवतः। तौचेल्लक्षणहेतू क्रियाविषयौ भवतः। लक्षणे-शयाना भुञ्जते यवनाः। हेतौ = अर्जन्वसति। एवं प्रथमासमानाधिकरणे रक्षन्निति शतृप्रत्ययः।

विचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव'' इतिश्रुतिरपि तस्य-कामसंकल्पादिधर्मितां गमयती आत्मतांगमयति। कामादिधर्मोहि सर्वेषामात्मा प्रसिद्धः। ''मन एवाऽस्यात्मा'' इति च स्पष्टं सावधारणं च तस्याऽऽत्मत्वं श्रूयते। किञ्च, प्रश्नोपनिषदि मनोहवाव यजमानः'' इत्युक्त्वा ''स एष यजमानमहरहर्ब्रह्मगमयत्यत्रैषदेवः स्वप्ने महिमानमनुभवति'' इति मनस एव ब्रह्मगमनस्वप्नद्रष्टृत्वे श्रूयेते। ते चात्मन एवेति श्रुत्यन्तरेषु प्रसिद्धे। तस्मान्मन एवात्मेति केचित्, तान्निराचष्टे-

मू०।। उद्भूतेस्साधनत्वादशनमयतया शुद्ध्यशुद्धिप्रतीते
हेतुत्वाद्बंधमुक्त्योस्तदनु तनुभृतेस्तन्मयत्वश्रुतेश्च।
जागृत्स्वप्नप्रशान्तौ करणगणलये तत्प्रशान्तेस्सुषुप्ते
रुत्थानेसुप्तिसौख्यस्मृतिभिरपि मितं मानसंचापि नाऽऽत्मा।। ३५।।

उद्भूतेरिति।। उद्भूत्यादिभिर्दर्शितहेतुभिः, मानसं = मनोऽपि नाऽऽत्मेति मितं = प्रमितमितिसंबंधः।। कृतहानाऽकृताभ्यागमप्रसङ्गापनुत्तयेहि सर्वैरास्ति-कैरात्माऽनादिरभ्युपगन्तव्यः। मनसस्तु 'तन्मनोऽकुरुत, अन्नात्प्राणोमनस्सत्यं लोकाः कर्मसु चामृतं स प्राणमसृजत, प्राणाच्छ्रद्धां खंवायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम्, अन्नाद्वीर्यं तपोमन्त्राः कर्म लोकालोकेषु नाम च'' इत्यादिश्रुतिषु सृज्येतर-पदार्थसाधारण्येन सृष्टिश्रुतेर्नात्मतेत्याह- उद्भूतेरिति।। उद्भवनमुद्भूतिः, उत्पत्तेरित्यर्थः। चक्षुरादिवन्मनसोऽपि करणत्वान्नात्मतेत्याह-साधनत्वादिति। तच्चास्य ''अन्यत्रमना अभूवं नादर्शम्, अन्यत्रमना अभूवं नाश्रौषम्, मनसाह्येव पश्यति मनसाश्रृणोति'' इति श्रुतौ कर्तुः पृथग्भावेन करणविभक्त्या च निर्देशात्। अत एव ''कामस्संकल्पो विचिकित्सा'' इत्यादिवाक्यशेषः कामादिकार्यलिङ्गैर्मनस्सद्भाव मात्रप्रतिपादनपरो नास्याऽऽत्मत्वप्रतिपादनपरः। ''त्रीण्यात्मनेऽकुरुत मनोवाचं प्राणम्'' इति (१)सप्तान्नप्रकरणे अन्नात्मनैव मनसस्सृष्टिश्रवणाच्च। अत एव ''मन एवास्याऽऽत्मा'' इति वचनं मनःप्रधानत्वात्संघातस्य तदनुवृत्तित्वादुपचारमात्रम्। ''वाग्जाया प्राणः प्रजा'' इति तथाविधजायाप्रजाप्रायपाठात्, कृत्स्नतासंपत्ति-हेतूपासनार्थत्वेन मनआदीनां प्रस्तुतत्वाच्चेति भावः। तथा छान्दोग्येऽपि ''अन्नमशितं त्रेधा विधीयते'' इति प्रस्तुत्य ''योऽणिष्ठस्तन्मनः, अन्नमयं हि सोम्य मनः'' इति च मनसोऽन्न-विकारत्वश्रवणाद्देहवन्नात्मतेत्याह -अशनमयतयेति।। अश्यत इत्यशनम्।

(१) आत्मोपकरण इति ग्र० पा०।।

बाहुलकात्कर्मणि ल्युट्। तद्विकारतयेत्यर्थः। अन्नगुणदोषाभ्यां हि मनः प्रसादमालिन्ये ध्यायिनामनुभवसिद्धेः "आहारशुद्धौ सत्वशुद्धिः" इति श्रुतेश्चेति भावः। तथा- "मनोहिद्विविधं प्रोक्तं शुद्धं चाऽशुद्धमेव च।"

इति शुद्ध्यशुद्धिद्वैविध्यश्रवणात्। आत्मनश्च "अनन्वागतं पुण्येन, अनन्वागतं पापेन, अनन्वागतस्तेन भवत्यसंगोऽह्ययं पुरुषः" "अस्नाविरं शुद्धमपापविद्धं" "शुद्धमक्षरं वेदयते ज्योतिर्मयो हि शुभ्रः" इत्यादिश्रुतिशतैर्नित्यशुद्धैकरूपत्वावगमात्। अत्यन्तवैधर्म्यादपि मनसो नात्मतेत्याह-शुद्ध्यशुद्धिप्रतीतेरिति।। प्रतीतिः श्रौती, आनुभाविकी च। तथा

"मन एव मनुष्याणां कारणं बंधमोक्षयोः।
बंधाय विषयाऽऽसक्तं मुक्त्यै निर्विषयं स्मृतम्।।"

इति श्रुत्या मनसो बंधमोक्षनिमित्तत्वोक्तेस्तद्गतसंगदोषैर्बद्धस्याऽऽत्मन-'स्तदन्यतेत्याहहेतुत्वादिति।। बंधस्य = आध्यासिकपरिच्छेदादिलक्षणस्य, मुक्तेः = तन्निवृत्तेश्च, हेतुत्वात् = प्रयोजकत्वादित्यर्थः।। तथा "तदेव सक्तस्सहकर्मणैति लिङ्गं मनोयत्र निषक्तमस्य" "मनो कृतेनाऽऽयात्यस्मिन् शरीरे प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयति।" "चित्तमेव हिं संसारस्तच्च यत्नेन शोधयेत्। यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम्" इत्यादिश्रुतेः,

"यंयं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तंतमेवैति कौन्तेय सदा तद्भावभावितः।।"

इत्यादिस्मृतेः, तत्क्रतुन्यायोपपादनाच्च जीवस्य मनोऽनुसारेण देहग्रहणावगमादपि तस्य नात्मतेत्याह-तदन्विति।. तन्मनोऽनुसृत्य तनुभृतेः = शरीरधारणादित्यर्थः। भरतादीनां मृगादिजन्मोपाख्यानमप्यस्मिन्नर्थे प्रसिद्धम्। पूर्वं सामान्ये, इहविशेषे, पूर्वं शुद्धस्य जीवभावे, इहतदुत्तरभाविशरीरग्रहणे वा निमित्तत्वमुक्तमिति हेत्वोर्भेदः। तथा "एतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः" "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयः" इत्यादौ वाक्प्राणाद्यभिमानादात्मन-स्तन्मयत्ववन्मनोभिमानेन मनोमयत्वश्रवणादपि तस्य नात्मतेत्याहतन्मयत्वश्रुतेश्चेति।। "तदनु" इत्येतदत्राऽपि संबध्यते। मनोऽनुसारेण मनोमयत्वश्रुतेश्चेत्यर्थः। तन्मयत्वं चात्र तत्प्रायत्वम्। वदन्वाकपश्यन् चक्षुः, श्रृण्वन् श्रोत्रम्, मन्वानो मनः" इति चान्यत्र तत्तदभिमानात्तद्रूप्यमात्मनः श्रुतम्। यदुक्तं सुषुप्तौ ब्रह्मप्राप्तिश्रवणात्तस्या-ऽऽत्मतेति तत्परिहरन्हेत्वन्तरमाह-जागृदिति।। जागृत्स्वप्नभोगप्रदकर्मोपरमेण तयोः

प्रशान्तौ मनस्यैकीभूतस्य चक्षुरादिकरणगणस्य सविषयस्यलये सहैवेन्द्रियैः मनसोऽपि प्रशान्तेः कारणे प्राज्ञे संस्कारमात्रावशेषेण विलयात् "तद्यथा सोम्यवयांसिवासोवृक्षं संप्रतिष्ठन्ते, एवं ह वैतत्सर्वं परे आत्मनि संप्रतिष्ठते।" इति सुषुप्तौ सर्वकार्यलयप्रपंचन-प्रस्तावे "चक्षुश्च द्रष्टव्यं च" इत्यादिवत् "मनश्च मन्तव्यं च" इति सविषयस्य मनसोऽपि लयश्रवणात्। नच वयोवासवृक्षदृष्टान्तात्तत्रप्रवेशमात्रं संप्रतिष्ठा, न तु विलय इति भ्रमितव्यम्। "सुषुप्तिकाले सकले विलीने", "सलिल एकोद्रष्टाऽद्वैतो भवति, न तू तद्द्वितीयमस्ति ततोऽन्यद्विभक्तम्" इत्यादिश्रुत्यन्तरैः सर्वकार्य-लयप्रतिपादनात्। मनसश्चात्मत्वे सुषुप्तावात्मनाशप्रसङ्गेनाऽऽत्मनित्यत्वप्रतिपादक-श्रुतिविरोधः, अभ्युदयनिश्रेयसाद्युपदेशवैयर्थ्यम्, इन्द्रियात्मवादोक्तदोषापत्तिश्च। न च तदेव मे मनः स एवाहमिति प्रत्यभिज्ञाविरोधान्नसुषुप्तौ मनोनाश इति शंक्यम्। त इमे शालयो भुज्यन्ते ये परोपभुक्ताः, तस्मिन्नेतस्मिन् स्रोतसि मज्जामः इतिवत्सादृश्यमात्रादात्यन्तिकविनाशाऽनभ्युपगमेन, तिरोभूतस्यैवपुनराविर्भावाद्वा प्रत्यभिज्ञोपपत्तेः। किंच, स एवाऽहमिति प्रत्यभिज्ञाऽऽत्माभेदमात्रविषयाऽतो तदेव मे मन इति प्रत्यभिज्ञा तु मनोतिरिक्तात्मानमवगाहत इति न तदवलंबनेनेष्टसिद्धिरिति भावः। नन्वस्त्वात्मन एव तर्हि सुषुप्तौ नाशः पुनर्जागरे उद्भवश्चेत्याशङ्कां परिहरन्हेत्वन्तरमाह–सुषुप्तेरिति।। सुषुप्तेस्सकाशात्पुनरुत्थाने जागरे सुप्तिः = सुषुप्तिः, सुखमेव सौख्यं तयोस्स्मृतिरित्यर्थः।। यद्यात्मनोऽपि नाशस्स्यात्तर्हि सुषुप्तेस्तत्सुखस्य चाऽनुभवितुरभावात् उत्थितस्य 'सुखमहमस्वाप्सम्' इतिस्वापसुखयोः स्मरणं न स्यादित्यर्थः। इदं च यद्यपि पूर्वहेतुफलम्। तथापि स्वातन्त्र्येणाऽपि व्याप्तिसंभवादुपन्यस्तम्। अपिशब्दो मम मनश्चपलं दुर्निग्रहमिति भेदाऽनुभवस्य तन्निग्रहबोधकश्रुत्यादिप्रमाणस्य च संग्रहार्थः। चकारः पूर्वप्रसाधिताऽनात्म-वर्गैर्मनसस्समुच्चयार्थः। द्वितीयस्त्वपिशब्दो दर्शितहेतुभिरेव मनोवदहंकारचित्तयोर-प्यनात्मत्वं सा धनीयमिति प्रदर्शनार्थः ।।३५।।

ननु मास्तु मनस आत्मत्वं, विज्ञानशब्दवाच्याया बुद्धेस्तु स्यात्। ननु निराकृतं विज्ञानस्याऽऽत्मत्वम्। सत्यं क्षणिकविज्ञानस्य तन्निराकृतम्। नित्यविज्ञानस्य तु न निराकर्तुं शक्यम्। श्रुत्यनुभवसिद्धत्वात्। "विज्ञानं यज्ञं तनुते" इत्यादिना सर्वयज्ञादिकर्मकर्तृभूतं तत्प्रस्तुत्य "विज्ञानं ब्रह्मचेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान् समश्नुते" इति तज्ज्ञानस्यैव सर्वपापनिवृत्ति-सर्वकामाऽवाप्तिफलश्रवणात्। आत्मज्ञानफलत्वेन च ते प्रसिद्धे। अतएव न मनस्साम्यं तस्य, करणत्वात्। अस्य च "यज्ञं तनुते, कर्माणि तनुते" इति

वैदिकलौकिकसर्वकर्मकर्तृत्वश्रवणात्। कर्ता हि सर्वैरात्मेष्यते "(१)शास्त्रफलं प्रयोक्तरि" इति जैमिनिसूत्रात्, कर्मकाण्डप्रामाण्याऽनुरोधात् "सहिकर्ता" इति श्रुतेश्च। एतच्च "(२)कर्ता शास्त्रार्थवत्वात्" इति सूत्रयतो बादरायणस्याऽपि संमतम्। तस्माद्विज्ञानमेवाऽऽत्मेत्येकदेशिनामुपासकमीमांसकादीनां च मतम्। तन्निराचष्टे-

मू०।। विज्ञानं स्थायि यत्तत्सममिह मनसा किंच नानाऽऽत्मतास्या-
त्तस्याऽनेकात्मकत्वात्तदभिमतिवशादात्मबंधश्रुतेश्च।
सारथ्यं तस्य क्लृप्तं यदपि तनुरथे स्वात्मनो भोगमुक्त्यो
स्तस्मादन्योऽस्य साक्षी तदुपहिततनुश्चिन्मयोऽस्त्यन्तरात्मा।।३६।।

विज्ञानमिति। स्थायि = क्षणिकविलक्षणम्, नित्यमित्यर्थः। ईदृशं विज्ञानं पूर्वोक्तेन मनसा समम् = तुल्यम्। तस्याऽपि चित्प्रतिबिंबग्राहिज्ञानक्रिया-शक्तिप्रधानान्तःकरणांशत्वेन पूर्वोक्तोत्पत्त्याद्यंशे तुल्ययोगक्षेमत्वादित्यर्थः। ननु "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" इत्यक्षपादसूत्रात् "बुद्धिर्मनीषा धिषणा" इत्यादिकोशेभ्यश्च ज्ञानमेव बुद्धिः, तदेव चैतन्यं विज्ञानं चेत्यवगम्यते, तस्यचा-ऽमूर्तस्योक्तशक्तिद्वयाऽऽधारत्वमसंभवि, नित्यज्ञानस्यत्वात्मत्वं सिद्धान्त्यविरुद्धं चेति न निराकरणार्हमिति चेत्। मैवम्। "बुद्धेर्गुणेनाऽऽत्मगुणेन चैव" "यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च नेङ्गते तत्र परमात्मानमश्नुते।। बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्" इत्यादिश्रुतिभिः प्रागुदाहृतश्रुत्या च गुणक्रियाऽऽश्रयत्वेन प्रसिद्धस्य परिच्छिन्नद्रव्यस्य बुद्धिशब्दवाच्यत्वनिश्चयात्। तस्यैव बह्वृचानामुपनिषदि "यदेतद्धृदयं मनश्चैतत्"इति मनोऽभेदाऽभिधानात्। विवरणे "एकमन्तःकरणं विज्ञानक्रियाशक्तिमन्मनआदिशब्दवाच्यम्" इत्युक्तत्वाच्च। तथाच बुद्ध्यादिशब्दा नानार्थाःआत्मशब्दवच्चैतन्ये मुख्याः, अन्यत्र तत्संबंधा-न्निरूढा लाक्षणिका वा। सर्वथाऽपि पराभिमतं विज्ञानं गुणक्रियाश्रयत्वात्परिच्छिन्न-द्रव्यमेवेति निराकरणार्हमेव। नन्वस्तु परिच्छिन्नत्वमेव जीवस्य, उत्क्रान्त्यादिशास्त्रा-नुगुणत्वात्। तथाविधस्यापि तस्य "न जीवो म्रियते" इति श्रुत्या नित्यत्वम्। "प्राणैर्मनो मनसश्च विज्ञानम्" इत्याद्युत्पत्त्यादिश्रवणं तु तदुपभोगसाधनदेहाद्युत्पत्त्यु-

(१) शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात्। (पू.मी. अ.३ पा०.७सू.१८)

(२) तद्गुणसारत्वाधिकारेणैवापरोपि जीवधर्म प्रपञ्च्यते। कर्ता चायं जीवः स्यात्। कस्मात्।। एवं च यजेत्, जुहुयात्, दद्यात् इत्येवं विधं विधिशास्त्रमर्थवद्भवति।। अन्यथा तदनर्थकं स्यात् तथेदमपि ज्ञान-शास्त्रमनर्थकं न भवति। एष हि द्रष्टा श्रोता मन्ता बोधकर्त्ता विज्ञानात्मापुरुष इति। (ब्र.सू.२/३/ ३३।।)

पचयाधीनोपभोग्यविषयसंबंन्धोत्पतत्त्या औपचारिकम्। "एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवाऽनुविनश्यति, न प्रेत्यसंज्ञाऽस्ति" इत्यादौ तवाऽपि तथैवेष्टत्वात्। सर्वगतत्वश्रुतयस्त्वीश्वरविषया भविष्यन्तीत्याशंक्य परिच्छिन्नस्याऽणुत्वमग्रे निराकरणीयमिति मध्यमपरिमाणत्वं परिशिष्यते। तथाच सावयवत्वप्रसङ्गे, अवयवानां प्रत्येकं चेतनत्वमवयविन एववेत्यार्हतचार्वाकमतोक्तदूषणगणग्रास इत्याह–किंचेति। अनेकात्मकत्वात् = अनेकावयवघटितत्वात्, अवयवाऽवयविनोस्तादात्म्यात्, अथवा अपञ्चीकृतभूतकार्यत्वात्पञ्चभूतात्मकमन्तःकरणम्, तस्याऽऽत्मत्वे तुल्यन्यायेन स्थूलदेहेन्द्रियादीनामप्यात्मता दुर्वारा, साधकबाधकयुक्तिसाम्यात्। तथाच नानात्मतास्यादित्यर्थः। "न जीवो म्रियते" इति श्रुतिस्तु जीवस्य ब्रह्माभेदाऽभिप्रायेणा-ऽविनाशित्वपरा। "अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा, मात्राऽसंसर्गस्त्वस्य भवति" इति श्रुत्यन्तरे तथैव निर्णीतत्वात्। "तत्त्वमसि" इत्यभ्यस्यमानप्रस्तुत महावाक्योपयोगाऽऽनुगुण्याच्च न विज्ञान नित्यत्वपरा। वस्तुस्वभावविरुद्धा-ऽप्रस्तुतार्थकत्वापत्त्याऽप्रामाण्यापत्तेः। यत्तूक्तमुत्क्रान्त्यादिशास्त्रानुगुण्यं तत्परिहरन् हेत्वन्तरमाह–तदिति।। तस्याः बुद्धेः, अभिमतिः = अभिमानः तादात्म्याध्यासलक्षणः, तद्वशाद् = तत्प्रयुक्तपारवश्यात्, आत्मनः परिच्छेदलक्षण–बंधश्रवणादित्यर्थः। तथा च श्रुतयः–"बुद्धेर्गुणेनाऽऽत्मगुणेन चैव आराग्रमात्रो–ह्यवरोऽपिदृष्टः।" ससमानस्सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव" "सधीः स्वप्नो भूत्वेमम् लोकमतिक्रामति" "मृत्यो रूपाणि" इति श्रुतौ "ससमानस्सन् हृद्यन्तर्ज्योतिः" इति हृच्छब्देन बुद्धेः, प्रस्तुतत्वात् बुद्ध्यासमानस्तादात्म्याध्यासादेकीभूतस्सन्नित्यर्थः। तथाचोत्क्रान्त्यादिकमपरिच्छिन्नस्याप्यध्यासनिमित्तकमेवेतिभावः।

"यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम्।।"

इत्यादीनां बुद्ध्युपाधिनिवृत्तावात्ममोक्षप्रतिपादकश्रुतीनां संग्रहार्थश्चकारः। किंच, "आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः। विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोऽति तद्विष्णोः परमं पदम्।।" इति काठकश्रुत्योर्भोगमोक्षोपयोगित्वाद्देहा-देरथरूपककल्पने आत्मनो रथित्वं, विज्ञानस्य तु सारथित्वं कल्पितम्। तदपि विज्ञानस्याऽनात्मत्वेमानमित्याहसारथ्यमिति।। तस्य = विज्ञानस्य, तनुरथे = शरीररूपे

स्यन्दने, सारथ्यं = सारथेर्भाव: सारथ्यं क्लृप्तम् = रूपकेण संपादितम्। किंच,, "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय:" इति स्पष्टमेवाऽऽत्मनो विज्ञानमयातिरिक्तस्य प्रदर्शनात्, विज्ञानमयस्य कोशत्वप्रसिद्धे:। भृगुवल्यां विज्ञानादप्युत्तरत्र "आनन्दो ब्रह्मेति व्यजानात्" इति दर्शितत्वात् "यो विज्ञाने तिष्ठन्विज्ञानादान्तर:" इति सर्वान्तरस्य पृथङ्निर्देशाच्च विज्ञानस्यापि साक्षी नित्यदृक्स्वरूप: परमात्माऽन्योऽस्तीत्याहतस्मादिति।। तस्मात् = उक्तहेतो: अस्य = विज्ञानस्य साक्षी = साक्षादव्यवधानेन द्रष्टा तेन = विज्ञानेनोपाधिना, उपहिततनु: = उपहितस्वरूप:, नीरक्षीरवदेकीभावाद्दुर्विवेक इत्यर्थ:। चिन्मय: = स्वार्थे मयट्, चित्स्वरूप:। अनेन दृष्टे: कर्तृत्वादाश्रयत्वाद्वा न साक्षित्वम्, किन्तु दृक्स्वरूपत्वादिति दर्शितम्। अन्तरात्मा सर्वान्तरत्वेन श्रुतिप्रसिद्ध आत्मा अस्ति, न नास्ति, तस्याऽभावे ग्राहकाभावान्निस्साक्षिकं विज्ञानादिजगत् आलोकासत्व इव रूपमस्ति नास्तीति व्यपदेशानर्हंखपुष्पायमानं स्यादित्यर्थ:। तथाच स्मृति:-

"असत्यस्मिञ्जगन्नाथे ह्यन्धीभूतमिदं भवेत्।
सूर्येणेव विहीनत्वान्निरालोकं जगद्यथा।।" इति।।

अयंभाव:-"विज्ञानं यज्ञं तनुते" इति श्रुति: यज्ञतत्फलोपभोगयोग्यं व्यावहारिकं सर्वान्तराऽऽत्मज्ञानोपायत्वेन प्रस्तुतं कोशविशेषमेवाऽऽह न पारमार्थिकमात्मानम्। अत एव तत्रत्यं सर्वपापक्षय सर्वकामावाप्तिफलकीर्तनमापेक्षिकस्यान्यत्रसिद्ध-हिरण्यगर्भोपास्तिफलस्याऽनुवादोऽर्थवादो वा, अपापश्लोकश्रवणवाक्यवत्। अन्यथाऽत्रैवोपक्रमोपक्षिप्तसर्वकामावाप्तिफलेनोपसंहारे ज्ञातव्यान्तराऽपरिशेषा-दभिलषितफलान्तराऽसंभवाच्चोत्तरत्राऽऽनन्दमयकोशनिरूपणं, पुच्छब्रह्मनिरूपणं, तदुपपादनार्थ उत्तरो ग्रन्थश्च निरर्थक: स्यात् "(१)कर्ताशास्त्रार्थवत्वात्" इत्यादिसूत्राणि तु "(२)तद्गुणसारत्वात्तु तद्व्यपदेश: प्राज्ञवत्" इति सूत्रोपदर्शितबुद्धि-संबंधाधीनकर्तृत्वादिप्रपञ्चनार्थानि कर्मोपासनाकाण्डोपयोगितया। तावतैव कर्मकाण्डप्रामाण्योपपत्ते:। 'शास्त्रफलं प्रयोक्तरि" इत्यादिर्कमपि बुद्ध्युपहित-

(१) कर्ता शास्त्रार्थवत्वात्। आत्मैव कर्ता न बुद्धि: कर्तुरपेक्षितोपायबोधकविधिशास्त्रस्यार्थवत्वात्। आत्मन: कर्तृत्वे विधिशास्त्रमर्थवद्भवति। अन्यथा बुद्धि: कर्ता आत्मा फलभोक्तेति कर्तुरपेक्षितोपायबोधकं शास्त्रमनर्थकमेव स्यात्।।

(२) तु शब्द: पूर्वपक्षव्यावृत्त्यर्थ:। तस्या: = बुद्धे:, गुणा: = अणुत्वोत्क्रान्तिगत्यागतिसुखदु:खादय:, ते गुणा: सार: प्रधानं यस्य जीवस्य सतथा तस्य भावस्तत्वं, तद्व्यपदेश: = तस्माद्व्यपदेश: अणुत्वादिव्यपदेश: प्राज्ञवत् = प्राज्ञस्य = परमात्मन: सगुणेषूपासनेषु "दहरोऽस्मिन्नन्तराकाश: अणीयान् ब्रीहेर्वायाद्वा" इत्यादिषूपाधिवशाद्यथाऽणुत्वादिकं व्यपदिश्यते तद्वदित्यर्थ:।

व्यावहारिकतादृशाऽऽत्मविषयं, न पारमार्थिकाऽऽत्मविषयमिति स्फुटीकृतं भगवद्भिर्भाष्यकृद्भिरिति दिग्विजयः।। ३६।।

ननु माभूद्विज्ञानमात्मा, ईश्वरांशभूतस्तु ज्ञानादिगुणवान् "एषोऽणुरात्मा चेतसा वेदितव्यः" "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्सविज्ञेयः" "बालाग्रमात्रं हृदयस्यमध्ये" "अणोरणीयान्" "इत्यादिश्रुत्या, गीतासु च "नित्यस्सर्वगतस्थाणुः" इत्यत्र सर्वगतस्थश्चासावणुश्चेति विग्रहाद्भगवद्वचनेन पाञ्चरात्राद्यागमैश्चाऽणुत्वेन प्रमित आत्मा स्यात्। सच स्वांशिनमीश्वरं तत्त्वतोज्ञात्वातपस्संयमभजनप्रापत्त्यादिभिः प्रसाद्य तत्प्रसादात्तत्साम्यं तत्सान्निध्यं च प्राप्नोत्येषैवाऽस्य मुक्तिः। सचाणुरेकदेशस्थितोऽपि सर्वशरीरव्यापिज्ञानगुणेन सर्वाङ्गीणशैत्याद्युपलभते। एकदेशस्थितेनाऽपि शैत्यचन्दनबिन्दुना सर्वाङ्गीण-शैत्योपजननदर्शनेन वस्तु शक्तेरचिन्त्यत्वात्। वायुप्रसारिततामरसाऽऽमोदवच्च ज्ञानगुणस्य धर्म्यतिरिक्तदेशप्रसरोप्यविरुद्ध इति पाञ्चरात्राद्यभिमतं पक्षमपि परीक्ष्य प्रतिक्षिपति-

मू०।। अण्वात्मा चित्स्वरूपो यदि सकलतनौ शैत्यबोधो न ते स्या
न्नावैधर्म्येऽस्यबोधः सकलतनुगतग्राहकोऽन्यो गुणश्च।
वैधर्म्येऽणोर्गुणश्चित्कथमखिलतनुं व्याप्नुयादाणवं वा
सिद्धं केनाऽऽत्मनस्ते श्रुतिभिरिति न यत्तास्तदानन्त्यनिष्ठाः।। ३७।।

अण्वात्मेति।। अण्वात्मा चिद्रूपोऽचिद्रूपोवा? तत्र पक्षद्वयसाधारण-दोषसहितमाद्यपक्षे दोषमाह-सकलेत्यादि श्लोकार्द्धेन। ते = तव मते हृदादि निमग्नस्य पुरुषस्य सकलतनौ = सर्वाङ्गे, शैत्यबोधः = शीतस्पर्शाऽनुभवो न स्यात्, अणोस्सर्वाङ्गसंबन्धस्य युगपदसंभवात्। [१]क्रमिकसंयोगानांचाऽयौगपद्येनैक-ज्ञानजनकत्वासंभवात्। नच शैत्यादिविषयप्रदेशे आत्माऽसंनिधानेऽप्यात्म-संयुक्तदेहेन्द्रियमनस्संबंधादेव शैत्यादिसाक्षात्कारोऽस्त्विति शंक्यम्। शैत्याद्यनुभवजन्य-सुखदुःखादेः शीतद्रव्यादिसंयुक्तावयवावच्छेदेनैवानुभवस्य सार्वजनीनस्य तत्रात्मसंनिधानमन्तरेण दुरुपपादत्वात्। अथवा सकलतनौ = सावयवे शरीरे आत्मसंयुक्तत्वेनाऽभिमतप्रदेशावच्छेदेनाऽपीत्यर्थः। अणोर्देहेन, तदवयवैर्वा संयोगस्य

(१) क्रमिकसंयोगानां चायौगपद्येनेति। अणोरात्मनः क्रमेण जायमानानां तत्तच्छरीरावयवसंयोगानां युगपत्स्थित्यनर्हत्वेनैकज्ञानजनकत्वासंभवादित्यर्थः।

वैशेषिकमतनिरासोक्तयुक्त्या दुर्निरूपत्वात्। अभ्युपगमेप्यणुनाऽण्वतिरिक्तप्रदेशाऽस्पर्शनादेकत्र मूर्तद्रव्यद्वयाऽसमावेशादात्माऽसंयुक्तावयवेष्वेव जलादिसंयोगस्य वाच्यतया तच्छैत्यस्य दुर्ग्रहत्वात्। आत्मसंयुक्ताऽणुप्रदेशे जलसंयोगाभ्युपगमेऽपि तत्राऽण्वतिरिक्तजलभागसंयोगायोगात्परमाणुस्पर्शस्य चातीन्द्रियत्वेन ग्रहणाऽनुपपत्तेः। नच तत्र जलावयवसंयोगेऽवयविसंयोगस्याप्यवर्जनीयतया तच्छैत्यग्रहसंभवइति युक्तम्। अङ्गुल्यग्रेण गङ्गांस्पृशतो महाप्रवाहशैत्यानुभवापत्ति वारणाय संयोगजसंयोगस्य स्वाश्रयस्पर्शग्रहाप्रयोजकत्वस्यावश्यवाच्यत्वात्।। यत्तूक्तं (प०टि०)सर्वदेहव्यापिज्ञानगुणेन शैत्यादिग्रह इति तत्परिहरन्नाहनेति। आत्मापि चिद्रूपो ज्ञानगुणश्च त्वयेष्यते। गुणगुणिनोर्वैधर्म्याभावे सकलतनुव्यापिशैत्यादिग्राहकत्वेनाभिमतोऽस्यात्मनो बोधः ज्ञानाख्योगुण अर्थादस्मादात्मनोऽन्यो भिन्नो न स्यादित्यनुषज्यते, भेदे कारणाभावादिति भावः। एवं गुणश्च न स्यात्, रूपरसादीनां हि स्ववैधर्म्यशालिद्रव्यगुणत्वं दृष्टं, न हि रूपं रूपान्तरस्य, रसो रसान्तरस्य, घटो वा घटान्तरस्य गुणः। न्यायनयेऽपि सत्तातिरिक्तजातेर्गुणगुण्युभयवृत्तित्वानभ्युपगमादित्यर्थः। नच दीपप्रभयोस्तेजस्त्वसाधारण्येऽपि धर्मधर्मिभाववज्ज्ञानत्वसाधारण्येऽपि गुणगुणिभावोऽस्त्विवति शङ्क्यम्। प्रभायां दीपाऽवृत्तिप्रभात्ववज्ज्ञानगुणे आत्माऽवृत्तिभेदकधर्मान्तराऽपरिचयात्। (१)गुणत्वमेव तथास्त्विवति चेत्। न। तस्य भेदाऽसिद्धावसिद्धेः। (२)स्व स्वाभावोभयसमानाधिकरण जाति तदभावोभयसामानाधिकरण्यायोगाच्च। विरलं प्रसृमरं तेजः प्रभा, निबिडं च दीपादीति सावयवयोर्द्रव्ययोरेव दण्डपुरुषयोरिव धर्मधर्मिभावेन गुणगुणित्वाऽसंप्रतिपत्तेश्च। द्वितीयपक्षमनूद्य दूषयति–वैधर्म्य इत्यादिना। आत्मगुणस्य ज्ञानस्याऽऽत्मवैधर्म्यमात्मनो जडत्वमन्तरेण न संभवतीत्यर्थादात्मनो जडत्वपक्ष इत्यर्थः। अणोः = अणुपरिमाणस्याऽऽत्मनो गुणश्चित् = ज्ञानम् अखिलतनुं = समग्रं

---

(१) गुणत्वमेव तथास्त्विवति।। आत्मावृत्तिज्ञानवृत्तिरान्मतो ज्ञानस्य भेदकधर्मरूपमस्त्विवति चेदाह नेति। तस्य गुणत्वस्य ज्ञानात्मनोर्भेदासिद्धौ ज्ञाने गुणत्वस्यैवासिद्धेरित्यर्थः।।

(२) भेदक धर्मस्य स्वस्वाभावोभयसमानाधिकरणजातितदभावोभयसमानाधिकरण्यायोगात् (इति) यथा पृथिव्यां जलादिभ्यो व्यावर्तकस्य पृथिवीत्वजातेः रसादिभ्यः स्वाश्रयरूपव्यावर्तकरूपत्वजातेः स्वस्वाभावोभयसमानाधिकरणद्रव्यत्वगुणत्व जातितदभावोभय समानाधिकरणायोग्यत्वमस्ति। द्रव्यत्वाभाववति गुणादौ पृथिवीत्वस्य गुणत्वाभाववति द्रव्ये च रूपत्वस्यावृत्तित्वात्तद्वन्न गुणत्वस्य तादृशायोग्यत्वमस्ति। तस्य यथोक्तजातितदभावोभयसामानाधिकरण्य सम्भवात्तथाहि। स्वं गुणत्वं तदधिकरणं ज्ञानं तत्र तद्वत् स्वं गुणत्वं तदभावाधिकरणमात्मा तत्र च वृत्तित्वाज्ज्ञानत्वस्य गुणत्वतदभावोभयसमानाधिकरणजातित्वमस्ति। तथा च गुणत्वस्य ज्ञाने ज्ञानत्वाभाववति रूपादौ च वृत्तित्वात्तदयोग्यत्वं नास्त्यतो न ज्ञानस्यात्मसकाशाद्भेदकत्व सिद्धिरिति भावः।

देहं कथं व्याप्नुयात्। गुणस्य गुण्यतिरिक्तदेशप्रसराऽयोगात्। नच तामरसाऽऽमोदव-दुपपत्तिः। तत्रापि वायूपनीतानां गन्धास्पदपुष्परेणूनां [१]प्रसरानुमानात्। अत एव चिरावस्थितपुष्पे गंधापकर्षः, कर्पूरादौ परिमाणापकर्षश्च दृश्यते। नच कस्तूर्यादावपि तदापत्तिः। भोजकाऽदृष्टेन पुनः पुनस्तादृशावयवपूरणाभ्युपगमात्। गन्धप्रसर-वादिनाप्यपसृते गन्धे द्रव्यस्य निर्गन्धत्वापत्तिवारणाय क्षणे-क्षणे गन्धान्तरोत्पत्तेरव-श्यवाच्यतया [२]गौरवाधिक्याभावात्। [३]अवयवगंधोऽवयविगंधो वा प्रसरतीत्यत्र विनिगमकाभावेन सर्वगंधापगमे गंधान्तरोत्पादकसमवधानपर्यन्तं निर्गन्धत्वापत्तेः सजातीयगंधान्तरोत्पादाय परमाणुपर्यन्तं विजातीयानन्तपाकादिकल्पनागौरवाच्च। गुणस्य गुणिपरित्यागे गुणत्वभङ्गापत्तेश्च। एतेन शैत्यचन्दनबिन्दुनिदर्शनोपन्यासोऽपि प्रत्युक्तः। तत्रापि चन्दनसंयोगाभिव्यक्तशैत्यजलभागानां सर्वाङ्गे प्रसरसंभवात्। किंच। असंभाव्यमपि सति प्रमाणे बलादभ्युपगम्येत यथा निरालम्बनेऽपि पक्षिणां स्वैरविहरणम्। निरुच्छ्वासेन वा मत्स्यादेर्जीवनं प्रत्यक्षसिद्धम्। न चेहतादृशं प्रमाणमस्तीत्यभिप्रेत्याह-आणवंवेति। आत्मनः, अणोरिदमाणवम् = अणुपरिमाणं ते = तव, केन = प्रमाणेन सिद्धम्। न तावत्प्रत्यक्षेण, द्रष्टुर्दृश्यत्वायोगेन बिना आश्रयं, परिमाणमात्रग्रहणासंभवादणोरतीन्द्रियत्वात्पारिमाण्डल्यस्याऽयोग्यत्वाच्च। अतएव नानुमानोपमानाभ्याम्। अतीन्द्रिये आश्रये लिङ्गसादृश्ययोर्दुर्ग्रहत्वात्। नाप्यागमेन, तस्य "अस्थूलमनणु" इत्यादिना प्रत्युत तत्प्रतिषेधकत्वादिति भावः! यत्तु "बालाग्रशतभागस्य" इत्यादिश्रुतिभिस्तत्सिद्धिरित्युक्तम्। तदुदाहृत्य-प्रतिषेधतिश्रुतिभिरितिनेति। उपक्रमादिपर्यालोचने तासां नाणुत्वबोधनतात्पर्याऽवसाय इति भावः। तर्हि तासां कोऽभिप्रायस्तत्राह-यदिति। यत् = यस्मात्कारणात्, ताः = त्वदुदाहृतश्रुतयस्तदानन्त्यनिष्ठाः = तस्य प्रत्यगात्मनो बुद्ध्युपाधिसम्बन्धप्रयुक्ता-ऽतिन्यूनपरिमाणतालक्षणपरिच्छेदाऽनुवादेन वास्तवाऽपरिच्छेदलक्षणे आनन्त्ये निष्ठा = परमतात्पर्यं यासांतास्तथोक्ताः।

अयं भावः-"बालाग्रशतभागस्य" इति श्रुतौ "भागो जीवः स विज्ञेयः

(१) प्रसरानुमानादिति।। वायुनीतामोदः द्रव्याश्रितः गुणत्वात्रूपवत्।।

(२) गौरवाधिक्याभावादिति।। गन्धाश्रय पुष्पावयवप्रसरपक्षे गन्धमात्रस्य देशान्तरं प्रतिगमनमिति पक्षापेक्षया गौरव लक्षणदोषाधिक्याभावादित्यर्थः। गन्धतदाश्रयावयवोत्पत्ति प्रागभावादि कल्पनाविशेषादिति भावः।।

(३) नन्वस्मिन्मते केवलगन्धस्यैव देशान्तरं प्रतिगमनं स्वीकारः। भवन्मते तु साश्रयगन्धगमनस्वीकारे तथा च कथं न गौरवाधिक्यं गुणगुणिनोरुभयोः प्रागभावादि स्वीकारापत्तेरित्यत आह। अवयवगन्धेति।

सचाऽऽनन्त्याय कल्पते'' इति वाक्यशेषजीवस्य मोक्षे स्वाभाविके आनन्त्यश्रवणा-दुक्ताऽल्पपरिमाणमौपाधिकमिति स्फुटमवगम्यते। नहि वास्तवस्यापगमः, उत्पन्नस्य नित्यता वा संभवति। अत एव ''बालाग्रमात्रम्'' इति श्रुतिरप्यौपाधिकपरिमाणा-नुवादिन्येव। अन्यथा क्वचिद्बालाग्रायुत तमभागपरिमाणत्वं, क्वचिद्बालाग्रपरिमाणत्वं, क्वचिदानखाग्रपरिमाणत्वं, क्वचिदानन्त्यं प्रतिपाद्यत इति विसंवादाच्छ्रुतीनाम-प्रामाण्यापत्तेः। वस्तुनि विकल्पायोगात्। औपाधिकपरिच्छेदाभ्युपमगे तु ''समः प्लुषिणा, समो नागेन, समो मशकेन, सम एभिस्त्रिभिर्लोकैः'' इति लिङ्गस्य तत्तद्देहोचिताऽनियतपरिमाणश्रवणात्सर्वं समञ्जसम्। इत्थमेव ''अणोरणीयान्'' इत्यादिश्रुतेरभिप्रायः। ''एषोऽणुरात्मा चेतसा वेदितंव्यः'' इत्यादावणुशब्दस्तु ''अणुः पन्था विततः पुराणः इतिवद्दुर्विज्ञेयत्वपरः, ''सूक्ष्मात्सूक्ष्मतरं नित्यम्'' इति श्रुतौब्रह्मणि सूक्ष्मशब्दवत्। दृश्यते हि ''यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते'' इत्यादौ विभावपि तथा विधसूक्ष्मादिशब्दः। (१)गीतावाक्यस्य पदभङ्गेनोपन्यास-स्त्वतिमन्दः, परिच्छिन्नस्य चलनाद्यनिवारणात्''अचलोऽयं सनातनः'' इति वाक्यशेष, विरुद्धश्च। जीवस्येश्वरांशत्वप्रतिपादकस्मृतयोऽपि न मुख्यांशांशिभावपराः। निरवयवत्व-श्रुतिव्याकोपात्, सांशस्याऽनित्यत्वप्रसङ्गाच्च। किन्तु भ्रान्त्याऽत्यन्तभिन्नत्वेन निश्चिते प्रत्यगात्मनि वास्तवब्रह्मैक्ये बुद्ध्यवताराय बिम्बप्रतिबिम्बयोरिव घटाकाशमहा-काशयोरिववौपाधिकाशांशित्वानुवादपरा इति सर्वं सुस्थम्।।३७।।

स्थायिविज्ञानात्मवादनिराकरणेन ज्ञानगुणनिराकरणेन च निराकृतप्रायमपि भट्टाभिमतं जडबोधात्मकमात्मतत्त्वं भट्टपादानां कर्मकाण्डार्थनिर्णये अभ्रान्तत्वस्य सर्वसंमतत्वात्तद्वदौपनिषदात्मतत्त्वनिर्णयेऽपि तेषामभ्रान्तत्वमेवेति मन्दमतीनां भवेद्विश्वास इति विशिष्य तन्निराकर्तुमाह-

मू०।। नैकस्स्याच्चिज्जडात्मा कथमथ विषयः सस्स्वयं स्वस्य कौ ता
वंशौ योगस्तथात्मा किमिति च जडता केन वा चेतनस्य।
कर्तृत्वं तस्य कीदृक्करणसमुदयं सैष धत्ते कथं वा
तत्त्वं जीवस्य देवप्रियपशुभिरिदं कर्मठैर्दुर्निरूपम्।। ३८।।

(१) गीतावाक्यस्य पदभङ्गेन इति।। ''यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते'' इत्यादि भगवद्गीता वाक्यस्य प्रकृतार्थतो वियोज्यार्थान्तरपरत्व कल्पनेन स्वाभीष्टार्थ परत्वेन विन्यासस्त्वतितुच्छः। तथा हि यथा आत्मा सौक्ष्म्यादणुपरिमाणवत्वात् सर्वगतं व्यापकं यदाकाशं गगनं तेन सर्वतो नो सम्बन्ध्यते तद्वदणुपरिमाणत्वेन देहे कुत्रचित् स्थितोप्यात्मा देहे सर्वावयवेषु न सम्बन्ध्यते। इत्येवं विधार्थकल्पनं न साधुर्वाक्यशेषेण विरोधापत्तेरित्यर्थः।।

नैक इति।। एक एवात्मा चिद्रूपो जडरूपश्चेति विरुद्धोभयस्वभावो न स्यात्। संभावनायां लिङ्। एकस्य तेजस्तिमिरोभयात्मनेव विरुद्धचिज्जडोभयात्मनावस्थितिर्न संभावितेत्यर्थः। अथवा विरुद्धोभयस्वभावस्त्वदभिमत आत्मा एको न स्यात्।। तथाचैकस्मिन्देहे द्वावात्मानौ स्वीकृतौ स्यातामित्यर्थः।। नन्वहंप्रत्ययविषय एवाऽऽत्मा सर्वसंमतः। अहं प्रत्ययविषयत्वं च तज्जन्यज्ञातताऽऽश्रयत्वम्।। न च चिदंशस्य तत्संभवति, स्वात्मनि क्रिया विरोधात्, चैतन्यान्तरगोचरत्वेऽपि घटादिवदचित्त्वप्रसङ्गादिति ज्ञानमात्रस्याऽतीन्द्रियत्वाभ्युपगमात्। अतस्तन्निर्वाहार्थमगत्या जडांशोऽप्यात्मन्यवश्यमभ्युपेय इत्याशङ्क्याहकथमिति। अथ = जडांशाऽभ्युपगमानन्तरमपि सः = चिज्जडांशसंवलितरूप आत्मा स्वस्य = स्वात्मकस्य स्वीयस्य वा चिदंशस्य विषयः कथम्? जाड्यांशमात्रस्य विषयत्वसंभवेऽपि चित्संवलितरूपे विषयतायाश्चिति तद्विषयत्वमन्तरेण [१]दुरुपपादत्वात्, नहि पुरुषाऽविषयके दण्डमात्रविषयके ज्ञाने दण्डसंवलित-पुरुषविषयता सूपपादा। नवा अतीन्द्रियसंवलितविषयकं प्रत्यक्षं क्वचित्प्रसिद्धम्। यदि तु तन्निर्वाहाय चिदंशेऽपि विषयत्वमभ्युपगच्छसि तर्हि जडांशकल्पनवैफल्यं, स्वात्मनि क्रियाविरोधतादवस्थ्यम्, अपसिद्धान्तश्च। न ह्यहमिव त्वमात्मनः स्वप्रकाशत्वमभ्युपगच्छसि। येनाहमाकार वृत्तावहङ्कारे स्फुरति तदधिष्ठानचैतन्यस्याप्यनावृतस्य स्वतस्स्फूर्तौ तादात्म्यस्फुरणात्संवलितस्य विषयत्वमुपपादयेदित्यर्थः। अथवा-अभ्युपगतस्यापि जडांशस्य वास्तवचित्तादात्म्याऽभ्युपगमेन चिद्रूपत्वात्तद्विषयत्वेऽपि स्वात्मनि क्रियाविरोधानिर्मोकात्सोऽचिदंशः स्वयं स्वस्य = स्वाभिन्नचिदंशस्य विषयः कथमित्यर्थः।।

नन्वंशयोरंशितादात्म्येऽपि न परस्परं तादात्म्यम्। नहि शाखानां वृक्षे तादात्म्यमस्तीति परस्परमपि तादात्म्यमिति चिदचिदंशयोरत्यन्तभिन्नयोर्विषयविषयिभावो न विरुद्धः। अंशस्य चाहंप्रत्ययविषयत्वे तत्तादात्म्यादंशिनोऽप्यायातमेव। नचाविषयचिदंशतादात्म्यादंशिनस्तदविषयत्वस्याप्यापत्तिः। चिदचिदुभयांशिनोर्विषयाविषयोभयरूपत्वस्येष्टत्वात्। अत एव "मनसैवानुद्रष्टव्यम्" "एतदप्रमेयं ध्रुवम्" इति विरुद्धश्रुतिद्वयस्याप्याञ्जस्य। नच विरोधः अंशांशिनोर्भेदाभेदाभ्युपगमवदहमिति

(१) चिदंशेन तादात्म्यापन्ने जडांशावच्छिन्ने चात्मनि य विषयता तस्याश्चिदंशविषयकज्ञाननिरूपितविषयतामन्तरेण दुरूपपाद्यत्वाद्धर्मिग्रहणमंतरेण धर्मिग्रहस्य दुःशक्यत्वान्न जंडांशेपि ज्ञानविषयतोपपत्तिरिति भावः।।

प्रतीतिबलादविरुद्धत्वकल्पनादित्याशङ्कां निराचिकीर्षुरंशांशिसम्बन्धानामनुपपत्तिमभिप्रेत्य पृच्छति-कावित्यादिना। तौ = चिदचिदंशौ, कौ = किमवयवौ, उत समूहिनौ, उत जातिव्यक्ती, उत गुणगुणिनौ, उत क्रियाक्रियाधारौ। नाद्यः, अमूर्तयोरवयव-त्वायोगात् अचिदंशस्य मूर्तत्वाऽभ्युपगमे देहेन्द्रियादिवदनात्मांशत्वापत्तेः। अन्यथा देहेन्द्रियादेरपि स्थूलोऽहमित्याद्यहं प्रत्ययविषयत्वादात्मांशत्वे चार्वाकमतप्रवेशापत्तेः। सावयवस्याऽऽत्मनो विनाशापत्तेश्च।।

न द्वितीयः। समूहिनामेकैकोपाधिसम्बन्धादारोपितैकत्वानां समूहबुद्धिविषयतया तदतिरिक्तसमूहाभावेन समूहिनोऽनात्मत्वे नैरात्म्यापत्तेः। देहेन्द्रियादिसमूहस्या-प्यात्मत्वापत्तेश्च। तयोरात्मत्वे त्वेकदेहे आत्मद्वयाभ्युपगमापत्तेः। न तृतीयः। द्वयोरपि त्वयाऽनेकानुगतत्वानभ्युपगमात्। न चतुर्थः। ज्ञानस्य गुणत्वनिरासाद्विषयांशस्य घटादिवज्ज्ञानगुणत्वायोगात् विषयस्य ज्ञानधर्मत्वे विज्ञानवादिमतप्रवेशाच्च। नान्त्योऽपि। अमूर्ते ज्ञाने क्रियायोगात्। ज्ञानस्य क्रियात्वे कारकतन्त्रत्वापत्तेर्वस्तुतन्त्रत्वानापत्तेश्च। अंशयोर्नित्यत्वाऽभ्युपगमविरोधाच्च। एवं योगः = अंशयोस्सम्बन्धश्च कः? इति विपरिणामेनान्वयः। किं संयोगस्तादात्म्यं, विषयविषयिभाव एव वा। आद्ये, अनित्यत्वापत्तेः। द्वितीये चिदचिदैक्यापत्तेः। तृतीये घटादिवदचिदंशस्या-ऽऽत्मांशत्वानापत्तेः। तथांऽशी आत्मापि कः? अंशाभ्यामन्योऽनन्योवा? व्यासज्यवृत्तिः, प्रत्येकपर्याप्तो वेत्यादिविकल्प्य वैशेषिकमतनिरासोक्तयुक्त्यादिभिर्निरसनीय इति भावः।।

यत्तु भेदाभेददृष्टान्तेनैकस्य विषयाऽविषयोभयरूपत्वमविरुद्धमिति। तदुत्तरत्र दृष्टान्तनिरासेन निराकरिष्यते। अंशांशिभावादेरप्रामाणिकत्वादेव न श्रुत्योरपि त्वदुक्तरीत्याऽऽञ्जस्यम्। किन्त्वावरणभङ्गार्थमखण्डाकारमनोवृत्त्यपेक्षणात् ''मनसैवानुद्रष्टव्यम्'' इत्युक्तिः, स्वप्रकाशचित्स्फूर्तौ वृत्तिप्रतिफलितचिदुपराग-लक्षणफलव्याप्यत्वाऽनपेक्षणादप्रमेयत्वोक्तिरित्यौपनिषदोपदर्शितरीत्यैव। किञ्चासौ जडांशो नित्यसिद्धः, आगन्तुको वा? आद्येमानाभाव इत्याह-किमितीति। (१) किं प्रमाणमस्तीति जडता चेतनस्योच्यते श्रुतिस्मृत्यादिभिश्चिदेकरसत्वावगमादित्यर्थः प्रयोजनं च जाड्यांशस्वीकारस्य नास्ति। अहं प्रत्ययविषयत्वस्याध्यस्ताहं-

(१) किं प्रमाणमस्तीति।। चेतनस्य या जडता त्वयोच्यते तत्र किं प्रमाणमस्ति न किमपीति प्रमाणाभावात्प्रत्युत श्रुतिस्मृत्यादिभिश्चिदेकरसत्वावगमाच्च नात्मनो जडतांशवत्तोपपत्तिरिति भावः।।

कारातादात्म्येनापि सूपपादत्वादिति सूचनार्थश्चकारः। द्वितीये कारणाऽभावश्चेत्याशयेनाहकेन वेति। केन वा = कारणेन चेतनस्य जडतोत्पन्नेत्यर्थः। [१]चैतन्यस्यापरिणामित्वादसङ्गत्वेन निमित्तान्तरसम्बन्धाऽयोगाज्जडांशान्तरपरिणामत्वे तत्रापि कारणान्तराऽपेक्षयाऽनवस्थानाच्चिद्धर्मत्वासंभवाच्चेत्यर्थः।। नन्विच्छाद्वेषादिकमन्तरेणेष्टाऽनिष्टप्राप्तिपरिहारार्थेषु लौकिकवैदिककर्मसु प्रवृत्त्ययोगाच्चिदंशस्य चेच्छाद्यनाश्रयत्वात्तदाश्रयो जडांश आवश्यक इत्याशङ्क्याह कर्तृत्वमिति। तस्याऽऽत्मनः कीदृक्कर्तृत्वं तद्धेतुरागादिकं च। न तावद्वास्तवं, श्रुतिस्मृतिसहस्रैरतत्स्वाभाव्यप्रतिपादनात्। व्यावहारिकंत्वध्यासेनापि सूपपादमिति न जाड्यांशसिद्धिरित्यर्थः। करणोपादानेनहिकर्तृता प्रसिद्धा, तदेव तावन्निरवयवस्यासङ्गस्य निष्क्रियस्य न संभवतीत्यभिप्रेत्याह करणसमुदयमिति। सः = "निर्गुणं निष्क्रियम्" इत्यादिश्रुतिप्रसिद्धः, एषः = प्रत्यगात्माविनाऽध्यासं करणसमुदयम् = इन्द्रियादिकलापं, कथं धत्ते? धारयति येनास्यवास्तवी कर्तृता स्यादित्यर्थः। सैषइत्यत्र[२] सोऽचि लोपे चेत्पादपूरणम्" इति सुलोपः।। तस्माद्वास्तवं कर्तृत्वमभ्युपगच्छद्भिर्बहिर्मुखैः कर्ममीमांसकैरिदमौपनिषदमात्मतत्त्वं बोध्यमानमपि ज्ञातुमेवाशक्यं किं पुनस्स्वतो निरूपयितुमित्यभिप्रेत्योपसंहरति-तत्त्वमिति। जीवस्य = प्राणानां धारयितुः प्रतीच इदमौपनिषदैकवेद्यं तत्त्वं-याथात्म्यं, कर्मठैः = अजस्रमैहिकामुष्मिकभोगसाधनेषु लौकिकवैदिककर्मसु घटमानैरविरक्तैर्बहिर्मुखैरित्यर्थः। कर्मणि घटोऽठच्, देवानांप्रियपशुभिः = इहलोके चन्द्रमण्डले च गवाश्वादिपशुवदुपभोगसाधनत्वात्प्रियैः पशुत्वाऽविच्छेदाय देवदूषितान्तःकरणैरित्यर्थः। तथा च श्रुतिः "आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" इति, "यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्पशावादीयमानेऽप्रियं भवति,

---

(१) चैतनस्यापरिणामित्वादिति।। आत्मनोजडता केन कारणेन जन्यते किं चैतन्येन जडांशान्तरेण वा? नाद्यः चैतन्यस्यापरिणामित्वादसंगत्वेननिमित्तान्तर सम्बन्धायोगाच्च न जड़ताया आत्मपरिणामरूपत्वसंभवः। द्वितीये तु जडांशान्तरस्यापि पूर्ववदागन्तुक स्वरूपत्वेन स्वसिद्ध्यर्थं जडांशान्तरापेक्षायां तस्य तस्यान्यान्यापेक्षायामनवस्था तथात्म जडताया जडांशान्तर परिणामित्वे तस्यैव धर्मत्वसम्भवेनात्मधर्मत्वासम्भवापत्तेर्नात्मनि जडतायाः सम्भव इति भावः।।

(२) सैष इत्यत्र सस् एष धत्ते इति प्रक्रियायां सस्य रुत्वे यत्वे यलोपे लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिरित्याशङ्क्याह-"सोऽचिलोपेचेत्पादपूरणम्" स इत्येतस्याचि परतस्सु लोपो भवति लोपेसति चेत्पादः पूर्यते इति सूत्रार्थः सपादसप्ताध्यायीस्थत्वादस्यनासिद्धत्वम्।।

किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः'' इति। देव दूंषिताशयत्वलिङ्गानि बहिर्मुखत्वादीनि।। तच्चोकतं वार्तिके-

''प्रमादिनो बहिश्चिताः पिशुनाः कलहोत्सुकाः।
संन्यासिनोऽपि दृश्यन्ते देवसन्दूषिताशयाः''।। इति।।

तस्मादीदृशैः कर्ममीमांसकैर्दुर्निरूपम् = निर्णेतुं प्रतिपादयितुं चाशक्यमित्यर्थः।। ३८।।

''नन्वस्तु तर्हि जड एवाऽऽत्मा, आकाशादिवद्विभुः, सुखादिवैचित्र्याच्च प्रतिशरीरं भिन्नः। तस्य चाणुरूपमनस्संयोगाद्बुद्ध्यादयोगुणा उत्पद्यन्ते। गुणाश्रयत्वाच्चाऽऽसौ द्रव्यत्वजातिमान्। उत्क्रान्तिगत्यादयोऽपि मनस एव, नात्मनः। अदृष्टवशाल्लोकान्तरे शरीरारम्भे तत्र मनः प्रवेशाद्भोगः'' इति कणभक्षाऽक्षचरणपक्षं प्रतिक्षेप्तुमाह-

मू०।। जीवानां वैभवं चेत्तनुकृतिकरणाऽदृष्टसाधारणत्वा
न्नस्याद्भोग व्यवस्था व्यतिकरमयते येन सर्वैर्मनोऽपि।
नानात्म्यं निष्प्रमाणं गदसि यदि तनूपाधिभिस्त्वं व्यवस्थां
सिद्धेऽसिद्धेऽपि भेदे यत इह विफलाः कल्पनीया विशेषाः।। ३९।।

जीवानामिति। जीवानां = बहुवचनादनेकेषां, विभूनां भावो वैभवं = सर्वमूर्तद्रव्यसंयोगानुकूलपरममहत्परिमाणाश्रयत्वमभ्युपगतंचेत् एकैकदेहे सर्वजीवानुप्रवेशात्, भोगव्यवस्था = भुज्यत इति भोगः सुखादिः तस्य व्यवस्था, देवदत्तात्मनएवेदं सुखं, न यज्ञदत्तात्मनः इत्येवमादिरूपा, न स्यात्। सर्वेषां भोगसाङ्कर्यप्रसङ्ग इत्यर्थः। तत्कुतस्तत्राह-तन्विति। तनुः = शरीरं, कृतिः = प्रयत्नः, करणानि = चक्षुरादीनि, अदृष्टं = धर्माधर्मावित्येतेषां साधारणत्वादस्यैवेदं नान्यस्येत्यत्र नियामकाभावेन सर्वेषां सर्वसाधारण्यस्य दुर्वारत्वादित्यर्थः। ननु तत्तदात्ममनसोर्योगस्तत्तदात्मविशेषगुणहेतुरिति व्यवस्थासिद्धिरित्याशङ्क्याह-व्यतिकरमिति।। न मनोयोगव्यवस्थया व्यवस्थासिद्धिः, येन हेतुना मनोऽपि क्रियावशादेकैकस्मिन्देहे सर्वैरात्मभिर्व्यतिकरं = संयोगम्, अयते = गच्छति। सर्वेषामेव सर्वमूर्तद्रव्यसंयोगार्हाणां संनिधानान्मनसश्च मूर्तत्वेन सर्वसंयोगाऽवर्जनादस्यैवेदं मन इत्यत्र च नियामकाभावादिति भावः।। नच जन्मान्तरीयतत्तददृष्टविशेषोपगृहीतं तत्तन्मन इति वक्तुं शक्यम्।

(१) जन्मान्तरेऽप्यदृष्टोत्पत्तेर्मनस्सापेक्षत्वेनाऽऽत्माश्रयापत्तेः। तत्र मनोन्तराभ्युपगमे-ऽनवस्थापत्तेः। देहेन्द्रियादिसापेक्षत्वेनाऽन्योन्याश्रयचक्रकाद्यापत्तेः। ततोऽपि जन्मान्तरीयात्कर्मणोव्यवस्थोक्तावनवस्थानात्, अन्धपरम्परया रूपनिश्चयन्यायापत्तेश्च। एतेनाहमिदं कर्म कृत्वाऽस्य फलं प्राप्स्यामीत्यभिसन्ध्यादेरप्यदृष्टादिव्यवस्थापकत्वं निराकृतम्। अभिसन्ध्यादेरप्यात्ममनोयोगव्यवस्थामन्तरेण व्यवस्थाऽसिद्धेः। तथाच भगवतो बादरायणस्य सूत्रं, (२) "अदृष्टाऽनियमादभिसन्ध्यादिष्वपि चैवम्" इति।। नन्वेकस्मिन्देहेऽनेकात्मनामनुप्रवेशेऽपि (३)तत्तदात्मसमवेतसुखादौ तत्तदात्मजन्यता-वच्छेदकमवान्तरवैजात्यं स्वीकृत्य (४)तादृशविजातीयभोगे तत्तद्देहव्यक्तेर्विशिष्य हेतुत्वं वक्ष्यामि। आत्मान्तरजन्यतावच्छेदकवैजात्याऽवच्छिन्ने च तद्देहस्या-ऽहेतुत्वाद्देहान्तरस्यैव च हेतुत्वान्नाऽव्यवस्थेत्याशङ्क्याह-नानात्म्यमिति।। यदि त्वं

(१) जन्मान्तरेप्यदृष्टोत्पत्तेर्मनः सापेक्षतयात्माश्रयापत्तेरिति।। जन्मान्तरीया दृष्टापेक्षया प्रत्यागात्ममनसो नियतत्वव्यवस्थास्वीकारे जन्मान्तरीयादृष्टोत्पत्तेरपि मन आधीनत्वेन तत्सिद्धये मन अपेक्षायांसत्यां मनसः स्वकीय प्रत्यात्मनियति सिद्ध्येर्थपेक्षमाणादृष्टजनकत्वेन स्वस्यैवापेक्षणादात्माश्रयोदोषः। जन्मान्तरीयादृष्ट जनकमनोऽन्तराभ्युपगमे तस्यापि स्वीय प्रत्यात्मनियति व्यवस्थार्थं मनोऽन्तरापेक्षायां स्वेस्वोत्तरोत्तरापेक्षालक्षणाऽनवस्थाऽऽपत्तिदोषः।। यस्यात्मनोऽदृष्टनिर्मितं यच्छरीरं तत्तदधिष्ठितं मनश्च तस्यैवात्मनो नान्यस्येति मनसः प्रत्यात्मनियतत्वव्यवस्थार्थं शरीराद्यपेक्षायां शरीरादेश्च स्वस्मिन् प्रत्यात्मनियतत्त्वसिद्धये स्वाश्रितमनोऽपेक्षायां द्वयोः परस्परापेक्षणादन्योन्याश्रयः। एवं शरीरस्य स्वकीय प्रत्यात्मनियति सिद्ध्यर्थमिन्द्रियापेक्षा तेषां च स्वकीय प्रत्यात्मनियत्यर्थं पुनरपि मनः सापेक्षत्वे चक्रकापत्तिदोषरिति।

(२) अदृष्टानियमादभिसान्ध्यादिष्वपि चैवमिति।। बहुष्वात्मस्वाकाशवत्सर्वगतेषु प्रतिशरीरं बाह्याभ्यन्तराविशेषेण सन्निहितेषु मनोवाकायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यति सांख्यानां तावत्तदनात्मसमवायि-प्रधानवर्ति प्रधानसाधारण्यान्न प्रत्यात्मसुखदुःखोपभोगस्य नियामकमुपपद्यते। काणादानामपि पूर्ववत्सा-धारणेनात्मनः संयोगेन निवर्तितस्यादृष्टस्याप्यस्यैवात्मन इदमदृष्टमिति नियमे हेत्वभावादेकस्यात्ममनः सुखित्वे-दुःखित्वे च सर्वेषामात्मनां तद्भावापत्ति दोषोभवति। तथाभिसन्ध्यादीनामपि साधारणेनैवात्म मनः संयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियमहेत्वभावात्कस्येदमभिसंधिरित्यनवधारणादुक्त एकाभिध्यानेन सर्वेषामभिध्यानवत्त्वादिदोष प्रसज्यत इति भावः।। ब्र०सू०अ०२पा०३सू० ५१-५२।।

(३) अवान्तरवैजात्यस्वीकृत्येति।। अवान्तरवैजात्यं सुखित्वादि व्याप्यमेतत्सुखादिव्यक्तित्व लक्षणमित्यर्थः।।

(४) तादृशविजातीय भोगे = देवदत्तात्मीयं यज्ञदत्तात्मीयसुखव्यक्ति लक्षणे भोगे देवदत्त यज्ञदत्तशरीर व्यक्तिर्विशिष्य देवदत्तात्मीय शरीरव्यक्तित्वेन यज्ञदत्तात्मीयशरीरव्यक्तित्वेन च हेतुत्वं वक्ष्यामीति।। तथा च यज्ञदत्तात्मनः सकाशादात्मान्तरस्य देवदत्तात्मनो यत्स्वसुखजनकत्वं तन्निरूपितजन्यतावच्छेदकं यद्देवदत्तात्मीयसुखव्यक्तित्वं तदवच्छिन्ने देवदत्तीय सुखेतद्देहस्य यज्ञदत्तात्मीय शरीरस्याजनकत्वाद् यज्ञदत्तशरीराद्भिन्नस्य च देवदत्तीय शरीरस्य तु हेतुत्वान्न सुखाद्यव्यवस्थापत्तिरित्याशंकयेत्यर्थः।

तनूपाधिभिर्देहलक्षणैरवच्छेदकोपाधिभिर्व्यवस्थां गदसि, तर्हि नानात्म्यम् = आत्म-नानात्वं, निष्प्रमाणं = प्रमाणशून्यं, तत्साधकत्वेनाऽभिमतस्यसुखादिवैचित्र्यस्याऽन्यत एवोपपादनात्। अभ्युपगतेऽप्यात्मभेदे वैचित्र्याऽनिर्वाहादित्यर्थः। "द्रोणो बृहस्पतेरंशः, युधिष्ठिरो विदुरश्च यमस्य" इति महाभारतादौ प्रसिद्धम्। तत्र द्रोणाद्यात्मनां मुख्यसांशत्वाऽसंभवाद्देहाद्युपाधिभेदादेवांऽशव्यवहार उपपादनीयः। तत्र चैकात्म्येऽपि देहभेदमात्रादेव भोगसाङ्कर्यप्रत्यभिज्ञादेरभावस्योपास्योपासकाऽनुग्राह्याऽनुग्राहक-भावादेश्च स्फुटतरं प्रसिद्धत्वात्। तन्न्यायेनेतरत्रापि विनाप्यात्मभेदं वैचित्र्योपपत्तेरिति भावः नचैकात्म्ये पारलौकिकदेहस्य परदेहाविशेषादेतद्देहार्जितादृष्टस्य तत्रभोगाभ्युपगमे परदेहेऽपि तदापत्तिरिति वाच्यम्।। "तदेव सक्तस्सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य", "कस्मिन्वहमुत्क्रान्ते, उत्क्रान्तौभविष्यामि, कस्मिन्वाप्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इत्यादिश्रुतिसिद्धलिङ्गोपाध्यवच्छिन्नप्रमातुरेवेह परत्र च कर्तृत्वभोक्तृत्वाद्यभ्युपगमेन तद्भेदादेव परदेहे भोगाऽनापत्तेः। वास्तवैकात्मनः क्वापि भोगानभ्युपगमात्। प्रत्युत तवैव मतेऽदृष्टस्याऽऽत्मसु व्याप्यवृत्तित्वे सर्वदेहेषु सर्वादृष्टसंनिधानात्सर्वेषां भोगापत्तिः। अव्याप्यवृत्तित्वे तु लिङ्गदेहानभ्युपगमेन स्थूलदेहातिरिक्ततदवच्छेदकाऽपरिचयात्तन्नाशेऽदृष्टनाशापत्तेः पारलौकिकदेहासिद्धिः, तदवच्छेदेनादृष्टाभावाच्च तत्र भोगासिद्धिप्रसङ्गश्च दुर्वारः। एतेनोत्क्रान्त्यादयो मनस एवेत्यपि निरस्तम्। तदुत्क्रान्तावपि परलोके भोगाऽसिद्धेः ।। ननु भोगवैचि-त्र्यादात्मभेदो न सिद्ध्यतु, नित्यद्रव्यभेदकैर्विशेषैस्स सेत्स्यतीत्याशङ्क्याह-सिद्धे इति। एको विशेषस्स्वाश्रयं भिन्द्यादनेको वा। आद्ये आकाशादेरपि नानात्वापत्तिः। द्वितीये त्वाश्रयभेदमन्तरेण तद्भेदकल्पकान्तराभावादात्मभेदसिद्धौ तेष्वनेकविशेषकल्पना अनेकविशेषकल्पनाधीनश्चाऽऽत्मभेद इत्यन्योन्याश्रयादात्मभेदे सिद्धेऽसिद्धे वा विशेषकल्पना निष्फलेत्यर्थः।। ३९।।

यत्तूक्तं तस्याणुरूपमनस्संयोगाद्बुद्ध्यादयो गुणा उत्पद्यन्ते, गुणाश्रयत्वाच्चाऽसौ द्रव्यमित्यादि, तन्निराचिकीर्षुराह-

मू०।। किञ्चात्मन्यनवयवे न संप्रयोग
स्संभाव्यो निरवयवस्य मानसस्य।
न द्रव्यं निरवयवं न शाश्वतं वा
तद्धर्मो नच धिषणा यतो जडा स्यात्।।४०।।

किञ्चेति। किञ्चेत्युक्तदोषैरस्य समुच्चयार्थम्। अनवयवे = अवयवशून्ये त्वदभिमतात्मनि निरवयवस्य = तथाविधस्य मानसस्य = मनसः, संप्रयोगः = संयोगो न संभाव्यः = न संभावयितुं शक्यः, येन ज्ञानादयो विशेषगुणा उत्पद्येरन् आरम्भवादिनिरासोक्तदोषग्रासादित्यर्थः। उक्तं चेत्थमेव श्रुतिसारसमुद्धरणे-

मनसा पुरुषः पुरुषेण मनो नभसा मुसलं मुसलेन नभः।
नहि योगवियोगमुपैति कुतोऽवयवित्वनिराकरणादमुतः।। इति।।

आत्मनो द्रव्यत्वे सावयवत्वाऽवर्जनादनित्यत्वप्रसङ्ग इत्यभिप्रेत्याह-न द्रव्यमिति।

(१)लिङ्गविपरिणामेन संभाव्यमित्यनुकृष्यते। न तावत्किञ्चिद्द्रव्यं निरवयवं संभवति। परमाणुनिरासात्। आकाशस्याप्यूर्ध्वाधः प्रभृति प्रदेशसत्त्वेन सावयवत्वस्यानुभवसिद्धत्वात्। अन्यथैकस्मिन्विहङ्गे उत्पतिते आकाशस्य तेनावरुद्धत्वेन विहङ्गान्तरस्योत्पिपतिषोर्निरवकाशता स्यात्। अनवरुद्धप्रदेशे उत्पतिष्यतीति चेत् सिद्धमवरुद्धाऽनवरुद्धाऽनेकप्रदेशवत आकाशस्य सावयवत्वम्। यदि तु वस्तुस्वभाववैचित्र्यादेकावरुद्धेऽप्यपरस्य समावेश उच्येत, तर्हि प्रस्थोदरे खारीशतस्यापि समावेशस्स्यात्। प्रस्थावयवानां तत्प्रतिबन्धकत्वे सावच्छिन्नेष्वसमावेशनियमे वा कल्प्यमाने, प्रस्थोदरे द्वितीयादितण्डुलानामसमावेशप्रसङ्गः। उदयादिप्रदेशावच्छिन्नव्योमप्रदेशातिरिक्तमहादिशोऽनभ्युपगमात्। अविद्याचित्सम्बन्धस्यैव महाकालत्वाभ्युपगमात्, "योऽणिष्ठस्तन्मनः" "अन्नमयं हि सोम्य मनः" इत्यादिश्रुत्या मनसः अन्नविकारत्वोक्तेश्च न निरवयवद्रव्यसिद्धिरिति भावः। अत एव द्रव्यं शाश्वतं नित्यमपि न संभाव्यमित्यर्थः। वाशब्दस्समुच्चये। आकाशादेरुत्पत्तेः "आत्मन आकाशस्संभूतः" इत्यादिश्रुतिसिद्धत्वेन नित्यद्रव्याऽसिद्धेः। तथाचाऽऽत्मनो द्रव्यत्वे सावयवत्वा नित्यत्वे दुवरि इत्यर्थः। एवं चैतन्यस्याऽऽत्मगुणत्वमप्ययुक्तम्। समवायनिरासेन गुणगुणिनोस्तादात्म्यातिरिक्तसम्बन्धाऽयोगेन तमःप्रकाशवद्विरुद्धस्वभावयोश्चिज्जडयोरध्यासमन्तरेण तादात्म्याऽयोगादुणत्वजातौ मानाभावाच्चेत्यभिप्रेत्याह- तद्धर्म इति।। धिषणा = चैतन्यं तस्य द्रव्यस्य धर्मो न भवति। चिज्जडयोस्सम्बन्धाऽनिरूपणादित्यर्थः। तद्गुणोनेति वक्तव्ये तद्धर्मो नेत्युक्तिः पराभिमतद्रव्यत्वगुणत्वसत्त्वादिजातिपरिभाषाया द्रव्यगुणेयत्तापरिगणनस्य च निष्प्रमाणत्वमिति सूचनाय। अस्तु वा गुणत्त्वजातिः, तथापि तस्याश्चैतन्यवृत्तित्वं

(१) लिंगविपरिणामेनेति।। मूलस्थ सम्भाव्यमिति पुलिंगपाठस्थाने सम्भाव्यमिति नपुंसकलिंगं कृत्वा निरवयवं द्रव्यं न सम्भाव्यमिति अनुषङ्गः, क्रियते इत्यर्थः।।

दुर्घटम्। जडत्वे तादात्म्याऽयोगाच्चिद्रूपत्वे भेदकाऽभावादिति सूचनार्थश्चकारः। तथा च प्रयोगः = चैतन्यं न जडधर्मः, तद्विरुद्धस्वभावत्वात्। यो यद्विरुद्धस्वभावो नासौ तद्धर्मः। यथा भास्वरत्वं तमसः औष्ण्यं वा जलस्येति। अत्रानुकूलं विपक्षे च बाधकं तर्कमाहयत इति। यतो यस्मात्कारणाद्धिषणा जडधर्मश्चेद्रूपादिवज्जडैव स्यात्। जडधर्माणां क्वचिदपि चित्त्वाऽदर्शनात्। तथाच स्वरूपव्याघात इति भावः।। ४०।।

किञ्च आत्मनो जडत्वे सुप्तोत्थितस्य, सौषुप्ताऽज्ञानसुखसुप्त्यात्मनां "सुखमहमस्वाप्सं न किञ्चिदवेदिषम्" इति सर्वानुभवसिद्धं प्रतिसन्धानं न स्यात्। तत्र त्वया जन्यज्ञानसामान्याऽभावाऽभ्युपगमात्। एवं जागरादौ धारावाहिक-ज्ञानाऽविच्छेदप्रतिसन्धानं च न स्यादित्याह-

मू०।। अज्ञानं स्वमथ सुखं सुषुप्त्यबुद्धं
बुद्धस्त्वं स्मरसि कथं स्वतो जडात्मा।
विज्ञानान्ययमयमित्यनेकसंख्या
न्यद्राक्षं चिरमिति केन वेत्स्यसाक्षी।।४१।।

अज्ञानमिति। हेतार्किक! आत्मनो जन्यज्ञानसमवायित्वाऽभ्युपगमेऽपि स्वतः = स्वरूपतो जडः = अचिद्रूप आत्मा यस्य स तथोक्तस्त्वं बुद्धः = सुषुप्तेः प्रतिबुद्धः, सन्सुषुप्त्यबुद्धं = त्वद्रीत्या सुषुप्तावननुभूतमज्ञानं तथा तदाश्रयं, स्वम् = आत्मानम्। अथेति समुच्चये। सुखं = स्वापं चेत्यर्थः। कथं स्मरसि, येन सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्यभिलपसि। अस्मृतस्याऽतीतस्या-ऽभिलापाऽयोगादननुभूतस्य च स्मरणायोगादित्यर्थः। परमते सुषुप्तिसिद्धिमभ्युपगम्य चेदमुक्तम्। वस्तुतस्तु परेषां सैव न सिद्ध्यति। तथाह्यननुव्यवसीयमानज्ञानानामपि बहुशः परैरभ्युपगतत्वेन यदि सुषुप्तौ ज्ञानं स्यात्तदोपलभ्यं स्यादिति तर्कानुदयात्। (१)तर्कितप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपयोग्यता विशिष्टाऽनुप-लब्धिलक्षणसहकार्यभावेन मनसा ज्ञानसामान्याऽभावग्रहणाऽयोगात्, तद्ग्रहेऽज्ञान-सामान्याऽभावलक्षणत्वदभिमत (२)सुषुप्ति (ग्रह) व्याघातात्, ज्ञानशून्यताया अग्रहे लिङ्गे तत्सामानाधिकरण्यस्यापि दुर्ग्रहत्वेनाऽनुमानस्याप्यनुदयात्, उपमानलौकिकशब्द-

(१) तर्कितप्रतियोगिसत्वेति। तर्किता अभावप्रमालक्षणकार्येणानुमिता कल्पिता वा या सा चासौ प्रतियोगिसत्त्वारोपण प्रयुक्तारोपितप्रतियोगिकत्व लक्षणयोग्यता विशिष्टा चानुपलब्धि-स्तादृशानुपलब्धिलक्षणसहकार्यभावेनेत्यर्थः।

(२) सुषुप्ति कालिकज्ञानशून्यताग्रहे सति लिङ्गे।। ज्ञानसामग्रीराहित्यादिलक्षणे हेतौ ज्ञानसामान्याभावरूप साध्यसामानाधिकरण्य रूपव्याप्तेरपि दुर्ग्रहत्वे इत्यर्थः।।

योस्तदुभयमूलकत्वेन तदविषये प्रवृत्त्ययोगाच्छ्रुतेश्च स्वयंज्योतिरात्मपरत्वेन प्रत्युत बाधिकायास्तत्साधकत्वस्य दूरापास्तत्वादिति। यतोजडात्मा। अत एवाऽ-साक्षी = साक्षादवस्थात्रयस्य द्रष्टा स्वयमुदासीनः साक्षी "साक्षाद्द्रष्टरि संज्ञायाम्" इति इनिप्रत्ययः। न विद्यते साक्षी यस्य सतथोक्तस्त्वम्। अयमयमिति = घटोऽयं घटोऽयमित्येवमाकाराणि धारावाहिकान्यनेकसंख्यानि विज्ञानानि केन = ज्ञानेन, वेत्सि = विषयीकरोषि? येन चिरं = बहुकालममुं घटम् अद्राक्षं = पश्यन्नेवासमित्य-भिलपसि? न तावदनुव्यवसायेन, पूर्वपूर्वज्ञानकाले उत्तरोत्तरज्ञानानां तत्पौर्वापर्या-ऽविच्छेदकालानां चाऽसंनिधानादुत्तरोत्तरकाले पूर्वेषां नाशादेकेनाऽनुव्यवसायेन सर्वाऽवगाहनाऽयोगात्। प्रत्येकमनुव्यवसायकल्पनेऽपि घटमात्रविषयकज्ञान-धारायाविच्छेदापत्तेः। एकैकेन तत्तत्पौर्वापर्याविच्छेदकालानामवगाहनाऽसंभवाच्च। सर्वतद्गोचरैकसंस्कारे हेत्वभावात्सकलतद्गोचरैकस्मृत्यसंभवापत्तेः। प्रत्येकगोचर-संस्कारैरेकस्मृतिजननोक्तावपि पौर्वापर्याऽविच्छेदयोस्स्मृत्ययोगाच्च। नचाऽस्मृत-मभिलपितुं शक्यम्। तस्मात्सौषुप्ताऽज्ञानसुखादिसाक्षी धारावाहिकज्ञानसाक्षी च नित्यचिद्रूप आत्मा बलादभ्युपेय इति सर्वतो दिग्विजयः।।४१।।

इति प्रतिकूलवादी मत निरासः

इत्थं श्रुतियुक्तिकदम्बैस्सर्वान्द्वैतवादिनस्स्वमतात्प्रच्याव्य श्रौतं स्वाभि मतं प्रत्यागात्मतत्वं बुबोधयिषुर्देहेन्द्रियप्राणमनोबुद्धिप्रत्याख्याने परिशिष्टवस्त्वसंभावना-क़ातरान्मन्दमतीनप्यनुपदसूचितसुषुप्त्यादिसाक्षिण इच्छादिद्रष्टुस्स्वात्मनस्सर्वानु-भवसिद्धस्य परिशेषप्रदर्शनेनाऽऽश्वासयंस्तस्य नित्यसिद्धसच्चिदानन्दात्मकत्वं दर्शयति-

मू०।। इच्छादेरुदयबिनाश सन्ततीना
मक्षाणामसुमनसां धियश्चतस्मात्।
द्रष्टाऽन्योस्त्यविपरिलुप्तदृक्सतत्त्वो
निस्सङ्गो विहरति यः पुरत्रयेऽपि।।४२।।

इच्छादेरिति। तस्मात्पराभिमतानामात्मत्वासंभवात्, अन्यः = तद्विलक्षणः आत्मा अस्ति = न नास्ति तस्याऽप्रसिद्धिवारणायाह-इच्छादेरित्यादिना-इच्छा = कामः, आदिशब्देन श्रुतिप्रसिद्धास्संकल्पविचिकित्सादयः क्रोधलोभादयश्च [१]योग-यान्तःकरणधर्मा गृह्यन्ते। तेषामुदयः = जन्म, विनाशः = ध्वंसः, सन्ततिः = धारा एषां द्रष्टा = 'इदानीमिच्छामि, इदानीं नेच्छामि, एतावन्तं कालमिच्छन्नेवासम्'

(१)योग्याः साक्षिप्रत्यक्ष योगाश्च त एवान्तःकरण स्वधर्मा इति योग्यान्तःकरण धर्मा इत्यर्थः।

इति स्वरूपचैतन्येन भासयिता। तथाऽक्षाणाम् = इन्द्रियाणाम्, असुमनसाम् असवः = प्राणाः, मनः = सङ्कल्पविकल्पकमन्तः करणं तेषामित्यर्थः। धियः = बुद्धेरध्यवसायात्मिकायाः। चकारस्स्मरणाभिमानात्मकयोश्चित्ताहङ्कारयोस्सङ्ग्रहार्थः। 'पश्यामि, वदामि, जीवामि, संकल्पयामि, अध्यवस्यामि, स्मरामि, अभिमन्ये' इति तत्तद्धर्मैस्सह तेषामपि द्रष्टा = भासक इत्यर्थः।। नन्वपरोक्षज्ञानस्य विषय विनाशानन्तरमवस्थानाऽसंभवाद्घटादिनाशेतदीयचाक्षुषनाशवदिच्छादिनाशेतत्साक्षिणोऽपि नाशस्स्यात्। अन्यथाऽनुभवनाशमन्तरेण संस्कारायोगात्कालान्तरे स्मृत्ययोगाच्चेत्याशङ्क्याह-अविपरिलुप्तदृक्सतत्त्व इति।। विपरिलोपो विपरिलुप्तं नपुंसके भावेक्तः। विनाश इत्यर्थः। उत्पत्तेरप्युपलक्षणमेतत्। तदुभयशून्याया दृक्चैतन्यं सैव सतत्त्वं = यथार्थस्वरूपं यस्य स तथोक्तः। ''तत्वसतत्वशब्दौ पर्यायावबाधितार्थवचनौअयंभावः-घटादिचाक्षुषवृत्ते; कुल्याद्वारा केदारप्रविष्टजलस्य केदारसम्बन्धात्तदाकारतावत् चक्षुर्द्वारा बहिर्निस्सृतान्तःकरणस्य घटादिसम्बन्धनिमित्तकघटाद्याकारपरिणामरूपत्वात्केदारभङ्गे जलस्य तदाकारता विनाशवद्घटादिनाशे विनाशो युक्तो नतु साक्षिणः। तस्य निर्विकारत्वान्निराकारत्वाच्च। विषयविनाशेन विषयनिष्ठाऽऽध्यासिकचित्सम्बन्धरूपविषयत्वाऽपायेऽपि चितोऽनपायात्, [1]तादृशविषयितानाशाद्विषयितोपहितरूपनाशाद्वा संस्कारस्मृत्योरुपपत्तेः।। वस्तुतस्तु तद्विषयकानुभवस्तद्विषयकसंस्कारे हेतुर्नत्वनुभवनाशोऽपि, मानाभावात्प्रयोजनाभावाच्चेति नित्येनापि साक्षिणा संस्काराधाने न कश्चिद्दोषः।। न च साक्षिरूपानुभवस्याऽन्तःकरणधर्मत्वाभावात्तेनान्तःकरणे संस्काराऽऽधानाऽसंभवः। अन्तःकरणे तदनुभवतादात्म्यस्यैव तद्गोचरसंस्कारनियामकत्वेन धर्मत्वस्याऽप्रयोजकत्वात्। अहमिच्छाम्यनुभवामि' इति प्रत्ययानुरोधेनेच्छादिप्रतिभासकालिकतत्साक्षिण्यन्तःकरणधर्मत्वाऽध्यासकल्पनासंभवाच्चेति। एवमिच्छादेश्शुद्धसाक्षिभास्यत्वसंभवेऽपितद्गोचराऽन्तः करणवृत्तिमभ्युपगच्छतांकेषांचिद्वृद्धानां कोऽभिप्राय इति चेत्। अयमभिप्रायः-संस्कारो नाम न वस्त्वन्तरम्। किन्त्वनुभवात्मकवृत्तेरेव तिरोभूतायास्सूक्ष्मावस्था। सा च कालान्तरे उद्बोधकसमवधानात्पूर्ववदाविर्भवन्ती विषयाऽसंनिधानात्स्मृतिरित्युच्यते। संनिकृष्टे च विषये तात्कालिकयोग्य-

(१) तादृश विषयतेति।। विषयनिष्ठाध्यासिक सम्बन्धरूप विषयतानिरूपित विषयिता नाशादित्यर्थः। ननु नहि विषयिता ज्ञानस्वरूपः किन्तु तद्धर्मस्ततश्च कथं तन्नाशात् संस्कारोत्पत्यादि सम्भव इत्यत आह। वेति अथवा यथोक्तविषयितोपहित स्वरूपेण साक्षिणोपि नाशसम्भवान्न संस्कारोत्पत्त्याद्य सम्भव इतिभावः।।

धर्मान्तरदेशकालादिगोचरवृत्तिसंवलनेनाविर्भवन्तीप्रत्यभिज्ञेत्युच्यते। तथा च साक्षिण-स्तिरोभावाऽसंभवात् संस्काराय वृत्तिरावश्यकीति।। इत्थमेव सुप्तोत्थितस्य सौषुप्त सुखादिस्मृत्युपपादनाय सुखादिगोचराऽविद्यावृत्तित्रयमङ्गीचक्रुः। यथाहुः,

"अन्तर्मुखो य आनन्द मयो ब्रह्मसुखं तदा।
भुङ्क्ते चिद्बिंबरक्ताभिरज्ञानोत्पन्नवृत्तिभिः" ।। इति।।

स्वामिनस्तु–वृत्तित्रयकल्पने प्रयोजनाभावात् 'सुखमहमस्वाप्सं न किञ्चिदवेषिम्' इति विशिष्टस्मृत्यभिलापाच्च, त्रितयविशिष्टात्मविषया, सुख विशिष्टस्वापाज्ञानो-भयविशिष्टात्मविषया वैकैवाऽविद्यावृत्तिर्युक्तेत्यखण्डार्थवादे निपुणतरमुपपादयां चक्रुः। तेषां मतेऽपि साक्षिण एव वृत्त्युपधानेन सुखादिद्रष्टृत्वादुपाध्यपगमेऽपि भासकस्वरूपानपायादिच्छादिद्रष्टुरविपरिलुप्तदृक्सतत्वतेति व्याख्येयम्। नच साक्षिणोऽपि नाशोऽस्त्विति शङ्क्यम्। तन्नाशस्य ससाक्षिकत्वे साक्ष्यन्तरकल्पने तस्यापि तादवस्थ्यादनवस्थानादाद्यस्यैवावस्थानात्।। निस्साक्षिकत्वे तु साधकाभावादेवसाक्षिविनाशासिद्धेः। प्रत्युत "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् अविनाशी वा अरेऽययात्मा" इत्यादयः परश्शतं श्रुतयस्तस्य नित्यतां गमयन्तीति भावः। किञ्च विनाशकसामग्रीसम्बन्धे विनाशप्रसक्तिस्स्यात्। स एव तावदसङ्गे साक्षिणिदुर्घट इत्यभिप्रेत्याह–निस्सङ्ग इति।। स्वसमसत्ता-कवस्त्वन्तरसम्बन्धिभिन्न इत्यर्थः।। नन्ववस्थात्रयसम्बन्धस्य सर्वानुभवसिद्धत्वा-त्कथमस्याऽसङ्गत्वमिति शङ्कां परिजिहीर्षुर्यथास्वप्नसुषुप्तिसाक्षिणो जागरे तयोरपायेऽपि नापायः, एवं जागृदिच्छाद्यपायेऽपि न तत्साक्ष्यपाय इति सूचयन्नवस्थात्रय-विहारेणैवाऽसङ्गत्वं समर्थयते–विहरतीति। यः प्रत्यगात्मा वैहारिक पुरत्रय सदृशेऽवस्थात्रये महाराज इव विहरति = क्रीडति पर्यायेण पश्यन्विहरन्निव लक्ष्यत इत्यर्थः। विहरणफलस्याऽऽत्माऽसंस्पर्श द्योतनायाऽकर्तृगामि फलत्व द्योतकं *परस्मैपदम्। तथा च श्रुतिः "पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम्" इति।

---

*"स्वरित ञितः कर्त्रभिप्राये क्रियाफले" स्वरितश्च ञ् च स्वरित ञौ, तावितौ यस्य धातो स्स स्वरितञित्, तस्मात्स्वरितञितः द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यतं इति न्यायेन 'इति' इत्येतस्य प्रत्येकाऽभिसम्बन्धः।। तथाचायमर्थः स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले! यथा स्वर्गकामो यजेतेति"। यदि स्वर्गफलं क्रियायाः कर्तृगामि तदाऽऽत्मनेपदं, यदियजमानगामि तदा परस्मैपदं, तथाच विहरतीति परस्मैपदेन परमात्मनोऽसङ्गत्वं बोध्यत इति तत्त्वम्।। (अ०१पा०३सू०७२)

अयं भावः-यद्यात्मन्यवस्थात्रयं यौगपद्येनाऽनुवर्तेत दहन पचन प्रकाशन शक्तय इव वह्नौ, यदि वा एकावस्थानुभूताः कतिपया वा धर्मा अवस्थान्तरेऽनुभूयेरन्, यथा बाल्याद्यवस्थाऽनुभूताः रूप गोत्र जाति प्रभृतयश्शरीरे यौवनेऽप्यनुभूयन्ते, तदा भवेदात्मा तत्सङ्गी। न त्वेवं। स्वप्नदृश्यमात्रस्य जागरे बाधाज्जागृद्दृश्यमात्रस्य च स्वप्ने तिरोधानात्तदुभय दृश्यस्य सुषुप्तौ विलयात्सुषुप्तेश्च तयोरप्रतिभासात्। द्रष्टैव हि केवलोऽवस्थात्रयेऽनुवर्तमानः प्रत्यभिज्ञयैकोऽनुभूयते। तदियमनुवर्तमानैक-वस्तुनिपर्यायेणप्रतिभासमानस्याऽनेकस्यैकैककालेऽपरस्याऽत्यन्ताऽननुवृत्तिर्मन्दान्धकारे नदी (वप्र = प्रवाह) वप्राऽवलंबि जरल्लतायां क्रमारोपित वक्रकाष्ठतरुमूल भूप्रदर भुजगादीनामिवाऽवस्थात्रयस्य मिथ्यात्वमवगमयतीत्यध्यस्तैरधिष्ठानाऽसंस्पर्शादसङ्गत्व सिद्धिरिति। "स यत्तत्र किञ्चित्पश्यत्यनन्वागत स्तेन भवत्यसङ्गो ह्ययंपुरुषः" "इति श्रुतिरप्यङ्गत्वादननुवृत्तिं दर्शन्यन्त्यमुमेवार्थं द्रढयति। "असङ्गो न हि सज्जत" इति च श्रुत्यन्तरम्। तथाचावस्थात्रयाऽधिष्ठानत्वाद्बाधकान्तराऽपरिशेषाच्चाऽऽत्मन-स्सत्यत्वं सिद्धम् ।।४२।।

नन्वस्तु तर्हि नित्यज्ञानवानेव सः, एवं च "द्रष्टुर्दृष्टेः" इति त्वदुदाहृत श्रुतिः "द्रष्टा श्रोता मन्ता" इत्यादि श्रुतिषु च ज्ञानाश्रयत्व बोधकतृजाद्यन्त शब्दाश्च निरुपचरितार्थाः भविष्यन्तीत्यपरमनुकूलमित्याशङ्क्याऽऽत्मनस्स्वयंज्योति-स्संविद्रूपत्वं विशदयितुं ज्योतिर्ब्राह्मणार्थं सङ्गृह्य दर्शयति-

मू०।। संशान्ते रवि शशि वह्नि वाक्प्रकाशे
निर्वाणे करणगणे निरस्तसङ्गः।
स्वज्योतिः प्रकटित वासनामयार्थ
श्चिद्धातुश्श्रुतिभिरुदीरितोऽन्तरात्मा।।४३।।

संशान्ते इति। रविः सूर्यः, शशी = चन्द्रः, वह्निः = अग्निः, वाक् = शब्दः, एषां प्रकाशे सम्यक् शान्ते सति स्वप्नावस्थायामित्यर्थः। बृहदारण्यके, जनकस्य काम प्रश्नवरणेन वशीकृतं याज्ञवल्क्यं प्रत्याऽऽदावेव "याज्ञवल्क्य! किंज्योतिरेवायं पुरुषः" इति सर्वव्यवहार निर्वाहक ज्योतिर्विषयक प्रश्नमुपन्यस्य प्रवृत्ते संवादे याज्ञवल्क्येन प्रश्नपरम्परानुसारेणादित्यादिषूपन्यस्तेष्वन्ते "अस्तमित आदित्ये याज्ञवल्क्य", "चन्द्रमस्यस्तमिते" "शान्तेऽग्नौ" "शान्तायां वाचि किं ज्योतिरेवायं पुरुष इति" प्रश्ने "आत्मैवास्य ज्योतिर्भवत्यात्मनैवाऽयं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येति" इति प्रत्यगात्मन एव सर्वाऽवभासक स्वयंज्योतिष्ट्वं

व्यवस्थापितम्। श्रुतौ पल्ययते = वनादि प्रतिगच्छति। विपल्येति = परावृत्त्या-ऽऽयातीत्यर्थः। आद्ये "उपसर्गस्याऽयतौ" इति, द्वितीये तु छान्दसत्वाल्लत्वम्। अस्याश्च श्रुतेरयमभिप्रायः- जागरे हि सूर्यचन्द्राग्नयः पूर्वपूर्वास्तमयेऽप्युत्तरोत्तरकाले सर्व प्राणीनामर्थप्रकाशाधीन व्यवहारहेतवः प्रसिद्धाः। तथा गाढान्धकारे दीपालोकाभावेऽपि संभाषण करतालादि शब्दैः पुरुष विशेष दिगादि परिचये गमनादि व्यवहार दर्शनाद्वागपि तत्रज्योतिरिति जागृद्व्यवहारस्य ज्योतिरन्तर सङ्कीर्णत्वादात्मनस्स्वयं ज्योतिष्ट्वं विद्यमानमपि न विविच्य दर्शयितुं शक्यमिति बाह्य सर्वज्योतिरुपरमोपलक्षिते स्वप्ने तस्य विविच्य प्रदर्शनं, स्वाप्नव्यवहारस्याप्यर्थ-प्रकाशाधीनत्वेनाऽऽत्मनस्स्वयंज्योतिष्ट्वाभावेऽसिद्धेरिति। तत्र सूर्याद्यालोकोपरमा-वस्थाप्रदर्शनं न्यायसाम्यादिन्द्रियात्मक ज्योतिषामप्युपरमस्योपलक्षणमित्यभिप्रेत्याह- निर्वाणे इति। करणगणे = इन्द्रियसमूहे निर्वाणे = उपशान्ते सतीत्यर्थः। "निर्वाणो वाते" इतिनिष्ठाणत्वम्। एतेन कौशिक मार्जारादीनां रात्रौ ज्योतिर्निरपेक्षव्यवहारदर्शनान्न व्यवहारमात्रे ज्योतिरपेक्षानियम इति निरस्तम्।। तदीयव्यवहारस्यापि विलक्षणेन्द्रियज्योतिस्सापेक्षत्वात्।। नन्वस्तु स्वाप्नार्थप्रकाशकमात्मज्योतिः, तस्य तु प्रकाशो ज्योतिरन्तरसापेक्षस्स्यात्। व्यवसायप्रकाशस्याऽनुव्यवसाय-सापेक्षत्ववदित्याशङ्क्याह-स्वज्योतिरिति।। स्वयमेव ज्योतिस्स्वज्योतिः। स्वप्रकाशोज्योतिरन्तरानपेक्ष इत्यर्थः। एवं हि सत्यनुव्यवसायकल्पनापि निष्फल, निष्प्रमाणा च। साक्षिणैव बुद्धिवृत्तीनां व्यवसायानां भानसंभवात्। अन्यथाऽनवस्थानात्।। ननु स्वप्नो नाम जागरानुभूतार्थानां निद्रादोषप्रमुष्टतत्ताकस्मृतिरेव। तस्याश्च तदानीन्तनविषयानपेक्षत्वान्न तत्प्रकाशकज्योतिरपेक्षेत्याशङ्क्याह-प्रकटितेति। प्रकटिताः = जागरितवत्स्फुटं प्रकाशिताः वासनामयाः = जागृद्वासनावासितमनः परिणामरूपा अर्थाः = अनिर्वचनीयविषयाः येन सः तथोक्तः। जागृतीव स्वप्नेऽपि "घटादिकमनुभवामि" इतिप्रत्यादिदन्त्वावभास्यस्य तत्तांशप्रमोषकल्पनेऽप्यनिर्वाहा-दननुभूतचरभाविजन्मभोग्यवस्तूनामपि कदाचित्स्वप्ने दर्शनादसंभावितदर्शनाच्च न स्मृतिरूपस्स्वप्न इत्यनिर्वचनीयविषयसिद्धौ तद्भासक आत्मा आवश्यक इति भावः।। ननु व्यावहारिकमनः परिणामस्य स्वाप्नप्रपञ्चस्य कथं प्रातिभासिकत्वं? व्यावहारिकमृदादिपरिणामघटादेस्तथात्वाऽदर्शनादिति चेन्न। मनसोऽपि प्रातिभासिकत्वाभ्युपगमात्। प्रतिभासलक्षणं-प्रमाणाविषयत्वे सत्यपरोक्षविषयत्वं हि प्रातिभासिकत्वम्। तच्च साक्षिमात्रवेद्ये मनस्यव्याहतम्। एवमविद्याया अपि

प्रातिभासिकत्वमेव।। नच तस्या व्यावहारिकप्रपञ्चोपादानत्वानुपपत्तिः। उपादानोपादेययोस्समसत्ताकत्वनियमस्यौत्सर्गिकत्वेनाऽसार्वत्रिकत्वात्। एवं च मनसो व्यावहारिकत्वेऽप्यक्षतिः। यत्तूक्तं, अस्तु नित्यज्ञानवानेव स इति। तत्राह-चिद्धातुरिति। चिन्मात्रस्वरूप इत्यर्थः। "आत्मैवास्य ज्योतिर्भवति" इति सावधारणश्रुतिविरोधाच्चिदतिरिक्तधर्म्यंशकल्पने प्रमाणप्रयोजनयोरभावाच्चेति भावः।। एतेन तृजादिप्रत्ययानां निरुपचरितार्थत्वप्रत्याशापि निरस्ता। न केवल ज्योतिर्ब्राह्मणानुरोधादेव स्वयंज्योतिष्ट्वं किन्तु चिदेकरसोह्ययमात्मा "स एतेन प्राज्ञेनाऽऽत्मना" "सत्यं ज्ञानमनन्तं ब्रह्म" "तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः" इत्याद्यनेकश्रुत्यनुसारादप्येवमेवेति स्थूणानिखननन्यायेनद्रढीकुर्वन्नाहश्रुतिभिरिति। अन्तरात्मा = प्रत्यगात्मा उदीरितः = तात्पर्येण प्रतिपादितः। "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" "ज्योतिषामपि तज्ज्योतिः" इत्यादिस्मृतयोऽप्यत्राऽनुसन्धेयाः ।।४३।।

एवं जागरेऽपि बाह्यार्थप्रकाशकपरम्परावधित्वेन स्वप्रकाशनित्यचैतन्यैकरस आत्मा विविच्य प्रदर्शयितुं शक्य इत्यभिप्रेत्याह-

मू०।। बाह्यार्थान्करणगणेन तं च बुद्ध्या
बुद्धिं यः प्रथयति सन्ततं स्वभासा।
आत्माऽसाऽवनधिगतः पराग्भिरेभि -
र्विज्ञेय स्तनुभवना - ऽऽन्तरप्रदीपः।।४४।।

बाह्यार्थानिति। यः = परमात्मा, बहिर्भवा बाह्याः "बहिषष्टिलोपोयञ् च" इति यञ्। अर्थाः = रूपादयस्तान्, करणगणेन = इन्द्रियकलापेनप्रथयति = प्रख्यापयति प्रकाशयतीत्यर्थः। तं च = बहिरिन्द्रियकलापं बुद्ध्या = अन्तःकरणेन प्रथयति, बुद्धिसंवलितसाक्षिण्येव 'काणोऽहं बधिरोऽहं पश्यामि श्रृणोमि' इति काणत्वादिविशिष्टेन्द्रियतादात्म्याध्यासेन तेषां तत्संवलितसाक्षिभास्यत्वे बुद्धेर्द्वारत्वात्करणत्वं, तथा बुद्धिम् = अन्तःकरणं च स्वभासा = स्वरूपचैतन्येनैव तप्तायः पिण्डस्थवह्निरयः पिण्डमिव साक्षात्प्रथयति। अयंभावः-यथा नीलपीताद्यनेकप्रकारभिन्नस्य रूपस्य मधुराम्लाद्यनेकप्रकारभिन्नरसादेश्चैकरूपमेव चक्षुरादिभासकं, यथा च चक्षुरादिकरणानामप्येकरूपमेवान्तःकरणं भासकं, तथा तस्यापि मनसः कामसङ्कल्पाद्यनेकवृत्तिभेदाद्भिन्नस्यैकरूप एव साक्षी भासक उचितः। (प०टि०)विभिन्नरूपभास्यगोचरैकरूपभासकपरम्परावधेस्तस्य नित्यैकरूपस्वप्रकाशत्वपर्यवसानादिति। यथाहुः-"रूपं दृश्यं, लोचनं दृक् दृग्दृश्यं, द्रष्टृ

मानसं, दृश्याधीवृत्तयः साक्षी दृगेव नतु दृश्यते'' इति। इदं च स्थूल[१]दृशामविमृश्य विवेके तु चक्षुरादीनां द्वारतामात्रेणाऽर्थप्रकाशकत्वोपचार। वस्तुतस्साक्ष्येवतत्तद्द्वारा सर्वप्रकाशक इति सूचनाय तेषां तृतीयया निर्देशः।। ननु बाह्यार्थस्य बुद्धिद्वारा साक्षिसम्बन्धः, बुद्धेस्तु साक्षादेव स इति कथं ज्ञायते? तत्राह-सन्ततमिति। सर्वदेत्यर्थः। अयंभावः बाह्यार्थस्य संनिधाने चक्षुरादिसंनिकर्षे चाऽन्तःकरण-समवधानाऽसमवधानाभ्यां कादाचित्क एव प्रतिभासः। ''अन्यत्र मना अभूवं नादर्शमन्यत्र मना अभूवं नाश्रौषम्'' इति श्रुतेः। तथैवाऽनुभवाच्च। अन्तःकरणस्य तु सदैव जागृत्स्वप्नयोरहमहमिति स्फुरणात्, तद्धर्मकामसङ्कल्पादीनामुत्पत्तिसमकालमेव स्फुरणाच्च साक्षादेव साक्षिसम्बन्धो निश्चीयत इति। असावुक्तलक्षणः साक्षी आत्मा विज्ञेय इति सम्बन्धः। ननु यदि साक्ष्यस्ति तर्हि सर्वैरेव बाह्यार्थवद्विविच्यकुतो न गृह्यते। नच ग्राहकाभावः। साक्षात्तत्सम्बद्धस्यान्तःकरणस्य चक्षुरादीनां च सत्त्वादित्यत आह-अनधिगत इति।। पराग्भिरिति। परं स्वाधिष्ठानादन्यं प्रत्येवाञ्चद्भिः प्रवर्तमानैरिति वा, परावर्तितमविद्याशक्त्या तात्विकरूपात्प्रच्याव्य जगद्रूपमापादितमेव वस्तु अञ्चद्भिः = अभिव्यञ्जयद्भिरिति वा बहिर्मुखत्वाद्व्यावहारिकबाह्यवस्तु-मात्रगोचरैरित्यर्थः। एभिः = बाह्याभ्यन्तरकरणैः, अनधिगतः = कदाप्यविषयीकृतः। तथाच श्रुतिः,-''पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्'' इति।। ननु यदि मनसोऽप्यविषयस्तर्हि कथं शास्त्रेण बोध्यते, मानसाऽगोचरे प्रमाणाऽप्रसरादित्याशङ्क्याह-तन्विति। तनुः = शरीरं तदेव भोगतत्साधनाऽऽयतनत्वात् संहतत्वाच्च भवनं = गृहं तस्य आन्तरः = अन्तस्थः प्रदीप इव प्रकाशकत्वात्प्रकाश-कान्तरनिरपेक्षत्वाच्च प्रदीपः। तथा च यथा अप्रकाशस्वभावगृहघटा-देस्स्वसंनिधानमात्रेण प्रकाशनसमर्थस्य दीपस्य स्वप्रकाशेदीपान्तरापेक्षा नास्ति, एवं स्वसंनिधानादेव जडदेहेन्द्रियादिप्रकाशनसमर्थस्य साक्षिणोऽपि न ग्राहकापेक्षास्तीत्यर्थः। यथाहुः,-

> ''प्रमाता च प्रमाणं च प्रमेयो निश्चितिस्तथा।
> यत्सांनिध्यात्प्रसिद्ध्यन्ति तत्सिद्धौ किमपेक्ष्यते''।। इति।

शास्त्रेण तु भासमानस्यापि बुद्ध्यादिसंवलनाद्विवेक्तुमशक्यस्य विवेक मात्रं क्रियते कोऽस्यां ब्राह्मणपङ्क्तौ देवदत्त इत्यविवेके यो मध्येऽस्ति स इति वाक्यवदिति भावः।।४४।।

(१) दृशाविमृश्य इति ग्रन्थ पाठः।

इत्थं प्रतीचश्चिद्रूपत्वं सिद्धम्। तस्याऽऽनन्दरूपत्वं च व्यवस्थापयितुमाह-

मू०।। प्रेयान्यस्सदन धनाऽऽत्मज प्रियादे-
र्यत्प्रेम्णा प्रियमिति मन्यते परा चः।
पारार्थ्याऽवधिरवधीरितैतरार्थ्यो
विज्ञेयस्स खलु सुखाऽब्धिरन्तरात्मा।।४५।।

प्रेयान्य इति ।। सदनं = गृहं, धनं = वित्तं, आत्मजाः = अपत्यानि, प्रिया = भार्या, एषु चानुकूलेषूत्तरोत्तरं प्रीत्याधिक्यं प्रसिद्धम्। येनाऽऽपद्युत्तरोत्तररक्षणाय पूर्वं पूर्वं जहाति। स्मरन्ति च-

"आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि" इति।।

आदिशब्देन बाह्या मित्रभृत्यक्षेत्रादयः, आन्तरा देहेन्द्रियादयश्च गृह्यन्ते। एते हि लोके प्रियाः। आत्मा त्वेभ्योऽपि निरतिशयप्रीतिविषयत्वात्प्रेयान्। सदनादीनां बहुत्वेऽपि प्रत्येकमात्मना सह प्रीत्यतिशयपरीक्षणाभिप्रायाद्वा, एकीकृताऽन्य-पदार्थाऽन्तर्भावाद्वा, *द्विवचनोपपदत्वादीयसुन्। प्रियस्थिरेत्यादिना पूर्वस्यप्रादेशे गुणः। देहेन्द्रियादावप्युत्तरोत्तरं प्रेमातिशयोऽनुमीयते। येन जीवनार्थिनस्सर्पदष्टाङ्गुलिं, राजदण्ड्याश्चक्षुरादीन्, परलोकहितार्थिनो युद्धादौ प्राणांश्च त्यजन्ति। उत्कृष्टसुखार्थिनां चाऽपकृष्टे जिहासा दृश्यते। आत्मनस्तु न कस्यापि महत्यपि कृच्छ्रे जिहासोत्पद्यते। प्रत्युत सर्वेषां "सर्वदैवाहं स्यां मा कदाचिन्माभूवम्" इति स्पृहैव दृश्यत इति तस्य निरतिशयाऽऽनन्दरूपत्वमिति भावः।।

"ननु प्रीतीविषयत्वं न सुखत्वव्याप्यं, (१)पुत्रादिष्वनैकान्त्यात्। निरतिशय-प्रीतिविषयत्वमपि न क्वचित्प्रसिद्धम्। सुखमात्रस्य सातिशयत्वादात्मनश्च सुखत्वा-ऽसंप्रत्ययादित्याशङ्क्याहयत्प्रेम्णेति। यस्मिन् = प्रत्यगात्मनि प्रेम्णा = निरुपाधिकप्रीत्येव हेतुभूतया, पराचः = अनात्मभूतान्मनः प्राणेन्द्रियदेहभार्यापुत्रादीन्प्रत्येकं प्रियं = प्रीतिविषयीभूतं ममेति मन्यते, न तु वास्तवं प्रियत्वं तेष्वित्यर्थः। अयं भावः-न

*द्विवचनविभज्योपपदे तरबीयसुनौ" द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुर्लघुतरो लघीयान्। "प्रियस्थिर स्फिरोरुबहुलगुरुवृद्ध-तृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः" प्रियादीनां क्रमात्प्रादयस्स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः।

(१) पुत्रादिष्वनैकान्त्यादिति सुखसाधनतया सुखरूपत्वाभाववतिपुत्रादौ प्रीतिविषयत्व लक्षणहेतोः सत्वेन व्यभिचारादित्यर्थः।

मनः प्राणादयः स्वतः प्रियाः, द्विषन्मनः प्राणादिषु प्रीत्यदर्शनात्। किन्तु स्वीयत्वेनैव। तथा च स्वात्मसम्बन्धौपाधिकमेव तेषां प्रियत्वम्। विवेके स्वात्मनएवपर्यवस्यति, जलादौ प्रतीयमानो गन्धः पृथिव्यामिव। तथाच श्रुतिः-''न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति'' इति। एवं च निरुपाधिप्रीतिविषयत्वमेव [१]हेतुः, तस्य च न व्यभिचार इति भावः।। ननु वैषयिकसुखेष्वेव निरुपाधिकप्रेमास्पदत्वम्, आत्मनि प्रीतिरपि भावितत्सम्बन्ध-प्रत्याशयैवेति किं न स्यात्। तत्राह-पारार्थ्याऽवधिरिति।। अयंभावः-यदर्थं यदिष्यते तस्य तदपेक्षयाऽऽधिक्यं, यथा धनाद्यपेक्षया पुत्रादेः, उपकारकप्रीतिरखिला चोपकार्यप्रीत्यौपाधिकी, सर्वं च साधनसाध्यं सुखमात्मार्थमेवेष्यत इति तस्यैव पारार्थ्यपरम्परापरमावधेर्निरुपाधिकप्रीतिविषयत्वं, निरतिशयसुखरूपत्वं च, न सुखलवेष्वित्यर्थः।। यत्तु भाविसुखलवार्थमेवाऽऽत्मप्रीतिरित्युक्तम्, तत्राह-अवधीरितैतरार्थ्य इति। अवधीरितं = निरस्तम्, ऐतरार्थ्यम् = अन्यशेषत्वं येन स तथोक्तः। यद्यात्मा स्वाऽतिरिक्त सुखार्थस्स्यात्तर्हि सुखं मे स्यादिति न स्पृहयेत्। किन्तु सुखायाहं स्यामिति शत्रुसुखार्थमपि यतेत। तत्रापि स्वस्य शेषत्वसंभवात्, नत्वेवं। तस्मादात्मार्थमेव सुखमिष्टमितिभावः।। ननु स्वयमेव निरतिशयाऽऽनन्दरूप-श्चेत्किमिति सुखलवान्स्पृहयति, तृप्तस्य बुभुक्षाऽदर्शनात्तत्राह-विज्ञेय इति।। खल्वितिहेतौ। अपरिच्छिन्नाऽऽनन्दरूपस्याप्यज्ञानाऽऽवृतत्वादसुख देहेन्द्रियादिता-दात्म्याध्यासाच्च युक्ता सुखलवस्पृहा। तृप्तस्यापि सुप्तस्य स्वप्ने बुभुक्षादर्शनात्। यतोऽस्य तथाविधस्वरूपाऽवाप्तिः प्रबोधाधीनेत्यर्थः। तथाच श्रुतिः-''स एनमविदितो न भुनक्ति'' ''यो वेद निहितं गुहायां सोऽश्नुते सर्वान्कामान्'' इति च। किं तर्हि सुखलवानां घटादीव पारार्थ्यादसुखत्वमेव, नेत्याह-सुखाब्धिरिति। सुखल-वशीकरमहार्णवायित इत्यर्थः। तथाच सुखलवा अप्यात्मैव किन्त्वभिव्यञ्जक-वृत्तितादात्म्याऽध्यासात्तदीयवैशद्यतारतम्यभेदपारार्थ्यैस्तेषु तारतम्यभेदपारार्थ्यविभावनमिति भावः ।। ''एतस्यैवाऽऽनन्दस्याऽन्यानि भूतानि मात्रामुपजीवन्ति'' इति श्रुतेः नन्वस्यां श्रुतौ पारमेश्वरानन्दः प्रकृतो नास्मदात्माऽऽनन्दरूप इत्याशङ्क्याह-अन्तरात्मेति। सर्वान्तरः परमात्मैव निरतिशयानन्दरूपस्तत्र प्रतिपिपादयिषितो न तटस्थेश्वरः। ''एषास्य परमा सम्पदेषाऽऽस्य परमागतिः। एषोऽस्य परम आनन्दः'' इति सुषुप्तौ स्वस्वरूपसम्पन्नस्य प्रतीच एव प्रस्तुतत्वात्, अन्यसुखस्याऽन्यैरुप-जीवनाऽसंभवाच्चेत्यर्थः ।।४५।।

(१) हेतुः - आत्मासुखरूपः निरुपाधिप्रीतिविषयत्वात्।

इत्थं त्वंपदार्थः प्रत्यगात्मा देहेन्द्रियादिविवेकेनाऽसङ्गाऽपरिच्छिन्न सच्चिदानन्दरूपो निर्णीतः।। ननु यद्यसङ्ग एवाऽऽत्मा तर्हि सर्वानुभवसिद्धाः कर्तृत्वभोक्तृत्वसुखदुः खादयः कस्य?। न तावद्देहस्य, तस्याचेतनत्वात्, मृतदेहेऽपि तत्प्रसङ्गात्। नापि प्राणस्य, सुषुप्तपुरुषदेहे प्राणस्य लब्धवृत्तित्वेऽपि तददर्शनात्। नापीन्द्रियाणाम्। एकैकव्यभिचारे [१]स्वप्ने च तददर्शनात्। नाप्यन्तःकरणस्य। करणस्य कर्तृत्वासंभवात्। सर्वेषामचेतनत्वाच्च। नचान्तःकरणस्य चित्प्रतिबिम्बग्राहित्वाच्चिदवच्छेदकत्वाद्वा चित्संवलितरूपेण कर्तृत्वादिः, स्वतस्तु करणत्वमेवेति रूपभेदादविरोध इति युक्तम्। विवक्षितविवेके चित्येव कर्तृत्वादिपर्यवसानाऽऽपत्तेः। असङ्गस्याऽमूर्तस्य रूपादिहीनस्य च चिदात्मनोऽवच्छेदप्रतिबिम्बयोरयोगाच्चेत्याद्याशङ्कापनुत्तये आत्मनः कर्तृत्वभोक्तृत्वोपजीवकविधिनिषेधशास्त्रप्रामाण्यनिर्वाहाय चाऽध्यासमुपपादयिष्यन्नाह-

मू०।। शुद्धोऽसावहमिदमित्युपाधिधर्मा
नध्यासादभिमनुते परस्परेण।
वृद्ध्यादीनिव सलिलप्रभेदधर्मा
न्ब्रध्नेऽम्बुप्रतिफलिते मृषैव मोहात्।। ४६।।

शुद्ध इति। सत्यमुक्तलक्षणे आत्मनि वस्तुतः कर्तृत्वादि नोपपद्यते। नापि देहादौ। तथापि स्वतश्शुद्धः = निर्दोष एव, असौ = आत्मा, अन्तःकरणाद्युपाधेस्स्वस्य च परस्परेण = अन्योन्यतादात्म्येनान्योन्यधर्मविनिमयेन च, अध्यासात् = आरोपात्, उपाधिधर्मान् =उपाधयश्च धर्माश्च उपाधिधर्मास्तान् अहङ्कारप्राणेन्द्रियदेहान्, तद्धर्मकामसंकल्पबलदर्शनश्रवणमनुष्यत्ववयोऽवस्थाकर्तृत्वभोक्तृत्वादींश्चेत्यर्थः। अभिमनुते = यथाक्रममात्मत्वेनात्मधर्मत्वेन चाभिमन्यते। तथाऽऽत्मधर्मांश्चेतनत्वप्रेमास्पदत्व स्थायित्व निर्दोषत्वादीनहङ्काराद्युपाधिधर्मत्वेनाऽभिमन्यत इत्यपि बोध्यम्।। अहमिदमितीत्यध्यासाभिलापः वस्तुत उपाध्यसंपृक्तस्याऽप्याध्यासिके तत्तादात्म्ये धर्मविनिमये च, "यथाह्ययं ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैकोऽनुगच्छन्। उपाधिनाक्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" इति श्रुतिसिद्धं दृष्टान्तमाह- बृद्ध्यादीनिवेति। सलिलानां = जलानां, प्रभिद्यन्त इति प्रभेदाः = घटशरावोदञ्चनकूपवाप्यादौ ऋजुवक्रत्वादिशालिनो विशेषाः, तेषां धर्मान् = वृद्धिह्रासचलनतर-

(१) स्वप्ने च तददर्शनादिति।। स्वप्नावस्थायामिन्द्रियाभावेपि कर्तृत्व भोक्तृत्व सुखदुःखादिदर्शनान्नतेषामिन्द्रिय धर्मत्वमित्यर्थः।

ङ्गविच्छेदर्जुवक्रत्वनिम्नदेशस्थत्वादीन्धर्मांस्तदम्बुप्रतिफलिते = प्रतिबिम्बते, ब्रध्ने = सूर्ये तत्तादात्म्यमध्यस्य यथाभिमन्यते तद्वदित्यर्थः। तथा च भगवतो बादरायणस्य सूत्राणि, (१) "आभास एव च"। (२)"अत एव चोपमा सूर्यकादिवत्"।। (३)वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमिति"।। अध्यस्तत्वादेव कर्तृत्वादेर्विचाराऽसहत्वाद्विवेके क्रियमाणे न कस्याप्येतदित्यध्यवसितुं शक्यमित्यभिप्रेत्याह-मृषैवेति।। मिथ्यैवेत्यर्थः। वास्तवत्वेहि कर्तृत्वादेः कस्यायं धर्म इति विचार्य निर्धारणं युक्तं। न मिथ्यात्वे। शुक्तिरजतस्य वन्ध्यापुत्रस्य च कस्येदं रजतं कस्यायं पुत्र इति विचारणनिर्धारणयोस्तत्फलस्य चादर्शनादित्यर्थः। उक्ताऽध्यासे कारणमाहमोहादिति। मोहयति चैतन्यमावृत्त्याऽन्यथा ग्राहयतीति मोहोऽज्ञानं, तस्माद्धेतोरित्यर्थः।। ४६।।

दर्शिताऽज्ञाने सर्वानुभवप्रमाणयंस्तस्य च स्वावृतचैतन्यभास्यत्वं सदृष्टान्तमुपपादयन्नावरणविक्षेपोभयशक्तिमत्त्वमनिर्वचनीयत्वं च दर्शयति-

मू०।। अज्ञोऽस्मीत्यनुभवनादनाद्यबोध-
श्चिन्निष्ठश्चिति विषयस्तमो यथेन्दुम्।
प्रच्छाद्य स्फुरति चितं चितैव भूयो
विक्षिप्य भ्रमयति हन्त दुर्निरूपः।।४७।।

अज्ञ इति। अहमज्ञो मामहं तत्त्वतो न जानामीति प्राग्दर्शितादनुभव-नात् = अनुभवात्। अनादिः = अनवस्थादोषेण कारणासंभवादजन्यः,

(१) यथानेकजलप्रतिबिम्बितानां सूर्याभासानां मध्ये एकस्मिन्सूर्याभासे कंपमाने सूर्याभासान्तरं न कम्पते, एवमीश्वराभास एवायं जीव इति नैकस्मिञ्जीवे धर्मादिसम्बन्धिनि जीवान्तरस्य धर्मादिसम्बन्ध इत्यर्थः।
(२) यतः परप्रतिषेधोपदेश्यो निर्विशेषोऽयमात्मा, अतएवौपाधिकं सविशेषत्वमादाय जलसूर्यकादिवदित्युपमा गृह्यते। "यथाऽह्ययं ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदेरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" इति। "एक एव तु भूतात्मा भूतेभूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जल चन्द्रवत्" इति, ज्योतिस्स्वभावो विवस्वानेकोऽपि तत्रतत्रत्या भिन्ना आपोऽनुगच्छन्बहुधा क्रियते। एवमयमात्मा देवस्स्वप्रकाशोऽजः कूटस्थ नित्य एकोऽपि भिन्नेषु क्षेत्रेष्वनुगच्छन्नुपाधिना भेदरूपः क्रियत इति योजना।। तथाचैतद्दृष्टान्तबलादपि ब्रह्मणो निर्विशेषत्वमिति सूत्रकृत्तात्पर्यम्।।
(३) वृद्धिह्रासेति।। यथा सूर्यप्रतिबिम्बस्य जलेऽन्तर्भूतस्य जलगतवृद्धिह्रासचलनादिभाक्त्वं न वास्तवम्।, एवमविकृतस्य परमात्मनो देहाद्युपाध्यन्तर्भावाद्देहगतवृद्धिह्रासादिभाक्त्वं न स्वाभाविकमित्येतावतांशेन तयोरेव दृष्टान्तदार्ष्टान्तिकयोस्सामञ्जस्याद्भवति सूर्यादि दृष्टान्तः। न हि सर्वात्मना साम्यं दृष्टान्तदार्ष्टान्तिकयोः।

अबोधः = बोधविरुद्धः पूर्वोक्तो मोहस्सिद्धः। स च मामहं न जानामीत्यात्मनो विषयत्वबोधकद्वितीयान्तपदेनाऽऽश्रयत्वबोधकाऽऽख्यातसमानाऽधिकरणप्रथमान्तपदेन चोल्लेखाच्चैतन्यविषयश्चैतन्याश्रयश्चेत्याह–चिन्निष्ठश्चिति विषय इति।। शुद्धचैतन्याश्रयस्तन्मात्रविषयश्चेत्यर्थः। इदं च मूलाऽज्ञानाऽभिप्रायेण। अवस्थाऽज्ञानानां तु शुक्त्याद्युपहित चिदाश्रय विषयत्वं बोध्यम्।। यद्यपि "मामहम्" इत्यहङ्कारस्याप्युल्लेखात्तदुपहितएवेदानीमज्ञानमनुभूयते, तथाप्यज्ञानाऽध्यासस्य अहङ्काराऽध्यासहेतुत्वात्सुषुप्तोत्थितस्य नाऽऽत्मानमवेदिषमिति स्मरणानुरोधाच्च तस्य शुद्ध चैतन्यमात्राऽऽश्रय विषयत्वम्। जागरस्वप्नयोः परं तत्राहङ्कारस्यापि संनिधानात्तदुपहितेऽज्ञान भानमिति बोध्यम्।। नचाऽऽवरण स्वभावस्याऽज्ञानस्य प्रतिभास विरोधिनस्सविषयत्वानुपपत्तिः।। घटं जानामीतिवन्न जानामीत्यज्ञानोल्लेखेऽपि घटस्य विषयत्वाऽनुभवाज्ज्ञानाऽज्ञानयोस्समानविषयत्वमन्तरेण निवर्त्य निवर्तक भावव्यवस्थाऽनुपपत्तेश्च तस्य सविषयत्व सिद्धेः।। नन्वात्मा यद्यबोधावृतस्तर्हि न भासेत पटाद्यावृतघटादेर्भानाऽदर्शनात्! चैतन्यतिरोधानेऽज्ञानमपि भासकाभावान्न सिद्ध्येदिति धर्मिग्राहकमानविरुद्धमावरणकल्पनमित्याशङ्कामपनुनुत्सुरावृतस्यापि प्रकाशकत्वं सदृष्टान्तमुपपादयन्नावरणशक्तिं दर्शयति–तम इति। यथातमः = राहुः– इन्दुं = प्रच्छाद्य तेनैव प्रकाशकेन स्वयं स्फुरति, तथाऽज्ञानमपि चितं प्रच्छाद्य तयैव चिता स्वयमपि स्फुरतीत्यर्थः। तथा च यथाराहुरिन्दुं सर्वनभोमण्डल विसृत्वरप्रकाशनयनानन्दजनकधवलतरपरिपूर्णमण्डलाकारांशं प्रच्छाद्य खदिराङ्गार– सच्छायतामापादयन्स्वच्छन्नेनैवेन्दुनाप्रकाश्यते, तथा अज्ञानमप्यात्मचैतन्य– मपरिच्छेदनिरतिशयानन्दांशयोः, 'नास्ति न भाति' इति व्यवहारापादकं तिरोभावमापाद्य स्वतिरोहितेनैवाऽऽत्मचैतन्येन स्फुरति। अतो नावृतघटादिवदत्यन्तमभानप्रसक्तिः। घटादेर्बाह्याऽऽलोकेन्द्रियसंनिकर्षसापेक्षत्वेनाऽप्रकाशस्वभावत्वेनाऽनावृतांशान्तराभावेन च वैषम्यात्। किन्त्वावरकधर्मसंवलनाद्रूपान्तरेण स्फुरति न स्वाभाविकरूपेणेति भावः। इत्थं च वास्तवरूपे 'नास्ति नभाति' इति व्यवहाराऽन्यथानुप– पत्याऽऽवरणशक्तिस्सिद्धा, कार्यन्तरेणापि तां स्फुटीकुर्वन्विक्षेपशक्तिं दर्शयति– भूय इति। प्रथममावृत्त्य पश्चाद्विक्षिप्य, आवरणस्य विक्षेपहेतुत्वादित्यर्थः। अतएव सुषुप्तावावरणमात्रमनुभूयते। जागरादौ विक्षेपोपीति कार्यपौर्वापर्यम्, भ्रमयति = अ– द्वितीयमेवाऽऽत्मतत्वं जगदाकारेणाऽन्यथा ग्राहयतीत्यर्थः। विक्षिप्येत्यनेनैव भ्रान्तेरपि सङ्ग्रहे पुनरुक्तिर्ग्राह्यग्राहकभेदेन सामान्यतो विक्षेपद्वैविध्यमिति प्रदर्शनाय।

''प्रच्छाद्यस्फुरति '', ''विक्षिप्यभ्रमयति'' इत्युभयत्रापि 'मुखं व्यादाय स्वपिति' इतिवद्वास्तवपौर्वापर्याभावेऽपि तत्कल्पनया ल्यप्। अविद्यावरणस्याऽनर्थनिदानत्वं, विक्षेपस्यानर्थरूपत्वं च सूचयितुं हन्तेति खेदे।।

ननु किमियमविद्या सती? उताऽसती?। नाद्यः, आत्मवदबाध्यत्वप्रसङ्गात्। ''नाऽभावो विद्यते सतः'' इति भगवता तत्प्रतिषेधाच्च। न द्वितीयः, भानानुपपत्तेः। बन्धस्य निर्मूलत्वापत्तेश्च। उभयरूपता तु विप्रतिषेधादेवाऽसंभाविनी। किञ्चेयमात्मनो भिन्ना? उताऽभिन्ना?। नाद्यः, अग्न्यौष्ण्यवदन्यत्राऽनुपलम्भेन भेदाऽयोगात्। आत्मन्यसङ्गे तत्सम्बन्धाऽयोगादावरणाद्यनुपपत्तेश्च। न द्वितीयः, आत्मविरुद्धस्व-भावत्वाऽनापत्तेः। तद्बाधे आत्मबाधाऽऽपत्तेश्च। तृतीयविधा तु पूर्ववत्।। किञ्चेयं निरवयवा? उतसावयवा? नाद्यः, परिणामाऽयोगात्। अवयवाऽन्यथाविन्यासमन्तरेण-परिणामादर्शनात्। न द्वितीयः, जन्यत्वक्रियानाश्यत्वादिप्रसङ्गादनन्तावयव-कल्पनागौरवान्मूलकारणत्वाऽसंभवाच्च।। तस्माद्विरुद्धस्वभावा कथमियंमभ्युपगम्यते। तत्राह-दुर्निरूप इति।। दुःखेनापि निरूपयितुमशक्योऽयमबोधोऽनिर्वचनीयः। स्वप्नेन्द्रजालवत्प्रतीतिमात्रसिद्धो मिथ्याभूत इति यावत्। तथा च सर्वदोषाऽऽकरस्याऽस्य विरुद्धस्वभावत्वं भूषणमेव, न तु दूषणमिति भावः। अत एव मिथ्यात्वं सत्त्वाऽसत्वादिबहिर्भूतं विधान्तरमिच्छन्ति वृद्धाः ।।४७।।

नन्वज्ञानस्य कथं मिथ्यात्वं। आविद्यकत्वं हि मिथ्यात्वे तन्त्रं, तच्च तत्कार्येष्वेव। किञ्चाऽध्यस्तत्वमेव मिथ्यात्वम्। न चाऽज्ञानमध्यसितुं शक्यम्। अनादित्वाभ्युपगमेन पूर्वसिद्धदोष संस्कार काम कर्मादीनामध्यासहेतुत्वेन क्लृप्तानां तदहेतुत्वात्। किञ्च नाविद्यापरिणामो जगत्, जीवाऽविद्याविषयीकृतं ब्रह्मैव जगद्विवर्तोपादानमिति मते शुद्धे ब्रह्मणि जगदध्यासे जीवाऽविद्याविषयत्वं निमित्तमिति पर्यवसितम्। नचाऽविद्याध्यासेऽप्य (१)विद्या निमित्तं, आत्मश्रयापत्तेः। नच शुक्तितत्त्वज्ञानाऽनन्तरं 'नेदं रजतम्' इति बाधानुभवात्तद्बाधस्य च तदज्ञाननिवृत्त्यधीननिवृत्तिरूपत्वस्य प्रागुक्तत्वात् तदज्ञानस्यापि बाध्यत्वेसिद्धे (२)तेनाध्यस्तत्वानुमानम्। एवं मूलाज्ञानेऽपि बाध्यत्वमेवाचाऽध्यस्तत्त्वं तदविद्यासाधारणमस्त्विति वाच्यम्। 'नेदं कालत्रयेऽपि रजतम्' इतिवत् 'नेदं कदापि नाज्ञासिषम्' इति बाधाऽननुभवेन कालान्तरे

(१) तद्बाधस्येति। शुक्तिरजतादिबाधस्यशुक्त्यज्ञान निवृत्यधीननिवृत्ति रूपस्येत्यर्थः। इदं शुक्त्यादिवस्तु अहं कदापि कालत्रयेपि नाज्ञासिषमिति कालत्रयाभावनिश्चयरूपस्य शुक्त्यज्ञान बाधस्यानुभवेनेत्यर्थः। तदविद्यासाधारणं = शुक्त्याद्य विद्यासाधारणमित्यर्थः।।

(२) अध्यस्तत्त्वानुमानमिति।। अज्ञानमध्यस्तं बाध्यत्वाच्छुक्तिरजतवत्।।

पुनारजतारोपदर्शनेन च तत्राप्यज्ञानबाधे मानाभावात्। भीतभटवद्विरोधिवृत्तिव्याप्ता-वपसरणमात्रकल्पनेनापि रजतबाधोत्तरं नेदानीं नाज्ञासिषमिति तदभावाभिलापोपपत्तेः। नच श्रुत्या तस्याध्यस्तत्वसिद्धिः। आहत्यतन्मिथ्यात्वबोधकश्रुत्यदर्शनात्। तस्य "त्रय आवसथास्त्रयस्स्वप्नाः", "सत्यं चानृतं च सत्यमभवत्"। "वाचारम्भणं विकारो नामधेयम्" इत्यादिश्रुतीनाम्, "अपागादग्नेरग्नित्वम्" इत्यादिश्रौतदृष्टा-न्तोपन्यासस्य च कार्य मात्रमिथ्यात्वतात्पर्यकत्वादित्याद्याशङ्काः परिहरिष्यन्माया-यास्स्वपरनिर्वाहकत्वं सदृष्टान्तमुपपादयति-

मू०।। चिद्भाने चितरिव या भिदेव भेदे
निर्वाहे निजपरयोस्स्वतस्समर्था।
संभाव्येतर घटनापटीयसी सा
संमोहं जनयति विभ्रमेण माया।।४८।।

चिद्भान इति।। यथा चितिः = अनावृतमात्मचैतन्यं स्वसम्बन्धादन्यस्यापि भासनसमर्थं स्वभाने चैतन्यान्तरनिरपेक्षं। यथा वा भिदा = भेदः। सामान्यत एकवचनं। घटपटयोः परस्परप्रतियोगिकौ भेदावित्यर्थः तौ यथा स्वाश्रययोर्विभिन्न-बुद्धिव्यवहारहेतू, (१)स्वात्मनोरपि भेदबुद्धिव्यवहारे भेदान्तरं नापेक्षेते, (२)अभावप्रति-योगिकस्य, अभावाऽधिकरणकस्यचाऽभावस्य न्यायनयेऽप्यधिकरणमात्रस्वरूपत्वात्। (३)अन्यथाऽनवस्थानात्। एवं या अविद्या सापि निजस्य स्वस्य परस्य स्वकार्यजातस्य च मिथ्यात्वादि निर्वाहे स्वत एव समर्था, न निमित्तान्तरसापेक्षेत्यर्थः। अयंभावः-

(१) स्वात्मनोरिति।। स्वात्मनोर्घटपटयोर्यौपरस्परभेदौ तयोर्घटपटयोर्विभिन्नबुद्धिव्यवहारहेतुत्ववत्स्व-भेदबुद्धिव्यवहारे घटपटयोर्भेदौ न घटपटात्मकौ इति स्वानुयोगिक घटपट प्रतियोगिकशब्द प्रत्ययात्मक व्यवहारे यद्वा घटपटौ न स्वभेदात्मकौ इति स्वप्रतियोगिक घटपटानुयोगिक शब्द प्रत्ययात्मकव्यवहारे हेतुभवत इत्यर्थः।।

(२) अभावप्रतियोगिकस्याभावाधिकरणकस्य चाभावस्य न्यायनयेऽप्यधिकरणस्वरूपत्वाभ्युपगमादिति। घटपटौ न स्वभेदात्मकाविति प्रतीतौ घटापटानुयोगिक तद्भेदप्रतियोगिक भेदस्य यथोक्त नियमानुसारेण घटपटात्मकत्वेन घटपट भेदबुद्धिव्यवहारे क्लृप्त घटपटभेद हेतुत्वेन हेतुत्वात् स्वभेदबुद्धि व्यवहारेपि तादृशभेदत्वेन हेतुत्वोपपत्तौ घटपट भेदापेक्षया न भेदान्तरत्वेन स्वभेदबुद्धिव्यवहारे हेतुत्वमेवं हि स्वानुयोगिक घटपट प्रतियोगिक भेदबुद्धि व्यवहारेपि स्वानुयोगिक भेदस्य यथोक्त नियमानुसारेण स्वात्मतया यथोक्तरूपेणैव हेतुत्वमुपपत्तौ न तादृग्भेदान्तरत्वेन तद्धेतुत्वं घटपट प्रति योगिकभेदत्वेन हेतुत्वमिति। तथा च यथा भेदस्य स्वस्यैव स्वव्यवहारहेतुत्वं तद्वदज्ञानस्यापि स्वपराध्यस्तत्व प्रयोजकता स्यादिति भावः।

(३) अन्यथा यथोक्तनियमानङ्गीकारे स्वस्वव्यवहारे भेदस्य भेदान्तरापेक्षायामितरेतरस्यापि भेदस्य स्वातिरिक्तभेदान्तरसापेक्ष व्यवहारविषयत्वादनवस्थास्यादिति भावः।।

मिथ्यात्वप्रयोजकमाविद्यकत्वं हि अविद्याकालमात्रस्थितिकत्वम्, अविद्याधीनस्थितिकत्वं वा अविद्यातत्कार्यसाधारणम्। [१]अभेदेऽपि योगक्षेमसाधारणस्य तदधीनस्थितिकत्वस्याऽव्याघातात्।। तथा चोक्तं वार्तिके-

"अविद्यास्तीत्यविद्यायामेवास्तित्वं प्रकल्प्यते।
ब्रह्मदृष्ट्यात्वविद्येयं न कथञ्चन युज्यते" इति।।

दोषसंस्कारादिकारणापेक्षापि कार्याध्यासेष्वेव, नाऽनादौ। नच दोषजन्यत्वमेवाध्यस्तत्वं, दोषत्वस्याऽननुगतत्वात्। अध्यासनिमित्तत्वमेव तदिति, अन्योन्याश्रयापत्तेश्च। किन्तु प्रतिपन्नोपाधौ निषिध्यमानत्वमनिर्वचनीयत्वं वा। तच्चाऽविद्या साधारणमेव। एवंचाऽविद्याविषयीकृतब्रह्मविवर्तमात्रं जगदिति मतेऽपि नोक्तदोषः।। नच कार्यमात्रस्य बाधो नाऽज्ञानस्येत्युक्तं युक्तं। ज्ञानाऽज्ञानयोरेव परस्परविरुद्धत्वात्, तदबाधे कार्यबाधस्यैवाऽसंभवात्। नचापसरणमात्रेण कार्योपमर्द इति सम्यक्। बाधस्य त्रैकालिक विषयत्वानुपपत्तेः नहि जलापसरणेन तरङ्गोपमर्दो बाधः। ब्रह्मज्ञानक्षणे सर्वकार्यबाधेऽपसरणीयदेशाऽन्तराऽप्रसिद्धेश्च। तस्मात् घटज्ञानेन मम तदज्ञानं नष्टमित्यनुभवात्, "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः" इति स्मृत्यनुरोधाच्च तस्यापि बाधकल्पनमावश्यकम्। नच तर्हिउक्तस्मृत्यनुरोधान्नाश एव कल्प्यतां, न बाध इति वाच्यम्। स्वप्रकृतौ तिरोधानलक्षण नाशस्य निष्कारणेऽज्ञानेऽसंभवान्नाशोक्तेर्बाधार्थकत्वाऽऽवश्यकत्वात्। बाधश्चाऽविद्या-तत्कार्याणामधिष्ठानात्मक एक एवेति नेदं कदाचिदपि रजतम्' इति कार्यमुखेन तस्य त्रैकालिकत्वमुल्लिख्यत एव। तथाच वार्तिकम्-

"न चाऽविद्यासमुच्छित्तिर्ज्ञानोत्पत्त्यतिरेकतः।
संसार नाशोऽविद्याया नाशान्न व्यतिरिच्यते"।। इति।।

'नेदं कदाचिदपि *नाऽज्ञासिषम्' इतिकारण पुरस्कारेण तदनुल्लेखस्तु विरोधिवृत्तावेव कादाचित्कयां तन्निवृत्तिरूपत्वाऽभिमानात्। अत एव नैयायिकादीनां ज्ञानप्रागभाव एवाऽज्ञानमिति भ्रान्तिरप्युपपन्ना। वृत्तिज्ञानरूपैवाऽज्ञान निवृत्तिरिति वृद्धव्यवहारोऽप्यतिरिक्तध्वंसकल्पना निरासपर एव। प्रपञ्चयिष्यते चैतदुपरिष्टात्।

---

(१) अभेदेपीति।। अभेदेप्यविद्याया एकरूपत्वेपि कार्यमिव स्वस्मिन्नप्यध्यस्तत्त्व प्रयोजकीभूताविद्याकालमात्रस्थितिकत्वाविद्याधीनस्थितिकत्व लक्षणस्यावश्यंभावात्तादृकप्रयोजकस्या-ध्यस्तत्वान्यथानुपपत्तिलक्षणार्थापत्ति गम्यत्वलक्षणयोगस्यतथाऽध्यस्तत्वप्रयोजकत्वावगाह्यनुभव विषयत्व लक्षणक्षेमस्याविद्यातत्कार्य साधारणस्य स्वीकारे व्याघाताभावादविद्यायामप्यध्यस्तत्वोपपत्तिरिति भावः।।

*नावेदिषम् इति पाठः।

छान्दोग्येऽपि "सदेव सोम्येदम्" इत्यादिना सजातीयादिभेदशून्यत्वेनोपक्रान्तवस्तूपपादनाय प्रक्रान्ततेजोवन्नसर्गहेतुत्वान्यथानुपपत्तिकल्प्यायां मायाशक्तौ नोपक्रमोपजीव्योभयविरुद्धमनध्यस्तत्वं कल्पयितुं शक्यम्। वरघातन्यायप्रसङ्गात्। अतः कार्यमात्रे वाचारम्भणत्वोक्तिः [(१)]"वेदो वा प्रायदर्शनात्" इति न्यायेनोपलक्षणमनात्मवर्गमात्रस्येति।। ननु परिच्छिन्नाऽविद्या अपरिच्छिन्नं ब्रह्म कथमावृणुयात्। नच परिच्छिन्नजीवाऽऽश्रितया तयाऽल्पेनाप्यक्षिपटलेनाऽक्षिपिधाने व्यवहितविस्तृतादित्यादितिरोधानवद्ब्रह्मतिरोधानमिति वाच्यम्। "य आत्मानमन्तरो यमयति एष त आत्मा सर्वान्तरः" इत्यादिश्रुत्याऽऽन्तरस्य ब्रह्मणो *जीवाद्विप्रकर्षाऽभावावगतेः। व्यवहितसूर्यादेर्जलादौ प्रतिबिम्बदर्शनेन ब्रह्मप्रतिबिम्बो जीव इति सिद्धान्ताऽनुपपत्तेश्च। किञ्च स्वप्रकाशचिदेकरसे परमात्मनि सवितरि तम इव नाऽविद्यैव संभावयितुं शक्या, दूरे तत्कृतमावरणम्। किञ्चाऽविकृतस्यैव ब्रह्मणो नामरूपव्याकरणाय संकल्पपूर्वको जीवभावेन प्रवेशश्श्रूयते। न चाऽसङ्गोदासीननिष्क्रियनिरवयवाऽपरिच्छिन्नानन्दरूपस्य ब्रह्मणस्सर्वज्ञस्य स्वतन्त्रस्य पूर्णकामस्येश्वरस्य वा निरतिशयदुःखनिदानजीवभावविषयस्सङ्कल्पः, अन्नमयादिकोशप्रवेशोन्मूढता, तत्प्रयुक्तसंसारश्च संभावयितुं शक्यते। किञ्च ब्रह्मणस्सर्वात्मना जीवभावे ईश्वराद्यपरिशेषादुपदेष्टुरभावान्मोक्षानुपपत्तिः। एकदेशेन जीवभावे सावयवत्वादनित्यत्वापत्तिः, एवं जगद्भावेऽपि दोषो बोध्य इत्यादिदोषसहस्रमेकोक्त्या परिहरन्मायाया अतर्क्याऽनन्तशक्तित्वं दर्शयतिसंभाव्येति। उत्कटकोटिकस्संशयः संभावना, तद्विषयस्संभाव्यस्तस्य, तदितरस्य = असंभाव्यस्य च घटनायाम् = उपपत्तौ, पटीयसी = अतिसमर्था। अतर्क्याऽनन्तशक्तिमत्वादघटितघटनापटीयसीत्यर्थः। सा = माया, विभ्रमेण = विलासेन विक्षेपशक्तिवैचित्र्येण संमोहं = जीवभावादिमहाभ्रमपरम्परां, जनयति = आविष्करोति। तथा च नाऽज्ञानस्यास्ति दुष्करमिति भावः। यथाहुः,-

"खमपि खादति खण्डितमीक्षते, निजशिरोनयनेन करार्पितम्।
卐किमपि दुर्लभमस्य न विद्यते, यदि विमूढमतिर्भवति स्वयम्" ।। इति।।

---

(१) वेदो वा प्रायदर्शनादिति।। सिद्धान्तमाह वेद इति। वेदउक्त विध्युद्दे शो मन्त्रब्राह्मणसमुदायरूपवेदधर्मः। ऋग्वेदेन यद्विहितं तत्सर्वमुच्चैरित्यर्थः। प्राये वाक्योपक्रमे वेदशब्ददर्शनात्। प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत तस्मात्तेपानात्रयोदेवा असृजन्ताग्निर्वायुरादित्यस्ते तपोऽतपान्ततेभ्यः स्तेपानेभ्यःत्रयो वेदो असृजन्ताग्ने ऋग्वेदो वायोर्यजुवेद आदित्यात्सामवेदाइत्युपक्रम्य तस्मांदुच्चैरृचाक्रियते इत्युपसंहारादसंजात विरोधित्वेन प्रबलेनोपक्रमानुसारेणोपसंहार नयनमिति भावः। जै.तं.अ.३ पा.३अ.१सू.२।।

*जीव विप्रकर्षाभावावगतेरिति ग्र० पा०। 卐 "किमपि तस्य न दुर्घटमीक्षते" इति पाठान्तरम्।

प्रेक्षावतां कृतार्थानामपि राजादीनां निद्राकुतूहलादिवशाच्छयनविनोदादौ प्रवृत्तिदर्शनात् तत्र च स्वप्नेन्द्रजालादावसंभावितसहस्रस्यापि दर्शनात्प्रतिबोधे स्वरूपाप्रच्युतिप्रतिसंधानाच्च न कश्चिद्दोष इति भावः।। वस्तुतस्तु प्रवेशश्रुते-रन्यथाऽभिप्रायो वक्ष्यते।।४८।।

किंचाऽसंभावितत्वे सति प्रतीयमानत्वमध्यस्तत्वेऽनुकूलमेव न प्रतिकूलमिति सूचयन्प्रसिद्धाद्ध्यासलक्षणमविद्यादौ प्रदर्श्य ज्ञानाद्ध्यासाऽर्थाद्ध्यासादित-द्भेदान्सर्वानुभवसिद्धान्दर्शयति-

मू०।। अद्ध्यासोऽनधिगतवस्तुनि ह्यतस्मि-
स्तद्बुद्धिस्स्फुटमनुभूयते प्रतीचि।
अज्ञोऽहं गलितबलो नरो दरिद्रो
जीवेयुर्मम तनयाः कथं बतेति।।४९।।

अद्ध्यास इति।। [१]अतस्मिन् = तत्पुरुष बहुव्रीहिभ्यां तद्भिन्ने व्याप्यवृत्तितदत्यन्ताऽभाववति च धर्मिणि, तद्बुद्धिः = तत्तादात्म्य तत्संसर्गगोचरा अविद्यावृत्तिः, अद्ध्यासः = अद्ध्यसनमद्ध्यासः ज्ञानाद्ध्यास इत्यर्थः। अथवा बुध्यत इति बुद्धिः। कर्मणिक्तिन्। सा चाऽसौ बुद्धिश्चेति कर्मधारये तद्भिन्ने तदत्यन्ताऽभाववति च प्रतीयमानः सोऽर्थोऽद्ध्यस्यत इत्यध्यासः अर्थाऽध्यास इत्यर्थः। यथा रजतभिन्ने रजतत्वाऽत्यन्ताभाववति च शुक्तिशकले रजततादात्म्यस्य, रजतत्व संसर्गस्य च बुद्धिः = इदं रजतमित्याकारा अविद्यावृत्तिस्तद्विषयश्च रजतांशे तादात्म्याध्यासो रजतत्वांशे संसर्गाऽध्यास इति भावः। न च ज्ञानाऽध्यासे मानाभावः, इदमंशस्येवाऽध्यस्तरजतादेरप्यन्तः करणवृत्त्यैव ग्रहसंभवादिति वाच्यम्। बाह्य गोचराऽपरोक्षान्तःकरणवृत्तौ पूर्वसिद्धविषयस्य हेतुत्वेन तस्याः प्रातिभासिक वस्त्वगोचरत्वात्। प्रमाणसहकारमन्तरेण बाह्यान्तःकरणवृत्त्यनुदयाद्रजतादेस्तद्विषयत्वे प्रामाणिकत्वेन वाध्यत्वानुपपत्तेश्च।। नच स्वाप्नमिवाऽऽभ्यन्तरमेव रजतं बहिर्वदव-भासत इति प्रलापो युक्तः। बाह्यशुक्तितत्त्वज्ञानबाध्यत्वाऽनुपपत्तेः। पुरोवर्तिनि बाह्ये प्रवृत्त्यनापत्तेश्च। बाह्यतादात्म्यानुभवविरोधाच्च। अतोऽविद्यावृत्तेरावश्यकत्वा-द्रजतेदं पदार्थयोरिव तदाकारान्तःकरणाऽविद्यावृत्त्योरपि तादात्म्यस्य रजतत्वेदं

---

(१) अतस्मिन्निति।। न तत् अतत्, तस्मिन्निति नञि तत्पुरुष समासे वा न विद्यते तत् = आरोपितं वस्तु रजतादियस्मिन् तदतत् तस्मिन्निति बहुव्रीहि समासे वाऽऽरोपितभिन्ने वस्तुनीत्यर्थोपपन्नः। तथा चारोपितभिन्ने तथा व्याप्य वृत्तिः स्वाधिकरणावृत्त्यन्ताभावप्रतियोगी च स चासावारोपितात्यन्ता-भावश्चेति कर्मधारय समासस्तथा च व्याप्यवृत्यारोपितात्यन्ताभाववती धर्मिणीत्यर्थः।

त्वयोरिव तदाकारयोरपि परस्पराऽवच्छिन्नत्वस्य च सर्वानुभवसिद्धत्वादविद्यान्तःकरणवृत्त्योस्तद्धर्माणां च परस्पराध्यासोऽपि दुरपह्नवः। तत्र शुक्त्यवच्छिन्नचिन्निष्ठा अविद्यारजताद्याकारेण, इदमाकारवृत्त्यवच्छिन्नचिन्निष्ठात्वविद्या रजतादिज्ञानाकारेण परिणमत इत्युभयत्राप्यविद्यैवोपादानमिति सूचयितुमाह-अनधिगत वस्तुनीति।। अनधिगते = अध्यासविरोध्यंशाऽऽवरकोक्ताविद्याद्वयविषयीकृते सामान्यतोभासमाने वस्तुनीत्यर्थः। उक्तलक्षणाध्यासः प्रत्यगात्मन्यपि सर्वानुभवसिद्ध इत्याह-स्फुटमिति। प्रतीचि = अहङ्कारोपलक्षिते साक्षिणि, तस्याप्यध्यासविरोध्यपरिच्छिन्नानन्दांशे आवृतत्वात्स्फुरणांशेऽनावृतत्त्वाच्च शुक्त्यादिसाम्यादिति भावः। अनुभवप्रपञ्चनमुखेनाऽविद्यादेः पूर्वपूर्वोपहितेक्रमेणोत्तरोत्तराध्यास इत्युत्तरोत्तराध्यासे पूर्वपूर्वस्य हेतुत्वमिति दर्शयंस्तस्याप्यध्यासस्याहं ममेति द्वैविध्यं दर्शयति-अज्ञोऽहमित्यादिना।। "अज्ञः" इति अविद्यातद्धर्माध्यासः। "अहम्" इति अन्तःकरणतद्धर्माध्यासः। ज्ञानेन्द्रियतद्धर्माध्यासस्याप्युपलक्षणमेतत्। गलितबलः = दुर्बलः इति प्राणधर्मेण बलेन व्यपदेशात्प्राणाध्यासः। कर्मेन्द्रियाध्यासस्याप्युपलक्षणम्। "नरः" इति स्थूलदेहाध्यासः। "दरिद्रः" इति बाह्यधनादिवैकल्यप्रयुक्ताऽपकृष्टरूपाध्यास इत्यविद्यादेस्तादात्म्याध्यासः, तद्धर्माणां च संसर्गाध्यासः। तत्प्रयुक्तश्च बाह्यपुत्रादौ ममेत्यध्यासः, तत्प्रयुक्तश्च तदीयजीवनादावात्मीयत्वाध्यासः, तत्प्रयुक्तश्चात्मनि चिन्ताशोकाद्यध्यास इति सूचनाय कथं बतेत्युक्तम्। प्राणाद्यध्यासस्यबलवान्द्विजो धनवानित्यादिरूपेणाऽप्युल्लेखसंभवे वैकल्याद्यपकृष्टरूपेणोल्लेखः अध्यासस्य दुःखपर्यवसायित्वबोधनेन वैराग्यार्थः। इति शब्दः आद्यर्थकः, अध्यासाऽऽनन्त्यप्रदर्शनार्थः।। ४९।।

नन्वस्त्वात्मन्यविद्याध्यासः, अनात्मस्वाऽऽत्मतद्धर्माणां तादात्म्यसंसर्गाध्यासे किं मानमित्याशङ्क्य, जडाऽनित्याऽशुचिदुःखरूपे देहादौ तद्वैपरीत्याऽनुभव एव मानमिति सूचयन्नध्यासस्याऽनर्थपर्यवसायित्वं सदृष्टान्तं पुनः कण्ठोक्त्याप्याह-

मू०।। शुद्धो हृष्टस्स्थिरोऽहं बुध इति च तनावात्मधर्मान्युवाहं
स्थूलो गौरोऽभिरूपः पंटुरिति च निजे देहधर्मान्मिमीते।
अन्योऽन्याऽध्यस्त सत्यानृत वलितवपुर्लोहपिण्डप्रविष्टो
वह्निः कूटाऽभिघातानिव विविधभवाऽनर्थजातं प्रपन्नः।। ५०।।

शुद्ध इति। शुद्धः = निर्दोषः,। हृष्टः = सुखी, स्थिरः = चिरस्थायी, बुधः = चेतनः, चकारो देहेन्द्रियादिरेव सत्यस्सारभूतः, सङ्घातरूप एवाहं भोक्तेत्यादिसङ्ग्रहार्थः। इत्युक्तप्रकारेण तनौ = सूक्ष्मे परिच्छिन्ने देहादावित्यर्थः।

शुद्धत्वादीनात्मधर्मान्मिमीते = अभिमन्यते। येन स्वदेहे मलमूत्रस्वेददौर्गन्ध्यादिना-ऽत्यन्ताऽशुचित्वादि पश्यन्नपि न पश्यतीत्यर्थः। यद्यपि शुद्ध्यादय आत्मस्वरूपमेव न धर्माः, तथाप्यशुद्धिदुःखजाड्यादिधर्म्यविद्यादिव्यावर्तकत्वात्तदपेक्ष्य धर्मा इत्युच्यन्ते।। तथाचोक्तं पद्मपादाचार्यैः,-"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात्पृथगिवाऽवभासन्ते" इति। तथाऽहं युवा = मध्यमवयाः, स्थूलः = उपचितावयवः, गौरः = सुरूपः, अत एवाभिरूपः = दर्शनीयः, पटुः = शीघ्रकारीति च। एवमादिप्रकारेण निजे = अस्थौल्यादिधर्मके स्वाभाविके स्वात्मनि। देहधर्मान्मिमीते = अध्यस्यति। पुनर्देहधर्माध्यासप्रदर्शनं दृष्टान्तार्थं, प्रपञ्चार्थं च। उपलक्षणं चैतत् इन्द्रियादिधर्माध्यासस्यापि। तत्रापि पश्यामि, श्रृणोमि, करोमि, सङ्कल्पयामि, बलवानित्याद्यभिलापदर्शनात्। "प्राणन्नेव प्राणोनाम भवति वदन्वाक्पश्यंश्चक्षुः" इतिश्रुतिरप्येतद्दर्शयति। अयं च धर्मसंसर्गाध्यासो धर्मितादात्म्याध्यासपूर्वकः, न स्फटिके जपाकुसुमलौहित्याऽध्यासवत्केवल इत्येतत्प्रदर्शनायाह-अन्योन्येति। परस्परतादात्म्येन परस्परस्मिन्नध्यस्ते ये सत्यानृते ताभ्यां वलितं = मिश्रीभूतं, वपुः = स्वरूपं यस्य स जीव इत्यर्थः। अनृत-संवलितरूपस्यैव भोक्तृत्वमविचारसिद्धम्, विचारे तु सत्यानृतयोस्संवलनस्यैवा-ऽवास्तवत्वान्न कस्यापीति व्यवहितशङ्कापरिहारंसूचयन्दृष्टान्तमाह- लोहपिण्डेति। यथा लोहपिण्डप्रविष्टो वह्निर्लोहाद्विवेकेनाऽगृह्यमाणः कूटाभिघातान्सहमान इव भ्रान्त्या लक्ष्यते, तद्वदात्माप्यध्यस्ताऽनृतसंवलनेन विविधभवानर्थजातम् = विविधं संसारानर्थसमूहं प्रपन्नः = प्राप्त इवेत्यर्थः। तथाच श्रुतिः-"सोऽनृताऽभिसंधो-ऽनृतेनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथहन्यते" इति। विवेकिनस्सत्याभिसंधस्य तु न दुःखभोक्तृतेति भावः।।५०।।

नन्वगृह्यमाणभेदयोर्भास्वरत्वादिसाधारणधर्मवतोश्शुक्तिरजतयोः परस्पराऽध्यासो युक्तः, नत्वत्यन्तविरुद्धस्वभावयोश्चिदचितोर्विषयविषयिभावेन स्फुटंप्रतीतभेदयो-स्तेजस्तिमिरयोरिव। नवा नीरूपे कस्यचिदध्यासः प्रसिद्धः। तथाच प्रागुक्तो "युवाहं स्थूलः" इत्यादिप्रत्ययः "अग्निर्माणवकः" इत्यादि वाक्यजन्यप्रतीतिवद्गौण एवेति, नाध्यासमूलं दुःखमिति कस्यचिदाशङ्कामपाकुर्वन्नाह-

मू०।। दृष्टः प्रत्यक्पराचोर्विषयिविषययोर्भास्तमोवद्विरोधे-
ऽप्यध्यासोऽहंममेति स्फुटमिति सुधियां नास्त्यसंभावनाऽत्र।
स्वप्नादौ गत्यभावाद्गगनमलिनिमाऽध्यासदृष्टेर्बुधानां
पश्वादीनां च साम्याद्व्यवहृतिरखिलाऽध्यासमूलेति सिद्धम्।।५१।।

दृष्ट इति।। प्रत्यक्पराचोः = आत्माऽनात्मनोः = विषयिविषय-योः = प्रकाशकप्रकाश्ययोः भास्तमोवत् = तेजस्तिमिरयोरिव स्वाभाविके विरोधे सत्यपि 'अहं मम' इति दर्शितो द्विविधोऽध्यासो युक्त एव। यतो दृष्टः = सर्वानुभवसिद्धो नाऽपह्नोतुं शक्य इत्यर्थः। अयं भावः-सत्यं भेदग्रहे नाध्यासो युक्तः। भेद एव तावद्दुर्ग्रहः। अहमित्यहङ्कार तादात्म्याध्यासस्य भेदग्रह-विरोधिनस्सर्वव्यवहारमूलस्य ततोऽपि पूर्वस्य सत्त्वात् तं विना केवलाऽऽत्मप्रकाशस्य व्यवहारदशायामप्रसिद्धेः। न ह्यपरिच्छिन्नं देहादिविविक्तमात्मानमनुभवति कश्चित्संसारी।। नच परिच्छिन्नमेवाऽऽत्मतत्त्वं, नाऽन्यादृशमिति युक्तम्। वास्तवरूपान्तरस्य तात्पर्यवच्छ्रुतिसिद्धत्वात्। अहङ्कारभेदाग्रहे च न तद्भेदग्रह गुणयोगादिज्ञानाधीना गौणता अहमिच्छामिगच्छामि इत्यादिव्यवहारस्योपपत्तिमती। न ह्यहं शब्दस्य लोके मुख्योऽन्योऽर्थः प्रसिद्धोऽस्ति। येनाहं शब्दो वा गौणीं वृत्तिमासादयेत्।। यदुक्तं-साधारण धर्माभावान्नाऽध्यास इति, तत्राह-स्वप्नादाविति। आदिपदात्स्फटिकलौहित्य मरुमरीचिका केशोण्ड्रकाद्यध्यास परिग्रहः। स्वप्नदेह गजादेर्जागरे बाधानुभवादध्यस्तत्वं तावदवश्यं वाच्यम्। न चाधिष्ठानमन्तरेणा-ध्यासस्संभवति। नच तत्राऽऽत्मातिरिक्तमधिष्ठानं संभवति। नच स्थूलदेह एव स्वाप्नाऽध्यासाधिष्ठानमस्तु, जागरे तत्प्रतिसंधानादेव स्वप्नबाधानुभवादिति वाच्यम्। स्वप्ने चक्षुरादीनां लीनतया मनसो बहिरस्वातन्त्र्यादभिमानत्यागाच्च स्थूलदेहस्याऽसंनिकृष्टतया तस्मिन्नारोपायोगात्। जाग्रदभिमानि व्यावहारिकजीवे निद्राख्याऽविद्यावस्थातिरोहिते स्वाप्नप्रपञ्चाऽरोपात्तादृशजीवप्रतिसंधानादेव स्वप्नबाधस्यावश्यवाच्यत्वात्स्थूलदेहप्रतिसंधानस्य तन्नान्तरीयकत्वेन स्वप्नबाधा-ऽप्रयोजकत्वात्। अतो गत्यन्तराभावात्साधारणधर्मशून्येऽप्यध्यासो बलात्स्वीकार्यः। एवं स्फटिके लौहित्याध्यासः तत्प्रयुक्तपद्मरागतादात्म्याद्यध्यासश्च न साधारण-धर्मापेक्ष इति व्यभिचारान्न सर्वत्र तदपेक्षेति भावः।। एवं रूपवत्येवाऽध्यास इत्यपि न नियम इति दर्शयति-गगनेति। रूपशून्येऽपि गगने मलिनिम्नोनैल्यस्य अध्यासदृष्टेः = अध्यासदर्शनादित्यर्थः। तथा चाऽऽगन्तुकाध्यासे निमित्तमात्रस्याऽपेक्षा, न रूपादेरिति तच्छून्येप्यात्मन्यविद्याकामकर्मवासनादिनिमित्तसत्त्वादुक्ताऽध्यास-सिद्धिरित्यर्थः।।

किञ्च, देहादावात्मतादात्म्याऽनध्यासे व्यवहारमात्रविलोपस्स्यात्। चेतनाऽनधिष्ठितस्याऽचेतनस्य प्रवृत्त्ययोगादसङ्गोदासीनेन चेतनेन चाध्यासमन्तरेणा-ऽधिष्ठातुमशक्यत्वात्।। नन्वागमोपदेशशून्यानां पृथग्जनानामस्त्वेवम्। विदुषां तु प्रतिपन्नाऽऽत्मतत्त्वानामध्यासबाधात्कथं व्यवहारोऽध्यासाधीनः? तत्राह-बुधानामिति।।

बुधानां = विदुषां पशु *शकुन्यादीनां च इष्टाऽनिष्टवस्तुदर्शने प्रवृत्तिनिवृत्तिव्यवहारे साम्यादित्यर्थः। तथाच विदन्तु नामाऽऽगमोपपत्या-दिनाऽऽत्मतत्त्वं, तथापि दर्शितव्यवहारस्याऽध्यासं विना दुरुपपादत्वात्प्रारब्धप्रतिबद्धा-ऽविद्यालेशप्रयुक्तः तात्कालिकाऽध्यासस्तेषामपि स्वीक्रियत इति भावः। न केवलं लौकिकव्यवहार एवाऽध्यासमूलकः। किन्तु शास्त्रीयो यज्ञादि श्रवणादि व्यवहारोऽपि तथैवेत्यभिप्रेत्याह-व्यवहृतिरिति।। व्यवहृतिः = प्रमाण प्रमेयादि व्यवहारः। अखिला = लौकिकी वैदिकी चेत्यर्थः। तथाच लौकिक प्रमाणानि शास्त्राणि चाऽविद्वद्विषयाण्येवेति भावः।। प्रपञ्चितं चैतद्भगवद्भिर्भाष्यकृद्भिरन्यैश्च महद्भिरिति नात्र विप्रतिपत्तिरित्य-भिप्रेत्योपसंहरति-इति सिद्धमिति।।५१।।

वैराग्यदार्ढ्याय शास्त्रप्रवृत्त्यौदासीन्यविच्छित्तयेचाऽध्यासप्रयुक्तमनर्थं प्रपञ्चयति-धर्मादित्यादिसार्धश्लोकद्वयेन-

मू०।। धर्माद्देवत्वमेति व्रजति पुनरधः पातकैस्स्थावरादी-
न्देहान्प्राप्या प्रणश्यन्क्वचिदपि लभते मानुषत्वं च ताभ्याम्।
कर्मज्ञानोभयेन व्रजति विधिपदं मुच्यते कोऽपि तस्मिन्
रागी प्रत्येति भूयो जनिमिति विषमं बंभ्रमीतीह लोकः।।५२।।

धर्मादिति।। धर्मात् = श्रुतिस्मृतिसदाचारप्रमाणककर्मजन्याऽपूर्वात्। कर्मतारतम्यानुरूपं देवत्वं=देवताशरीरं- धूमादिमार्गेण चन्द्रमण्डलं प्राप्य एति = प्राप्नोति। धूमादिमार्गः, चन्द्रमण्डलावाप्तिः, तत्र भोगः, ततः पुनरावृत्तिश्च कर्मिणां श्रूयते-"अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति। तस्मिन्यावत्सम्पातमुषित्वाऽथैतमेवाऽध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमोभूत्वाऽभ्रं भवति। अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते" इति श्रुतौ धूमादिशब्दास्तदभिमानिदेवतापराः। षट्दक्षिणैति मासानादित्य इति शेषः। अन्नमुपभोग्यं, भक्षयन्ति सेवादिनोपभुञ्जते, देवोपभोग्यानां च कर्मिणां राजभृत्यानामिव स्वतोऽपि भोगोऽस्त्येव। यथेतं = क्वचिद्यथागतम्। दुष्कर्मिणां गतिमाह-व्रजतीति। पुनः = शास्त्रविहिताऽननुष्ठाने प्रतिषिद्धाऽऽचरणे वा। तत्प्रयुक्तैः पातकैः = पतनहेतुभिः पापैः, अधः = अधोभुवनं, तत्र हि नरका रौरवादयः

*शकुंत इति ग्र० पा०

पुराणादौ प्रसिद्धाः। तेषु व्रजति = याम्यैः पुरुषैर्नीयमानो गच्छति, तादृशदेहसम्पन्नस्तद्दुःखमुपभुङ्क्ते इत्यर्थः। ततस्तत्र चिरं दुःखभोगानन्तरं शिष्टैः पापैः स्थावरादीन् = तृणगुल्मलता वृक्षमशकदंश कीट सरीसृपादीन् दुःखबहुलान्देहान्प्राप्य, बहुवचनमेकैकयोनीनामप्यनन्तवारप्राप्तिबोधनाय, प्रणश्यन् = पुनः पुनर्मरणदुःखमनुभवन्, ताभ्यां = धर्माधर्माभ्याम् अनेककोटिजन्मसञ्चिताभ्यां दैवात्साम्यमापन्नाभ्यां मनुष्यदेहारम्भककर्मण उद्बोधान्मानुषत्वं = क्वचिदपि देशे काले वा लभते। चकारो मनुष्यदेहस्याऽतिदौर्लभ्यद्योतनार्थः अप्यर्थे। तत्राऽपिकर्मभूमौशास्त्राऽऽचार्यादिसम्पन्नकाले तत्राऽपि त्रैवर्णिकेषु तत्राऽपि ब्राह्मणेषु शीलवृत्ताऽध्ययनसम्पन्नेषु तथाविधं जन्म दुर्लभतमम्, किमु वक्तव्यम् अध्यात्मविद्याधिकृतमिति सूचनाय क्वचिदपीत्युक्तम्।।

तथा च श्रुतिः-''इह चेदवेदीदथ सत्यमस्ति। न चेदिहाऽवेदीन्महती विनष्टिः'' इति।। इत्थं केवलकर्मफलं प्रपञ्च्य उपासनसमुच्चितसत्कर्म फलमपि नश्वरत्वाद्धेयमेवेति दर्शयन्नाह- कर्मज्ञानोभयेनेति।। ज्ञानमत्रोपासनं ''विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह'' इति श्रुतेः। परस्परसमुच्चिताभ्यां कर्मोपासनाभ्यामित्यर्थः। विधेः = विराजो हिरण्यगर्भस्य वा, पदं = स्थानमुपासनतारतम्याऽनुसाराद्व्रजत्यर्चिरादिमार्गेण गच्छति। सूर्यरश्म्यनुसारी अर्चिरादिमार्गेण कार्यब्रह्मणोऽवाप्तिरप्युपासकानां श्रुत्यैवोक्ता-''तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षुड्डुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः। स एतान्ब्रह्म गमयत्येष देवयानः पन्थाः'' इति। तत्र गतानामपि-

''ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परंपदम्।।
आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन''।।

इति स्मृतिद्वयानुसाराद्वीतरागाणां तत्रैव ज्ञानप्राप्त्या मोक्षः, रागिणस्तु परावृत्तिरिति दर्शयति-मुच्यते इति।। तस्मिन्-विधिपदे कोऽपि=वीतरागो ब्रह्मणा सह मुच्यते = मोक्षं प्राप्नोति। ब्रह्मलोकेऽपि वीतरागाणामल्पत्वद्योतनाय कोऽपीति। तत्र रागी = भोगलम्पटस्तु भूयः = पुनरपि जनिं = प्रत्येति परावृत्त्यप्राप्नोति। यदि ब्रह्मलोके गतानामपि वैराग्यपूर्वकज्ञानावाप्त्यैव मुक्तिस्तर्हि इहैव विरक्तिस्सम्पाद्या। किं ब्रह्मलोकप्रत्याशया। तत्र भोगसामग्रीबाहुल्येन दिव्यकार्यकरणसम्पन्नतया भोगसामर्थ्याविघातादिना च वैराग्यस्य दुष्करत्वादिति भावः।। उक्तमुपसंहरति-इतीति। इति = दर्शितप्रकारेण विषमं = दुःखबहुलं यथा स्यात्तथा

इह = संसारे लोकः = जीव सङ्घ बंभ्रमीति = अनादिकालादारभ्य भ्रमन्नेवाऽऽवर्तते, तेन न क्षणमपि विश्राम्यत्यहो कष्टेयं दशेति भावः।। (१)भ्रमेर्यङ्लुकि (२)"नुगतोऽनुनासिकान्तस्य" इति अभ्यासस्य नुक् ।।५२।।

ननु न संसारे दुःखमेवाऽनुभूयते किन्तूच्चावचं सुखमपि। स्वर्गे तु महाभोगश्रवणात्सुखमेव चिरम्। तथाचाऽऽयव्ययसाम्याल्लाभाधिक्याद्वा वणिजामिव नोपरतिर्युक्तेत्याशङ्कां परिजिहीर्षुः विषसंपृक्तमोदकाऽऽस्वाद सुखवद्बहुतरदुःखाऽनुबन्धित्वादल्पविषयसुखं हेयमेवेत्यभिप्रेत्य दुःखबाहुल्यं प्रपञ्चयति-

मू०।। दुःखं स्वर्गात्प्रपाते बहुविधनरके गर्भवासेऽति दुःखं
निस्स्वातन्त्र्याऽशनाया ग्रह गद रुदितैश्शैशवे दुःखमेव।
तारुण्येऽमर्षलोभ व्यसन परिभवोद्वेग दारिद्र्य दुःखं
वार्धक्ये शोकमोहेन्द्रियविलयगदैर्दुःखमन्तेऽतिदुःखम्।।५३।।

दुःखमिति।। यन्मन्यसे स्वर्गे बहुतरं सुखमिति, श्रृणु तत्र दुःखं। राग - द्वेषाऽसूयाऽभिमानादि प्रयुक्तं मानसं दुःखं तावद्दुष्परिहरम्। उत्कृष्ट सुकृतकारिभिरल्पसुकृतानां तिरस्कारादेरवर्जनात्। शारीरमपि देवानामसुरादिभिः पीड्यमानानां महर्षिभिश्शप्तानां यज्ञभागोच्छेद पीडितानां च तत्र तत्र श्रूयते। भयमपि तेषां "सोऽबिभेत्" "भीषाऽस्माद्वातः पवते" "मुक्तेश्च बिभ्यतो देवा मोहेनाऽपिदधुर्नरान्" इत्यादिश्रुतेः, पुराणाख्यायिकाभ्यश्च स्वाभाविकादज्ञानात्, प्रशासितुरीश्वरादुपभोग विरोधि संभावनात्, भावि पतन पुण्यक्षयादि प्रतिसन्धानात्, तपोबलाधिकेभ्यश्च प्रसिद्धं। सखि बन्धु कलत्रभृत्यादीनां क्षीणपुण्यानामादौ पतने वियोग जन्यमपि दुःखं, गौतमाऽपराधादिप्रयुक्तमिन्द्र चन्द्रादीनामपि रोग वैरूप्यादि दुःखं प्रसिद्धं, किंवक्तव्यमन्येषाम्। उच्चावच सुकृत भोग वैचित्र्यात्कालभेदेन सेव्य सेवक भाव वैपरीत्यं, शत्रुसहवासः, शात्रवैरन्यैर्वा स्वेष्टतम भार्याभूषण विमानाद्यपहारः, कृतपापानां स्वबन्धुजनानां निरन्तर नरकयातना दर्शनमित्यादि दुःखसहस्राणि कामादि दोषसहस्र कलुषित चेतसां स्वर्गिणां दुष्परिहराणि।। यथाह भगवान्व्यासः-

(१) अभ्यासस्य गुणः स्याद्यङि यङ् लुकि च। गुणो यङ् लुको। ७/४/८२/ इत्यस्य सूत्रस्य वृत्ति।
(२) अनुनासिकान्तस्य योभ्यासोऽदन्तस्तस्य नुक् स्यात्। नुकानुस्ववारो लक्ष्यते इत्युक्तम्। यँय्यम्यते यम्यते तपरत्वसामर्थ्याद्भूतपूर्व दीर्घस्यापि न। (पा०अष्ट० अ०७ पा० ४सू० ८५)

*(प०टि०)।। "इन्द्र लोके महद्दुःखं प्राजापत्ये तथैव च।
विष्णु लोके च रौद्रे च दुःखमेव विचारतः।।" इति।।

तिष्ठतु तावदिदं। स्वर्गात्पतनावसरे तेषां निरतिशयमेव दुःखं येनाऽम्मयं स्वर्गिशरीरं द्रवीभूतं जलभावमापद्यत इत्याह-दुःखमिति।। स्वर्गात् = ऊर्ध्वलोकात्, प्रपाते = अवरोहणे प्रसक्ते दर्शितलक्षणदुःखं, ततस्सानुशयानामेवाऽवरोह श्रवणात् कपूयाऽनुशयाऽवशेषे बहुविधनरके = रौरवकुम्भीपाकादौ चिरकाल भोग्यं दुःखं। रमणीयाऽनुशय मात्राऽवशेषेऽपि संपिण्डितकरण ग्रामाणामेव मार्गपर्व सम्बन्धादन्तरा दुःखाऽभावेऽपि वायु-धूमाऽभ्र-वृष्टि-जल क्रमेण ब्रीहि-यवादि भावमापद्य रेतस्सिग्देह सम्बन्धाऽनन्तर योषिति गर्भाकार परिणामे करणानां वृत्तिलाभाद्गर्भवासे नरकादप्य-तिशयितं दुःखं। तच्च प्रसिद्धं गर्भोपनिषदि, पुराणेषु च। ततो जन्मकाले प्रसूतिवायुविपीडनान्मरणोपमं दुःखमनुभूय मूर्च्छितस्य जन्मोत्तरकालमपि न दुःखविश्रान्तिरित्याह-निस्स्वातन्त्र्येत्यादिना। शिशोर्भावः शैशवं तत्रापि स्वातन्त्र्यस्या-ऽभावो निस्स्वातन्त्र्यमस्वाधीनचेष्टत्वान्मशकमत्कुणदंशादिनिवारणाऽक्षमता। अशितुमिच्छा अशनाया = क्षुत्। ग्रहाः = बालग्रहः। गदाः = रोगाः, दन्तजन्मादिषु प्रसिद्धाः। रुदितं = रोदनं, शिशूनां धैर्यहेतुविवेकाऽभावात्पुनः पुनारोदनेनापि दुःखबाहुल्यं प्रसिद्धम्। एतैः प्रकारैर्दुःखमेव, न सुखलेशोऽप्यस्तीति भावः।। यद्यप्यस्वातन्त्र्यादीन्युत्तरावस्थास्वपि सन्त्येव, तथापि बाल्ये तदतिशय इत्युपन्यस्तानि। एवमुत्तरत्रापि। यत्र तारुण्ये सुखसंभावनापि स्यात्तस्मिन्नपि दुःखानि दर्शयति-तारुण्य इति।। तरुणो मध्यमवयाः, तस्यभावस्तारुण्यं तत्राऽप्यमर्षः = क्रोधः येन दिवानिशं दन्दह्यमान इव भवति। गुरुद्विज-वधाऽऽदिमहापापान्यपि करोति। लोभः = वित्तस्नेहोत्कर्षः, येन दिवानिशमर्जनाय बहुदुःखाऽऽयाससाध्येष्वपि कर्मसु प्रवर्तते, रक्षणाय च यतते, व्ययाच्चाऽङ्गच्छेदादिव बिभेति, वित्तस्य नाशे च विदीर्णहृदयो म्रियत इव। सुवर्णस्तेयादिपातकेष्वपि प्रवर्तते। व्यसनं = रागादिप्राबल्यप्रयुक्ता स्त्रीद्यूताद्यासक्तिः। यया हि कुलशील-मानलज्जावित्तनाशाद्यप्यगणयन् गुरुतल्पगमनादिष्वपि सज्जते। परिभवः = शत्रु-स्वजनादि-कृत-तिरस्कारः। उद्वेगः = राजचोराऽग्न्याद्युपप्लवव्यग्रता, इत्यादयो धनिनां दुःखहेतवः। दरिद्राणां तु दारिद्यमपि, यन्मरणाद्वरमित्याचक्षते। एतैर्निरन्तरं दुःखम्। चरमे वयसि तु दुःखस्य पराकाष्ठेति दर्शयति-वार्धक्ये इति। कुत्सितो

*अयं चश्लोको व्यासाचार्येण कुत्रोक्त इति बहुधा विमृश्यमानोपि न ज्ञातुं शक्यते।

वृद्धो वृद्धकः, तस्य भावो वार्धक्यं, तत्र शोकः = इष्टपुत्रदारादिवियोगादन्तर्दाहः, मोहः = विस्मरणशीलता। इन्द्रियविलयः - इन्द्रियाणां = चक्षुरादीनां विलयः = विकारपूर्वको नाशः। दन्तादिनाशस्याप्युपलक्षणमेतत्। गदाः = दीर्घरोगाः। दिक्प्रदर्शनं चैतत्। दुःखस्थानानामानन्त्यात्। एतैर्दुःखम्। अन्ते = मरणे त्वतिशयितं दुःखमतिदुःखम्। सर्वाङ्गीणस्य प्राणस्य हृदये उपसंहारकाले सहस्रवृश्चिक-दंशजन्यदुःखोपमं दुःखमिति पुराणेषु प्रसिद्धम्। सर्वोत्कृष्टे मनुष्यदेहेऽप्येतादृशं दुःखम्, किं वक्तव्यं स्थावरादिजन्मस्विति भावः।।५३।।

मरणाऽनन्तरमपि पुनः पूर्ववदुच्चावचदुःखपरम्परा तदवस्थैव, तद्धेतोः कामकर्मवासनाश्रयाऽज्ञानस्याऽविच्छेदादिति दर्शयंस्तद्विच्छेदायाऽनुकम्पया श्रुतिशास्त्राऽऽचार्यप्रवृत्तिं दर्शयति-

मू०।। इत्थं यः कर्मबद्धो भ्रमति परवशः प्राणभृज्जंन्मसङ्घैः-
र्दुःखस्याऽन्तं न वेत्ति स्मरति न च जनिव्रातमज्ञानयोगात्।
तं सर्वाऽनर्थमूलप्रशमनविधिना स्वात्मराज्येऽभिषेक्तुं
तात्पर्येण प्रवृत्ताश्श्रुतिशिखरगिरस्सूत्रभाष्यादयश्च ।।५४।।

इत्थमिति।। यः = परमात्मा, अज्ञानयोगात् = कामकर्म वासनाबीज-संभृताऽविद्यातादात्म्याध्यासान्निमित्तात्, प्राणभृत् = जीवस्सन्, कर्मबद्धः = कर्मभिः = वासनादिसंवलनात्त्रिवृद्रज्जुस्थानीयैः, बद्धः = परिच्छेदपारवश्याद्यापादितः, अत एव परेषाम् = अनात्मभूतदेहेन्द्रियादीनां वशः = अधीनस्सन् इत्थं = दर्शित-प्रकारेणाऽनादिकालादारभ्य, भ्रमति = घटीयन्त्रवदूर्ध्वाधोलोकेषु मुहुः परि-वर्तनेनाऽवतिष्ठते। दुःखस्यच = उक्तलक्षणस्य, अन्तं = अवधिं, न वेत्ति = न जानाति। जनिव्रातं = प्रागनुभूतजन्मपरम्परां च, न स्मरति = सुप्त एव चोरैर्भूषणाद्यपहाराय बध्वा स्वदेशाद्देशान्तरमभिनद्धाक्ष आनीतस्तथैवाऽरण्ये विसृष्टः (१)कान्दिशीकः पुरुष इव रोदितीत्यर्थः। यथा तं पुरुषं केचिद्दयालवोऽध्वगाः बन्धनात्प्रमुच्य विसृज्याऽक्षिणी तद्देशमार्गं दर्शयितुं प्रवृत्ताः, तथैव श्रुतिशास्त्राऽऽचार्य-

(१) कान्दिशीक इति = कां दिशां यामीति वदनभयात् पलायतः पुरुषः।

इति श्रीपरमहंस परिव्राजकाचार्य श्री स्वामि ब्रह्मानन्दगिरि पूज्यपाद शिष्येण विरक्तशिरोमणि परमहंस श्री स्वामि वामदेवेन विरचितायां श्री वामदेवप्रसादिन्याख्य टिप्पण्यां अध्यारोपाख्यं प्रथमं प्रकरणं सम्पूर्णम्।

शुभमस्तु

।नमः शिवाय।।

प्रवृत्तिः, तद्दर्शितदिशैव वक्ष्यमाणविचारलक्षणया प्रत्यगभिन्न सच्चिदानन्दाऽद्वयं ब्रह्मसाक्षात्कारात् आत्यन्तिकाऽनर्थ निवृत्त्युपलक्षित निरतिशयाऽऽनन्दलक्षण-परमपुरुषार्थाऽवाप्तिरित्याह-तमिति। तं = तथाभूतं जीवं, सर्वाऽनर्थमूलप्रशमन-विधिना = जीवभावादीनां सर्वेषामनर्थानां मूलस्य = निदानस्य अज्ञानस्य ज्ञानेन प्रशमनविधिना = कार्यैस्सहोच्छेदसम्पादनेन स्वात्मराज्ये स्वः = निरवच्छिन्न सच्चिदानन्द स्वरूपमात्रलक्षण याथात्म्येनाऽवशिष्टो य आत्मा प्रत्यगात्मा, तद्रूपे राज्ये सर्वाऽऽधिपत्ये सुखानां तत्रान्तर्भावाद्राजभावे, अभिषेक्तुं इवाभिषेक-तुं = प्रतिष्ठापयितुं तात्पर्येण = अनन्यपर्यवसानलक्षणेन षड्विधलिङ्गावगमितेनैदम्पर्येण, श्रुतिशिखरगिरः = वेदान्तवाक्यानि सूत्राणि = वैयासिकानि, भाष्याणि = भग-वत्पादप्रणीतानि शारीरकमीमांसादीनि। आदि पदात्प्रस्थानानि प्रकरणानि स्वस्वाचार्योपदेशाश्च प्रवृत्ता इत्यर्थः। सूत्रादीनां च लक्षणान्याहुः-

"*स्वल्पाऽक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।
सूत्रार्थो वर्ण्यते यत्र वाक्यैस्सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।
शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदमविस्तरम्।।" इति।।

तथा च सूत्रकाराद्याचार्योपदर्शितदिशैव स्वस्वरूपलाभलक्षण-मोक्षावाप्तिरित्यर्थः। तथा च श्रुतिः-"यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रध्मायीताऽभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टस्तस्य यथाऽभिनहनं प्रमुच्य ब्रूयादेतां दिशं गंधारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येत, एव-मेवेहाऽऽचार्यवान्पुरुषो वेद" इति। श्रुतौ-गन्धाराः = देशविशेषाः। अतिजने = विजने, विसृजेत् चोरादिभिरिति शेषः। प्राङ्वोदङ्वाऽधराङ्वा = पूर्वोत्तराऽधोदिक्षु प्रध्मायीत = आक्रोशं कुर्यात्। विसृष्ट इत्यन्तमाक्रोशप्रदर्शनं, तस्य यथेति कश्चिद्दयालुरध्वग इति शेषः। अभिनहनं = बन्धनं, पण्डितः = वाक्यार्था-ऽवधारणकुशलः, मेधावी = उहापोहकुशल इति शिष्यप्रज्ञाऽऽवस्यकत्वं दर्शयति।

*अल्पाक्षरेति ग्र० पा०।

अत्रगन्धारप्रतिपत्तिदार्ष्टान्तिकत्वेनाऽऽत्मवेदना निर्दिशन्ती श्रुतिः विस्मृतकण्ठ-चामीकरन्यायेनाऽऽत्मनो ज्ञानमेव लाभो नाऽन्यादृश इति स्पष्टतरं दर्शयतीति ज्ञानलाभ एवाऽऽत्मसाम्राज्यलाभ इति सिद्धं।।

विधूय विमतध्वान्तमान्तरे परिशेषिते।
प्रतीचि जगदध्यासादध्यारोपोऽत्र दर्शितः।।५४।।

***

इति श्रीमत्परमहंस परिव्राजकाऽऽचार्य श्रीमद्रामचन्द्र सरस्वती
पूज्यपाद शिष्येण, श्रीसर्वज्ञसरस्वती पूज्यपाद प्रशिष्येण
गङ्गाधरसरस्वत्याख्याभिक्षुणा विरचितायाम्
आत्मसाम्राज्यसिद्धिव्याख्यायां
कैवल्यकल्पद्रुमाख्यायाम्
अध्यारोपप्रकरणाख्यं
पूर्वार्धं सम्पूर्णम्।
शुभमस्तु
नमः शिवाय



ॐ श्रीगणेशाय नमः।।

अथ अपवाद प्रकरणम्।।

***

मू०।। वरमभयमुदारं पुस्तकं चाऽक्षहारं
मणि वलय मनोज्ञैः पाणिपद्मैर्दधाना।
सित वसन ललामा कुन्द मुक्ताऽभिरामा
वसतु शशिनिभाऽऽस्या वाचि वाग्देवता नः।।१।।

मू०।। चूडाऽवतंसीकृत चन्द्रखण्डं गौरी करोल्लालित चारु शुण्डम्।
भक्तौघ विघ्न प्रशम प्रचण्डं भजे निजे चेतसि वक्रतुण्डम्।।२।।

मू०।। पङ्कोत्थं न चिरश्रि, षट्पद गणैरामर्दितं चाऽङ्घ्रिभि-
श्चञ्चत्कण्टक नाल मञ्चति विधौ मौनव्रतीत्यन्वहम्।
अम्भोजं हसती इवेन्दु विजयि प्रोद्यन्नखानां श्रिया
श्रीमद्देशिक वर्य चारु चरणाम्भोजे भजे नित्यशः।।३।।

पूर्व परिच्छेदे सर्ववादि विप्रतिपत्तिनिरास पुरस्सरं तत्पदार्थस्य मायाशबल ब्रह्मणः सर्व प्रपञ्चाऽभिन्न निमित्तोपादान कारणत्व व्यवस्थापनेन, त्वंपदार्थस्य प्रत्यगात्मनश्च देहेन्द्रियाद्यतिरेकेण, तथा प्रसाधितस्याऽविद्याद्यध्यास प्रयुक्त कर्तृत्व भोक्तृत्वाद्यनर्थप्रपञ्चनेन च शुद्धे ब्रह्मणि वियदादि लक्षणस्याऽवस्थात्रय लक्षणस्य च प्रपञ्चस्याऽध्यारोपो दर्शितः। अथेदानीं तदपवादेन पदार्थौ परिशोध्य वाक्यार्थ निरूपयितुमिदमारभ्यते।।

ननु यद्यपोद्यमेव जगत् ब्रह्मणि, तर्हि किमर्थमध्यारोप्यते? "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन विनैवाऽध्यारोपं अलौकिकमपि ब्रह्म स्वर्गाऽपूर्वादिकमिव साक्षादेव कुतो न बोध्यते। सत्यमेवं स्यात्, यदि ब्रह्म स्वर्गाऽपूर्वादिकिमिव तटस्थं स्यात्। न तु तथा। सर्वाधिष्ठानत्वात्सर्वान्तरं हि ब्रह्म रज्जुरिव स्वाध्यारोपित सर्पादिः। न च तदारोपितं मनपोद्य वास्तवेन रूपेण निदर्शयितुं शक्यम्। न हि सर्पादिकमप्रत्याख्याय रज्जुतत्त्वं निदर्शयितुं शक्यम्। न च श्रुति युक्ति कदम्बैर्गत्यन्तर प्रतिषेध पुरस्परं ब्रह्मण्येवाऽध्यारोपमनि-श्चाय्य प्रत्यक्षादिप्रबलबहुतरप्रमाण प्रत्युपस्थापितं जगदपवदितुं शक्यमिति निष्प्रपञ्च

ब्रह्म प्रतिपत्तावुपायान्तराऽसंभवात्तदुपायत्वेन ब्रह्मण्यध्यारोपं प्रपञ्च्य प्रथमं युक्तिभिरपविवदिषुरेकदेश्यभिमतं सविशेष ब्रह्मण एव लक्ष्यत्वं, जगज्जन्मा-दिकारणत्वस्य तन्मात्रलक्षणत्वमित्येतच्च निराचिकीर्षुर्दर्शिताऽभिन्न निमित्तोपादान कारणत्वस्य तटस्थ लक्षणत्वं, प्रत्यगभिन्न सच्चिदानन्दाऽद्वय स्वरूप निर्विशेष ब्रह्मणश्च लक्ष्यत्वं, श्रुति तात्पर्योद्घाटनेन प्रदर्शयितुं प्रतिजानीते— हेतुत्वमिति।। अथवा ननु श्रुति सूत्रादि दर्शित दिशाऽपि कथं निर्विशेष ब्रह्माऽवगतिः? ब्रह्मणो लक्षणाद्यभावेन तैरपि बोधयितुमशक्यत्वात्। न च जगत्कारणत्वं तल्लक्षणम्, अतद्धर्मत्वात्। न हि श्रृङ्गं शशस्य लक्षणं, कृतकत्वं वा नित्यस्य। न च नित्यत्वादिकमेव तल्लक्षणं, तस्याऽनुपलब्ध चरत्वात्। प्रसिद्धं हि लक्षणं भवति। नाऽत्यन्ताऽप्रसिद्धम्। एवं च शब्दोऽप्यत्र न क्रमते। अत्यन्ताऽप्रसिद्धस्य निर्विशेषस्य च, पद वाक्य गोचरत्वाऽदर्शनात्। अतो न ब्रह्म विचारयितुं प्रतिपादयितुंवा शक्यमित्याशङ्कामपनयन् अतद्धर्मस्यापि तल्लक्षकत्वाल्लक्षणत्वं सदृष्टान्तं प्रदर्श्याऽत्यन्ताऽप्रसिद्धिं च वारयंल्लक्ष्य स्वरूपं प्रतिजानीते—

मू०।। हेतुत्वं लक्षणं यद्गदितमिदमुपादान कर्तृत्व रूपं
ताटस्थ्यादास्पदं स्वं गमयति परमं ब्रह्म शाखेव चन्द्रम्।
एवं लक्ष्यं च सच्चित्सुखवपुरखिल द्वैतहीनं सुसूक्ष्मं
सत्य ज्ञानादि मन्त्रोदितमखिल मनो वागतीतं गुहास्थम्।। १।।

हेतुत्वमिति।। पूर्वं ''यस्मादुत्पत्तिगुप्ती'' इति श्लोके यत् = जगज्जन्मादिहेतुत्वं ब्रह्मणो जिज्ञास्यत्वेन प्रस्तुतस्य लक्षणं गदितं = व्यक्तमभिहितं, तदिदं कुलालादेर्घटादिकं प्रतीव न निमित्तकारणत्वमात्रम्, नापि मृदादेरिवोपादानत्वमात्रम्। कालाऽदृष्टादौ साङ्ख्याऽभिमतप्रकृतौ चाऽतिव्याप्तेः। किन्तु जीवत्पुरुषस्य स्वकेशलोमादिकं प्रतीव उपादानकर्तृत्वरूपम् = उपादानं च तत्कर्तृचेति कर्मधारयोत्तरभावप्रत्ययेन सामानाधिकरण्येनैकपद प्रवृत्तिनिमित्त विशिष्टाऽपरपद-प्रवृत्तिनिमित्ताऽभिधानात् उपादानकारणत्वविशिष्टकर्तृत्वरूपमित्यर्थः। इदमेवाऽभिन्न-निमितत्तोपादानत्वमित्युच्यते। उपादानत्वंच-(१)स्वतादात्म्याऽऽपन्नकार्यजनकत्वम्।

(१) स्वतादात्म्यापन्नकार्यजनकत्वमुपादानत्वमिति।। अत्र कार्यजनकत्वमुपादानत्वमित्येतावन्मात्रोक्ते निमित्तकारणभूते कुलादावतिव्याप्तिस्तद्वारणाय तादात्म्यापन्नमित्युकतम्। तावत्युक्ते पुनरपि दोषतादवस्थ्य स्वकारणीभूतया प्रकृत्या सह तादात्म्यापन्नं जगदात्मकं कार्यं प्रति मृत्तादात्म्यापन्न घटं प्रति कुलालमिव कालादीनां कारणत्वात्तद्वारणाय। स्वेति तादात्म्यविशेषणम्। स्वेति चोक्तौ तादात्म्येति चानुक्तौ कालिक विशेषणता सम्बन्धेन स्वसम्बद्धजगत्कारणत्वात्पुनर्दोषतादवस्थ्यमिति तद्वारणाय तादात्म्येत्यप्युक्तमिति दिक्।।

कर्तृत्वं च कार्योत्पादनाऽनुकूल ज्ञानशक्तिसम्पन्नत्वं। नतु कृतिमत्त्वम्। नित्यकृत्यनभ्युपगमेनेच्छादेः कृतिसाध्यत्वाऽयोगेन चेश्वरे तदकर्तृत्वप्रसङ्गात्। तदिदमुपादानकर्तृत्वरूपं लक्षणं न "सत्यं ज्ञानमनन्तं ब्रह्म" इति वत्स्वरूपलक्षणम्। न वा "लम्बकर्णो देवदत्तः" इतिवत्स्वविशिष्टस्य। किन्तु स्वबाधाऽवधेरधिष्ठा-नस्येत्याह आस्पदमिति।। स्वं = स्वीयमास्पदं कल्पनाधिष्ठानं, परमं = अबाध्य-त्वात्सर्वोत्कृष्टं शुद्धं ब्रह्म, गमयति = लक्षयतीत्यर्थः। तत्र हेतुमाह— ताटस्थ्यादिति। तटे तिष्टतीति तटस्थस्तद्भावस्ताटस्थ्यं तस्मादिव ताटस्थ्यात्। यथा पिपासितपुरुषेण क्व नदीति पृष्टः कश्चिद्दूरे निम्नदेशस्थां नदीं साक्षात्प्रदर्शयितुमशक्नुवन्नदीतटस्थं वृक्षं दर्शयति "यत्रायंवटः पिप्पलोवा" इति, तन्मूलमुपसृप्तोऽयं नदीं द्रक्ष्यतीति, तत्र यथा नद्यसम्बद्धोऽपि वृक्षो नदीताटस्थ्यान्नदीप्रतिपत्त्युपाय इति नद्याः लक्षकत्वाल्लक्षणं, तद्वज्जगत्कारणत्वमपि ब्रह्मलक्षणमित्यर्थः।।

ननु वृक्षस्साक्षात्सम्बन्धाऽभावेऽपि तटघटितपरम्परासम्बन्धसत्त्वात्सामीप्याच्च नदीं लक्षयतु। न त्वसङ्गे ब्रह्मणि वस्तुतः कारणत्वस्य परम्परासम्बन्धः, सामीप्यं वा अस्तीति वैषम्यमित्याशङ्क्य वास्तवसम्बन्धाऽभावेऽपि कल्पितसम्बन्धादपि लक्षकत्वोपपत्तिरित्यभिप्रेत्य तथाविधस्यापि लक्षणत्वे दृष्टान्तमाह— शाखेति।। यथाऽतिदूरस्थत्वाच्चन्द्रेणाऽत्यन्ताऽसम्बद्धापि तत्सम्बन्धित्वेनोपदर्शक पुरुषबुद्धि-परिकल्पिता शाखा द्रष्टुरपि तादृशबुद्धिजननद्वारा चन्द्रसाक्षात्कारहेतुत्वाच्चन्द्रं लक्षयतीत्युच्यते, तद्वदित्यर्थः।।

ननु जगत्कारणत्वलक्षणेन स्वविशिष्टं सगुणं ब्रह्मैव लक्ष्यताम्, सर्वे वेदान्ताश्च सविशेषैकपरास्सन्तु, अन्यथा गिरिकूटप्रासादाग्रादिभिरपि चन्द्रलक्षणात्, शाखयैवचन्द्रो लक्षणीय इत्यनियमवत्सर्वस्य त्वन्मते ब्रह्मण्यध्यस्तत्वाद्येन केनचित्पदार्थेन स्वाधिष्ठान ब्रह्मलक्षणसंभवात् जगत्कारणत्वेनैव सर्वश्रुतिषु ब्रह्मलक्षणनियमो न स्यादिति शङ्कायाः परिहारं च सूचयन्निर्विशेषमेव तल्लक्ष्यं श्रुतितात्पर्यसिद्धमिति दर्शयति— एवमिति।। यथेदं लक्षणं कल्पितसम्बन्धेनैव लक्षकम्, एवमेतस्य लक्ष्यमपीत्यर्थः। कुतः? यतस्तदखिलद्वैतहीनं— द्वौ = इतो द्वीतः तद्भावः, द्वयोर्भावो द्विता सैव वा द्वैतं = सजातीयादिभेदो द्वित्वपृथक्त्वादि च। अखिलेन तेन हीनं = कालत्रयेऽप्यसम्बद्धमित्यर्थः। "शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" "एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम्" इत्यादिश्रुतिभिः निर्विशेषस्यैव मुक्तये ज्ञेयत्वोक्तेः लक्षणस्य च तद्बोधोपायत्वेनाऽवतारादितिभावः।

"तमेतं वेदाऽनुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिना आत्मज्ञानाय बहुतरप्रयत्न उपदिश्यते। स च परमसूक्ष्मत्वाद्दुर्विज्ञेयस्य निर्विशेषस्यैव लक्ष्यत्वे उपपद्यते। सविशेषस्य प्राणादेरिवोपदेशमात्रेणसुग्रहत्वादित्यभिप्रेत्याह–सुसूक्ष्ममिति।। स्थूलेषु पृथिव्यादिपञ्च-भूतेषूत्तरोत्तरं जलादीनि सूक्ष्माणि, तेभ्योऽप्यपञ्चीकृतभूतानि तद्वत्, ततोऽप्यव्यक्तं ततोऽपि तदधिष्ठानं ब्रह्म। तत्र पृथिवीजलयोस्स्थूलयोरपि क्षीरोदकादाऽवन्योन्यसंवलने जलादि पृथक्त्वेन दुर्ग्रहं, किं पुनः परमसूक्ष्मं ब्रह्मेति भावः।। तथाच श्रुतिः—

"यत्परं ब्रह्म सर्वात्मा विश्वस्याऽऽयतनं महत्।
सूक्ष्मात्सूक्ष्मतरं नित्त्यं तत्त्वमेव त्वमेव तत्"।। इति।
"नित्यं विभुं सर्वगतं सुसूक्ष्मं तद्भूतयोनिं परिपश्यन्ति धीराः" इति च।

तथाचेदृशं यत्सच्चित्सुखवपुः = सच्चिदानन्दस्वरूपं ब्रह्म तदेव लक्ष्यमित्यर्थः। उपक्रमादिपर्यालोचनेऽपि प्रकृत लक्षणस्य निर्विशेषोक्तरूप ब्रह्मलक्षकत्वं स्फुटं प्रतीयत इति दर्शयति— सत्यज्ञानादिमन्त्रोदितमिति। "यतो वा इमानि भूतानिजायन्ते" "तस्माद्वा एतस्मादात्मन आकाशस्संभूतः" इत्यादि लक्षणवाक्यं हि तैत्तिरीयाणामुपनिषदि श्रूयते। तत्र हि "सत्यं ज्ञानमनन्तं ब्रह्म" इति कण्ठोक्त्यैव सच्चिदद्वयं सर्वकामाऽवाप्तिलिङ्गेन च परमानन्दरूपं ब्रह्मोपक्रान्तमिति भावः। अखिलमनोवागतीतं = "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति वाङ्मनसगोचरसर्वधर्मशून्यपरमानन्दरूपं तदेवोपसंहृतमित्यर्थः। गुहास्थम् = अपरि-च्छिन्नं स्वप्रकाशमपि ब्रह्म, स्वान्तः प्रवेशे रूपान्तराऽऽपादनेन गूहति = संवृणोतीति गुहा = कोशपरम्परा तस्यां प्रत्यग्रूपेण स्थितम्। आनन्दमय-कोशरूपाऽव्यक्त स्याप्यधिष्ठानत्वेन "ब्रह्मपुच्छं प्रतिष्ठा" इति मध्ये परामृष्टमित्यर्थः। तदेव चोत्तरत्राऽभ्यस्तं सोपपत्तिकं स्तुतं चेति तस्याश्श्रुतेः निर्विशेष एव तात्पर्यं नान्यत्रेति तस्यैव लक्ष्यत्वमुचितं, न सविशेषस्येति भावः। सर्वश्रुतिषु जगत्कारणत्वस्यैवलक्षणत्वेन कीर्तनं तु सत्यत्वाऽऽनन्त्ययोरुपपादनायेति वक्ष्यामः।। १।।

तत्र लक्ष्यस्याऽद्वितीयत्वोपपादनाय जगतो मिथ्यात्वं प्रतिपिपादयिषुः प्रथमं कारणस्वरूपपर्यालोचनेन तत्प्रतिपादयति—

मू०।। कूटस्थं ब्रह्म विश्वं जनयति न विना मायया सा च मिथ्या
तस्मिञ्छब्दप्रसिद्धेः परसमधिगमात्तन्निवृत्तिश्रुतेश्च।
सैवाऽविद्या मृषार्था अपि समधिगताः कार्यदक्षाः प्रपञ्चः
तस्मान्मायूरपिञ्छच्छविरिव गहनो ब्रह्मसंविद्विवर्तः।। २।।

कूटस्थमिति।। कूटमिव स्थितं कूटस्थं, कूटम् = अयोभिघाताऽधिकरणम्। तद्यथा स्वस्मिन्ननेकशतलोहादिविकारोदयेअधिष्ठानभावेन निमित्तभूतमपि स्वयं निर्विकारत्वात्स्वरूपादप्रच्युतं, तथैव निर्विकारमित्यर्थः। तथाविधमपि ब्रह्म विश्वं = कृत्स्नं जगज्जनयतीति श्रुत्यादिप्रमाणैरवगम्यते। तथा च श्रुतं निर्विकारोपादानकत्वमेव जगतो मिथ्यात्वे पर्यवसन्नमिति भावः एवं परिणाम्युपादानमायास्वरूपपर्यालोचनेऽपि तदेव पर्यवस्यतीत्यभिप्रेत्याह— न विना माययेति। निर्विकाररज्जुशुक्त्यादेः सविकाराऽज्ञानगोचरत्वेनैव सर्परजताद्यु-पादानत्वदर्शनात्। ब्रह्मणोऽपि तथात्वात् "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुत्यापि जगदाकारपरिणाम्यविद्यागोचरत्वेनैव ब्रह्मणो जगत्कारणत्वोपपादनादित्यर्थः। तथाचोक्त सर्परजतादिवदेव मिथ्यात्वसिद्धिरिति भावः।। नन्वस्तु जगतो मायापरिणामत्वं, तथापि न मिथ्यात्वसिद्धिः, मायायाः "स्वाभाविकी ज्ञान बलक्रिया च" "देवाऽऽत्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतिषु ब्रह्मात्मत्वस्वभावत्वयोश्श्रवणेन परमार्थसत्यत्वात्, तत्परिणामस्यापि तत्समसत्ताकत्वाऽनपायादित्याशङ्क्य तस्याः मिथ्यात्वमुपपादयितुं प्रतिजानीते- साचेति। सा = मायापि, मिथ्या = (१)स्वाधिकरणवृत्तिव्याप्यवृत्यभावप्रतियोगिनीत्यर्थः। अयं भावः— न त्वदुदाहृतश्रुतेस्त्वदुत्प्रेक्षितोऽर्थः। तस्याः निर्गुणचिदेकरस-ब्रह्मस्वभावत्वे "स्वगुणैर्निगूढां, ज्ञानबलक्रियाच" इति त्वदुदाहृतवाक्यशेषविरोधात्। "न तस्य कार्यं करणं च विद्यते" "साक्षी चेता केवलो निर्गुणश्च" इति पूर्वोत्तरसन्दर्भविरोधात्। स्वगुणैर्निगूढामिति गुणानां स्वपदविशेषणस्वारस्येन ब्रह्मसम्बन्धव्यावर्तनाच्च। तस्मात् "देवात्मशक्तिम्" इत्यस्य देव एवात्मा तात्त्विकं रूपं यस्याः, कल्पितस्याऽधिष्ठानव्यतिरेकेण तात्त्विकरूपाऽभावादिति वा, अन्योन्याऽध्यासाद्देवस्य सर्गादिव्यवहारनिर्वाहकत्वाच्च उपचाराद्देवस्य स्वरूपभूतामिति वाऽर्थः। एवं "स्वाभाविकी" इत्येतदप्यनन्याधीनत्वपरमिति न कश्चिद्दोषः। मायाशब्दस्य बाध्येरूढत्वादपि तस्याः मिथ्यात्वमित्यभिप्रेत्याह— तस्मिन्निति।।

---

(१) स्वाधिकरणवृत्तिव्याप्यवृत्त्यभावप्रतियोगित्वमेव मिथ्यात्वमिति। तत्र प्रतियोगित्वमेव मिथ्यात्वमित्येतावन्मात्रोक्तौ सम्बन्धादि प्रतियोगिनि गुणादौ अतिव्याप्तिस्यात्तद्वारणायाभाव-प्रतियोगित्वमित्युक्तमव्याप्य वृत्त्यभावप्रतियोगिनि संयोगादौ तद्वारणाय व्याप्य वृत्तीत्यभावविशेषणम्। व्याप्यवृत्त्यभावप्रतियोगिनि परमतेनावृत्तिस्वभावगगनादौ रूपादौ चातिप्रसङ्गवारणाय घटत्वादि जातौ च तद्वारणाय स्वाधिकरणवृत्तीति चाभाव विशेषणम्दत्तम्। तथा च गगनादीनामपि वेदान्तिनये स्वाधिकरण ब्रह्मवृत्यभाव प्रतियोगित्व सम्भवान्न दोषः।।

तस्मिन् = मिथ्याभूतेऽर्थे मायाशब्दस्य बहुशः प्रयोगप्रसिद्धेरित्यर्थः। ऐन्द्रजालिकोपदर्शितहस्त्यश्वादौ हि "मायेयम्" इति सर्वजनव्यवहारः, सूत्रकृतोऽपि (१)"माया मात्रं तु कार्त्स्न्येनाऽनभिव्यक्तस्वरूपत्वात्" इति स्वाप्नरथादौ मायाशब्दप्रयोगः,

"माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैवं मां मन्तुमर्हसि।।"

इति भगवतोऽप्यवास्तवत्वेन प्रतिपिपादयिषिते विश्वरूपे मायाशब्दप्रयोग इत्यादिप्रसिद्धेरिति भावः।। एतेन "मन्त्रौषधादिरेवैन्द्रजालिकस्य माया" इति कस्यचिदुक्तिर्निरस्ता, तत्र तथाप्रसिद्ध्यभावात्। भ्रान्तिज्ञानमेव मायेति चेत्। न। "मायां तु प्रकृतिं विद्यात्" इति प्रकृतित्वश्रवणविरोधात्। ईश्वरस्याऽभ्रान्तत्वेन मायिनं तु महेश्वरमित्यस्याऽनुपपत्तेश्च। तस्मात् "नासदासीन्नोसदासीत्तदानीं तम आसीत्तमसा गूढमग्रे यदा तमस्तन्न दिवा नरात्रिर्न सन्नचाऽसन् शिव एव केवलः"

"दैवीह्येषा गुणमयी मम माया दुरत्यया।
"माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः।।"

इत्यादि श्रुतिस्मृतिरूप धर्मिग्राहकमानैरनिर्वचनीयत्वज्ञानावरणत्वभ्रान्तिहेतुत्वादिना मायाशब्दविषयत्वेन च मिथ्याभूतैव सा सिध्यतीति भावः।। तत्त्वज्ञानमात्रेण निवृत्तिश्रवणादपि तस्या मिथ्यात्वमित्याह— परेति।। परस्य = ब्रह्मणः प्रत्यगभेदेन सम्यगधिगमात्, तस्याः = मायाया निवृत्तिश्रुतेः = "तस्याऽभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चाऽन्ते विश्वमायानिवृत्तिः"(२) इति कार्यैस्सह निवृत्तिश्रवणादित्यर्थः।

---

(१) मायामात्रं त्विति।। ननु य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणाः इति। अथो खल्वाहुर्जागरितदेशवास्यैष इति यान्येव जाग्रत्पश्यति तानि सुप्त इति। प्राज्ञात्मकर्तृकत्वं जाग्रत्समानस्वभावत्वं च सन्धिस्थानस्य स्वप्नस्य श्रुतिदर्शयत्यतो जाग्रद्वत्स्वाप्नोपि सत्य एवेति संशये सत्याह मायेति। सन्ध्येसृष्टिर्मायामात्रमेव न परमार्थ गन्धोपि, कार्त्स्न्येन परमार्थवस्तु धर्मेणोत्पत्तिस्थित्यादि योग्य देशकालाद्यवच्छिन्नतयाऽनभिव्यक्तस्वरूपत्वात्स्वप्नस्य मिथ्यात्वमेव शुक्तिरजतादिवन्न सत्यत्वगन्धोपि इति भावः।। (ब्र० सू० अ० ३ पा० २ सू० ३)

(२) तस्याभिध्यानादिति।। तस्य स्वप्रकाश ब्रह्मणोऽभिध्यानादेवादिसर्वशरीरेषु स्वरूपप्रदत्त्वेनानन्दरूपतया कारणत्वेन साक्षित्वेन च वर्तते इति चिंतनात्संसारे पारमार्थिकत्वापादकाज्ञानांशनिवृत्तिः। योजनात्कार्यकरणसंघातसाक्षिभूतो यो हरः स एवाहमस्मि "इत्यात्माभेदे चित्तसंयोजनात्। तथा तत्त्वभावात्प्रत्यगभिन्न ब्रह्मसाक्षात्काराद्द्वैतभ्रमतन्मूलाविद्यानिवर्त्तकादित्युभाभ्यां जन्मान्तरापादकाज्ञानांशनिवृत्तिः। अन्ते प्रारब्धकर्मान्ते तु द्वैत प्रतिभासमात्रनिर्वाहकनिखिलाविद्या निवृत्तिरिति श्रुतेरर्थः।

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।"

इत्यादिस्मृतिसङ्ग्रहार्थश्चकारः। ननु विद्याऽविद्ययोर्विरोधाद्विद्यया जीवाऽऽश्रिताऽविद्या निवृत्तिरुचिता। तत्कथमीश्वराऽऽश्रितमायाशक्तेर्निवृत्तिरित्याशङ्क्याह— सैवेति।। सा = मायैवाऽविद्या नान्येत्यर्थः। [१]तत्त्वावभासविरोधित्वे सति विपरीताऽवभासहेतुत्वरूपलक्षणैक्यादितिभावः।। नच स्वाश्रयव्यामोहहेतुरविद्या, तमव्यामोहयंत्यन्यव्यामोहहेतुर्मायेति लक्षणभेदाद्भेदोऽस्त्विति वाच्यम्। अव्यामोहस्य तत्त्वज्ञानप्रयुक्तत्वात्। अङ्गुल्यवष्टम्भादिना बुद्धिपूर्वकचन्द्रद्वित्वादिप्रतिभासे, दर्पणे मुखादिप्रतिभासे चाऽविद्याया अपि स्वाश्रयाऽव्यामोहदर्शनात्। अत एव [२]कर्तुस्स्वातन्त्र्यपारतन्त्र्याभ्यामपि न भेदप्रत्याशा। एतेनेश्वरस्याऽविद्याश्रयत्वे भ्रान्तत्वाऽऽपत्तिरपि निरस्ता। विरोधिज्ञानाऽनास्कन्दित-विपर्ययस्यैव भ्रान्तत्वाऽऽपादकत्वात्। अन्यथा भ्रान्तभ्रान्तिज्ञसङ्करापत्तेः। तस्मात् "तरत्यविद्यां वितताम्" इति प्रागुदाहृतस्मृतौ अविद्यां मायामिति सामानाधिकरण्यात्, ज्ञाननिवर्त्यत्वाच्च, न मायाऽविद्ययोर्भेदः। व्यवहारभेदस्तु स्वाश्रयव्यामोहाव्यामोहाद्युपाधिभेदादुपपादनीय इति विवरणाचार्याः। आचार्यवाचस्पतिमिश्रास्तु-प्रतिजीवमविद्याभेदमङ्गीकृत्य व्यष्टिरूपेणाऽऽश्रयतासम्बन्धेन जीवेषु साऽविद्येत्युच्यते, समष्टिरूपेण विषयतया तु ब्रह्मणि सा मायेत्याहुः। शुद्धचैतन्यमात्राऽऽश्रयविषया सेति सङ्क्षेपशारीरकाचार्याः। यथाहुः—

"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवति नाऽपि गोचरः।।" इति।

इत्थं च तूलाऽविद्याया अपि घटाद्यधिष्ठानचैतन्यमेव विषयः, न तु घटादि। जडस्य तस्य स्वतस्स्फुरणप्रसक्त्यभावेन तत्राऽऽवरणकृत्याभावादिति बोध्यम्।। ननु न मिथ्याभूतस्याऽर्थक्रियासामर्थ्यं, न हि शुक्तिरजतेन कङ्कणं कर्तुं शक्यं, न वा मृगतृष्णाम्भसि स्नातुं शक्यमित्याशङ्क्याह— मृषार्थाअपीति।।

---

(१) तत्त्वावभासविरोधित्वेसतिविपरीतावभासहेतुत्वमिति मायाऽविद्या साधारण लक्षणम्। तत्र विशेष्यमात्रोपादाने रजतादिभ्रमोत्तरजायमानभोडरादिभ्रमहेतौ संस्कारदोषादौ त्वतिप्रसङ्गः स्यात्तद्वारणाय विशेषणांशोपादानम्। विशेषण मात्रस्यलक्षणत्वे तु तमसिपटलादौ चातिप्रसक्तिवारणाय विशेषांशोपादानमितिभावः।

(२) कर्तुः स्वातन्त्र्यपारतन्त्र्याभ्यामिति। यत्र व्यवहारे कर्तुः स्वातन्त्र्यं तद्धेतुर्माया यत्रव्यवहारे कर्तुः पारतन्त्र्यं तद्धेतुरविद्येत्याभ्यामपि लक्षणाभ्यां न मायाविद्ययोर्भेदसिद्धिर्बुद्धिपूर्वकं स्वेच्छया क्रियमाणे चन्द्रद्वित्त्वादि प्रतिभासे दर्पणेमुखादिप्रतिभासे च जीवस्यापि स्वतन्त्रत्वात्तदीयभ्रमात्मकतथाव्यवहारहेतुभूताविद्यायां मायालक्षणस्यातिव्याप्तेरित्यर्थः।।

मृषार्था: = मिथ्याभूतपदार्था अपि, देवाऽसुरमायानिर्मितहस्त्यश्वादयो यावद्बाधं युद्धादिकार्येषु दक्षा: = समर्था: श्रुतीतिहासपुराणाद्याऽऽख्यायिकासु समधिगता:, स्वाप्ननद्यादौ च स्नानपानादि तदानीं सर्वानुभवसिद्धम्। शुक्तिरजतादेरपि पुरुषप्रवर्तकत्वाद्यर्थक्रियाकारिता काचिदस्त्येव, समीपोपसर्पणे विशेषदर्शना-त्तत्त्वसाक्षात्कारस्याऽवर्जनीयतयाबाध्यमानत्वात्तु तस्य न कङ्कणादिक्षमतेति भाव:।। इत्थं च तंतुद्वयवन्मायासमुच्चितं वा, मायाशक्तिकं वा, परिणममानमायाधिष्ठानं वा ब्रह्म जगदुपादानमस्तु, सर्वथापि मायेव दुर्निरूपस्वभावत्वाज्जगन्मिथ्यैवेत्याह तस्मादिति।। तस्मात् = उक्तहेतो:। प्रपञ्च: = ब्रह्मैव संवित् = शुद्धचैतन्यैकरसं परमार्थवस्तु तस्य विवर्त: = अन्यथा प्रतिभास:, तत्त्वादप्रच्युतस्य अन्यथाप्रतिभासो हि विवर्त: यथा सर्परजताद्यात्मना रज्जुशुक्त्यादे:। विवर्त इतिभावे कर्मणि च घञ्। तेन ज्ञानाऽध्यासविषयाऽध्यासयोस्सङ्ग्रह:। पूर्वाऽवस्थात: प्रच्युतस्या-ऽवस्थान्तरप्राप्तिस्तु परिणाम:। यथा मृत्कनकादे: पिण्डावस्थात: प्रच्युतस्य घटरुचकाद्यवस्थाप्राप्ति:।। यत्तु केचित्कारणविषमसत्ताकं कार्यं विवर्त:, तत्समसत्ताकस्तु परिणाम इत्याहु:, तत्कार्यात्मकविववर्तस्यैव लक्षणम्। अविद्याद्यनाद्यध्यासाऽव्यापनात्। एतेन सृष्टिश्रुतिप्रामाण्याद्ब्रह्मजगदाकारेण परिणमते इति कस्यचित्पक्ष: प्रत्युक्त:। सृष्टिश्रुतीनां विवर्तोपादानपरत्वेनाऽप्युपपत्ते:। किञ्च ब्रह्मणस्स्वरूपादप्रच्युतस्य जगद्भावाऽऽपत्त्युक्तौ विवर्तवाद एव शब्दान्तरेणोक्त: स्यात्। तत्प्रच्युतस्य तथोक्तौ जगद्व्यतिरेकेण ब्रह्माऽभावप्रसङ्गाज्ज्ञानेन प्रपञ्चबाधे सर्वशून्यताऽऽपत्तेश्च।। दुर्निरूपस्वभावत्वे दृष्टान्तमाह— मायूरेति।। मयूरस्यावयवो मायूरम् "अवयवे च प्राण्यौषधिवृक्षेभ्य:" इत्यनुवर्तमाने "प्राणिरजतादिभ्योऽञ्" इत्यञ्। तस्यपिञ्छस्य = बर्हस्य, छवि: = कान्ति:। यथा प्रकाशसा-मुख्यवैमुख्याद्युपाधिभेदाद्धरितेव, कपिशेव, नीलेव, रक्तेव, पाटलेव(१), धूसरेव, प्रतीयमाना वर्णविशेषात्मना दुरधिगमा, तथा प्रपञ्चोऽपि कारणत:, उत्पत्तिस्थिति लयत:, जातिगुणक्रियादित:, अवयवत:, उपचयाद्यवस्थात:, विशेष्यविशेषण विशिष्टोपहितोपलक्षितकेवलादिरूपत:, सम्बन्धत:, प्रति भासतश्च भेदाऽभेदसत्वा-ऽसत्त्वादिना वादिसहस्रैरपि निर्धारयितुमशक्यत्वाद्गहन: = दुर्विचिन्त्य:, ततो मिथ्यैवेत्यर्थ:।। २।।

इत्थं कारणस्वरूपपर्यालोचनेन मिथ्यात्वं प्रदर्श्य "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इति श्रुत्यन्तरोपदर्शितदिशा वाचारम्भण श्रुत्यनुगुणतर्कैश्च कार्यस्वरूपपर्यालोचनया तन्मिथ्यात्वमुपदर्शयितुमाह—

(१) पाटलेव = श्वेतरक्तवर्णं पाटलीपुष्पे प्रसिद्धं।।

मू०।। यस्माद्विश्वं सदुत्थं सदुपभृतमथो लीयते तत्र तस्मा-
त्सन्मात्रं नान्यदस्मान्मृदइव घटिकोदं चनादिर्विकारः।
सद्भेदे स्यादसत्वं सदथ यदि तदा नास्ति भेदः कथञ्चि-
द्भेदाऽभेदौ विरुद्धौ न हि भवति भिदाऽभिन्नवस्तुप्रतिष्ठा।। ३।।

यस्मादिति।। यस्मात् = हेतोः, विश्वं = कृत्स्नं जगत्, सदुत्थम्-सतः = परमार्थसत्यैकस्वभावाद्ब्रह्मणः प्रकृतिभूतात्, उत्थं = आविर्भूतं सृष्टौ, स्थितिकाले च सदुपभृतम् तेनैव सता उपभृतं = तादात्म्यलक्षणपरमसामीप्येन धृतं पालितं च। अथो = अनन्तरं प्रलयकालेऽपि, तत्र = तस्मिन्नेव सद्रूपे ब्रह्मणि लीयते तस्मात् = कालत्रयेऽपि सदव्यतिरेकात् सन्मात्रम् = सदेव सन्मात्रं। किं जगद्रूपाऽप्रहाणेनैव? नेत्याह— नेति।। अस्मात् = सद्रूपात्, अन्यत् = जगद्रूपं न = नास्तीत्यर्थः। तत्र "(१)तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रोपबृंहितवाचारम्भणश्रुतिदर्शितं दृष्टान्तमाह-मृद इवेति।। अल्पो घटः, घट एव वा घटिका, उत् = ऊर्ध्वं अञ्च्यते उद्ध्रियते ओदनाद्यस्मिन्नित्युदञ्चनं = शरावः। आदिपदान्मणिमल्लिकादिपरिग्रहः। स यथा कालत्रयेऽपि मृदव्यतिरेकान्मृन्मात्रं तद्वदित्यर्थः। तथा च श्रुतिः "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति।। किञ्च जगतो ब्रह्मसत्ताऽतिरिक्तसत्त्वस्य निरसिष्यमाणत्वात्सद्ब्रह्मभेदेऽभेदेवा त्वयोच्यमाने उभयथापि स्वमुखेनैव मिथ्यात्वमभ्युपगतं पर्यवस्यतीत्यभिप्रेत्याह— सद्भेदे इति।। विश्वस्येति विभक्ति विपरिणामेन संबध्यते। तस्य सतः = ब्रह्मणः सकाशात्, भेदे = उच्यमाने, असत्त्वं = अनृतत्वमेवोक्तं स्यात्, 'सद्भिन्नं, असत्, अनृतम्, इति शब्दानामपृथगर्थत्वादित्यर्थः।। अथ विश्वं सत् = सदभिन्नमेवेति यदि ब्रूषे, तदा भिद्यत इति भेदः = जगद्रूपं सद्व्यतिरिक्तं कथञ्चित् = प्रयत्नसहस्रेणाऽपि नास्ति। अभिन्नमिति नञो भिन्ननिषेधकत्वेन जगच्छब्दप्रत्यययोः सद्व्यतिरिक्तविषयाऽनिरूपणादित्यर्थः।. ननु यथा कुण्डलकटकादिषु अनुगतकनकप्रत्ययात्कनकात्मना अभेद एव, कुण्डलकटकादिव्यावृत्तरूपेण तु परस्परं भेदः, तथा सद्रूपेणाऽभेदेऽपि

(१) तदनन्यत्वमारम्भणशब्दादिभ्यः।। ब्र० अ० २ पा० १ सू० १४।। कार्यमाकाशादिकं बहुप्रपंचं जगत्। कारणं परंब्रह्म तस्मात्कारणात्परब्रह्मणः सकाशात् कार्यस्याकाशादि प्रपंचस्यानन्यत्वं व्यतिरेकेणाभावोवगम्यते। कुतः। आरम्भण शब्दादिभ्यः इति। एक विज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्र दृष्टान्त उच्यते। यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारोनामधेयम् मृत्तिकेत्येव सत्यमित्यादिशब्दात्। एतदात्मीयमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति इदं सर्वं यदयमात्मेत्यादयः श्रुतयो गृह्यन्ते तेभ्यः इत्यर्थः।

सर्ववस्तूनां प्रातिस्विकरूपेणभेदोऽस्तु। इत्थं च कार्यकारणरूपाभ्यां भिन्नाऽभिन्नमेव वस्तु तत्त्वं। अभिन्नादिशब्दाश्च न स्वगतभेदप्रतिषेधकाः। यथाहुः—

"कार्यरूपेण नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा।।" इति।।

तत्राह— भेदाऽभेदाविति।। भेदश्चाऽभेदश्च भेदाऽभेदौ। विरुद्धौ = असहभाविनौ परस्परोच्छित्तिरूपत्वादित्यर्थः। अयं भावः— यदिकुण्डलं कनकाऽभिन्नं, तर्हि कटकादपि न भिद्येत, तस्यापि कनकत्वात्। यदि च तस्माद्भिद्येत, तर्हि कनकादपि भिद्यते। तदभिन्ने[१] तदभिन्नभेदाऽयोगात्। अन्यथा कुण्डलेपि कुण्डलभेदप्रसङ्गात्। एवं कनकभेदोऽपि प्रसज्येत। तदभिन्नभिन्ने[२] तद्भेद नियमात्। तथायदि कनकाऽभिन्नं कटकं, तर्हि कनकवत्कुण्डलेऽनुवर्तेत। नानुवर्तते चेत् न कनकाभिन्नं, यस्मिन्ननुवर्तमाने यन्नानुवर्तते तत्ततोऽत्यन्त भिन्नम्। यथा सूत्रात्कुसुमानि। किञ्च यदि कुण्डलादय कनकाऽभिन्नाः तर्हि दूरात्कनके गृहीते तदभिन्नास्ते गृहीता एवेति न पुनर्जिज्ञास्येरन्। भेदोऽप्यस्तीति जिज्ञासेति चेत्, अभेदोऽस्तीति ज्ञानसामग्रीसत्त्वाज्ज्ञाता एवेति न जिज्ञासा युक्ता। अतो यस्मिन् ज्ञाते यदज्ञातं तत्ततोऽत्यन्तभिन्नं, यथा घटात्पटः।। ननु यथा भेदग्राहिमानसत्वाद्भेदः, तथा अभेदग्राहिमानसत्वे सोऽपि दुरपह्नवः। अस्ति चाऽभेदेऽपि कुण्डलं कनकमित्यबाधित-सामानाधिकरण्यप्रत्ययः। सर्वजनीनो मानं। नह्यत्यन्त भिन्नयोः गौरश्व इति सामानाधिकरण्यप्रत्ययोऽस्ति।। न च विरोधादन्यतरस्याऽनृतत्वम्। विरुद्धमिति नः क्व संप्रत्ययो यत्खलु प्रमाणविपर्ययेण वर्तते। यत्तु यथाप्रमाणेनाऽवगम्यते तत्तथाभूतमेव, सामानाधिकरण्यप्रत्यये च प्रमाणभूते, व्यक्तं भेदाभेदौ चकास्त इत्यविरोधकल्पनमेव युक्तमितिचेत् तत्राह— नहीति।। भिदा = भेदः। अभिन्नं = भेदशून्यं यद्वस्तु तदेव प्रतिष्ठा आश्रयो यस्यास्तथाविधा नहि भवति। भेदस्य प्रतियोगिवृत्तित्वाऽसंभवात्।। [३]अभेदस्य भेदनिवृत्तिरूपत्वे

---

(१) तदभिन्ने तदभिन्नभेदाऽयोगात्।। यदि कटक कुण्डलयोः कनकाभेदोऽभ्युपगम्यते तदा तदभिन्नेत्यत्र तत्पदेन कनकोग्राह्यस्तथा च कनकाभिन्ने कुण्डले तदभिन्नस्य कनकाभिन्नस्य कटकस्यापि भेदायोगादसंभवान्न कटककुण्डलयोः परस्पर भेदसिद्धि स्यात् इत्यर्थः।

(२) तदभिन्नभिन्ने तद्भेदनियमादिति।। तत्पदाभिधेय कनकाभिन्न कटकादिभिन्ने कटक प्रतियोगिक भेदाश्रये कुण्डलादौ कटकाभिन्न कनकभेदस्याप्यावश्यक नियमादित्यर्थः।।

(३) अभेदस्येति।। अभिन्ने भेदो-वर्तते इति पक्षेऽभेदस्य भेदानाश्रयस्य भेदनिवृत्तिरूपस्यवेत्यर्थो भवेत्तत्राद्ये प्रतियोग्यभिन्नस्यानुयोगिनो भेदाश्रयत्व स्वीकारेऽनुयोग्यभिन्नतया तदात्मकस्य प्रतियोगिनोपिस्वभेदाश्रयत्वं स्यात्तच्च लोकविरुद्धं भेदविशेषणत्वेन स्वस्यैव स्वाश्रयतापत्तावात्माश्रयश्च

निवृत्तं तिष्ठतिचेति व्याघातात्। अतद्रूपत्वे गवि अश्वाऽभेदप्रत्ययस्य, शुक्तौ रजताऽभेदप्रत्ययस्य च याथार्थ्यापातात्। सामानाधिकरण्यं त्वेकस्य पारमार्थिकत्वेऽन्यस्य व्यावहारिकत्वेऽप्युपपन्नमिति नाऽविरोधं कल्पयितुं क्षमत इति भावः।।

(१)अथवा।। ननु कुण्डलं कनकाऽव्यभिचारात्ततो न भिद्यतां, कनकं तु कुण्ड्लव्यभिचारि कुण्डलाद्भिद्यत एवेति, नैकत्र भेदाऽभेदावित्यविरोध इत्याशङ्क्याह—(२)नहीति।। न भिन्नं वस्तु प्रतियोगिपदार्थो यस्यास्सकाशात्साऽभिन्नवस्तुः तथाविधा प्रतिष्ठा = आश्रयो यस्याः सा तथा, (३)स्वाऽऽश्रयाऽभिन्नप्रतियोगिका न भवतीत्यर्थः। अन्यथाऽगौर्गौः, असास्नादिमती गौः, इदं कनकं न कुण्डलमित्यादि प्रत्ययस्याऽविपर्ययत्वप्रसङ्गादित्यर्थः।।

इत्थं च वस्तुनि विकल्पाऽसंभवादवश्यभाविनि भेदाऽभेदयोरन्यतरस्य मिथ्यात्वे आगन्तुकत्वात्, सापेक्षत्वात्, अनियतत्वात्, दृष्टबाधत्वात्, वाचारम्भणश्रुत्याऽऽनुगुण्यात्, बहूनां सत्यत्वकल्पने गौरवाच्च भेदस्य मिथ्यात्वं, लाघवात्, पूर्वसिद्धत्वात्, उपजीव्यत्वात्, नियतैकरूपत्वात्, निरपेक्षत्वात्, अदृष्टबाधत्वात्, सर्ववेदान्ततात्पर्यविषयत्वाच्च परमार्थसद्वस्तुरूपस्याऽभेदस्यैव सत्यत्वमिति युक्तम्। यथाहुः, आचार्यवाचस्पतिमिश्राः—''तस्माद्भेदाभेदयोरन्यतरस्मिन्नवहेये अभेदोपादानैव भेदकल्पना, न भेदोपादानाऽभेदकल्पना। भिद्यमानतन्त्रत्वात् भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्'' इति।। ३।।

यत्तु सामानाधिकरण्यप्रत्यये प्रमाणभूते व्यक्तं भेदाभेदौ चकास्त इति साधकमुपन्यस्तं तत्तु विपरीतं बाधकमेव। विरुद्धोभयांशभानोक्तौ संशयवत्प्रा-

---

दोषः। निवृत्तिस्वरूपमिति द्वितीय पक्षे तु भेदोऽभिन्नेस्वनिवृत्यात्मकानुयोगिनि निवर्तमानो निवृत्तं सदपितिष्ठतीत्यापत्तिस्तथा च व्याघातोयथा देवदत्तो मृतो वर्तते चेति वदिति भावः।।

(१) शुक्तिरजतादिष्वभेदप्रत्ययस्य याथार्थ्यतापत्ति लक्षणदोषपरिजिहीर्षया विधान्तरेण समानाधिकरण्य प्रत्ययस्य गतिमाशङ्कते।।अथवेति।।

(२) कुण्डलं कनकं विहायान्यत्र वर्तितुमशक्यत्वान्नकनकप्रतियोगिकभेदाश्रयो भवतीति भवतु। कनकं तु कुण्डलं विहाय कटकादौ वर्तत एव तथा च कनकं कुण्डलप्रतियोगिकभेदाश्रयो भवेदेव तथा चाभेदस्य कुण्डलवृत्तित्वाद्भेदस्य च कनकवृत्तित्वान्न तयोरैक्याधिकरण्यावकाश एवं चाप्यविरोधेन सामानाधिकरण्यप्रत्ययोपपत्तौ कुतो व्याघातादि दोषावकाश इत्याशंङ्क्याह।नहीति।।

(३) स्वाश्रयाभिन्नप्रतियोगिकेति।। साभिदानाम भेदः स्वपदार्थस्तस्याश्रयोऽनुयोग्यात्मकोधर्मिते नाभिन्नो यः प्रतियोगी सः तादृशप्रतियोगिको भेदो न भवति। यद्वा स्वपदार्थो भिदापरपर्यायो भेदस्तस्यप्रतियोगितानिरूपकतासम्बन्धेनाश्रयो यः प्रतियोगी तेनाभिन्नः स्वाश्रयभिन्नो योनुयोग्यात्मको धर्मिपदार्थः स प्रतियोगी यस्य स तथा तादृशो भेदो नहि सम्भवतीति भावः।।

माण्यस्यैवाऽयोगेनाऽन्यतरांशे अप्रामाण्याऽवश्यंभावेन वास्तवांशे अवास्तवांशस्य बाधरूपत्वेन पर्यवसानगत्या वा मिथ्यात्वसाधकत्वात्। किञ्चोक्त प्रत्ययगोचरो भेदः स्वतः? परतो? वा, न संभवति वस्तुन्युभयथापि भेदाऽघटनादित्यभिप्रेत्याह—

मू०।। भेदोऽभिन्ने प्रतीतो भवति खलु मृषा चन्द्रनानात्मतावत्
भिन्नेऽभेदश्च तद्वत्प्रभवति हि ततो न स्वतो वस्तुभेदः।
धर्मैर्भेदः प्रसिद्ध्येद्यदि भवति भिदा धर्मिणो हन्त तेषां
भेदेऽभेदेऽपि लोके न खलु परिचिता धर्मधर्मिव्यवस्था।।४।।

भेद इति। अभिन्ने = भेदशून्ये वस्तुनि प्रतीतः = प्रतिभातः, भेदः = [१]स्वप्रतियोगिकाऽन्योन्याभावः। मृषा = मिथ्या भूतो भवति। खलु इति सर्वसंमतत्वद्योतनाय। तत्र लोकप्रसिद्धं दृष्टान्तमाह— चन्द्रेति।। यथा चन्द्रनानात्मता = चन्द्रव्यक्त्यनेकता अभिन्ने चन्द्रे प्रतीता मृषेव तद्वत्। तथा च चन्द्रैकत्वबुद्धिर्यथा द्वित्वबाधरूपा, तथा सामानाधिकरण्यंबुद्धिरप्यैक्यांशे भेदबाधरूपैव। अत्र भेदाऽभेदयोरविरोधकल्पने, चन्द्रेऽपि तथा कल्पनाप्रसङ्गात्। वस्तुनि विकल्पाऽयोगस्तु प्रकृतेऽपि समान इति भावः।। अथवा अनुमानमनेन प्रदर्श्यते। सामानाधिकरण्यप्रत्ययगोचरो भेदो मिथ्या अभिन्ने प्रतीतत्वात्, चन्द्रभेदवदिति।। ननु वैपरीत्यमेव किं न स्यात्। उक्तप्रत्ययगोचरोऽभेदो मिथ्या, भिन्ने प्रतीतत्वात्, दूरस्थवृक्षद्वयप्रतिभासमानाऽभेदवदित्यपि प्रयोगसंभवात्। भवताप्यात्मनि प्रतिभासमानस्य अन्तःकरणदेहेन्द्रियाद्यैक्यस्य तथात्वाऽभ्युपगमादित्याशङ्क्य [२]भवत्वेवं, तथापि कुण्डलादौ कनकात्पृथक् सत्ताऽदर्शनात्, सत्कनकाऽभेदबाधस्य तेष्वसत्त्वाऽऽपादकत्वेन [३] फलतो विशेषाऽभावादित्यभिप्रेत्याह–भिन्ने इति।। दूरस्थवृक्षादिवद्भिन्ने वस्तुनि प्रतीतः अभेदः = ऐक्यं च, तद्वत् = मृषैवेत्यर्थः। स च प्रकृते मृषाभवन्कुण्डलादिकं सत्त्वात्प्रच्याव्य मृषात्वे स्थापयिष्यतीतिभावः। अभ्युपेत्यापि भेदप्रतिभासस्याऽभेदबाधकत्वमिदमुक्तम्।

(१) स्वप्रतियोगिकान्योन्याभाव इति। प्रतियोग्यनुयोगिनोरभेदपक्षे प्रतियोगीपदार्थस्यानुयोगिवस्तुस्वरूपत्वात्तत्स्वरूपेऽनुयोगिनि प्रतीयमानो भेदः स्वपदार्थस्वरूपप्रतियोग्यभिन्नानुयोगिप्रतियोगिकोऽन्योन्याभावः इत्यर्थः।।

(२) भवत्वेवमिति। एवं = त्वदुक्तानुमान सम्भवे सतीत्यर्थः। अद्वितीयात्मनि प्रतीयमानोंतःकरणदेहेन्द्रियादितादात्म्यं मिथ्याभवत्वित्यर्थः।।

(३) फलतो विशेषाभावादिति। भेदमिथ्यात्वानुमानतोऽभेदमिथ्यात्वानुमानस्यापि मिथ्यात्वानुमितिजनकत्वेनानुमितिलक्षणकार्यजनने भेदाभेद पक्षकानुमानयोर्विशेषाभावान्नास्मदभिमताभेदपक्षकानुमानस्य बाधकत्वं त्वदभिमतभेदपक्षकानुमाने सम्पद्यते इति भावः।।

(१)विशेषस्य प्रागुक्तत्वात्। (२)उभयथापि वास्तवं कनकैक्यमव्याहतमेवेत्याह—प्रभवतीति।। ततः = उक्तहेतोरन्यतरमृषात्वलक्षणात्कनकादिवस्तुनः स्वतो भेदो न प्रभवति, अनृतभेदस्यैक्याऽविघातित्वादित्यर्थः। अथवा।। नन्वेवं सामानाधिकरण्यप्रत्ययगोचर भेदाऽभेदयोरेकतरविरोधादन्यतरमृषात्वमिव सत्प्रतिपक्षन्यायेन परस्परपराहतत्वादुभयमृषात्वमेव किं न स्यात्? तथा च सर्वप्रपञ्चे प्रतिभासमानस्य सदभेदस्यापि मृषात्वापत्तौ शून्यवादप्रसङ्ग इत्याशङ्क्य, भवत्वेवं तथापि कुण्डलाद्यनृत-विकारसापेक्षभेदाभेदयोर्मृषात्वेऽपि निरपेक्षवास्तव-कनकैक्याऽक्षतेरित्यभिप्रेत्याह-प्रभवतीति।। ततः = त्वदुक्तसापेक्षभेदाभेदोभयमृषात्वात् स्वतस्सिद्धनिरपेक्षवस्तुनः परमार्थसद्रूपस्य भेदनं भेदोऽसत्त्वं न भवति। तथाविधसर्पभेदाऽभेदोभयबाधेऽपि रज्ज्वादिस्वरूपाऽविघातदर्शनादित्यर्थः।।

ननु स्वतोऽभिन्नमपि कनकादिवस्तु कटकत्वकुण्डलत्वादिधर्मभेदात् भिद्यताम्। यथा अभिन्नोऽपि पुरुषो दण्डी कुण्डली स्रग्वीत्यादिविशेषणभेदाद्भिद्यते। केवले तंस्मिन्विशेषणान्तरवति च नायं दण्डीतिभेददर्शनात्, (३)स्वात्ममात्रनिरूपिताऽभेदस्य चाऽन्यप्रयुक्तभेदाऽविरोधित्वेन बाधकाऽभावान्मिथ्यात्वाऽसिद्धेश्चेत्याशङ्क्याह-धर्मैरिति।। उक्तधर्मैः कनकादिधर्मिणि तदा भेदः प्रसिद्ध्येत्, यदि तेषां = धर्माणां, दण्डकुण्डलादिविशेषणानामिव धर्मिणः = कनकादेः सकाशात् भिदा = प्रमाणसिद्धा भवति।। नतु तथा। तेषु कनाकद्यभेदस्य त्वयैवोच्यमानत्वादित्यर्थः। ननु तर्हि कटकत्वादिजातयः कनकादत्यन्तभिन्ना एव तत्समवेताश्च सन्त्विति वैशेषिकाद्याशङ्कायामाह— भेद इति।। खल्वितिहेतौ। यस्माल्लोके गवाश्वादीनां भेदे सति चन्द्रादिस्वरूपस्याऽभेदेऽपि वा सति गौः अश्वधर्मोऽश्वोगोधर्म इति, गवाश्वौ परस्परस्य धर्मिणाविति वा, चन्द्रःचन्द्रधर्मश्चन्द्रधर्मीति वा धर्मधर्मिव्यवस्था= धर्मधर्मिव्यवहारः, तद्भावेन स्थितिर्वा न परिचिता = न क्वचिदपि दृष्टा। तथाच धर्मधर्मित्वमपि विमर्शे प्रमाणागोचरत्वात् भेदवन्मृषैवेति धर्माणां भेदकत्वं दूरापास्तमिति भावः।।४।।

---

(१) विशेषस्येति। भेदाभेदयोः सापेक्षत्वनिरपेक्षत्वाभ्यां प्रबलदुर्बलभावस्य पूर्वं पृष्ठे उक्तत्वादिति।।

(२) उभयथापीति।। भेदमिथ्यात्वाभेदमिथ्यात्वप्रसाधनलक्षणप्रकारद्वयेनापीति भावः।।

(३) स्वात्ममात्रनिरूपिताभेदस्येति।। धर्मानिरूपित धर्मिमात्र निरूपितस्याभेदस्यान्यप्रयुक्त भेदस्य = कटकत्वकुण्डलत्वादि प्रयुक्त कनकादि धर्मिणो भेदस्याविरोधित्वान्न कनकादिभेद बाधकत्वमिति भावः।।

किञ्च (१)भिन्नैर्धर्मैर्धर्मिण्यन्योभेद उत्पाद्यते? उत स्वनिष्ठएवाऽऽसज्यते? नाद्य इत्याह–

मू०।। यच्चाऽऽभिन्नं स्वतस्तन्न भवति परतो भेदभाङ्नान्यभेदा-
दन्यो भिद्येत धर्माः कथमथ विविधा धर्म्यभेदादभिन्नाः।
भेदो भिन्नाश्रयश्चेदधिकरणभिदा तेन चेदात्मनिष्ठा
नोचेदन्योन्यनिष्ठा स्थितिहतिरथवा तद्भिदा दुर्निरूपा।।५।।

यदिति।। यत् = कनकादिवस्तु स्वतः अभिन्नं = भेदरहितं, तत्परतः = स्वातिरिक्त कटककुण्डलत्वादिधर्मतः, भेदं भजत इति भेदभाङ्न भवति = परोत्पाद्यभेदाधिकरणं न भवतीत्यर्थः। उत्पन्नेन भेदेन स्वाभाविकाऽभेदोपमर्दे कुण्डलादेरकनकत्वप्रसङ्गात्। अनुपमर्दे चोत्पत्तुमेवाऽशक्यत्वात्। किञ्च, अभिन्ने वस्तुनि लब्धात्मानौ धर्मौ भेदं जनयेताम्? अलब्धात्मानौ वा? आत्मलाभसमकालमेव वा? आद्ये अभिन्ने वस्तुनि विनापि भेदं यथोत्पत्तिं लभेते, एवं स्थितिमपि लप्स्येते इति भेदजननवैयर्थ्यम्। उत्तरकल्पयोस्तु अलब्धात्मकधर्मयोर्जनकत्वमेवाऽसंभवि। परेषां जन्यभेदाऽसंप्रतिपत्तिश्चेति दोषान्तरसूचनार्थश्चकारः।। द्वितीयेऽप्याह— नेति।। अन्यस्य भेदादन्यः = तदितरो न भिद्येत। संभावनाया लिङ्। एतन्न संभावितं, न हि घटपटयोर्भेदाद्देवदत्तादि भिद्यते। परभेदस्य परस्मिन्नध्यासमन्तरेणाऽऽसञ्जयितुमशक्यत्वात्। अन्यथाऽभेदमात्रोच्छेदप्रसङ्गादिति भावः।। एतेन 'दण्डी कुण्डली' इत्यादि विभिन्न विशेषणानामप्यभिन्नपुरुषे भेदकत्वं न संभवतीति दर्शितम्।। धर्माणां परस्परभेद एव न सिद्ध्यति, दूरे तेषां धर्मिभेदकत्वमित्यभिप्रेत्याह— धर्मा इति 'अथ' इति युक्तिभेदद्योतनार्थः।। अभिन्नेन धर्मिणा सहाऽभेदात् धर्माणामपि भेदो नोचित इति ते धर्माः विविधा भिन्नाः = कथं? = न कथञ्चिदित्यर्थः। स्वनिष्ठधर्मभेदादितिचेत्। न। तत्राप्याऽऽक्षेपसाम्यात्, अनवस्थापाताच्च।। अथवा, यदि धर्मभेदाद्धर्मी भिद्यत इति निर्युक्तिकमेवाऽभ्युपगच्छसि, तर्हि तथैव धर्म्यभेदाद्धर्माणामप्यभेद इति वैपरीत्यमेव किं नाभ्युपगच्छेरित्यर्थः। धर्मधर्मिणोर्धर्माणां च परस्परं भेदो मिथ्येति किं वक्तव्यं यदिघटपटादीनामपि परस्परभेद आश्रयादितत्त्वविमर्शे तथैवेति दर्शयति— भेद इत्यादिना।। सर्वोऽपि भेदः अभिन्नाऽऽश्रयः? भिन्नाऽऽश्रयो वा? नाद्यः, व्याघातात्, प्रतियोगितावच्छेदकसामानाधिकरण्यविरोधाच्चेति।। द्वितीयमनूद्य दूषयति— भिन्नाश्रय

(१) भिन्नैर्धर्मिणीति।। धर्माणां परस्परभेदाद्धर्मिणोपि भेद इति पक्षे धर्मेषु यः परस्परप्रतियोगिको भेदो वर्तते स एव धर्मण्यासज्यते उत स्वनिष्ठपरस्पर प्रतियोगिक भेदादन्योऽभिनव भेद उत्पाद्यत इत्यर्थः।

इति।. भिन्नः = [१]स्वप्रतियोगिप्रतियोगिकाऽन्योन्याभाववानाश्रयो यस्य सः तथाविधोऽभ्युपगत इति चेत्। तत्र पृच्छामः;— निरूप्यमाणभेदाधिकरणस्य [२]व्यावर्तिका भिदा प्रतियोग्यन्यता निरूप्यमाणभेदेनैव? उत भेदान्तरेणेति? आद्ये तावदाह— तेनेति।। तेन निरूप्यमाणभेदेनैवेति चेत्, तदा आत्मनिष्ठा = आत्माश्रयदोषः। [३]स्वाधिकरणविशेषनिर्णये स्वाधिकरणनिर्णयस्य हेतुत्वोक्तिपर्यवसानादित्यर्थः।. द्वितीयेऽपि दोषद्वयमाह— नोचेदिति।. तेनैवेति न, किन्तु भेदान्तरेणेति चेत्। तस्यापि भेदत्वात् प्रतियोग्यन्यवृत्तित्वस्याऽवश्यवाच्यतया पूर्वभेदेन [४]तदधिकरणस्य प्रतियोग्यन्यत्वोक्तौ अन्योन्यनिष्ठा = अन्योन्याश्रयः। भेदयोः परस्पराधिकरणनिर्णये परस्पराधिकरणनिर्णयस्य हेतुत्वोक्तिपर्यवसानात्। यदि तु तदधिकरणव्यावर्तनाय तृतीयो भेदोऽप्यभ्युपगम्येत तदाप्याह— स्थितिहतिरिति।। अथवेति = पक्षान्तरे। तस्याऽपि पूर्वभेदद्वयवदाश्रयव्यावृत्यनिर्णयादाद्यभेदेन तदुक्तौ चक्रकं, द्वितीयेन त्वन्योन्याश्रयः, स्वेनैव चेदात्माश्रय इत्यन्यस्याऽन्यस्य स्वीकारेस्थितेः = विश्रान्तेः, हतिः = क्षतिरनवस्थेत्यर्थः।। प्रस्तुतं निगमयति— तदिति। तत् = तस्मा-दाश्रयविशेषाऽनिरूपणात्। भिदा = भेदमात्रं दुर्निरूपा = तत्त्वतो निर्वक्तुमशक्या। अतो मिथ्यैवेत्यर्थः।। ५।।

किञ्च धर्मितावच्छेदकविशिष्टधर्मिज्ञानस्य प्रतियोगितावच्छेदकविशिष्टप्रति-योगिज्ञानस्य चाऽभावे भेदबुद्ध्यदर्शनाद्भेदज्ञानस्य तथाविधधर्मिप्रतियोगिविषय-कत्वनियमाच्च तस्मिन् धर्मिप्रतियोगिज्ञानं कारणमिति निर्विवादम्। तत्र [५]तयोरैक्यज्ञाने

(१) स्वप्रतियोगि प्रतियोगिकान्योन्याभाववानाश्रयो यस्येति। स्वयं निरूप्यमाणभेदस्तस्य यः प्रतियोगी स एवप्रतियोगी यस्य कस्यान्योन्याभावरूपभेदस्य स तथा तद्वानाश्रयो यस्य प्रकृत भेदस्य स तथेत्यर्थः।।

(२) व्यावर्तिका भिदेति।। निरूप्यमाणभेदस्य यदधिकरणं तस्य व्यावर्तिका प्रतियोगि सकाशाद्व्यावृत्तिबुद्धिजनका या भिदा नामभेदः सा किं निरूप्यमाणेन प्रकृतभेदेन कृतानिष्पादिताऽथवा भेदान्तरेण वेति स्वप्रतियोगिभूतपदार्थ सकाशात्स्वधर्मिभूतपदार्थस्य व्यावर्तको यो भेदो येनावच्छिन्ने च धर्मिणि स्वयं भेदो वर्तते सः किं स्वयमेव प्रकृत भेद इत्यर्थः।।

(३) स्वाधिकरणविशेषनिर्णये स्वाधिकरणनिर्णयस्येति। स्वयं निरूप्यमाणोभेदस्तस्य योऽधिकरणविशेषो भिन्ने भेदो वर्तते इति पक्षे धर्मिविशेषणीभूतो यो भेदः तद्विशिष्टः कश्चिद्धर्मि पदार्थः। विशिष्टवृत्तिधर्मस्य विशेषणवृत्तित्वनियमानुसारेण प्रकृतभेदाधिकरणतापत्तौ तेनैव भिन्नेति पक्षे च भेदावच्छिन्नस्वाधि-करणविशेषनिर्णयनिमित्तं विशेषणज्ञानविधया स्वस्यैव धर्मिविशेषणतया स्वाधिकरणनिश्चयत्वे हेतुत्वोक्तावात्माश्रय इत्यर्थः। पूर्वभेदेन = निरूप्यमाणेनप्रथमभेदेनेत्यर्थः।।

(४) तदधिकरणस्येति।। धर्मिविशेषणीभूत द्वितीयभेदाधिकरणस्येत्यर्थः।।

(५) तयोरैक्यज्ञानेति।। तयोर्धर्मिप्रतियोगिनोरैक्य ज्ञाने सति तत्रोभयोर्भान संम्भवेन कारणीभूत धर्मिप्रतियोगिज्ञानसत्त्वात्तद्भेदज्ञानं कुतो न जायते इति चेदाह।।

कुतो न भेदधी:? (१)ऐक्यज्ञानं विरोधीति चेत्। न। प्रत्येकमैक्यज्ञानस्याऽवर्जनीयतया भेदबुद्धिमात्रोच्छेदापत्तेः। भेदज्ञानात्प्राक् भेदाभावत्व तद्व्याप्यत्वादिना ऐक्योपस्थित्यसंभवेन विरोधित्वाऽसंभावाच्च। तस्मादगत्या भेदज्ञाने धर्मिप्रतियोगिनोर्भेदज्ञानं हेतुरित्यवश्यं वाच्यम्। तत्र कारणीभूतज्ञानगोचरो भेदो यदि ग्राह्यभेद एवोच्येत, तर्हि तज्ज्ञाने तज्ज्ञानं कारणमित्युक्तं स्यादित्यात्माश्रयदोष वारणायाऽन्यो वाच्यः। तस्यापि भेदत्वात् पूर्वभेदवदेव धर्म्यादिभेदग्रहं विना ग्रहणा योगात्पूर्वभेदज्ञानस्याऽपेक्षणे अन्योन्याऽऽश्रयप्रसङ्गादन्योन्यो भेदो वाच्यः तस्याप्यन्यः। तथाचाऽनवस्था दुर्वारैवेत्याह—

मू०।। भेदोऽयं भिन्नधर्मिप्रतिभटविषयज्ञानजज्ञानवेद्यो
धर्म्यादेर्भेदसिद्धिः पुनरपि च तथेत्यापतेच्चाऽनवस्था।
भेदे धर्म्याद्यभेदे बत भवति मृषा भेदबुद्धिर्विभेदे
प्रादुःष्युः पूर्वदोषा नच गतिरपरा तेन भेदो मृषैव।। ६।।

भेदोऽयमिति।। अयं = प्रसिद्धो भेदः। भिन्नौ यौ धर्मिप्रतिभटौ = आश्रयप्रतियोगिनौ तौ विषयौ यस्य तथाविधाज्ज्ञानात् जातं यज्ज्ञानं तेन वेद्यः = ग्राह्यः। भेदज्ञाने धर्मिप्रतियोगिभेदज्ञानं कारणमिति यावत्। तत्र धर्म्यादिः = आदिपदात्प्रतियोगिनश्च परस्परभेदस्य सिद्धिः = ज्ञानं, पुनरपि = पूर्वभेदज्ञानवदेव, तथा = धर्मिप्रतियोगि भेदज्ञानाधीना, इति = एवंरीत्या अनवस्था आपतेत् = आपद्येत परावृत्तावन्योन्याश्रय चक्रकयोरापत्तिरिति द्योतनार्थश्चकारः।. किञ्च भेदः धर्मिप्रतियोगिभ्यां भेदान्तराच्चाऽभिन्नः? भिन्नो वा? आद्ये तावदाह भेदे इति।। वक्ष्यमाणाऽऽत्माश्रयादिदोषभयाद्भेदे = भेदपदार्थे, धर्म्यादिः = आदिपदात्प्रतियोगिनो भेदान्तराच्च सकाशात्, अभेदे = भेदाभावे। व्यधिकरणे सप्तम्यौ। अथवा अभेदे भेदशून्ये तदनधिकरणे वा अभ्युपगम्यमाने। भेदबुद्धिः = भेदज्ञानं, मृषा = निर्विषया भवति घटात्पटो भिन्न इति बुद्धेर्भिन्न इत्यंशे घटपटाऽतिरिक्तविषयाऽनिरूपणादित्यर्थः। किञ्च (२) प्रतियोग्यभेदे घटशून्यो घटभिन्नो न स्यात्,

(१) ऐक्यज्ञानमित्यादि।। धर्मिप्रतियोगिनामैकैकस्यापि ज्ञाने सति सर्वत्रैक्यज्ञानावर्जनीयतया प्राप्ते विरोध्युपस्थित्यभेदधीमात्रोच्छेदापत्तिरपि स्यादितिभावः।।

(२) प्रतियोग्यभेदेति।। भेदस्यप्रतियोग्यनुयोगिभ्यां भेदान्तराच्चाभेद इति पक्षे सामान्यतो दोषमभिधाय विशेषतः प्रत्येकाभेदपक्षेपिदोषाभिधित्सया प्रथमप्रतियोग्यभेदपक्षे दोषमाह।। प्रतियोग्य भेद इति।। प्रतियोगितद्भेदयोः परस्परभेदस्वीकारे किं भेदस्य प्रतियोगिन्यंतरभावउत प्रतियोगिपदार्थस्य भेदान्तरभावस्तत्रादेयदोषमाह घटशून्य इति घटशून्यो घटानधिकरणीभूतो भूतलादि पदार्थो घटाभिन्नभेदस्यापि अनधिकरणतया घटभेदवान्नस्यात्। इति भावः।। द्वितीये घटस्य भेदान्तर्भावे घटस्य भेदात्मकाभावस्वरूपतया भावरूपत्वं न स्यात्तथा घटाद्भिन्नः पटादिपदार्थो घटात्मकभेदवत्त्वेन

घटभिन्नो वा घटशून्यो न स्यात्, घटभेदशून्यश्च घटो घटवान्न स्यात्, भेदप्रतियोगी च घटो न स्यात्। अभावविरहात्मत्वाभावात्। [१]एवं [२]धर्म्यभेदेऽप्याधारा-ऽऽधेयभावो न स्यात्। [३]घटभेदात्मकपटाद्याश्रयस्य घटाऽभिन्नत्वापत्तिः। अभावान्तराऽभेदे तत्तत्प्रतियोग्यवृत्तित्वप्रसङ्गे [४]निराश्रयत्वापत्तिरित्यपि बोध्यम्।। परेषां भेदनिरूपणक्लेशवैफल्यदर्शनात्, बतेति खेदे।

द्वितीयेऽप्याह— विभेदे इति।। भेदे अधिकरणे धर्मिप्रतियोगिभ्यां विभेदे-ऽभ्युपगम्यमाने पूर्वदोषाः =आत्माश्रयादयः। प्रादुःष्युः "उपसर्गप्रादुर्भ्यां मस्तिर्यच्परः" इति षत्वं। आविर्भवेयुरित्यर्थः। तथाहि [५]भेदनिष्ठो धर्म्यादिभेदः स्वयमेव चेदात्माश्रयदोषापत्तिः। अभेदे आधाराऽऽधेयभावा-ऽयोगात्पूर्वकल्पाऽविशेषात् तदुक्तसर्वदोषापत्तिश्चः।। [६]अन्यश्चे[७]त्सोऽपि भेदो धर्मिप्रतियोगिभिन्नोऽवश्यं वाच्यः [८]तन्निष्ठ धर्मिप्रतियोगिभेदास्तस्याऽधिकरणाऽऽत्मकत्वे आत्माश्रयापत्तेः।

घटवान्नपि स्यात्तच्छून्यश्च न स्यात्तथा घटभेदशून्यो घटोपि घटवान् घटपदाभिधेयत्ववान्नस्याद्भेद प्रतियोगि च घटो न स्याद्भाव भेदप्रतियोगी चाभाव विरहात्मत्वाभावादितिदोषगणग्रसितत्वात् प्रतियोग्यभेदपक्षो न युक्तः इति भावः।।

(१) एवं भेदस्य प्रतियोग्यभेद पक्षे दोषमभिधायानुयोग्यभेदपक्षेपि दोषमाह।. एवमिति।।

(२) प्रतियोग्यभेद पक्ष इवानुयोग्यभेदपक्षेपि किमनुयोगिनि भेदान्तरभाव उतानुयोगिनो भेदेंऽतर्भाव इति विकल्प्य आद्ये दोषमाह। धर्म्यभेद इति।।

(३) भेदस्य धर्म्यन्तर्भावे तदात्मकतया धर्मिनिष्ठत्वासम्भवेन धर्मिभेदयोः परस्परमाधाराधेयभावोऽनुपपन्नः स्यात्तथा च घटभेदशून्ये पटादिपदार्थे जायमाना घटभेदबुद्धिर्मिथ्यैव स्यात्तथा च घटस्यापि तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन पटाद्यात्मकतापत्तौ व्यवहारोच्छेदापत्तिर्लोकविरोधश्च स्यादितिभावः।।

(४) एवं भेदेऽनुयोगिनोंऽतर्भावे भेदात्मक भावस्वरूपापत्तौ भावत्वानुपत्तिः सर्वशून्यतापत्तिश्च दोषः। पटभेदे यो घटभेदस्तस्य पटभेदस्वरूपतया घटस्यापि पटप्रतियोगित्वं स्यात्। तथा पटावृत्तितया पटे घटभेदबुद्धेर्मिथ्यात्वं स्यादिति भावः। तद्भद्भेदस्यापि पटधर्मिकस्य घटप्रतियोगिकस्य भेदस्य स्वधर्मिकघटपटोभयप्रतियोगिकभेदभिन्नत्वे द्वयोरप्येकात्मतया स्वप्रतियोगीभूतपटानाश्रयतयाऽभेदे-ऽऽधाराधेयभावानुपपत्त्या स्वानाश्रयतयाऽप्रामाणिकत्वेन प्रपंचस्यापि भेदशून्यतयाऽलीकत्वाच्छून्यता-पत्तिरित्यर्थः।।

(५) भेदनिष्ठो धर्म्यादिभेदः।। भेदधर्मिकोघटादिधर्मि पटादि प्रतियोगि प्रतियोगिकश्च यो भेदः इत्यर्थः। स्वयमेव घटधर्मिकः पटप्रतियोगिकश्च यः प्रकृतभेदः स एवेत्यर्थः तदात्मा श्रयदोषः स्वाश्रयविशेषणतया स्वस्यैवापेक्षणादित्यर्थः।।

(६) अन्यश्चेत्। घटधर्मिक पटप्रतियोगिकनिरूप्यमाणभेदाद्भेदधर्मिकोभेदोभिन्नश्चेदित्यर्थः।।

(७) सोपि।। भेदधर्मिको घटपटप्रतियोगिकश्च भेदोपि स्वधर्मिप्रतियोगिभ्यां भेदघटपटाभ्यां भिन्नोऽवश्यं वक्तव्य इत्यर्थः।।

(८) तन्निष्ठः।। भेदनिष्ठो घटपटात्मक धर्मिप्रतियोग्युभयप्रतियोगिको यो भेदः तस्याभावाधिकरणकाभाव-स्याधिकरणस्वरूपत्वनियमात्प्रथमाभावस्वरूपत्वमित्यर्थः।।

अन्यत्वे पूर्वभेदात्मकत्वेऽ(१)न्योन्याश्रयात्। अन्यत्वे परावृत्तो (२)चक्रकापत्तेः। तत्राऽप्यन्यस्तत्राऽप्यन्य (३)इत्यनवस्था। एवं (४)द्वितीयादिभेदेषु पूर्वपूर्वभेदभेदस्य तेषु चोत्तरोत्तरभेदभेदस्य चान्यत्वानन्यत्वादिना आत्माश्रयाऽन्योन्याश्रय चक्रकानवस्था अपि प्रसञ्जनीयाः। एवमेव च (५)घटभेदे पटभेदः तस्मिंश्च घटभेदश्चाऽऽश्रयानतिरिक्तश्चेत्सर्वभेदानामैक्यापत्तौ जगत एव तत्प्रतियोगितया तदाऽश्रयत्वाऽयोगान्निराश्रयत्वात्सर्वप्रमाणाऽगोचरत्वे अलीकत्वापत्तिः। प्रतियोगिनामेव तदाश्रयत्वाभ्युपगमे च घटोऽपि घटभिन्नः पटोऽपि पटभिन्नः भेदोऽपि भेदभिन्नस्स्यादिति सर्वं जगदव्यवस्थितं मिथ्यैवाऽऽपद्येत। (६) तयोराश्रयातिरिक्तत्वे चान्योन्याश्रयचक्रकाऽनवस्थाः। एवं कुड्यादिभेदे (७)तौ, तयोस्तम्भादिभेदः, तस्मिन्कुड्यादिभेद इति चक्रकानवस्था। तथा (८)घटे घटभेदभेदः तद्भेदतद्भेदइत्यनवस्था। (९)एवमभावाधिकरणकाऽभावान्तरस्याऽश्रयाभेदे अत्यन्ताभावेऽपि न्यायसाम्यादैक्यापत्त्या तस्य प्रतियोग्यधिकरणाऽवृत्तित्वे निराश्रयत्वापत्तिः। तद्वृत्तित्वे तु जगन्मात्रस्य

(१)धर्मिभूतद्वितीयभेदस्य विशेषणीभूतभेदस्य प्रथमभेदात्मकत्वेऽन्योन्याश्रयः।।

(२) ताभ्यां घटतन्निष्ठभेदधर्मिकाभ्यामन्यत्वे तस्य तृतीय भेदस्यापि स्वाश्रयादितो भिन्नतैव स्यात्तथा च तृतीय भेदस्य स्वाश्रयादितो यो धर्मिविशेषणीभूतो भेदस्तस्य प्रथमभेदात्मकत्वे चक्रकापत्तिदोषः।।

(३) तेभ्योऽन्यत्वे तस्य तस्य भेदाश्रयविशेषणतयोत्तरोत्तरस्वभिन्न भेदाकांक्षायामनवस्थापत्तिदोष इत्यर्थः।।

(४) घटपटयोर्यः परस्परभेदस्तस्यापि घटपटस्वरूपत्वाभावात्तत्र यो घटपट प्रतियोगिको भेदस्तस्य द्वितीयभेदस्यापि प्रथमभेदस्वरूपत्वाभावाद्द्वितीयादि भेदस्य यो प्रथमादि भेदे भेदस्तस्येत्यर्थः।

(५) एवं प्रथमादिभेदस्य द्वितीयादिरूपत्वाभावाद्द्वितीय तृतीयादि भेदप्रतियोगिकभेदस्य प्रथमादिभेदेषु वर्तमानस्येत्यर्थः।।

(६) घट भेदे। घटप्रतियोगिक भेदो घटभेदस्तस्मिन्यः पटप्रतियोगिकोभेद घटस्यापि पटभेदात्मकत्वाभावात्पटभेदे योयं घटभेदस्तस्यापि चाभावाधिकरणकाभावस्य धर्मिभूताभावात्मकत्व नियमेन पटभेदस्वरूपत्वाद्घटस्यापि पटप्रतियोगिक भेदप्रतियोगित्वमायातमेवं हि सर्वप्रपंच प्रतियोगिकस्य पटभेदधर्मिकस्य च भेदस्य पटभेदात्मकतया सर्वप्रपंचस्य पटभेदप्रतियोगित्वमागतं ततश्च भेदस्य प्रतियोगितावच्छेदक धर्मिविरोधितया न तदाश्रयत्वं सम्भवति नाप्यन्याश्रितत्वं प्रपंचान्यस्य वस्तुनोऽभावात्तथा च निराश्रयभेदस्याप्रसिद्धत्वेनालीकतयाऽप्रामाणिकत्वेन मिथ्यात्वं स्यादिति भावः।।

(७) तयोर्घटपटभेदयोरित्यर्थः। तौ घटपटभेदौ, तयोर्घटपटभेदयोः तस्मिन्स्तम्भादिभेद इत्यर्थः।।

(८) घटे घटभेदभेदेति। घटस्यापि घटभेदतोभिन्नतया घटे वर्तमानो यो घटभेदप्रतियोगिको भेदस्तस्यापि स्वप्रतियोगिभूतघटभेदतोभिन्नत्वेन तत्र वर्तमानो यो घटभेदभेद प्रतियोगिको भेदस्तस्य प्रथमघटभेदान्न भेदात्मकत्वेआत्माश्रयोऽन्यत्वेऽन्योन्याश्रय चक्रकापत्तिस्तत्र तत्रान्यान्य भेद स्वीकारे अनवस्थेत्यर्थः।

(९) एवमभावाधिकरणकाभावान्तरस्याश्रयाभेदेऽत्यन्ताभावेपि न्यायसाम्यादिति।। भेदं निरस्यात्यन्ता-

स्वाधिकरणनिष्ठाऽत्यन्ताभावप्रतियोगित्वेन मिथ्यात्वाऽऽपत्तौ अस्मदभिलषितसिद्धिः। आश्रयाद्भेदे त्वनवस्थाद्यापत्तिरित्यादिबोध्यम्।। ननु घटभेदे घटभेद इत्यभेदेऽप्याधाराधेयभावः प्रामाणिकप्रतीति बलादभ्युपगम्यते।। (१)घटे घटभेदभेदः, तद्भेदेतद्भेद इत्यनवस्थापि प्रामाणिकत्वान्न दोषायेत्यादिकं परेषां कुशकाशावलम्बनेन परिहारं निरस्यति— न चेति।। अपरा = त्वदभ्युपगमलक्षणा गतिः = उपपत्तिः प्रतीतेः प्रामाणिकत्वनिर्वाहिका न। घटो घटवानिति घटान्तरानधिकरणघटविषय-

भावाद्यभावान्तरं निराकरोति। एवमिति। यथा भेदोऽभिन्नाधिकरणे वर्तते भिन्ने वेति विकल्पेनात्माश्रयादिदोष प्रसक्तिस्तथैवाभावाधिकरणकाभावान्तरस्य घटभेदादभिन्ने घटात्यन्ताभावे पटस्यावृत्तितया घटात्यन्ताभावे वर्तमानो यो पटात्यन्ताभाव सः किं स्वाश्रयीभूताद्घटात्यन्ताभावद्भिन्नोऽभिन्नोवेति विकल्प्याद्ये-ऽऽधाराधेयभावानुपपत्तिः दोषोऽभेदेतदसंभवादन्यथाघटोऽपिघटाश्रितः स्यादिति द्वितीयेऽपि। किमत्यन्ताभाववति तच्छून्येववर्तते इति विकल्प्याद्ये किं स्वेनाभाववति स्वयं वर्तते उतान्येनाद्येऽऽत्माश्रयः। द्वितीय प्रथमाश्रयविशेषणीभूताभावोपि तथाभूताश्रये वर्तते सोपि च किं स्वेनोत प्रथमेन यद्वा तृतीयेन वाभाववति वर्तते। आद्ये, आत्माश्रयः द्वितीयेऽन्योन्याश्रयः, तृतीयेनेति पक्षे तस्य प्रथमेन तद्वति वर्तने चक्रका चतुर्थेन तथात्वे चतुर्थादीनामप्युत्तरोत्तरापेक्षायानवस्थापत्तिरित्येवं भेदतुल्ययुक्त्याऽप्रमाणकत्वेनालीकतया मिथ्यात्वमेवेति सिद्धमस्मत्समीहितमिति भावः। एवं प्रागभावप्रध्वंसाभावयोरपि।। प्रागभावः प्रागभाववति वर्ततेतच्छून्ये वा तद्वध्वंसोपिध्वंसवति तच्छून्ये वावर्तते इति विकल्प्यात्माश्रयादिदोषगणेन निरासो वेदितव्यः इति दिक्।।

(१) तथा घटे घटभेद भेदेति। भेदस्य स्वप्रतियोग्यनुयोगिभ्यां भिन्नत्वनियमात्तयोरपि भेदभिन्नत्वात्कोटि चतुष्टयोपलब्धिः। तथाहि।. तत्र प्रतियोगिभूतघटधर्मिका घटभेदप्रतियोगिका प्रथमा। घटभेदधर्मिका घटप्रतियोगिका द्वितीया। एवमनुयोगिस्वरूपपटधर्मिका घटभेदप्रतियोगिकातृतीया। तथा घटभेदधर्मिका पटप्रतियोगिका चतुर्थीत्येवं कोटिचतुष्टयमापाद्याद्येऽनवस्थां दर्शयति घट इति। पटो न घट इत्यत्र प्रतीतौ यः प्रतियोग्यात्मको घटस्तं घटो न घटभेद इति प्रतीतौ धर्मित्वेनाभ्युपगम्यानवस्थात्वित्थं प्रदर्शनीया। घटे यः स्वप्रतियोगिक प्रथम भेदतो भेदस्तस्य द्वितीयभेदस्यापि स्वधर्मिप्रतियोगिरूपाभ्यां घटंतद्भेदाभ्यां भिन्नत्वे वक्तव्ये द्वितीयभेदधर्मिक घट प्रथमघट भेदोभय प्रतियोगिको भेदस्तृतीयोऽन्य एव स्वीकर्तव्यः। अभेदपक्षे तु पूर्वमेवात्माश्रयादि दोषाणामुक्तत्वान्नतदुपपन्यासः। तथा च स तृतीय भेदोपि स्वधर्मिप्रतियोगिभूताभ्यां घटभेदभेदघटभेदाभ्यां भिन्न इति वक्तव्यः तृतीय भेदधर्मिकस्तत्प्रतियोगिधर्मिप्रतियोगिकश्चतुर्थः स्वीकार्यः स्यादेवं चतुर्थधर्मिकोऽन्य पंचमोभेदः स्वीकार्य एवमुत्तरोत्तरभेद परम्परा स्वीकारेऽनवस्था तथा च पूर्वपूर्वस्य प्रथम द्वितीयादि भेदस्य प्रतियोगित्वमुत्तरोत्तरस्य द्वितीयतृतीयादिभेदस्य च धर्मित्वमुररीकृत्यानवस्था स्फुटं प्रदर्शिता भवति इति भावः। एवं तद्भेदेतद्भेद इत्यत्र तत्पदेन घटमधिकृत्य घटप्रतियोगिक भेदस्यापि घटाद्भिन्नत्वेन घटप्रतियोगिको यो भेदस्तद्धर्मिक घटप्रतियोगिक भेद पक्ष लक्षण द्वितीयकोटावपि प्रथमभेदधर्मिक घटप्रतियोगिक द्वितीयभेदस्यापि घटाद्भिन्नत्वेन् द्वितीयभेदधर्मिकघटप्रतियोगिक तृतीय भेदस्तस्यापि घटाद्भिन्नत्वेन तृतीयभेद धर्मिकश्चतुर्थो भेद इत्येवं भेदपरम्परायामनवस्थेति भावः। एवमग्रेपि कोटिद्वयेऽनवस्था तर्कणीयेति भावः।।

कप्रतीतेरपिप्रामाण्यापत्तेः। यदितु तादृशघटस्यापि घटात्यन्ताभावाधिकरणत्वात्तदभाववति तदवगाहित्वात्सा अप्रमा, तर्हि प्रकृतेऽपि तुल्यमिति भावः।। प्रतीयमाना अप्यन्ये भेदाः नाभ्युपगम्यन्ते चेत्। आद्योऽपि तथास्तु, साधकबाधकयोस्साम्यादित्याह— तेनेति। तेन = उक्त-दोषनिवहेन। भेदः सर्वोऽपि मृषैव = मिथ्यैव मिथ्याभूतस्य तु दोषाऽऽकरत्वं भूषणमेवनतुदूषणमिति भावः।। ६।।

एवं भेदस्याऽधिकरणेन सह सम्बन्धस्य दुर्निरूपत्वादपि निरवच्छिन्न स्वसम्बन्धाभाववति प्रतीयमानत्वरूप मिथ्यात्वलक्षणाऽऽक्रान्तत्वात् मिथ्यात्वमिति सदृष्टान्तमाह— द्रव्य इति।

मू०।। द्रव्ये भेदस्य योगो न भवति निरुपाख्यस्य भावस्वरूपो
नाऽभावोऽन्यः समत्वादनुभयमिलनान्नापि तत्तत्स्वरूपम्।
भावाऽभावाऽतिरिक्तं न च किमपि तयोरस्ति सम्बन्धरूपं
निस्सम्बन्धेऽपि शुक्तौ रजतमिव मृषा तेन भेदः प्रतीतः।। ७।।

भेदाऽधिकरणत्वेनाऽभिमते भूतलादि द्रव्ये गुणादीनां विमर्शे द्रव्याऽनतिरेकात् तेभ्यो द्रव्यस्य प्राधान्याच्च वस्तुमात्रोपलक्षणत्वेनद्रव्यनिर्देशः। वस्तुमात्रे भेदस्य = अन्योन्याभावमात्रस्य। आधारतानियामको योगः = सम्बंधः, भावरूपः? अभावरूपो वा?। आद्यं निरस्यति— न भवतीति। तत्र भावस्वरूपस्तावन्न संभवति। [१]सम्बन्धो हि सम्बन्धिभ्यां भिन्नः तावाश्रितश्चेति सम्बन्ध लक्षणाक्रान्तस्यैव तस्याऽवश्यवक्तव्यतया अधिकरणवत्तस्याप्यभावेन सह सम्बन्धान्तर कल्पनेऽनवस्थानादसिद्धेः। सम्बन्धाऽयोग्यत्वोपपादनाय भेदं विशिनष्टि- निरुपाख्यस्येति। निर्गता धर्मि प्रतियोगि व्यावर्तक धर्मव्यतिरेकेण उपाख्या शब्दप्रत्यय प्रवृत्ति निमित्त धर्मो यस्य स्वतोऽध्यासतो वा व्यावर्तक सर्वधर्मशून्यस्येत्यर्थः। अभावत्वादेव धर्माऽऽधारत्वस्याऽध्यासाऽधिष्ठानत्वस्य चाऽयोगात्।। नच तेजोभावेऽन्धकारे नैल्यचलनाद्यारोपो दृश्यत एवेति नाऽयं नियम इति वाच्यम्। अन्धकारस्याऽपि द्रव्यान्तरत्वात्।। न चैवं सति तत्साक्षात्कारे आलोकसंयोगा-

(१) सम्बन्धो हि सम्बन्धिभ्यां भिन्नः तावाश्रितश्चेति सम्बन्धलक्षणम्।। तत्र सम्बन्ध्याश्रितः सम्बन्ध इत्येतावन्मात्रस्य लक्षणत्वे ध्वंसप्रागभावौ नात्यन्ताभावात्मकाविति प्रतीतौ अत्यन्ताभाव प्रतियोगिक भेद लक्षणाभावेऽतिव्याप्तिस्तन्निरासाय सम्बन्धिभ्यां भिन्न इत्युक्तम्। तदुक्तौ ध्वंसाद्यधिकरणकाभावरूपस्याभेदस्याधिकरणस्वरूपत्वनियमात् न तद्भिन्नत्वमतोनातिव्याप्तिः। तावन्मात्रस्यलक्षणत्वे घटतद्गुणाभ्यां सम्बद्धे पटादावतिव्याप्तिस्तद्व्युदासाय तांवाश्रितश्चेत्युक्तम्। तथा च पटादेर्घटततद्गुणाश्रितत्वाभावान्नातिव्याप्तिरितिभावः।।

पेक्षाऽऽपत्तिः। पेचकादीनां द्रव्यचाक्षुषे अस्मदादीनामालोकचाक्षुषेचाऽऽलोक-संयोगाऽपेक्षाविरहेण तस्याऽसार्वत्रिकत्वात्।। नचाऽऽवश्यकतेजोभावेनैव निर्वाहः। अबाधितनैल्य-चलन-तारतम्य-संख्या-परिमाण-संयोगविभाग- पृथक्त्व-परत्वाऽपरत्व-संस्कार-जात्यादिगोचर सर्वानुभवसिद्ध प्रत्यक्षाणां स्वतः संवादतश्च निश्चितप्रामाण्यानां निर्वाहकत्वादावश्यकेन तमोद्रव्येणैव निर्वाहे तेजोऽभावस्यैव काममपलापापत्तेः।। नचाऽवयवादि कल्पना गौरवम्। अवयवानामप्यनुभवसिद्धत्वात्। परमाणूनां च पृथिव्यादिष्वपि निरस्तत्वेन क्वाप्यकल्पनीयत्वात्। अन्यथा तुल्यन्यायेन शीतोष्णस्पर्शयोरन्यतराऽभावेनैवोपपत्तेरेकतरस्य अनुष्णाऽशीतस्पर्शस्य वाऽपलापाऽऽपत्तेः।।

नच [१]पृथिवीवाय्वोरुभयाऽभावाऽनुभवविरोधः। तप्यमानोदके कदाचिदुभयाऽभावाऽनुभववदुपपत्तेः।। किञ्च, [२]प्रौढप्रकाशकतेजः संसर्गाऽभावस्यैवाऽन्धकारत्वे घटे घटान्तराऽभाववत्प्रौढ प्रकाशक तेजस्यपि तदभावसत्त्वात्सूर्येऽप्यन्धकारव्यवहाराऽऽपत्तिः।। तेजोगतगुणक्रियादिषु तेजस्संयुक्त घटादिसर्वद्रव्यनिष्ठ गुणक्रियादिषु चाऽन्धकारप्रत्ययाऽऽपत्तिः। तत्र प्रौढप्रकाशक यावत्तेजस्संसर्गाऽभावस्य सदैव सुलभत्वादिति यत्किञ्चिदेतत्।। द्वितीयं निरस्यति— नाभावइति। अभावश्च प्रकृतभेदएवेति पक्षस्याऽग्रिमस्वरूपपक्षान्तर्भावात्तद्व्यावर्तनायाऽन्यइति, प्रकृतभेदातिरिक्तोऽभावो भेदतदधिकरणयोर्योग इति न। कुतः। समत्वात्।। तस्यापि निरूपाख्यत्वेन भेदतुल्यत्वादधिकरणेन भेदेन च सह सम्बन्धायोगात्। एतेन विशेषणता पदार्थान्तरमिति नवीन तार्किक प्रलापोपि निरस्तः। तस्य भावाऽभावान्यतरान्तर्भावस्याऽवश्यवाच्यत्वात्। विशेषणताख्यः स्वरूपसम्बन्ध विशेष इति जरत्तार्किक प्रलापमपि निरस्यति— अनुभयेति। स्वरूपसम्बन्ध इत्यस्य = स्वरूपमेव सम्बन्ध इत्यर्थो वा? स्वरूपयोस्सम्बन्ध इति वा? आद्येऽपि तत्तदधिकरणस्वरूपं? भेदस्वरूपम्? उभयस्वरूप वा? नत्रितयमपि। कुतः।

(१) पृथिवीवाय्वोरुभयाऽभावानुभव विरोधः इति। शीतोष्णस्पर्शयोः परस्पराभावात्मकत्व-स्वीकारेऽन्यतरस्थितेरवश्यम्भावेन तत्रोभयविध स्पर्शाभावप्रत्यक्षेण विरोधः स्यात्। तप्यमानोदके चाग्निसंयोगादुष्णस्पर्शोपलब्धेस्तत्कालीनशीतानुष्णशीतस्पर्शयोरभावानुभववदुपपत्तेर्यद्वा तप्यमानोदके बह्निसंयोगेन नष्टशीतस्पर्शेऽनुत्पन्नोष्णस्पर्शे च जले स्वाभाविकोष्णस्पर्शाभावमौपधिक शीतस्पर्शाभावं चादायोभयाभावानुभववदुपपत्तेरित्यर्थः।।

(२) प्रौढ़ प्रकाशतेजः संसर्गाभावस्येति।। तथाविध तेजोऽभावस्यान्धकाररूपत्वे सूर्यप्रकाशे चन्द्रप्रकाशस्याभावेन सूर्येऽन्धकार व्यवहारापत्तेरित्यर्थः। प्रौढ़प्रकाशसामान्यस्य तमोरूपत्वे घटादि निष्ठगुणकर्मादिषु अन्धकारप्रत्ययापत्तेस्तेषां तेजो द्रव्यः संयोगानधिकरणत्वेन प्रकाशाश्रयत्वासंभवात् इति भावः।।

अनुभयमिलनात्। उभाभ्यां सम्बन्धिभ्यां मिलनं सम्बन्ध उभयमिलनं तदभावात्। एकैकस्वरूपस्योभयाऽसम्बन्धत्वात् उभयस्वरूपस्याप्यसम्बद्धस्याऽन्यसाधारणत्वात् उभयाश्रितत्वाभावादनेकत्वाच्च तेषां सम्बन्धत्वायोगादित्यर्थः।। द्वितीयेऽप्याह- भावाभावातिरिक्तमिति।। तयोः = भेदतदधिकरणयोः भावाभावाभ्यामतिरिक्तं किमपि सम्बन्धरूपं नास्ति। तदुभयभिन्नस्याऽलीकत्वादिति भावः।। प्रकृतमुपसंहरन्निष्टसिद्धिं दर्शयति— निस्सम्बन्धेऽपीति।. तेन = उक्तदोषगणेन। सम्बन्धस्याभावो निस्सम्बन्धं, अर्थाभावेऽव्ययीभावस्य "अद्रुतायामसंहितं रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इत्युभयथापि माहभाष्ये प्रयोगेन तत्पुरुषेण सह विकल्पनादव्ययीभावः, तत्पुरुषो वा। अव्ययीभावपक्षे (१)"तृतीयासप्तम्योर्बहुलम्" इति बहुलग्रहणात्सप्तम्या अम्भावो न। सम्बन्धाभावेऽपीत्यर्थः। प्रतीतः = प्रतीयमानः भेदः मृषैव।। तत्र दृष्टान्तः = शुक्तौ रजतमिवेति। यथा रजतसम्बन्धशून्यायां शुक्तौ प्रतीयमानत्वाद्रजतंमृषा तद्वद्भेदोऽपीत्यर्थः। अत्र निस्सम्बन्धेऽपि तत्र प्रतीयमानत्वं मिथ्यात्वमिति लक्षणप्रदर्शनेन सम्बन्धविमर्शे गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, अवयवावयविनोः, विशिष्टकेवलयोः, उपादानोपादेययोः, आधाराऽऽधेयप्रभृतीनां च सम्बन्धस्य भिन्नत्वाऽभिन्नत्वादिना दुर्निरूपत्वात् सर्वप्रपञ्चस्य मृषात्वे, असङ्गोदासीनमद्वितीयकूटस्थचिन्मात्रवस्त्वेव परमार्थसत्यं शिष्यत इति सिद्धान्तरहस्यं सूचितम्।।७।।

ननु प्रमाणजन्यप्रतीतिरेव वस्तुतत्वसाधिका। सा च घटपटादीनां भेदं ग्राहयति। न च प्रामाणिकोऽप्यर्थो युक्तिसहस्रेणाप्यपलपितुं शक्यः। युक्तीनामपि प्रमाणाधीनत्वेन उपजीव्यप्रमाणविरोधे आभासत्वौचित्यात्। उपपत्तिरहितानामपि पक्षिमत्स्यादेः निरालम्बनगमन निरुच्छ्वासजीवनादीनां प्रत्यक्षसिद्धानामप्रत्याख्येयत्वादित्याशङ्क्य भेदग्राहिप्रमाणानि विमृश्य निराचष्टे— संयोगादेरिति।।

मू०।। संयोगादेरयोगान्न हि भवति भिदा गोचरश्चेन्द्रियाणां
व्याप्तिर्नासङ्गताया न भवति सदृशी वाक्यतात्पर्यदूरा।
मानाभावो न मानं न च पुनरपरं मानमस्यां तथापि
प्रत्यक्षा स्वाप्नमाया नगरमिव भवेत्साधु सैषा मृषैव।।१।।

तत्र भेदस्याऽऽद्यप्रमाणगम्यतां निरस्यति— संयोगादेरिति।। भिदा = भेदः। इन्द्रियाणां = चक्षुरादीनां। गोचरः = विषयः न भवति। कुतः? संयोगादेः = न्याय-

(१) तृतीया सप्तम्योर्बहुलम्।। अष्टा० अ० २ पा० ४ सू० ८४।। अदन्तादव्ययीभावात्तृतीयासप्तम्यो र्बहुलमम्भावः स्यात्। अपदिशम्। अपदिशेन। अपदिशम्। अपदिशे बहुलग्रहणात्समुद्रमुन्मत्तगंगमित्यादौ सप्तम्यानित्यमम्भावः।।

नयप्रसिद्धस्य संयोगसंयुक्तसमवायादेः भाट्टाभिमत संयुक्ततादात्म्यादेश्च संनिकर्षस्य निरुपाख्ये तस्मिन्नयोगात्। न च विशेषणता संनिकर्षोऽस्ति, तस्याः सम्बन्धनिरासेनैव निरस्तत्वात्। तस्मान्न भिदा प्रत्यक्षस्य गोचरः। नाप्यनुमानस्येति दर्शयति— व्याप्तिरिति। अधिकरणविशेषेणाऽसङ्गतायाः = असम्बद्धायाः, 'भिदायाः' इति विभक्तिविपरिणामेन सम्बन्धः। समानोक्तिर्वा। व्याप्तिः = अव्यभिचरित सामानाधिकरण्यलक्षणा, [१]स्वाधिकरणनिष्ठाऽत्यन्ताऽभावप्रतियोगिताऽनवच्छेदकभेदत्वाऽवच्छिन्न-सामानाधिकरण्यलक्षणा अन्यदृशी वा व्याप्तिः। क्वचिदपि वस्तुनि न = नास्ति। यद्ग्रहात्सा अनुमीयतेत्यर्थः। एवं निरुपाख्यत्वादेव व्यापकताऽवच्छेदकधर्मशून्यत्वात्, प्रतियोगिताऽधिकरणत्वाऽसंभवात्, प्रतियोग्यनुयोगिभावसम्बन्धस्यैव विमर्शे दुर्वचत्वाच्च व्याप्तिर्नेत्यपि बोध्यम्।। नाऽप्युपमानस्येत्याह— न भवतीति।।। गवादिसदृशे गवयादौ हि दृष्टे गोसदृशो गवय इत्यतिदेशवाक्यार्थं स्मरतः प्रागदृष्टगोपिण्डस्य पुरुषस्योपमितिः प्रसिद्धा। नच निरुपाख्ये भेदे कस्यचितसादृश्यमस्ति, येनोपमीयेतेति भावः।। एवं वैधर्म्याऽसाधारणधर्मयोरप्याधारत्वाऽसंभवात्, तत्सिद्धेः प्रमाणगोचरत्वसिद्ध्य-धीनत्वाच्च वैधर्म्याऽसाधारणधर्मविशिष्ट पिण्डज्ञानजन्योपमितिगोचरताऽपि निरसनीया।। असंनिकृष्टे संनिकृष्टसादृश्यज्ञानमुपमितिरिति भाट्टनयेऽपि वस्तुतस्सदृश एवोपमितिरिति सर्वतो विसदृशी भिदा न तद्गोचरः। नापि शब्दस्य। तत्र लौकिकशब्दस्य प्रत्यक्षादिसिद्धार्थानुवादित्वेन प्रत्यक्षाद्यगोचरेऽप्रसरात्।। दृश्यमानस्य च नीलं नभ इत्यादिवद्भ्रान्तिसिद्धानुवादित्वेनाप्युपपत्तेरित्यभिप्रेत्य वैदिकशब्दगोचरत्वं निराचष्टे-वाक्येति।। वाक्यस्य = वैदिकवाक्यस्य, तात्पर्यं = ऐदम्पर्यं, दूरं = यस्याः सकाशात्सा। वाक्यतात्पर्यात्स्वयं दूरेति वा। वैदिकवाक्यतात्पर्यगोचरता भेदस्य दूरापास्ता। प्रत्युत "नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" "एकधैवाऽनुद्रष्टव्यम्" "अत्र भिदामिव मन्यमानः" "उदरमन्तरं कुरुते। अथ तस्य भयं भवति" "यत्र हि द्वैतमिव भवति" "अथ योन्यां देवतामुपास्ते अन्योसावन्योऽहमस्मीति न स वेद यथा पशुः" "सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयं" "यत्र नाऽन्यत्पश्यति नाऽन्यच्छृणोति नाऽन्यद्विजानाति स भूमा" इत्यादि श्रुतिसहस्रैः प्रत्यगद्वयसन्मात्रतात्पर्यकैः प्रतिषिध्यमानत्वादिति भावः।।

---

(१) स्वाधिकरणनिष्ठाऽत्यन्ताऽभावेति।। अत्र स्वपदेन भेदनिरूपितव्याप्त्याश्रयो हेतुः ग्राह्यस्तथा च स्वयं भेदव्याप्तो हेतुस्तदधिकरणत्वेनाभिमत घटादि पदार्थ निष्ठाऽत्यन्ताऽभाव प्रतियोगिपटादिपदार्थः प्रतियोगितावच्छेदकं घटत्वादितदनवच्छेदकं प्रकृते भेदत्वं तदवच्छिन्नो भिदापरपर्याय भेदस्तत्समानाधिकरण्यलक्षणव्याप्तिः कस्मिन् पदार्थे नास्ति ततश्च न तज्जन्यानुमिति विषयत्वं भेदस्येति भावः।।

ननु क्रियाकारकफलभेदस्य प्रतिषेधे सर्वप्रमाणप्रमेय व्यवहारोच्छेदः, कर्मकाण्डप्रामाण्याऽनुपपत्तिः, गुरुशिष्यशास्त्राऽऽदिद्वैताभावे श्रवणाद्यप्रसिद्धे-रुपनिषदामपि प्रवृत्त्ययोगात्प्रामाण्याऽसिद्धिरित्यसंभावना प्रपञ्चनोक्तदोषाणां कः परिहार इति चेत्? श्रृणु। लोकसिद्धव्यावहारिकभेदोपजीवनेनैव सर्वव्यवहारसिद्धिः। अविद्वद्विषयत्वात् सर्वप्रमाणानां। उपपादितं ह्येतद्भगवद्भिर्भाष्यकारैः। *तथाहि, "ब्राह्मणो बृहस्पतिसवेन यजेत" "राजा राजसूयेन स्वाराज्यकामो यजेत" "वैश्यो वैश्यस्तोमेन यजेत" "जातपुत्रः कृष्णकेशोऽग्नीनादधीत"। "एतया निषादस्थपतिं याजयेत्" इत्यादिश्रुतयो लौकिकवर्णाऽऽश्रमवयोवस्थाऽदिविशिष्ट देहतादात्म्यमुपजीव्य प्रवृत्ता अपि नाऽप्रमाणं, तात्पर्यविषयीभूते यागादिक्रियाफलयोः साध्यसाधन-भावेऽविसंवादात्। तथा क्रियाकारकफलभेदं कर्तृत्वभोक्तृत्वादिकं च वस्तुतो मिथ्याभूतमपि लौकिकसर्वानुभवसिद्धमुपजीव्य प्रवृत्ता अपि। अन्यथा देहाऽऽत्मवादस्याऽपि श्रुत्यनुमतत्वेन वास्तवत्वकल्पना प्रसङ्गात्।। न चोपजीव्य-विरुद्धार्थं श्रुतिरपि कथं निवेदयेदिति वाच्यम्। तात्त्विकप्रामाण्यांशस्याऽनुप-जीव्यत्वात्, तद्बाधेऽपि व्यावहारिकप्रामाण्यांशस्याऽबाधनेन तावन्मात्रस्यैवोपजीव्य-त्वेनाऽविरोधात्।। नच क्रियाकारक फलविभागस्य मिथ्यात्वनिश्चये कर्मसु श्रवणादौ च प्रवृत्त्यनापत्तिः। प्राक्तन्निश्चयात्प्रवृत्त्युपपत्तेः। तादृशपुरुषान्प्रत्येव शास्त्रप्रामाण्योप-पत्तेः। निश्चितात्मतत्त्वं प्रत्यप्रवृत्तावपि कृतकार्यायाः श्रुतेर्वैयर्थ्यस्याऽनाशङ्क्यत्वादिति भावः।। नाप्यनुपलब्धिः तस्यां मानमित्याह— मानाभाव इति।। उपलब्धिर्ह्यर्थ-सद्भावाऽवगाहनान्मानं। तदभावश्चाऽनुपलब्धिः। सा च न मानं = न प्रमाणं। न ह्युपलब्धिरर्थं साधयतीति तदभावोऽपि तथेति वक्तुं शक्यम्। चक्षुरादेरर्थग्राहित्वं दृष्टमित्यांऽऽन्ध्यादेरपि तथात्वकल्पनापत्तेः।. नच तस्याः स्वतोऽर्थग्राहित्वाऽभावेऽपि (१)प्रतियोगितद्व्याप्येतरयावत्प्रतियोग्युपलब्धिसामग्री सहकृतस्वरूपयोग्यता विशिष्टाया अभावोपलब्धि जनकत्वमस्त्विति वाच्यम्। अननुगतगुरूतर प्रतियोग्युपलब्धिसामग्रीणां कारणतावच्छेदकत्वाऽनुपपत्तेः। अनुपलब्धिविशिष्टप्रतियोग्युपलब्धिसामग्री वा तद्विशिष्टाऽनुपलब्धिर्वा सामग्रीघटकैकैककारणानि वा प्रत्येकन्तदितरकारणान्य-नुपलब्धिविशिष्टानि, वैपरीत्यं वेत्यत्र विनिगमनाविरहेणाऽभावग्रहे प्रमाणाऽऽनन्त्यापत्तेः। अनुपलब्धिमात्रग्राह्यत्व नियमभङ्गापत्तेश्च।।

---

* यथाहि इ० पा०

(१) प्रतियोगितद्व्याप्येतरेति।। यथा घटोपलब्ध्यभावस्य प्रतियोगिभूता या घटोपलब्धिस्तस्यास्तथा घटोपलब्धिव्याप्याद्घटतद्गतरूपादिविषयादालोकसंयोगादितो वेतराया चक्षुरादिस्तत्सहकृतस्वरूपयोग्यता-विशिष्टाया अनुपलब्धेरभावोपलब्धि जनकत्वमस्त्वित्यर्थः।।

किञ्चा अन्धकारेऽपि घटाऽभावप्रत्ययापत्तिः। घटाऽऽलोकसंयोगादेर्घटव्याप्यत्वेन तदितरचक्षुरादिसत्त्वात्।। अपिच। पिशाचचाक्षुषसामग्र्यप्रसिद्ध्यास्तम्भे पिशाचभेदग्रहाऽनापत्तिः। किञ्चाऽनुपलब्धेरप्यभावतया साप्यनुपलब्ध्यन्तरेण सिद्ध्यतीत्येवं वाच्यम्। तथाच साप्यन्यया साप्यन्ययेत्यनवस्थानात् अनुपलब्धिरेव स्वयं न सिद्ध्यति दूरे तस्या अर्थसाधकत्वम्। एतेन प्रतियोगिसत्वप्रसञ्जन-प्रसञ्जितप्रतियोगिकत्वरूपा तद्योग्यतापि प्रत्युक्ता।। तर्कस्याऽऽपाद्याऽऽपाद-कव्यतिरेकनिश्चयाधीनत्वेन अनुपलब्ध्यग्रहे अयोगात्। तद्ग्रहेचाऽनवस्थानात्। यद्यनवस्थाभयादनुपलब्धिः अन्यतस्स्वतो वा सिद्ध्यतीत्युच्येत, तर्हि अभावान्तरमपि तथैव सेत्स्यतीत्यनुपलब्धिकल्पनवैयर्थ्यम्।। यदि तु सा साक्षिवेद्या, तर्हि स्वाप्नार्थवन्मिथ्यैवेति नार्थसाधिका। अभावान्तराणामपि तथात्वापत्तिश्चेति त्वदभिलषितभङ्गएवेति भावः। अर्थापत्त्यादिगोचरतामपि भेदस्य निराचष्टे—न चेति।। अस्यां भिदायां, अपरम् = अर्थापत्त्यादिरूपं मानं प्रमाणं च न संभवति। अर्थापत्तेः व्यतिरेकव्याप्तिग्रहाऽधीनत्वेन प्रतियोग्यप्रसिद्धौ व्यतिरेकाऽप्रसिद्धेः। किञ्च। पटे कस्याऽनुपपत्त्या घटभेदः कल्प्येत। पटत्वस्येति चेत्। न। तस्य भेदाऽविनाभावनियामक तज्जन्यत्वादिसम्बन्धाऽप्रसिद्ध्या तत्कल्पकत्वाऽयोगात्। घटत्वाऽभावाऽनुपपत्त्येति चेत्। समनियताऽभावानामैक्येन भेदाऽभावाऽभावरूपत्वेन च तस्य भेदाऽव्यतिरेकात्। व्यतिरेकाऽभ्युपगमेऽपि भेदसमानयोगक्षेमत्वात्सोऽपि कस्याऽनुपपत्त्या पटेकल्प्येतेति प्रष्टुं शक्यत्वात्। कल्पकाऽपरिचयेऽर्थापत्त्यप्रसरात्।। नापि संभवः प्रमाणं। तस्य *सर्वसंमतत्वाभावात्। अभ्युपगन्तॄणामपि संख्यापरिमाणादिमात्रगोचरत्वप्रसिद्धेः अभावग्राहकत्वाऽभावात्।। एवमुपदेशनिरपेक्ष-त्वात् ऐतिह्यप्रमाणगोचरतापि तस्य न संभवत्येवेति भावः।। तर्हि सा किमलीकैव? तथा सति न प्रतिभासेतेति शङ्कां वारयन्साक्षिवेद्यत्वपरिशेषणेन तन्मिथ्यात्वं साधयति—तथापीति। तथापि = प्रमाणाऽगोचरत्वेऽपि, प्रत्यक्षा = अपरोक्षत्वेन सर्वानुभवसिद्धा, सा = विमृष्टा, एषा = भिदा, साधु = अतितरां मृषैव।। तत्र दृष्टान्तः—स्वाप्नेति। स्वप्नदृष्टं ऐन्द्रजालिकमायोपदर्शितं वा नगरं यथा साक्षिमात्रवेद्यत्वान्मिथ्या, तद्वदित्यर्थः।। तथा च प्रयोगः—भेदो मिथ्या, प्रमाणाऽविषयत्वे सत्यपरोक्षत्वात्। स्वप्नगन्धर्वनगरादिवदिति।। भेदस्य मिथ्यात्वसाधकयुक्तयः संसर्गाभावेऽपि समाः सुधीभिरूहितुं शक्यन्त इति न पृथक् प्रपञ्चिताः। इत्थं कार्यकारणभेदनिरास प्रसङ्गेन सर्वे भेदाः स्वातन्त्र्येणापि निरस्ताः। ब्रह्मणः सर्वप्रपञ्चकारणत्वश्रुत्युपजीवितर्कैः कनककुण्डलन्यायेनापि

*सर्वसंगतत्व इति पाठः।

प्रागदर्शितयुक्तिभिः सर्वप्रपञ्चभेदो निरस्त एवेति कार्यस्वरूपपर्यालोचनमुखेनापि जगन्मिथ्यात्वस्य तर्कैः प्रसाधनादद्वितीयब्रह्मसिद्धिरिति सर्वतोदिग्विजयः।।८।।

एवमन्योऽन्याभावलक्षणे भेदे निरस्ते द्वित्वपृथक्त्वादिरूपस्यापि तस्य निरासे, अयमेवाऽवसरः तत्र वैशेषिकादय*स्तावदाहुः—"संख्याऽऽख्योगुणः सर्वद्रव्यवृत्तिः, एकत्वद्वित्वबहुत्वभेदात् त्रिधा। तत्राऽवयवगतैकत्वैः अवयव्येकत्वमनित्यद्रव्येषु यावद्द्रव्यभावि जन्यते। नित्यद्रव्येषु तु तन्नित्यमेव। द्वित्वादौ तु विशेषः। घटद्वये चक्षुरादिसंयोगात् अयमेकोऽयमेक इत्यपेक्षाबुद्ध्या द्वित्वोत्पत्तिः। ततो द्वित्वत्वनिर्विकल्पकम्, अनन्तरम् द्वित्व सविकल्पकम्, अनन्तरमिमौ द्वौ घटाविति विशिष्टवैशिष्ट्याऽवगाहि साक्षात्कारः। द्वित्वे प्रत्येकवृत्त्येकत्वद्वयमसमवायिकारणं। द्रव्यद्वयं समवायिकारणम्। अपेक्षाबुद्धिर्निमित्तकारणम्। एवं बहुत्वादावप्यूह्यम्। अपेक्षाबुद्धिनाशाच्च द्वित्वनाशः। अपेक्षाबुद्धिः क्षणचतुष्टयस्थायिनी। एवं पृथक्त्वेऽपि सर्वं बोध्यम्" इति। तदेतन्निराकर्तुमाह—बाह्य इति।।

मू०।। बाह्योऽर्थो बुद्धिमात्रान्न भवति स भवन्गोचरः स्यात्परेषा
मेकैकं न द्वयंचेदुभयमिति मृषा तद्विशिष्टप्रथा च।
द्वित्वादेस्सङ्करः स्यान्न खलु भवति ते प्रागभावाद्व्यवस्था
नापेक्षाबुद्धिक्लृप्तिः ⁑सकलमपि शनैर्योज्यमेतत्पृथक्त्वे।।९।।

अपेक्षाबुद्ध्या द्वित्वं जन्यत इत्यसत्। यतो बहिर्भवो बाह्यः = घटादि-प्रदेशवृत्तिरर्थः सत्यवस्तुरूपः, बुद्धिमात्रात् = इच्छाप्रयत्न कायचेष्टाद्यद्वारक ज्ञानात्, न भवति = नोत्पद्यते। उत्पद्यमानश्च मिथ्यैवस्यात्। तथाच प्रयोगः,— द्वित्वादिः मिथ्या, बुद्धिमात्रजन्यबाह्यार्थत्वात्, गिरिशिखरे मनोरथपरिकल्पित प्रासादवत् इति।। एवं स्वाप्नपदार्थवदेकैक पुरुषमात्रग्राह्यत्वादपि तस्य मिथ्यात्वमित्यभिप्रेत्याह— स इति।। सः = द्वित्वादिलक्षणोऽर्थः, भवन् = अपेक्षाबुद्ध्या जायमानत्वेन त्वयाऽभ्युपगम्यमानः, परेषां = पुरुषान्तराणाम्, गोचरः = प्रत्यक्षः, स्यात्। बाह्यसत्यार्थस्यैकपुरुषमात्रग्रहणयोग्यस्याऽप्रसिद्धेः। तथाविध शुक्तिरजतादेर्मिथ्या-त्वप्रसिद्धेश्चेति भावः।। [१]स्वसमानाधिकरणाऽत्यन्ताभावप्रतियोगित्व स्वविशेष्यनिष्ठभेद

---

* तावदेवमाहुः इति पाठ। ⁑निखिलमपि इति पाठ।

(१) स्वसमानाधिकरणाऽत्यन्ताभावप्रतियोगित्वं मिथ्यात्वलक्षणम्।। तत्र प्रतियोगित्वमिति लक्षणे सम्बन्धप्रतियोगिनि गुणक्रियाजात्यादावतिव्याप्तिस्तन्निरासायाभावप्रतियोगित्वमित्युक्तम्। तावत्युक्ते भेदलक्षणाभावप्रतियोगिन्याकाशादावतिव्याप्तिस्तन्निरासायात्यन्तेत्यभाव विशेषणम्। तथाप्या-

प्रतियोगितावच्छेदकत्वरूप मिथ्यात्वलक्षणयोगादपि द्वित्वादेर्मिथ्यात्वमित्याह- एकैकमिति।। [१]एकैकत्र न द्वित्वमेकैको नद्वाविति प्रतीतेः एकैकं वस्तु प्रत्येकं न द्वयं = द्वित्वशून्यं, द्वयभिन्नं वेति तवाऽप्यभिमतमेव। एवं चेत्प्रत्येकमनीलयोर्नीलाविति प्रतीयमाननीलरूपवत् प्रत्येकमनुभयस्वरूपयोरुभयमिति प्रतीतं द्वित्वमपि मृषा = मिथ्यैव। द्वौ न द्वौ, द्वयोर्द्वित्वं नास्तीति प्रतीतिर्नास्तीतिचेत् प्रत्येकमनीलयोः द्वावप्यनीलौ, द्वयोरपि नैल्यं नास्तीति वत्, द्वावपि न द्वौ, द्वयोरपि द्वित्वं नास्तीति प्रतीतौ बाधकाऽभावात्। द्वित्वाऽभावप्रकारतायां द्वित्वं विशेष्यतावच्छेदकं नेतिचेत्। न। नेदं रजतमितिवत् रजतं रजतं नेति [२]बाधाऽनुल्लेखात्। बाधे क्वाप्यारोपितस्य रूपस्य विशेष्यतावच्छेदकत्वाऽप्रसिद्धेस्तदनपेक्षणात्।। किञ्च। सति नीले पाकेन रक्तरूपाऽनिष्पत्तेः व्याप्यवृत्ति *गुणस्य समवायेन गुणत्वव्याप्यजात्या सजातीयस्योत्पत्तौ प्रतिबन्धकत्वमवश्यं वाच्यम्। तथाच सत्येकत्वे समवायेन द्वित्वाद्युत्पत्त्यनुपपत्तिः। एकत्वस्य नाशे तस्य यावद्द्रव्यभावित्वसिद्धान्तव्याघातः। प्रत्येकमेकत्व प्रत्यया- ऽनुपपत्तिश्च।

किञ्च। यदि प्रत्येकं न द्वित्वं, तर्हि क्व द्वित्वं? द्वयोरिति चेत्। किं तद्द्वयं? द्वित्वान्तरस्य पर्याप्त्यधिकरणं चेदनवस्था। स्वस्यैव चेदाऽऽत्माश्रयः। स्वाधिकरणविशेषनिश्चये स्वाधिकरणविशेषनिर्णयस्य हेतुत्वाऽऽपत्तेः। अथ च केयं पर्याप्तिः?। स्वरूपसम्बन्धविशेष इति चेत्। विशेषणतोक्तदोषग्रासः। अतिरिक्ता

काशादावति व्याप्तिस्तादवस्थ्यं तेषामवृत्तिस्वभावतया घटादिवृत्त्यत्यन्ताभावप्रतियोगित्वात्तद्वारणाय स्वसमानाधिकरणेत्यभावविशेषणम्। तथा च न दोषः परमते गगनादीनामवृत्तिद्रव्यतया तादृगभावप्रतियोगित्वाप्रसिद्धेरिति भावः। सत्ता सम्बन्धभेदमादाय लक्षणस्य स्वलक्ष्यसाधकत्वं नोपपद्यते तादृगभाव प्रतियोगित्वस्यान्यथैवोपपन्नत्वादित्यतोलक्षणान्तरमाह। स्वविशेष्यनिष्ठ भेदप्रतियोगिताऽवच्छेदकत्वं वा मिथ्यात्वम्। भेदप्रतियोगितावच्छेदके घटत्वादावतिव्याप्तिस्तेषामपि पटादिनिष्ठ घटादिभेदप्रतियोगिताऽवच्छेदकत्वात्तन्निरासाय स्वविशेष्यनिष्ठेति भेद विशेषणं दत्तम्। तेन न घटत्वादौ तद्दोषप्रसक्तिस्तेषां घटादिनिष्ठपटादि भेद प्रतियोगिताऽनवच्छेकत्वादिति। स्वविशेष्यनिष्ठेत्ये तावन्मात्रस्यलक्षणत्वे तु गगनादिनिष्ठ परममहत्परिमाणादौ तद्दोषस्तन्निरासायोत्तरदलमुक्तमितिभावः।।

(१) एकैकत्रेति।. परमतेन द्वित्वादौ मिथ्यात्वलक्षण द्वयस्यैकैकत्र द्वित्वं नास्ति। प्रत्येकं न द्वाविति च प्रतीति द्वयमाश्रित्याव्याप्तिमाशङ्क्य, तन्निरासपूर्वकं लक्षणद्वयसमन्वयं दर्शयति ऐकैकत्रेति।।

(२) बाधाऽनुल्लेखादिति। प्रातीतिकधर्मावच्छिन्न धर्मिकबाधाप्रसिद्धेर्न रजतं न रजतमिति बाध दर्शनाद् द्वित्वादेर्विशेष्यकतावच्छेदकत्वाप्रसक्तेर्यथोक्तप्रत्ययाभावो न दोषावह इतिभावः।।

*नीलस्य इति पाठः।

चेत्?। सापि प्रत्येकमसती क्वास्ते?। सापिद्वयोः पर्याप्ताचेत्? अनवस्थेति न द्वित्वाऽऽश्रयसिद्धिः। किंच। त्वया योग्यविभुविशेषगुणानां स्वोत्तरजन्यगुणनाश्यत्वाऽभ्युपगमात्, द्वित्वसमकालोत्पन्न ज्ञानेन द्वित्वत्वनिर्विकल्पकेन वा अपेक्षाबुद्धिनाशाऽवश्यं भावात् तेन द्वित्वनाशे द्वित्वसविकल्पकं, द्वित्वविशिष्टद्रव्यप्रत्यक्षं वा निर्विषयं स्यात्। तथा च प्रत्यक्षे विषयस्य कार्यसहभावेन हेतुत्वसिद्धान्तहानिः। तदभाववति तदवगाहित्वात् द्वाविति प्रत्यक्षस्याऽप्रमात्वापत्तिश्च। पूर्वं द्वित्ववानासीदिति तद्वत्येव तदवगाहनमिति चेत्। न। तस्कराऽपहृतकुण्डले पुरुषे असौ कुण्डली पुरस्तादास्ते इति शब्दप्रत्यययोः प्रामाण्याऽदर्शनात्। तदानीं घटवति भूतले पूर्वोत्तरकालयोर्घटाभाववत्वमात्रेण घटाभाववदिदं भूतलमिति शब्दप्रत्ययप्रमाणत्वापत्तेः, तुल्यन्यायेन घटवदिदं भूतलमिति शब्दप्रत्यययोरप्रमाणत्वापत्तेश्च (१)प्रातीतिकालिकतत्तदभाववत्तयोरेव प्रमात्वाऽप्रमात्वप्रयोजकताया अवश्यं वाच्यत्वादित्यभिप्रेत्याह— तद्विशिष्टेति। तस्य = द्वित्वस्य विशिष्टप्रथा = सविकल्पज्ञानं द्वित्वविशिष्टद्रव्यप्रत्यक्षं वा मृषा = निर्विषया, अप्रमास्यादित्यर्थः। अथवा, अपेक्षाबुद्धेर्विनैव प्रमाणं चतुःक्षणावस्थानाभ्युपगमेऽपि दण्डकुण्डलोभयवानिति षष्ठक्षणोत्पन्नज्ञानस्याऽप्रामाण्यं दुर्वारमेव। पञ्चमक्षणेऽपेक्षाबुद्धिनाशेन षष्ठक्षणे द्वित्वनाशादिति भावः।। किञ्च अयमेकोऽयमेक इत्यपेक्षा बुद्ध्या द्वयोरेव द्वित्वं, त्रिष्वेव त्रित्वमित्यादिनियमः कुतः?। (२)वैपरीत्यस्यापि दुर्वारत्वात्। समवायिकारणादिसाम्ये कार्यवैलक्षण्यं वा कथं?। नचैकत्वयोर्द्वयं द्वित्वे, त्रयं त्रित्वे हेतुरिति नियमाद्व्यवस्थेति वाच्यम्। एकत्वे द्वित्वाद्यभावात्। गुणे गुणानङ्गीकारात्। द्वित्वोत्पत्तेः प्राक् द्रव्येऽपि तदभावेन परम्परासम्बन्धेनाऽपि तत्र तस्य दुर्वाच्यत्वात्। अत एव द्वित्वे द्रव्यद्वयं हेतुरित्यपि, उक्तिसंभवाभावादित्यभिप्रेत्याह— द्वित्वादेरिति।। द्वित्वस्य = आदिपदात्रित्वादिसंख्यामात्रस्य च सङ्करः = आश्रयाऽव्यवस्था, एकत्रैव समवधानमवैलक्षण्यं, (३) एकैकस्याऽनेकजात्याक्रान्तता च स्यात्। कारणवैचित्र्यं

(१) प्रातीतिकालिक तत्तदभावयोरेवेति।। यथा घटवद्भूतलं घटाभाववद्भूतलमिति प्रतीतिद्वयोत्पत्ति समकालवर्तमानयोरेव घटतदभावयोर्यथोक्त प्रतीतिद्वयस्य घटसत्त्वासत्त्वदशायां प्रमात्वाप्रमात्वयोः प्रयोजकत्वं तद्वदद्वित्वतद्भावयोरेव द्वाविति प्रतीती तथैवैकत्र द्वित्वं नास्तीति च प्रतीतौ द्वित्व सत्त्वासत्त्वदशायां प्रमात्वाप्रमात्वयोः प्रयोजकत्वमवश्यमेव वक्तव्यं स्यादिति भावः।

(२) वैपरीत्यस्येति। द्वयोस्त्रित्वं त्रिषु च द्वित्वमित्यस्यापि वारयितुमशक्यत्वादित्यर्थः।।

(३) एकैकस्येति।। एकैकस्य दित्वत्रित्वादेरयमेकोयमेक इति द्वयमिति प्रतीत्या द्वित्वजात्याक्रान्ततास्यात्तथा प्रत्येकैकस्य द्वित्वाभावादिमौ द्वावयं चैक इति द्वयोरेव त्रित्वोपपत्तौ त्रित्वजात्याक्रान्तता च स्यादेवमयमेकोऽयमेक इमौ च द्वाविति चतुष्टत्वोपपत्तौ चतुष्टयत्वजात्याक्रान्ततापि च स्यादेवं त्रित्वादीनामप्यनेक जात्याक्रान्तापत्तिस्यादिति भावः।।

विना कार्यवैचित्र्याऽयोगात् (१)योगे चात्रेदमेवैतज्जातीयमेव जननीयमिति विनिगमका भावेन एकैकत्रैवाऽनेकवैजात्यशालि द्वित्वत्रित्वादिसमावेशप्रसङ्गात्। जायमानैक-संख्याव्यक्तेरेव वा लाघवात् द्वित्वत्वत्रित्वत्वाद्यनन्तवैजात्यकल्पन प्रसङ्गादित्यर्थः।। नच (२)तत्तत्प्रागभावव्यवस्थाभेदाभ्यां कार्यव्यवस्थाभेदवैलक्षण्यानीत्युदयनाचार्योक्तं युक्तम्, प्रागभावस्य कार्यवैलक्षण्याऽप्रयोजकत्वात्, अन्यथा गुणगुणिनोः समान-सामग्रीकत्वेऽपि प्रागभावभेदादेव वैलक्षण्योपपत्तेः, समवायिकारणादिभेदकल्प-नस्याऽनुभवविरुद्धपौर्वापर्योत्पत्तिकत्व कल्पनाप्रयासस्य च नैष्फल्याऽऽपत्तेः। सजातीय कारणजन्यघटादीनां नानाद्वित्वादिव्यक्तीनां च प्रागभावभेदाद्वैजात्यापत्तेः, प्रागभाव तद्भेदयोः प्रतियोगि तद्भेदसिद्ध्यधीनत्वेनाऽन्योन्याश्रयापत्तेः, प्रागभावानभ्युपगमा-च्चेत्याशयेनाह— न खल्विति।। ते = तव प्रागभावाद्व्यवस्था = आश्रयनियमो विविधा अवस्था व्यवस्थेति व्युत्पत्तेर्वैलक्षण्यं च न भवति। खल्विति = दर्शितार्थस्य प्रसिद्धत्वद्योतनाय।। यत्त्वाहुः-एकत्वान्तरसहितैकत्वेन द्वित्वं, द्वित्वसहितैकत्वेन त्रित्वं, तत्सहितेन चतुष्ट्वमिति। तन्न। (प०टि०)द्वयोरेव द्वित्वोत्पत्त्यनन्तरं त्रित्वचतुष्ट्वाद्यापत्तेः। तयोः प्रत्येकमेकत्वस्यापि सत्वेन द्वित्वसहितैकत्वस्य तत्रैव सुलभत्वात्। नच द्वित्वाऽसमानाधिकरणैकत्वमेव तथाविधं त्रित्वहेतुरिति वाच्यम्। (३)(प०टि०)द्वित्वान्तराश्रयघटकैकेन सह द्वयोस्त्रित्वव्यवहाराऽनापत्तेः।।

(४)ननु नानैकत्वविषयिण्या अपेक्षाबुद्ध्या द्वित्वं, द्वित्वतद्व्यक्तिव्य-

(१) योगे च।। कारणवैचित्र्यमंतरेणापि कार्यगतवैचित्र्य योगांगीकारेचेत्यर्थः।।

(२) तत्तत्प्रागभावव्यवस्थाभेदाभ्यामिति।। मृत्सकाशाद्घटोत्पत्ति दर्शनान्मृद्येव घटप्रागभावो न तु तन्तुषु। तद्वत्तन्तुभ्य एव पटोत्पत्तिदर्शनात्तन्तुषु पटप्रागभावो न च मृदीति/प्रागभावस्य पृथक्पृथक्व्य-वस्थितिलक्षणव्यवस्था तथा घटप्रागभावोऽन्यः पटप्रागभावोन्यः प्रतियोगिभेदेनाभावभेदाभ्युपगमादिति प्रागभाव भेदस्ताभ्यामित्यर्थः।।

(३) द्वित्वान्तराश्रय घटकैकेनेति। घट पटौ घट कुडौ चेति घटपटोभयवृत्तिद्वित्वान्यद्यद्घटकुडोभयगत द्वित्वं तदाश्रयस्य घटकं विशेषणीभूतं यद्घटमात्रवृत्त्येकत्वं तेनैकत्वेन सहघटपटयोस्त्रित्वव्यवहाराप्रसिद्धेर्न द्वित्वासमानाधिकरणैकत्वमेव द्वित्वसहितं सत्त्रित्वव्यवहारहेतुरिति नियमोपपत्तिरिति भावः। यद्वा द्वित्वस्य द्वयवृत्तित्वाभ्युपगमादेकत्वस्य चैकमात्रवृत्तित्वाभ्युपगमादेकात्पृथग्भूत द्वित्वाश्रययोर्यदेक-मात्रवृत्येकत्वं तेन सहिते द्वित्वे यद्वातयोरेकमात्रेण सहितयोरेकत्व द्वित्वयोस्त्रित्वव्यवहाराप्रसिद्धेर्न यथोक्तनियमसिद्धिरिति दिक्।।

(४) ननु नानैकविषयिण्येति। एक भिन्नं नानेति अभ्युपगमबलाद्द्वयमात्रवृत्त्येकत्व विषयिण्याऽयमेकोऽयमेक इति अपेक्षाबुद्ध्या द्वित्वं जायते तथैव द्वित्वं तद्व्यक्तिव्यधिकरणैकत्वविष-यिण्या = द्वित्वाश्रयीभूतव्यक्तिद्वयभिन्नाधिकरणवृत्येक विषयिण्या इमौ द्वावयं चैक इत्येवं रूपिण्याऽपेक्षाबुद्ध्या त्रित्वं जन्यते। एवमग्रेपित्रित्वाश्रयव्यक्तित्रयभिन्नाधिकरण वृत्येकत्वविषयिण्या-पेक्षा बुद्ध्या चुतष्ट्वं जन्यते इति कारण वैलक्षण्यादेव त्रित्वादि वैलक्षण्यमित्यर्थः।।

धिकरणैकत्वविषयिण्या त्रित्वं, एवं त्रित्वादि, तद्व्यधिकरणैकत्वविषयिण्या चतुष्ट्वादीनि, कारणवैलक्षण्यादेव द्वित्वत्रित्वादिवैलक्षण्यम्। एवमसमवायिकारणमपि त्रित्वे द्वित्वं तद्व्यक्तिव्यधिकरणैकत्वं चेत्यादि तद्व्यवस्थयैव कार्यव्यवस्थासिद्धिरिति नोक्तदोष इत्याशङ्क्याह-नेति।। अपेक्षाबुद्धेः क्लृप्तिः = ईदृश्ये वाऽस्यांसंख्यायां हेतुरिति निश्चयो नास्ति। उपलक्षणंचैतदसमवायिकारणत्वेनाऽभिमतसंख्यानामप्यनिश्चयस्य। तथाहि—अयमेकोऽयमेक इत्येकरूपया द्वित्वं, अयमेकोऽयमेकोऽयमेक इति वा, इमौ द्वावयमेक इति वा द्विविधया त्रित्वं, (१)एवमेकत्वचतुष्कविषयिण्या इमौ द्वावयमेकोऽयमेकः, इमे त्रयोऽयमेकः, इमौ द्वाविमौद्वाविति च चतुर्विधया चतुष्ट्वं च, सर्वैरनुभूयत इति नैकतरैव कारणमिति विनिगमकमस्ति। इत्थं चाऽऽसां सर्वासां कार्यवैजात्यादिनियामकत्वे द्वित्वस्यैकरूपस्य संभवेऽपि त्रित्वे वैजात्यद्वयं, चतुष्ट्वे वैजात्यचतुष्टयं, (२)पञ्चत्वे वैजात्याष्टकमित्येवं क्रमेणोत्तरोत्तरंबहुतर-वैजात्य*वृद्धिरनुगतत्रित्वत्वाद्युच्छेदश्च स्यात्। एवमेव विनिगमनाविरहाद्गणितशास्त्रप्रसिद्ध गुणनभाजन वैचित्र्यबुद्धीनामपि संख्या ज्ञानहेतूनां संख्यावैजात्यप्रयोजकत्वे द्वित्वादिसर्वसंख्यास्वप्यनन्तवैजात्यानि स्युरिति। एवं तत्तद्द्रव्यसमवेतपूर्वपूर्वसर्वसंख्यानां व्यस्तसमस्तानां स्वस्वन्यूनाऽधिकसर्वसंख्यासु गुणनभाजनादिवैचित्र्येण प्रत्येकमसम-वायिकारणत्वे वैजात्यप्रयोजकत्वे च सर्वसंख्यासु प्रत्येकमनियताऽनन्तवैजात्यापत्तिः। कारणीभूतद्वित्वाद्यव्यवस्थया त्रित्वादिष्वव्यवस्थापत्तिश्च बोध्या।

नन्वेवमेकत्वस्याप्यनुपपत्तौ अद्वयं ब्रह्मेतिवदनेकं ब्रह्मेत्यप्याऽऽपद्येतेति चेत्। न। तस्येतरनिरपेक्षत्वेन वस्तुस्वरूपत्वात्। परमाणुतदेकत्वयोर्मानाभावेन कारणपरम्पराभङ्गात् जन्यैकत्वासिद्धेः। आकाशादेरुत्पत्तिश्रवणान्नित्यद्रव्याऽप्रसिद्ध्या, नित्येऽपि तस्मिन्मानाभावात्। गुणकर्मादिष्विव सर्वत्रापि वस्तुस्वरूपमात्राऽवलम्बनेनैव

(१) एवमेकत्व चतुष्कविषयिण्येति।। अयमेकोऽयमेकोऽयमेकोऽयमेक इति एकत्व चतुष्क विषयिण्येत्यर्थः एवमिमौ द्वाविमौ द्वाविति चतुर्थ प्रकारः। एवमिमौ द्वावयमेकोऽयमेक इति द्वितीय प्रकारः। इमे त्रया अयमेक इति तृतीय प्रकारः। इमौ द्वाविमौ द्वाविति चतुर्थ प्रकारः। इति चतुष्प्रकारोपपन्नयापेक्षया बुद्ध्या चतुष्ट्वं जन्यते इति सर्वैरनुभूयतेऽतोनैकतरापेक्षा बुद्धिकारणमिति नैकतरपक्षविनिगमक युक्तेरस्तीत्यर्थः।।

(२) पंचत्वे वैजात्याष्टकमिति।। अयमेकोऽयमेकोऽयमेकोऽयमेकोऽयमेक इति एकवैजात्यम्। इमौ द्वाविमेत्रया इति द्वितीय वैजात्यम्। इमे त्रया इमौ द्वावितितृतीय वैजात्यम्। इमौ द्वाविमौद्वावयमेक इति चतुर्थ वैजात्यम्। इमौ द्वावयमेक इमौ द्वाविमौ द्वाविति पंचमवैजात्यम् अयमेकोऽयमेकोऽयमेक इमौ द्वाविति षष्ठम् वैजात्यम्। अयमेक इदं तु चतुष्टयमिति सप्तम प्रकारः। इदं चतुष्टयमयमेक इति वैपरीत्यकरणेनाष्टमप्रकारः। इति वैजात्याष्टकम्।।

*बुद्धि इति पाठः।

ऐक्यव्यवहारोपपत्तेः। नचाश्रयगतसंख्ययैव गुणादिष्वेकत्वादिव्यवहारः, न स्वरूपमात्रेणेति साधुः। एकव्यक्तिसमवेतगुणक्रियादिषु एकत्वादिषु चाश्रयैक्यापत्तौ, विनैवाऽऽयासमस्मदिष्टसिद्ध्यापत्तेः। व्यक्त्यनेकत्वाज्जातिसमवायादिषु द्वित्वादिसर्व-संख्याव्यवहारापत्तेः, एकव्यक्तिगतरूपरसादिषुद्वित्वबहुत्वव्यवहारा-ऽनापत्तेश्च। [१]तत्रैकत्वं स्वरूपमेवेति यद्युच्येत, तर्हि द्रव्येष्वपि तथैवाऽस्तु।. किञ्च। [२]आकाशै-कत्वव्यक्तेरेकत्वव्यवहारः किमाश्रयैकत्वव्यक्त्यन्तरात्? उत स्वतः?। आद्ये तस्याप्यन्यतस्तस्याप्यन्यतस्तस्याप्यन्यत इत्यन्योन्याश्रय चक्रकाऽनवस्थाः स्युः। द्वितीये तस्येव घटादीनामपि स्वत एकत्वव्यवहारोपपत्तौ नैकत्वाऽऽख्य-संख्यागुणस्वीकारे प्रयोजनं प्रमाणं वास्तीति मूलोच्छेदादपि न द्वित्वादिसिद्धिः। साधकबाधकसाम्यात्संख्योक्तदूषणानि पृथक्त्वेऽप्यतिदिशति-निखिलमपीति।। निखिलं = सर्वमप्येतद्दूषणजातं संख्यायामिव पृथक्त्वेऽपि योज्यं। तस्यापि संख्यावदेव एकपृथक्त्वद्विपृथक्त्वादिभिन्नस्य कारणगतैकपृथक्त्वापेक्षाबुद्ध्यादिजन्यत्वस्य परैरभ्युपगमादित्यर्थः। त्वरयोपन्यासे व्यामोहः स्यादिति शनैरित्युक्तम्। एतेन बहुतरतपन परिस्पन्दाश्रयत्वादि ज्ञानसाध्याः परत्वादयोपिः परास्ताः।। ९।।

ननु कनककुण्डलयोरन्योऽन्याऽभावलक्षणो द्वित्वपृथक्त्वादिलक्षणश्च भेदो मास्तु, तथाप्यधिकरणात्मकाऽभाववादिनां प्राभाकरादीनां मत इवाधिकरणस्वरूप एव भेदोऽस्त्वित्याशङ्क्याह— कार्यमिति।

मू०।। कार्यं नाऽन्यन्निदानात्पृथगनधिगमान्न ह्युपादानहेत्वो-
वैंलक्षण्यं तथात्वे न भवति समवायाद्व्यवस्थाऽनुपेतात्।
नोचेत्स्वर्णादिकार्ये द्विगुणगुरुतया मूल्यवृद्धिप्रसङ्गो-
ऽवस्थाभेदाद्विभेदे स्थितिगतिभिदया भेदिनः स्युर्नराश्च।। १०।।

कार्यं = घटशरावादि, निदानात् = उपादानकारणात् मृदादेः, ना-न्यत् = स्वरूपतोऽपि भिन्नं न भवति। कुतः। पृथक् = कारणात्पृथग्भावेन, अनधिगमात् = मृदः पृथक्कृत्यघटादेर्दर्शयितुमशक्यत्वादित्यर्थः। ननु क्षीरोदकयो-र्मिलितयोः पृथक्करणाऽसामर्थ्येऽपि तत्स्वरूपभेदवदत्राप्यस्त्वित्याशङ्क्याह— नहीति।। हि = यस्मात्, तथात्वे = कार्यस्योपादानाऽन्यत्वे सति, उपादानहेत्वोः = उपादान-

(१) तत्र = एक व्यक्तिगतरूपरसादिष्वित्यर्थः।।

(२) आकाशैकत्वव्यक्तेरिति।। आकाशस्यैकव्यक्तिस्वरूपत्वात्तत्र या एकत्व संख्या तस्यां य एकत्व व्यवहारः सः किमाश्रयगतैकत्व संख्यालक्षणव्यक्त्यंतरात्सम्भवति किम्वा स्वत एकत्वात्मक स्व स्वरूपमेवेत्यर्थः।।

कारणनिमित्तकारणयोः, वैलक्षण्यं = विभिन्नलक्षणत्वं न संभवति। गवाश्वयोरिवाऽत्यन्तभिन्नयोस्तयोः अयुतसिद्धिनियामकस्य दुर्वचत्वात्, [१]स्वतादात्म्याऽऽपन्न कार्यजनकत्वमुपादानत्वं, [२]स्वातिरिक्तकार्यजनकत्वं निमित्तत्वमित्येव उपादाननिमित्तयोर्लक्षणभेदस्याऽवश्यवाच्यतया भेदाभ्युपगमे लक्षणभेदाऽसंभवादित्यर्थः।। ननु [३]स्वस्मिन्समवायेन कार्यजनकत्वमुपादानत्वं, तदन्यसम्बन्धेन कार्यजनकत्वं निमित्तत्वमित्येव लक्षणम्। अयुतसिद्धिनियामकश्च समवाय एवाऽभ्युपगम्यत इति चेत्। तत्राह— न भवतीति।। [४]"समवायाऽ-*भ्युपगमाच्च साम्यादनवस्थितेः" इति बादरायणदर्शितदिशा निरसनीयत्वेन अनुपेतात् = अनभ्युपगतात्समवायात्त्वदुक्तलक्षणव्यवस्था न संभवत्येवेत्यर्थः। तथाहि- उपादानोपादेययोः, गुणगुणिप्रभृतीनां च न तावत्समवायाख्यः सम्बन्धः संभवति।

---

(१) स्वतादात्म्यापन्नकार्यजनकत्वमुपादानत्वम्। कार्यजनकत्वमुपादानत्वमित्युक्ते कुलालादावतिव्याप्तिस्तन्निरासाय तादात्म्यापन्नेति कार्यविशेषणम्। तावन्मात्रोक्ते कालादौ तद्दोषस्तेषामपि मृत्तादात्म्यापन्न घटादिं प्रति जनकत्वादित्यतः स्वेति विशेषणम्। तथा च न दोषः कालादीनां स्वतादात्म्यापन्न घटादिं प्रति जनकत्वात्। विशेष्यभागानुपादाने तु घटादीनां स्वं प्रत्यप्युपादानत्वापत्तिर्दोषस्तार्किकसमये सर्वस्य सर्वस्मिन्तादात्म्याभ्युपगमात्तन्निरासाय स्वतादात्म्यापन्न कार्यजनकत्वमित्यर्थः।।

(२) स्वातिरिक्त कार्यजनकत्वं निमित्तकारणत्वम्। अत्राप्युपादानादिप्रसक्ति निरासाय स्वातिरिक्तेत्युपादानम्। स्वातिरिक्तजनकत्वमित्येतावन्मात्रोक्तावसम्भव आकाशादीनित्यपदार्थान्प्रतिजनकत्वासम्भवात्तद्व्युदासाय स्वातिरिक्त कार्येतिदत्तम्।।

(३) स्वस्मिन्समवायेनकार्यजनकत्वमुपादानत्वम्।। अत्र कुलालादौ दोषवारणाय समवायेन कार्यजनकत्वमित्यस्य समवायसम्बन्धावच्छिन्नकारणताशालित्वेत्यर्थकत्वेऽसमवायिकारणेऽतिप्रसक्तिवारणाय स्वस्मिन्नित्युक्तम्। तथा चासमवायकारणीभूतावयवसंयोगादेरथात्वान्नदोषः। कार्येत्यनुपादानेऽसम्भवः। सर्वस्यापि स्वं प्रतिजनकत्वाभावात्तन्निषेधाय कार्येत्युपादानमिति समवायान्यसम्बन्धेन कार्यजनकत्वं निमित्तकारणत्वम्। अत्राप्युपादानेऽतिव्याप्तिनिरासाय समवायान्येत्युक्तम्। समवाय सम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यातिरिक्तसम्बन्धावच्छिन्न कारणताशालित्वमित्यर्थः।। तावन्मात्रस्य लक्षणत्वे समवायान्यतादात्म्यसम्बन्धावच्छिन्नकारणताशालिनि उपादानेऽतिप्रसक्तिवारणाय समवायेत्यस्य तादात्म्यसम्बन्धोपलक्षणत्वात्समवायतादात्म्यातिरिक्त सम्बन्धेनकारणता शालित्वार्थसम्भवान्नदोषः।।

(४) समवायाभ्युपगमाच्च साम्यादनवस्थितेः।। अ० २ पा० २ सू० १३।। द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामण्वोः समवेतीति द्व्यणुकस्य परमाणुभ्यामत्यन्तभिन्नस्य ताभ्यां समवायसम्बन्धाभ्युपगमात्समवायस्यापि सम्बन्धिभ्यां भिन्नत्वस्यद्व्यणुकेन तुल्यत्वात्स्ववृत्यर्थं समवायान्तरापेक्षायामनवस्था स्यादतो न परमाणुकारणवादसिद्धिरित्यर्थः।।

* अभ्युपगमे च इति पाठः।

स हि संयोगवदेव संबन्धिभ्यां भिन्नस्तावाश्रितश्च वाच्यः। तस्य यद्युभयसम्बन्ध्याश्रितत्वं संयोगवदेव स्वातिरिक्तसमवायेन कल्प्येत, तर्हि तस्यापि पूर्वसमवायसाम्यात्पूर्वसमवायतत्सम्बन्धिनौ चाऽऽश्रयितुं समवायान्तरपर्येषणायां तस्यापि पूर्वाभ्यां साम्यमित्यनवस्था प्रसङ्गात्। किञ्च पटादिद्रव्यस्यैकेन समवायेन बहुभिस्तन्तुभिर्गन्धरसादिभिश्च न सम्बद्धत्वसंभवः। संयोगे तथा अदर्शनात्। अपि च, सत्स्ववयवेषु अवयविनाशस्थले एकसम्बन्धिनि नश्यति सम्बन्धो न नष्ट इत्येतदनुभवविरुद्धं, घटध्वंसाऽधिकरणकपालेषु घटसमवायप्रत्ययाऽऽपत्तिश्च। तदानीं तेषु तत्समवायो नास्तीति चेत्। अनपसृतस्य अनष्टस्य च तस्य तत्र कुतोऽसत्त्वं। सत एव तस्य समवायस्य *तदाऽऽधारतानियामको नेति चेत्। तत्प्रागपि तस्य कपालेष्वाधारतानियामकसम्बन्धस्य दुर्वचत्वेन पूर्वोत्तरकालयोरविशेषात्। अभावीयविशेषणता निरासोक्त युक्तिभिः अनवस्थाप्रसक्त्या च विशेषणता विशेष्यस्याप्युक्तिसंभवाऽभावात्। एवं तन्तुषु प्रागसतः पटसमवायस्योत्पत्तिमन्तरेण कथं पटोत्पत्त्यनन्तरमपि सत्त्वं। तत्राऽनागतस्यानुत्पन्नस्य चाऽसतस्तत्र सत्त्वोक्तेरनुभवपथाऽनारोहात्। अत एवोपहसितं बौद्धैः—

"(१) ना याति न च तत्राऽसीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाऽधारमहो व्यसनसन्ततिः।। इति।।

अयं च दोषगणो जातिष्वत्यन्ताभावे च बोध्यः।। किञ्च। यद्येक एव समवायस्तर्हि तन्तुषु घटः, कपालेषु पटः, अश्वे गोत्वं, गविचाश्वत्वमिति रीत्या सर्वेषां समवेतद्रव्यगुणकर्मजातीनां सर्वद्रव्यगुणकर्मसु समवेतत्वात्सर्वस्य सर्वात्मकत्वे वस्त्वव्यवस्था स्यादिति निष्प्रमाणकात् दुरवस्थिताच्च समवायान्न लक्षणव्यवस्था सिद्धिरिति भावः। कार्यस्योपादानान्यत्वाऽभ्युगमे दण्डान्तरमाह–नोचेदिति।। कर्षादिपरिमितसुवर्णादिः कार्यं = कुण्डलकटकादौ द्रव्यान्तरभूते कारणगुरुत्वेन तत्सदृशगुरुत्वान्तराऽरम्भादापाद्यमानया द्विगुणगुरुतया मूल्यस्य = क्रेतृप्रत्यर्पणीयद्रव्यस्य,

---

*तदाधारता = कपालाधारकतेत्यर्थः।।

(१) नायातीति श्लोकार्थः। व्यक्त्युत्पत्ति समये तावन्न व्यक्त्यन्तरादायाति निष्क्रियत्वान्न च व्युत्पत्ति प्रदेशे व्यक्त्युत्पत्तेः पूर्वं सा जातिरासीत्। व्यंजकाभावात्। तथापि तथात्वे सर्वगतत्वापत्तेः, न च पश्चादस्ति उत्पद्यते अनित्यत्वप्रसङ्गात्। यदा च व्यक्त्यन्तरादायाति, इति पक्षस्तदा न चांशवत् येन व्यक्त्यन्तरमपरित्यज्य व्यक्त्यन्तरमुपक्रमेत् न च पूर्वतनमाधारं जहाति येन निरंशं सदन्यव्यक्तौ वर्तेत पूर्वतनाश्रये तद्व्यवहाराभावप्रसंगादिति सामान्यवादीनां महाव्यसनसंततिरहोऽनुकम्पायामित्यर्थः।।

(तत्त्वप्रदीपिकाटीकायाम्)

वृद्धिप्रसङ्गः द्वैगुण्यं प्रसज्येत। कर्षान्तरसंवलिते गुरुत्वमूलद्वैगुण्यदर्शनादित्यर्थः। कारणगुरुत्वस्य कार्यगुरुत्वेनाभिभवान्न द्वैगुण्यप्रत्यय इति चेत्, अतीन्द्रिये कार्य प्रतिबन्धातिरिक्ताभिभवनिरूपणासंभवात्, विनिगमनाविरहेण परस्परेण परस्परकार्य-प्रतिबन्धे पतनादिकार्यस्यैवाऽसंभवापत्तेः। पतनादिकार्याऽतिरेकेण तदनुमापकान्तरा-ऽप्रसिद्धेः। तदसंभवे गुरुत्वप्रत्ययस्यैवोच्छेदापत्तेश्चेति भावः।। नन्वस्तु कनककुण्डलयोरत्यन्ताऽभेदः। तथापि तदभिन्नकुण्डलाद्यवस्था *परिमाण भेदात् तद्नुषक्त कनकस्वरूपमपि भिन्नमेवोच्यतां। अन्यथा वैचित्र्यबुद्धेर्निरालम्बनत्वापत्तेः। अवस्थाभेदेऽपि कनकैकाकारप्रत्ययस्तु कनकत्वजात्यैक्यनिबन्धनो भविष्यतीत्या-शङ्क्याह— अवस्थाभेदादिति। पिण्डकुण्डलाद्यवस्थादिभेदात् कनकादिवस्तुभेदे उच्यमाने स्थितिगत्युपवेशनाद्यवस्थाभिदया देवदत्तादयो नराः = मनुष्याश्च प्रत्येकं प्रतिक्षणं भेदिनः = भेदवन्तः स्युः।। तथा च देवदत्तस्योपविष्टस्योत्थाने तदवस्थस्य मरणात्, उत्थितस्य च जन्मत आशौचजातकर्मादिप्रसङ्गः। उपविष्टस्य मरणहेतावुत्थाने इच्छाऽयोगात् सर्वपुरुषाणां स्पन्दनानुपपत्तिश्च। यदि तेष्वबाधितप्रत्यभिज्ञाबलादभेदः, तर्हि प्रकृतेऽपि तुल्यम्। अवस्थानां तु भेदाभेदादिना दुर्वचत्वेन मिथ्यात्वमेव। एवमाश्रयात्पार्थक्येन उत्पत्ति विनाश निरवयवत्व सावयवत्व परिस्पन्दाऽपरिस्पन्द व्याप्ति विछित्ति व्यासक्ति पर्याप्तिसाङ्कर्याऽसांकर्यादिना दुरवधारण स्वभावत्वात् आवश्यकानुगतोपादानेनैवाऽनुगतकनकादिबुद्धिनिर्वाहाच्च तार्किकाभिमत नित्यजातिपदार्थोऽपि निरसनीयः। तत्रापि "ना याति नच तत्राऽसीदिति" श्लोकोक्तदोषसाम्यादिति नाऽधिकरण-स्वरूपोऽपिभेदः प्रामाणिक इति सर्वोपादानसन्मात्रवस्त्वैक्यं सिद्धमिति भावः।। १०।।

ननु वस्तुनोऽत्यन्ताऽभेदे कार्यकारणभावप्रत्ययः किं निबन्धन इत्या शङ्क्य सोऽपि मायिकाऽवस्थाभेदपर्यालोचननिबन्धनो न वास्तवः, तदन्वयव्यतिरेका-ऽनुविधानादिति दर्शयन्—

"तस्मात्संभावनामात्रः संसारः प्रत्यगात्मनि।
उक्तेऽर्थे संशयश्चेत्स्यात्प्रत्यग्दृष्ट्या निरीक्ष्यताम्।।"

इति।। वार्तिकोक्तप्रत्यग्दृष्टिप्रकारोपदर्शनेन निष्प्रपञ्चं सन्मात्रमनुभावयति-पिंडाऽवस्थेति।।

---

* परिणाम इति पाठः।

मू०।। पिण्डाऽवस्थाघटत्वे मनसि विमृशतो हेतुकार्यत्वधीः स्या-
न्मृन्मात्रं यद्वदेकं स्फुटमभिमृशतो नैव हेतुर्नकार्यम्।
तद्वन्मायिप्रपञ्चौ मनसि कलयतो ब्रह्म विश्वस्य हेतुः
सन्मात्रन्त्वेकरूपं पटुपरिमृशतो नैव मायी न विश्वम्।। ११।।

पूर्वोत्तरोभयाऽवस्थाऽनुगतं हि मृद्वस्तु प्राक्तनपिण्डावस्थापन्नं कारणमित्युच्यते, पश्चात्तनं घटावस्थापन्नं तु कार्यमिति। तत्र पूर्वतनीं पिण्डावस्थां पश्चात्तनं घटत्वं = घटावस्थां च मनसि विमृशतः = विभेदेनाऽनुसंदधानस्य पुरुषस्य वस्तुतो भेदशून्येऽपि मृद्वस्तुन्यवस्थाद्वयाऽनुषङ्गमपेक्ष्य हेतुकार्यत्वधीः = कार्य-कारणभावलक्षणभेदग्राहिणी बुद्धिः स्यात्। प्राप्तकालतायां लिङ्। एकं = उभयावस्थानुगतं मृदमेव = मृन्मात्रं स्फुटं = अवस्थाद्वय विविक्तं, परिमृ-शतः = पर्यालोचयतः पुरुषस्य पूर्वोत्तरावस्थयोर्मृद्व्यतिरेकेणाऽसत्त्वप्रतीतेः, स्वरूपमात्रनिष्ठे मृद्वस्तुनि चाभिन्ने कार्यकारणभावासंभवात्, हेतुः = कारणं नैवा-ऽस्ति = नास्त्येव, एवं कार्यमपि नास्ति, वास्तवरूपपर्यालोचने मायिकरूप-तिरोभावादित्यर्थः। यथाऽयं दृष्टान्तः- तद्वन्मायी = मायासंवलितः परमात्मा प्रपञ्चस्य पूर्वावस्था "सदेव सोम्येदमग्र आसीत्" इति श्रुतेः। प्रपञ्चश्चोत्तरावस्था "तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियत" इति श्रुतेः। तौ = मायिप्रपञ्चौ द्वैतवासनावासिते मनसि कलयतः = प्रतिसंदधानस्य पुरुषस्य "तदेतद्ब्रह्माऽपूर्वमनपरम्" इत्यादिश्रुतेः वस्तुतः कार्यकारणभावनिर्मुक्तमपि ब्रह्म विश्वस्य = जगतः, हेतुः = उपादानमिति धीरपि स्यात्। वस्तुतो मायिप्रपञ्चयोः सर्वाऽनुगत-सद्वस्त्वव्यतिरेकात्, सदेवैकरूपं सन्मात्रं ब्रह्म पटु = द्वैतवासनाऽनास्कन्दितं यथास्यात्तथा परिमृशतः = सर्वत्र पश्यतः पुरुषधौरेयस्य, मायी = मायाविशिष्टः जगत्कारणं, नैव = नाऽस्त्येव, तथा विश्वं = जगदपि नाऽस्त्येव। मायिप्रपञ्चयोः सदविचारमात्रसिद्धत्वेन विचारपूर्वकदर्शने सत्येव तिरोधानादिति भावः।। यथाहुः—

"दन्तिनि दारुविकारे दारु तिरोभवति सोऽपि तत्रैव।
जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोभवति।।" इति।।

श्रुतिरपि—"कार्यकारणतां हित्वा पूर्वबोधोऽवशिष्यते।" "मनसैवेदमाप्तव्यं" "नेहनानास्ति किञ्चन" "पूर्णमदः पूर्णमिदम्" इत्यादौ तदेव बोधयतीति।। ११।।

ननु यदि ब्रह्मैव सत्यमितरत्सर्वमनृतं, तर्हि कथं जगति सत्यता प्रतीतिरित्याशङ्क्य देहादावात्मताप्रत्ययवत्सत्पदार्थे जगदध्यासात्तद्धर्मेणैव तथाप्रतीतिरिति लौकिकदृष्टान्तेन बोधयति— सन्कुम्भ इति।। अथवा— ननु घटशरावादौ मृन्मृदित्यनुगतप्रत्ययवज्जगति

प्रतिवस्तु न ब्रह्माऽनुगतिः प्रतीयते। तत्प्रतीतौ जाड्यदुःखानुभवविरोधादित्याशङ्क्य विरुद्धचित्सुखरूपानुगमादर्शनेऽपि अध्यस्तरूपाविरुद्ध सत्तांशाऽनुगतिर्दृश्यत एवेति सदृष्टान्तमुपपादयति— सन्कुम्भ इति।।

मू०।। सन्कुम्भः सत्कुसूलं सदखिलमिति यद्भाति यच्च श्रुतं प्राक्
तत्सत्यं व्याप्य विश्वं घटपिठरमुखं मृत्तिकेवाऽवभाति।
तस्मिन्नज्जाविवाऽहिर्निखिलमपि जगत्कल्पितं तत्स्वभावा-
त्तन्मात्रं तत्पृथक्त्वे ह्यसदिदमखिलं स्यात्तदेव ह्यभेदे।। १२।।

कुम्भः = घटः सन् = सत्यः, एवं कुसूलं = मार्तिकं धान्याऽऽवपनं सत् = सत्यमिति रीत्या, अखिलं = जगत्, सत् = सत्यमिति यत्सर्वत्रैकं सद्रूपं भाति, यच्च सृष्टेः प्राक् "सदेव सोम्येदमग्र आसीत्" "तद्धेदं तर्ह्यव्याकृतमासीत्" "आत्मा वा इदमेक एवाऽग्र आसीत्" "अहमेकः प्रथममासं वर्तामि च भविष्यामि च" इत्यादिश्रुतिषु नित्यसत्ताबोधकेन असधातुना सदेकस्वभावं वस्तु श्रुतं तदेव मायिप्रपञ्चोभयानुगतमुभयाधिष्ठानरूपं सत्यं, तदेव मृत्तिका = मृत्, घटपिठरमुखं = कुम्भस्थालीशरावादि स्वकार्यजातमिव कृत्स्नं प्रपञ्चं व्याप्य अवभाति = प्रथते।। तर्हि मृदिव किं ब्रह्मापि सविकारं नेत्याह— तस्मिन्निति।. तस्मिन् = सद्रूपे ब्रह्मणि, निखिलमपि जगत्कल्पितं = अध्यस्तमित्यर्थः। रज्जुगतऋजुवक्रतादेस्तदध्यस्तसर्प इव विवर्तेऽपि जगति अधिष्ठानसत्तानुवृत्तिसंभवादिति भावः। ततः को लाभ इत्याशङ्क्येष्टसिद्धिरित्याह— तदिति।। तत् = ब्रह्मैव स्वः = स्वीयः भावः = तत्त्वं यस्य जगतस्तत्तत्स्वभावं भावप्रधानो निर्देशः। तथात्वादित्यर्थः। तन्मात्रं = ब्रह्ममात्रं तद्व्यतिरेकेण जगन्नास्तीत्यद्वितीय-सद्वस्तुसिद्धिरित्यर्थः। उक्तेऽर्थे प्रागदर्शितयुक्तीरपि स्मारयन्नुपसंहरति— तदिति।। हि = यस्मात्। तत्पृथक्त्वे = सद्रूपादन्यत्वे, इदमखिलं = जगत् असत्स्यात्, सतः अभेदे तु सदैकरूप्यात् तद्ब्रह्मैव जगत्सम्पन्नमित्युभयथापि प्रतिज्ञाताऽद्वितीय सन्मात्ररूपलक्ष्यसिद्धिरित्यर्थः।। १२।।

ननु यदि ब्रह्मसत्तयैव जगत्सत्ता न स्वतः, तर्ह्यापणस्थरजते शुक्तिरजते च मिथ्यात्वेनाऽविशिष्टे एकस्येदानीमेव बाधो, लोके मिथ्यात्वव्यवहारश्च, अन्यस्य तु नेति वैलक्षण्यं कुतः? इत्याशङ्क्य सदृष्टान्तमुपपादयति— एकैवेति।।

मू०।। एकैव ब्रह्मसत्ता व्यवहृतिविषये शुक्तिरूप्यादिके च
ख्यात्याऽद्ये सत्यमेतज्जगदिति धियमाब्रह्मबोधाद्विधत्ते।
यावत्स्फूर्ति द्वितीये प्रथितमिव पटस्फाटिके रक्तरूपं
माञ्जिष्ठं साधु रक्तः पट इति न मृषा स्फाटिके तन्मृषेति।। १३।।

अधिष्ठानब्रह्मसत्ता व्यवहृतिविषये = कटकनूपुरादिनिर्माणरूपस्य क्रयविक्रयादिरूपस्य च व्यवहारस्य विषये = निर्वाहके आपणस्थरजतादौ प्रातिभासिक शुक्तिरूप्यादिके च तत्तत्प्रतीतिकाले ख्याती = भासमाना एकैव = न भिन्ना। तथापि आद्ये = आपणस्थरजतादिव्यावहारिके जगति, आब्रह्मबोधात् = सर्वाधिष्ठानब्रह्मसाक्षात्कारं मर्यादीकृत्य, तावत्कालमित्यर्थः। एतत् = प्रत्यक्षादिदृश्यं जगत् सत्यं = वास्तवमेवेति धियं = प्रतीतिं विधत्ते = जनयति। तद्बाधकसाक्षात्कारस्याऽनुदयादित्यर्थः। द्वितीये = शुक्तिरूप्यादिके तु यावत्स्फूर्ति = तत्प्रतिभासकालमभिव्याप्यैव सत्यमेतदिति धियं विधत्त इत्यनुषज्यते, तद्बाधकशुक्त्यादिसाक्षात्कारस्योत्तरकालमेव समीपोपसर्पणे संभवादित्यर्थः। तथा च बाधकसमवधानविलम्बशैघ्र्याभ्यामेव लोके सत्यमिथ्यात्वव्यवहारव्यवस्थेति भावः। तत्र दृष्टान्तः—यथा माञ्जिष्ठं = मञ्जिष्ठा रञ्जकद्रव्यविशेषः तत्सम्बन्धिरक्तरूपं, पटश्च स्फटिकस्य विकारः स्फाटिकं च तयोः समाहारे पटस्फाटिके। प्रथितं = प्रतीतं वस्तुतो रञ्जकद्रव्यनिष्ठस्यैव पटस्फाटिकयोरारोपितत्वाविशेषेऽपि रक्तः, पट इति अर्थो ज्ञानं च न मृषा = न मिथ्या, किन्तु साधु = यथार्थमेव। यतः प्रत्युत तत्संवीतपुरुषे "असौ शुक्लवासाः" इति व्यवहरन्तं पुरुषं लोकाः भ्रान्तोऽसीत्याहुः। यत्परिधानादौ "शुक्लवासाश्चरेद्व्रतम्" इत्यादिविधयो विगुणाः। "लोहितोष्णीषा ऋत्विजः प्रचरन्ति इत्यादिविधयश्च साङ्गा भवन्तीति। स्फाटिके तु तत् = रक्तः स्फटिक इत्यर्थो ज्ञानं च मृषैव = अयथार्थमेवेति यथा तद्वदित्यर्थः।

अयं भावः—व्यावहारिकरजतादेर्निरवच्छिन्ने(१) शुद्धचैतन्येऽध्यासात् तन्मात्राऽऽश्रयविषयकमूलाऽज्ञानकार्यत्वाच्च निरवच्छिन्नशुद्धचैतन्यगोचरब्रह्मसाक्षात्कारादेव बाधः। प्रातिभासिकरजतादेस्तु शुक्त्याद्यवच्छिन्नचैतन्येऽध्यासात् तादृशचैतन्यमात्राऽऽश्रयविषयावस्थाऽज्ञानकार्यत्वाच्च शुक्त्याद्याऽऽकारवृत्त्या तदवच्छिन्नचैतन्याऽऽवरणभङ्गेन शुक्त्यादौ वृत्तिव्याप्त्या चिदुपरागेण वा शुक्त्यादिसाक्षात्कारेणैव बाध इति विशेष इति। अत्र "भग्नावरणविषयावच्छिन्नचैतन्यमेव विषयाऽवभासकं।" "विषयप्रतिफलितमेव विषयाऽवभासकम्" इति भामतीविवरणकृतोर्मतभेदः। आद्ये आवरणभङ्ग एव वृत्तिफलम्। द्वितीये तु अस्वच्छतमे घटादौ स्वतश्चित्प्रतिबिम्बोदयाऽयोगात्स्वच्छतमान्तःकरणवृत्तिव्याप्तौ काचरसोपलिप्तकुड्यादौ सौराऽऽलोकादि प्रतिबिम्बग्राहित्ववत् चित्प्रतिबिम्बग्रहणसंभवाच्चिदुपराग एव वृत्तिफलमिति द्वैविध्यमुक्तम्।। १३।।

(१) निरवच्छिन्ने = कार्योपाध्यनुपहिते।।

नन्विदमिति सामान्याकारेण स्फुरति शुक्तित्वादिविशेषाकारेणाऽऽवृते शुक्त्यादौ रजताद्यारोपो दृष्टः, तथा ब्रह्मण्यपि सामान्यविशेषांऽशद्वयसद्भावे सांशत्वापत्तिः, निरवयवत्वश्रुतिव्याकोपः, अनित्यत्वाऽऽपत्तिश्च। निरंशत्वे तु तत्र जगदध्यासाऽनुपपत्तिः। किञ्च; ब्रह्म यदि सदेकरूपमेव, तर्ह्यपुरुषार्थः स्यात्, सुखस्यैव पुरुषार्थत्वात्। तस्यापि परकीयस्याऽतथात्वात् अपरोक्षतापि तद्घटिकाऽवश्यं वाच्या। यदि तु पुरुषार्थत्वोपपादनाय सदपरोक्षाऽऽनन्दांशा ब्रह्मणि स्वीक्रियेरन्, तर्हि एकरसत्वहानिः। न च तेषामंशानामत्यन्ताऽभेदाददोष इति वाच्यम्। तथा सति "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिषु सत्यज्ञानादिपदानां पर्यायतया ज्ञानादिपदानां वैयर्थ्याऽसहप्रयोगादिप्रसङ्गात्। लोके सच्चिदंशयोरानन्दांशव्यभिचारित्वस्य सदंशे चिदंशव्यभिचारित्वस्य च दर्शनेनैक्यसंभावनाऽयोगाच्च।। किञ्च, यदि सत्तैव चिदानन्दौ, तर्हि सत्सदिति जगद्भासमानमानन्दरूपमेव भातीत्यहेयं स्यात्। दुःखस्य स्पृहणीयत्वाऽऽपत्तिश्च। घटः सन्निति सदंशसाक्षात्कारे जाते ब्रह्मणि ज्ञातव्यरूपान्तराऽपरिशेषात्, तत्त्वसाक्षात्कारो वृत्त एवेति मूलाज्ञानोच्छेदेसर्वजगद्बाधाऽऽपत्तिश्चेत्याद्याशङ्काः परिहरिष्यन्नैकरस्येऽपि सामान्यविशेषांशभेदमुपपादयति— सच्चिदिति।।

मू०।। सच्चित्सौख्यैकरस्येऽप्यनृतजडमहादुःखमोहाऽन्यभावा-
त्सत्यज्ञानादिवाक्यव्यवहृतिविषये कल्पिते रूपभेदे।
शुक्तीदंतेव सत्ता स्फुरति समरसा कल्पितेनाऽनुविद्धा
शुक्तित्वादीवमायाऽऽवरणपरिभवाच्चित्सुखत्वेनभातः।। १४।।

सच्चित्सौख्यानां = सत्यज्ञानाऽऽनन्दांशानां एकरस इव रसः = सारः अबाध्यत्वादानन्दरूपत्वाच्चात्मा तद्भाव ऐकरस्यं तस्मिन्नद्वितीयात्ममात्रस्वरूपत्वे सत्यपीत्यर्थः। तथाविधस्य तस्याऽव्यवहार्यत्वाच्छब्दप्रयोगादिव्यवहारमन्तरेण च शिष्यबोधनाऽसंभवात् व्यावर्तकधर्मशून्यवस्तुनो व्यावर्तनीयविरुद्धरूपकल्पनमन्तरेण अनृतजडदुःखात्मकाऽविद्यादिप्रपञ्चाद्विविच्य बोधयितुमशक्यत्वाच्च बोधनार्थंप्रवृत्तानां "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिवाक्यानां बोध्यबोधनव्यवहारोपपादकत्वात् व्यवहृतिविषये = अनाद्यविद्याकल्पिते सत्यत्वज्ञानत्वसुखत्वरूपभेदे।। निर्धारणेसप्तमी।। भिद्यमानरूपेषु मध्ये इत्यर्थः। रूपभेदे कल्पिते सतीति वा।। भेदकल्पनायां हेतुमाह-अनृतेति। अनृतः = मिथ्याभूतः, जडः = स्वसिद्धावन्यसापेक्षः, महादुःखः = नित्यंप्रतिकूलवेदनीयश्च यो

मोहः = अज्ञानं तस्मादन्यभावात् = [१]स्वतोव्यावृत्ततद्विरुद्धस्वभावत्वादित्यर्थः। अयं भावः-किमनाद्यविद्याद्याध्यासेऽधिष्ठानस्य सामान्यविशेषांशापेक्षा, उत कार्याध्यास एव? नाद्यः, अनादेरन्वयव्यतिरेकानुविधानाऽयोगेन [२]तद्योगक्षेमाऽनिर्वाहकस्यांऽशद्वयस्याऽपेक्षाविरहात्। द्वितीये त्वनृत जडदुःखरूपैरधिष्ठानवस्तुविरुद्धया अविद्ययैवाभिन्नेऽपि वस्तुनि [३]तत्सापेक्षत्रैरूप्यकल्पनया आवृताऽनावृतांशप्रयुक्तकार्याध्याससिद्धेर्वास्तवांशाऽपेक्षाऽभावात्। न च कल्पितांशभेदस्याऽध्यासोपयोगो न दृष्टचर इति शङ्क्यम्। शुक्तिकेदमंशस्यैव तथाभूतस्य तद्दर्शनात्। नहि शुक्तिकाया इदमंशो नाम कश्चिदवयवो गुणो जातिर्वा वास्तवोऽस्ति-किंतुपुरोवर्तिदेशकालसंनिकर्षादिसम्बन्धं कादाचित्कमपेक्ष्याऽवास्तवेनैव भेदेनाऽभिन्नशुक्तिस्वरूपमेव इदमनिदमिति चाख्यायत इति तद्वत्प्रकृतेऽपीष्टसिद्धेरिति। तथाचाऽभिन्नमेव वस्तु अनृतविरुद्धस्वभावमिति सत्यपदेन, स्वसिद्धावन्यनिरपेक्षमिति चित्पदेन, नित्यानुकूलवेदनीयत्वात् प्रतिकूलवेदनीय विरुद्धस्वभावमित्याऽऽनन्दपदेन च तत्तद्विरोधिरूपविवेचनायाऽभिधीयत इति भावः। नचाऽविद्याऽधीनांशभेद कल्पनाया अपि अध्यासत्वाऽविशेषात् तत्राप्यावृतानावृतांशान्तराऽपेक्षायामनवस्थेति वाच्यम्। अविद्याया इवांऽशभेदकल्पनाया अप्यनादित्वेनाऽदोषात्।

इत्थं रूपभेदे कल्पिते सति तत्राऽनावृतमधिष्ठानसामान्यांशं सदृष्टान्तं दर्शयति—शुक्तीदंतेवेति। तस्मिन् रूपभेदे सत्ता = सद्रूपं, कल्पितेन = अध्यस्तेन जगद्रूपेण, अनुविद्धा = धर्मसंसर्गाऽध्यासान्मिलिता, धर्मितादात्म्याऽध्यासात् समरसा = घटत्वादिजगद्रूपसमस्वभावा। स्फुरति = घटपटादिसर्ववस्तुषु घटस्सन्, पटस्सन्नित्येवं रूपेण सर्वप्रत्ययेषु प्रथते। तत्र दृष्टान्तः—शुक्तीदंतेवेति। यथा शुक्ताविदं रजतमित्यध्यासे शुक्तीदंता कल्पितरजतसंसृष्टा तादृशरजतत्वसमरसा च स्फुरति, तद्वदित्यर्थः।। नचैवं सत्ताया अपि कल्पितत्वे तस्या जगद्रूपाऽविशेष इति वाच्यम्। सद्वस्तुन एव धर्मधर्मिभावभेदकल्पनेन धर्मत्वस्य जगद्रूपाऽन्तः प्रवेशेऽपि तस्या वस्तुस्वभावभूतायास्तदप्रवेशात्। आवृतविशेषांशावपि तथैव

(१) स्वतो व्यावृत्ततद्विरुद्धस्वभावत्वादिति।। स्वतो व्यावृत्तं = व्यावर्तकधर्मान्तरशून्यं च तदेव तद्विरुद्ध स्वभावं = अनृतजडदुःखविरुद्धं तद्व्यावृत्तिस्वरूपं स्वभावं पारमार्थिक सच्चिदानन्दस्वरूपं यस्य शुद्धचैतन्यस्य तत्तथा तस्मादित्यर्थः।

(२) तद्योगक्षेमेति।। अत्रतत्पदेनानाद्यध्यासो विवक्षितस्तस्योत्पत्ति ज्ञप्त्यादि लक्षण योगक्षेमयोरनुपपादकस्येत्यर्थः।

(३) तत्सापेक्षेति। अनृताद्यंशत्रयापेक्षेत्यर्थः। सत्यादीनामनृतादिर्निवृत्त्युपलक्षितात्मस्वरूपत्वाभ्युपगमेन स्वोपलक्षणीभूतनिवृत्तिस्वरूपभेदनिरूपकत्वेनानृतादित्रयांशापेक्षेति भावः।।

दर्शयति—शुक्तितत्वादीवेति। यथा दर्शितदृष्टान्ते शुक्तितत्वत्रिकोणत्वाऽरजतत्वादयो विशेषांशाअज्ञानाऽऽवृतत्वात् रजतभ्रमदशायां न भासन्ते, तद्वद्ब्रह्मण्यपि मायागताऽऽवरणशक्त्या परिभवात् = प्रतिबद्धत्वात् तिरोहितत्वादित्यर्थः। चित्सुखत्वे = चैतन्याऽऽनन्दांशावपि, न भातः = न स्फुरतः, यावद्ब्रह्मसाक्षात्कारोदयमित्यर्थः।।

अयंभावः—न तावत्सच्चिदानन्दांशानां ब्रह्मणि वास्तवो भेदः संभवति। अबाध्यत्वं हि सत्त्वं। स च बाध्यत्वाऽभावोऽधिकरणस्वरूप एव।। न च सत्ताजात्यादिकमेव सत्त्वमिति युक्तम्। तथासति तत्सम्बन्धस्यैव जगत्यपि सत्सदिति प्रतीतिनिर्वाहकत्वस्याऽवश्यं वाच्यतया सत्तायां, सत्ताश्रयत्वाभ्युपगमेऽनवस्थानात्। अनभ्युपगमे च सत्ताजातेरेवाऽसत्त्वापत्तौ तया अन्यसत्त्वनिर्वाहाऽयोगात्। एवमर्थक्रियाकारित्वेऽप्यर्थक्रियान्तरकारित्वेऽनवस्था, नोचेदसत्वापत्तिरिति न तदपि जगत्सत्यत्त्वमितिबोध्यम्। किञ्च। स्वतो बाध्यस्य धर्मसहस्रैरपि त्राणाऽसंभवः। स्वत एवाऽबाध्यं वस्तु चेत्। अतिरिक्तसत्ताजातिकल्पना क्लेशो व्यर्थ इति स्वरूपमेव सत्वम्। एवं (१)स्वपरप्रथायामन्यनिरपेक्षत्वं चित्त्वं, तदपि स्वयंज्योतिरात्मस्वरूपमेव। स्वतो जडस्य धर्मसहस्रैरपि स्वस्वरूपपरिवर्तनाऽसंभवात्। एवमानन्दरूपत्वमपि निरुपाधिप्रीतिप्रयोजकं नित्यानुकूलाऽऽत्मस्वरूपमेव। स्वतः प्रतिकूलस्य धर्मशतैरप्यनुकूलयितुमशक्यत्वादिति कल्पनापेक्ष एव तेषां भेदः। लोके सच्चिदंशयोरानन्दांशव्यभिचारादिरपि कल्पितांऽशभेदतदावरणादिवशादेव, श्रौतसच्चिदानन्दपदानामपर्यायतापि वाच्यतावच्छेदकं कल्पितरूपभेदमादायैव। एकैकपदोपादाने आविद्यकविरुद्धत्रैरूप्यव्यावर्तनासिद्धेरिति प्रपञ्चितमेव।। नचैवमाविद्यकघटत्वाद्यनन्तरूपव्यावर्तनायापि ब्रह्मणितत्तद्रूपविरुद्धांशभेदकल्पनपदान्तरोपादानाद्यापत्तिः। अस्थूलादिवाक्यैरनन्तादिपदैश्च स्थौल्यादितत्तद्व्यापकरूपनिषेधेनैव तद्व्यावृत्तेरपि सिद्धेः। अत एव हि "(२)आनन्दादयः, प्रधानस्य" "(३)अक्षरधियां त्ववरोधः" इत्यधिकरणयोर्भावाऽभावलक्षणसकलव्यावर्तक-

---

(१) स्वपरप्रथायामन्यनिरपेक्षत्वं चित्वम्।। अत्रान्यनिरपेक्षत्वमित्येतावन्मात्रस्य लक्षणत्वे नित्यत्वेन पराभिमतगगनादावति प्रसङ्गस्तदवारणाय प्रथायामित्युक्तम्। तदुक्तावपि न दोषोद्धारः सुखादिगोचर वृत्यनङ्गीकर्तृमते सुखादावतिव्याप्तिस्तद्वारणायपरप्रथायामित्युक्तम्। परप्रथायामन्यनिरपेक्षत्वस्य लक्षणत्वे घटादिप्रकाशकालोकस्यालोकान्तर निरपेक्षत्वात्तत्रातिव्याप्तिस्तन्निरासाय स्वेति प्रथा विशेषणमुक्तं तथा च न दोषः। आलोकस्यापि स्वगोचरज्ञानात्मक प्रकाशे चक्षुः सापेक्षत्वादिति।

(२) आनन्दादयः प्रधानस्य।। अ० ३ पा० ३ सू० ११।। आनन्दादयः श्रूयमाणाः ब्रह्मधर्माः प्रधानस्य ब्रह्मणः सर्वे सर्वत्र प्रतिपत्तव्यः। सर्वत्र श्रुतिषु प्रधानस्य ब्रह्मणोर्भेदस्वरूपेण प्रतिपादितत्वादिति भावः।।

(३) अक्षरधियां त्ववरोधः।। अ० ३ पा० ३ सू० ३३।। अक्षरविषयास्तु विशेषास्तु

गुणोपसंहारो भाष्यकृद्भिर्दर्शितः।

"नित्यश्शुद्धो बुद्धमुक्तस्वभावः सत्यः सूक्ष्मः सन्विभुश्चाऽद्वयश्च।
आनन्दाब्धिर्यः परस्सोहमस्मि प्रत्यग्धातुर्नात्र संशीतिरस्ति।।"

इति वृद्धैः सङ्ग्रहेणोक्तः।। यद्यपि घटः सन्नित्यादिप्रत्येयष्वपरिच्छेद-सौक्ष्म्याद्यंशा अपि न भासन्ते, तथापि स्फुटत्वाद्वक्ष्यमाणेन पुरुषार्थोपयोगित्वेन प्राधान्याच्च चित्सुखत्वे न भात इत्येतावदेवोक्तं। तदभानादेवतद्विरुद्ध-प्रपञ्चाऽध्यासोपपत्तिः, तत्र सामान्यांशभानोपपत्तिश्चेति भावः।। नच कल्पिताऽधिष्ठा-नांऽशविरुद्धोऽध्यासोऽप्रसिद्धः, वास्तवशुक्तितत्वाद्यंशविरुद्धस्यैवरजतादेरध्यास-सिद्धेरिति वाच्यम्। स्वतः सांमुख्यवैमुख्यबिम्बत्वप्रतिबिम्बत्वरहितेऽपि (१)मुखे पुरस्स्थितदर्पणापेक्षाकल्पिततत्सांमुख्यविरुद्धस्वसांमुख्यस्य, कल्पितबिम्बत्व-विरुद्धप्रतिबिम्बत्वस्य चाऽध्यासदर्शनात्।। नच दर्पणे ग्रीवास्थमुखातिरिक्तं मुखान्तरमेवाऽध्यस्यत इति युक्तम्। दर्पणाऽऽवरकाऽज्ञानस्य दर्पणाऽपरोक्षादेव नाशात्, दर्पणे तदाऽऽवरणीयांशान्तराऽप्रसिद्धेश्च, तत्र मुखारोपाऽसंभवेन ग्रीवास्थ एव मुखे दर्पणप्रतिघातपरावृत्त नयन रश्मिसंनिकृष्टे दर्पणस्थत्वप्रतिबिम्बत्वाद्यारोप इत्यस्यैव न्याय्यत्वात्। एवं स्वस्थानस्थितवृक्षादौ स्वतो दक्षिणोत्तरभावशून्ये व्यवहर्तृपुरुषसूर्योदयाद्युपाधिपरिकल्पितदक्षिणोत्तरादिभावमपेक्ष्य दिङ्मोहे तद्विरुद्धधर्माऽऽरोपदर्शनाच्च, वास्तवांशभेदविरुद्धस्यैवाऽऽरोप इति नियमाभावात्।। यत्तूक्तं सत्सदिति जगद्भासमानमानन्दरूपमेव भातीत्यहेयं स्यात्, दुःखस्यापि स्पृहणीयत्वापत्तिश्चेति। नैष दोषः। वस्तुतश्चित्सुखाऽभिन्नसद्रूपस्यैव जडदुःखाऽऽत्मकप्रपञ्च संवलनेन स्फुरणे सत्सुखांशभेदवासनावासितचेतसां प्रबलतरतिक्तसंसृष्टमधुररसस्येव, अस्पृहणीयत्वेनाऽपुरुषार्थत्वद्वेष्यत्वयोरुपपत्तेः। अत एव हि द्वेष्यतमरजस्तमोशांऽल्पत्वे सात्त्विकस्त्रगादिजन्यान्तःकरणवृत्तौ सुखात्मनैव सत्तास्फूर्तिर्देहेन्द्रियादौ प्रेमाचाऽनुभवसिद्ध उपपद्यते। परमपुरुषार्थत्वं च सर्वोपाधिनि-

---

विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोधव्याः सामान्यतद्भवाभ्यां = सर्वत्रविशेषनिराकरणरूपो ब्रह्मप्रतिपादन प्रकारः सर्वत्र समानः। तद्भावस्य ब्रह्मणोऽभेदेन प्रत्यभिज्ञानात्। औपसदवदितियथा जामदाग्न्येऽहीने पुरोडाशनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणां "अग्निर्वै होत्रं वेरध्वरमित्येवमादीनामुद्गातृवेदोत्पन्नाना-मप्यध्वर्युभिरभि सम्बन्धो भवति। अध्वर्युकर्तृत्वात्पुरोडाशप्रधानस्य प्रधानतन्त्रत्वाद्यागाङ्गानाम्। एवमिहाप्यक्षरतन्त्रत्वात्तद्विशेषणानां यत्र क्वचिदप्युत्पन्नानामक्षरेण सर्वत्राभिसम्बन्धः इति इत्यर्थः।।

(१) मुखेइति।। मुखे पुरःस्थितदर्पणापेक्षया कल्पितदर्पण सामुख्यस्य तथा तद्विरुद्ध स्वपदाभिधेय मुख सांमुख्यस्य च तद्वत्कल्पितदर्पणसांमुख्यापेक्षया कल्पित बिम्बत्वस्य तथा कल्पित स्वसांमुख्यापेक्षया च कल्पित प्रतिबिम्बत्वस्यचाध्यासदर्शनादित्यर्थः।।

र्मुक्तंसन्मात्रवस्तुनः स्वसाक्षात्कारप्रध्वस्ताऽऽवरणविक्षेपस्य आनन्दैकरसस्य तस्यैवेति न कश्चिद्दोषः।। १४।।

इत्थं श्रुत्यनुगुणैस्तर्कैरद्वितीयत्वं ब्रह्मणो व्यवस्थाप्य इदानीं साक्षाच्छ्रुति-तात्पर्योद्घाटनेनापि तद्व्यवतिष्ठापयिषुः तटस्थलक्षणमुखेन सृष्टिश्रुतीनामद्वितीय-ब्रह्मबोधकत्वे लौकिकं दृष्टान्तमाह— पृष्ट इति।

मू०।। पृष्टे "कोऽस्मिन्समाजे नरपतिरिति" यो मत्तमातङ्गपृष्ठे
मुक्ताजालान्तराले शशिधवललसच्छत्रमूले स्फुरन्सः।
इत्युक्तः पुंविशेषं सपदि परिचिनोत्येष राजेति सर्वं
मुक्त्वैकं येन पश्यन्नमुमपरविधं शैष राजेति वेत्ति।। १५।।

केनचिदनभिज्ञपुरुषेण राजस्वरूपपरिचयेच्छुना तदभिज्ञपुरुषान्तर अस्मिन् = परिदृश्यमाने सैनिकसमाजे नरपतिः = राजा कः? इति पृष्टे सति तदभिज्ञपुरुषेण यो मत्तस्य = मदयुक्तस्य मातङ्गस्य = गजस्य, पृष्ठे, तादृशगजान्तरस्याऽपि-प्रधानाऽऽद्यधिष्ठितस्यसंभवात् मुक्तेति। मुक्तानां = मौक्तिकानाम् यज्जालं = जालकं चतुरश्रं दोलाकारं तस्याऽन्तराले मध्य इत्यर्थः। राजपुत्रादीनामपि तत्संभवात् तद्व्यावर्तनाय शशीति। शशी = पूर्णचन्द्रः तत्रैव स्फुटं शशाकारलाञ्छनदर्शनात् स इव धवलं = शुभ्रं, सुवर्णकलशप्रवालदण्डादिभि-र्लसत् = शोभमानं यच्छत्रं तस्यमूले = छायाप्रदेशे स्फुरन् = विचित्राऽऽयुधा-ऽऽभरणाम्बरादि प्रभाभिः निजतेजसा च दीप्यमानो यः स राजा इत्यनेन प्रकारे-णोक्तः = लक्षणोपन्यासेन प्रतिबोधितः श्रोता, सपदि = तत्कालमेव सर्वं = मत्तमातङ्गादिलक्षणजातं स्वस्याऽजिज्ञासितं वक्तृतात्पर्याऽविषयीभूतं चेति मुक्त्वा = विहाय तदुपलक्षितमेकं = पुरुषान्तरव्यावृत्तं पुंविशेषं = विजातीयसंस्थानं पुरुषमेव, एष राजेति सपदि = तत्कालमेव, परिचिनोति नोक्तसर्व-लक्षणविशिष्टमेवेत्यर्थः।। नन्वेतत्कथं ज्ञायते तत्राह— येनेति। येन = हेतुना, अयं = परिचेता, अमुं = राजानं देशान्तरे, कालान्तरे च अपरविधं पूर्वदृष्टलक्षण-शून्यं, अन्यलक्षणाक्रान्तं च जलक्रीडाद्यासक्तमङ्गनासहस्रमध्यगतं, (१)मुच्यमान-चिकुरचय मवलुप्यमानमाल्याङ्गरागं, मदविघूर्णिताऽरुणलोचनमपि पश्यन्स एवैष राजेति वेत्ति = प्रत्यभिजानीते। अतो लोके छत्रादिलक्षणस्य राजस्वरूपा-ऽघटकस्यापितदितराऽसम्बन्धादन्यव्यावर्तकत्व मात्रेण तल्लक्षणत्वं प्रसिद्धम्। एवं

(१) मुच्यमानचिकुरचयम्।। मुक्तकेशसमूहम्। चि इत्यव्यक्त शब्दं करोतीति व्युत्पत्तेः त्यक्तवृक्षसमुदायं वा ताभिः कासारमध्यगतत्वाज्जलक्रीडाद्यर्थम्।।

(१)'लोहितोष्णीषः पीतवासाः स्रग्वी देवदत्तः' इत्यादि लौकिकलक्षणवाक्यान्यप्युदाहर्तव्यानि।। १५।।

दृष्टान्तमुपपाद्य तथैव दार्ष्टान्तिके प्रकृतलक्षणवाक्येष्वपि परमार्थसद्वस्तुलक्षकत्वात्तल्लक्षणत्वमिति दर्शयति— वर्णिता इति।

मू०।। वर्णिता विविदिषादि-
यन्त्रणात्पुंविशेषमिव लक्षणोक्तयः।
विश्वसर्गविषयाऽऽगमाः परं
लक्षयन्ति निरवद्यचिद्घनम्।। १६।।

एवं वर्णिताः = विविच्य दर्शिताः लौकिक्यो लक्षणोक्तयः = लक्षणवाक्यानि, श्रोतृबुभुत्सावक्तृतात्पर्यानुरोधान्मत्तमातङ्गाद्युपलक्षितं पुंविशेषं = सर्वतो व्यावृत्तराजाद्यखण्डपुरुषव्यक्तिमात्रमिव, विश्वसर्गविषयाऽऽगमाः = "यतो वा इमानि" इत्यादिजगत्सृष्ट्यादिगोचरवेदान्तवाक्यान्यपि, निरवद्यचिद्घनम् = निरस्तमायादिद्वैतदोषं = "तद्यथा सैन्धवखिल्यः" इत्यादिश्रुत्युपपादितं चैतन्यैकरसंप्रत्यग्ब्रह्म, लक्षयन्ति = जगतस्त्रैकालिकतदव्यतिरेकात् तन्मात्रत्वमिति मिथ्यात्वसमर्थनमुखेनाऽनुभावयन्तीत्यर्थः। नच प्रष्ट्रा पूर्वमेव कश्चिदत्र राजास्ति स च पुरुष इति ज्ञातत्वादितरव्यावृत्तिमात्रं जिज्ञासितं, न तत्स्वरूपमिति वाच्यम्। तथा च सति को राजा? इतिप्रश्नाऽनापत्तेः। सामान्यतः स इतरव्यावृत्त इत्यपि ज्ञातत्वात्, अन्यथा अत्यन्ताऽप्रसिद्धायां व्यावृत्तावपि जिज्ञासायोगात्, विशिष्याऽप्रसिद्धेश्चराजस्वरूपेऽपि साम्यादित्याद्यखण्डार्थविमर्शे विस्तरेणोपपादयिष्यामः।। नन्वत्र राजस्वरूपमात्रप्रश्नानुसारात् उत्तरत्र पुरुषमात्रदर्शनेनापि प्रत्यभिज्ञादर्शनाच्च लौकिकलक्षणवाक्यस्य पुरुषस्वरूपमात्रलक्षकत्वमस्तु, यतो वेत्यादिवाक्येतु "अधीहि भगवो ब्रह्म" इतिप्रश्नवाक्यस्य सविशेषब्रह्मपरत्वं निर्विशेषब्रह्मपरत्वं वेत्यत्र नियामकाभावात्, उत्तरत्र जगज्जन्मादिकारणत्वोपन्यासेन प्रश्नस्यापि कारणत्वविशिष्टविषयत्वप्रतीतेः, श्वेताश्वतराणामुपनिषदि "किं कारणं ब्रह्म कुतः स्म जाताः" इति तद्विशिष्टस्यैव प्रश्नदर्शनाच्च, एवं "कुत आजाता कुत इयं विसृष्टिः" "न तं विदाथ य इमा जजान" इत्यादिश्रुतिषु कारणत्वविशिष्ट एवाऽज्ञानजिज्ञासयोरभिलापाच्च, निर्विशेषस्य लक्ष्यत्वे श्रुतहान्यश्रुतकल्पनादिदोषप्रसङ्गाच्च, सविशेषस्यैव लक्ष्यत्वमुचितमित्याद्याशङ्का निरासाय वाक्यस्य निर्विशेष एव तात्पर्यग्राहकं दर्शयतिविविदिषादियन्त्रणादिति। वेदितुमिच्छा विविदिषा आदिपदात् उपक्रमादिषड्विधतात्पर्यलिङ्गानि, तैः समानप्रकरणस्थस्फुटतरश्रुत्यन्तरैश्च निर्विशेष एव तात्पर्यनियमनादित्यर्थः।

(१) लोहितोष्णीषः उष्णमीषते हिनस्तीति शिरो वेष्टनं यस्य स इत्यर्थः।।

अयं भावः— व्रात्यनास्तिकादेरनधिकारादधीतसाङ्गवेदः श्रद्धालुर्विवेकी श्रवणादावधिक्रियत इत्यविवादम्। तस्य च "निर्गुणं निष्क्रियं शान्तं" "एकमेवाद्वितीयं नेह नानास्ति किञ्चन" "अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" "यत्र नाऽन्यत्पश्यति नाऽन्यच्छ्रूणोति नान्यद्विजानाति स भूमा" "यत्तदद्रेश्यमग्राह्यं अपूर्वमनपरं" "न तस्य कार्यं करणंच विद्यते" "नतत्समश्चाऽभ्यधिकश्च दृश्यते" "गुहाशयं निष्कलमद्वितीयं" "नान्तः प्रज्ञं न बहिःप्रज्ञं" "अस्थूलमनणु" इत्यादिश्रुति-वाक्याध्ययनस्याऽवर्जनादद्वितीयनिर्विशेषाऽऽत्मज्ञानमेव मोक्षहेतुरित्यापाततो ज्ञानस्याप्यनिवार्यत्वात्, निर्विशेष एव जिज्ञासासंभवात्, "अधीहि भगवो ब्रह्म" इत्यत्र "सत्यं ज्ञानमननतं ब्रह्म" इत्यादिना पूर्ववल्युपपादितनिर्विशेषस्यैव प्रत्यभिज्ञानात्, उत्तरत्र यतो वा इत्यादिना कारणत्वोपन्यासस्य तटस्थलक्षणत्वेनाप्युपपन्नत्वात्, यावत्स्वरूपलक्षणाधिगमं जिज्ञासाऽनुवृत्तिदर्शनात्स्वरूपपरिचयमात्रेण जिज्ञासाऽशान्तेश्च निर्विशेषस्यैव प्रश्न इति स्पष्टमवगमात्। एवं "किं कारणं ब्रह्म" इत्यादिवाक्येष्वपि यत्कारणं ब्रह्म तत्किं स्वरूपम्? इत्येव प्रश्नतात्पर्यं, न तु कारणत्वांशेऽपि। तत्स्वरूपे निश्चिते तद्धर्मकारणत्वांशे जिज्ञासाऽपरिशेषात् अनिश्चिते च तस्यैव प्रश्नतात्पर्यगोचरत्वकल्पनौचित्यात्। कारणं जगतः किञ्चिदस्तीत्यनिश्चित्य किं कारणमिति प्रश्नायोगात्, कारणत्वमात्रांशे जिज्ञासोक्तौ च कथं कारणिमिति प्रश्नाऽपत्तेश्च। किंच। उत्तरत्र—

"ते ध्यानयोगाऽनुगता अपश्यन्देवात्मशकिंत स्वगुणैर्निगूढाम्।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।"

"मायां तु प्रकृतिं विद्यात्" इत्यादिना कारणत्वादेर्मायाशक्ति-मात्रनिर्बाह्यत्वप्रदर्शनात् "न तस्य कार्यं करणं च विद्यते" "एक एव रुद्रो न द्वितीयाय तस्थु" इत्यादिना कारणत्वादिसर्वद्वैतप्रतिषेधेन पुनः पुनः परामृष्टस्याऽन्ते—

"निर्गुणं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परं सेतुं दग्धेन्धनमिवाऽनलम्।।"

इति निष्प्रपञ्चस्यैवोपसंहाराच्च प्रकरणस्य तन्मात्रपरत्वनिश्चयात्। सविशेषपरत्ववादिन एव श्रुतहान्यादिदोषो नाऽस्माकम्। एवं "न तं विदाथ" इत्यज्ञानोल्लेखिवाक्यस्याऽपि स्वरूपमात्राज्ञानोपदर्शकत्वं, जजानेति लिटा जनकत्वांशे पारोक्ष्यप्रतिपादनेनैवाऽज्ञातत्व सूचनेन पुनरज्ञातत्वकीर्तनस्य स्वरूपमात्र विषय-त्वपर्यवसानात्, पौर्वापर्यपर्याऽऽलोचनाच्च स्पष्टं प्रतीयते। तथा "को अद्धा वेद क इह प्रावोचत्" इत्यवाङ्मनसगोचरत्व प्रदर्शनादपि "कुत आजाता"

इत्यादिवाक्यस्य कारणतत्त्वनिर्विशेषमात्रगोचराऽज्ञानाऽनुवादित्वं नाऽन्यदिति भावः।। १६।।

ननु तटस्थलक्षणपरत्वेनाऽभिमतानि "यतो व्रा" इत्यादिवाक्यानि कथं निर्विशेषं लक्षयेयुः किं शक्त्या? उत लक्षणया वा? नाऽऽद्यः। पदानां प्रवृत्तिनिमित्तमनन्तर्भाव्य शक्यार्थोपस्थापनाऽसामर्थ्यात् (१)वाक्यार्थबुद्धेः पदार्थोपस्थित्यन्यूनविषयत्वसंसर्गगोचरत्वनियमात्, शाब्दनिर्विकल्पकाऽसंप्रत्ययात्, उद्देश्यविधेयभावयोरखण्डेऽयोगाच्च। अत एव न द्वितीयः। बीजाऽभावाच्च। तथाहि–न तावद्गङ्गायां घोष इतिवदन्वयानुपपत्तिः अत्र लक्षणा बीजं। (२)योग्यताद्यबाधात्। नापि यष्टीः प्रवेशयेत्यादि वाक्यवत्तात्पर्यानुपपत्तिः। पूर्वोत्तरसंदर्भव्यतिरेकेणाऽलौकिकवाक्यस्याऽलौकिकेऽर्थे तात्पर्यग्राहकमानान्तराऽप्रसरात्, पूर्वोत्तरवाक्यानामपि वाक्यत्वाऽविशेषेण संसर्गगोचरत्वादिनियमेन निर्विशेषतात्पर्यग्राहकत्वाऽयोगात्। अवान्तरवाक्यसंदर्भस्यैव उपक्रमादिशब्दार्थत्वेन तस्य निर्विशेषबोधकत्वाऽसिद्धौ इदं वाक्यं निर्विशेषतात्पर्यकं निर्विशेषोपक्रमादिघटितत्वात्, इत्याद्यनुमितेरप्यसंभवात्।। किञ्च। किं सर्वाणि पदानि निर्विशेषं लक्षयेयुः? उत ब्रह्मादिपदमेव?। आद्ये विभिन्नविभक्तिकनानापदैः एकार्थलक्षणाऽयोगात्, नानार्थानां च विभक्त्यर्थानद्वारीकृत्याऽन्वयाऽयोगात्, तद्द्वाराऽन्वये चाऽभेदान्वयेऽनाकाङ्क्षत्वात्, क्रियाकारकभावादिसंसर्गे च निर्विशेषत्वस्याऽयोग्यत्वात् वाक्यकदर्थनापत्तेः। अभिलषिताऽसिद्धेश्च। अत एव न द्वितीयः। (३)विशेषणाऽन्वयाऽयोग्यमर्थं विशेष्यपदं लक्षयतीत्युक्तिसंभवाऽभावाच्च। पक्षद्वयेऽपि जगज्जन्मादिकाररणत्वस्य वाक्याद्ब्रह्मण्यनवगमेन तस्य तटस्थलक्षणत्वोक्तिव्याघातात्। तस्यापि बोधने युगपद्वृत्तिद्वयस्वीकारविरोधात्, वाक्यभेदाऽऽपत्तेश्च।। नच भट्टमते "वायुर्वै क्षेपिष्ठा देवता" इत्यादिपदानां परस्परान्वयेन विशिष्टार्थबोधकत्वेऽपि निष्प्रयोजनत्वात् प्रधानीभूतविध्येकवाक्यत्वाऽनुरोधाच्च अखण्डप्राशस्त्यलक्षकत्ववत् जगज्जन्मादिकारणत्वविशिष्ट सगुणब्रह्मबोधनद्वारा वाक्यमेव तादृशकारणत्वोपलक्षिताऽखण्डनिर्विशेषवस्तुलक्षकमस्त्विति वाच्यम्। वायुक्षेपिष्ठत्वादिवाक्यवदस्याऽन्यशेषत्वाऽभावेन वैषम्यात्। पदवद्वाक्यस्यापि

(१) वाक्यार्थबुद्धेः।। घटनिष्ठकर्मत्वबुद्धेरिति।।

(२) योग्यताद्यबाधात्।। शक्यार्थान्वये योग्यतादीनां बाधाभावादित्यर्थः।।

(३) विशेषणान्वयायोग्यमर्थमिति। साधनस्य क्रियां प्रत्युपसर्जनत्वनियमानुसारेण जगत्सृष्टिक्रियायां ब्रह्मपदावबोधस्य निर्विशेषस्य कर्तृतया विशेषणरूपेणान्वयायोग्यत्वेन न तद्विशेष्यवाचिब्रह्मपदं लक्षणया बोधयतीतिभावः।।

पदार्थमात्रपरत्वे तद्वदेव पदार्थान्तरान्वयसाकाङ्क्षत्वापत्त्या प्रामाण्यायोगात्। भट्टमतेऽर्थवादानां शाब्दीभावनेतिकर्तव्यताभूतप्राशस्त्यपदार्थलक्षकाणां पदैकवाक्यतयैव विध्यन्वयसिद्धान्तेन वैषम्यात्। लक्ष्यतावच्छेदकरूपाऽनाक्रान्ते लक्षणाप्रवृत्त्ययोगाच्चेत्याद्याशङ्क्य पदलक्षणापक्षदूषणान्यनभ्युपगमेनैव परिहरन्वाक्यलक्षणापक्षसमर्थनेन निर्विशेषे तटस्थलक्षणसमन्वयं दर्शयति— तत्त्वमिति।

मू०।। तत्त्वमर्थवदत्र यद्यपि नाऽन्वयानुपपत्तिधी-
र्नाप्यभिन्नपदार्थकत्वमतः पदेषु न लक्षणा।
भेदसङ्गतिकानि तानि समेत्य सत्यचिदद्वयं
तत्पराणि हि लक्षयेयुरुपक्रमाद्यनुसारतः।। १७।।

यद्यप्यत्र = तटस्थलक्षणे तत्त्वमर्थवत् = "तत्त्वमसि" इति महावाक्यस्थ तत्त्वंपदवाच्यसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्मविशिष्टेश्वर जीवरूपपदार्थयोरिव पदार्थानां परस्परमन्वयाऽनुपपत्तिज्ञानं नास्ति। नापि प्रकृष्टप्रकाशादिवाक्यवत् अभिन्नपदार्थकत्वं, अभेदान्वययोग्यसमानविभक्तिकपदोपस्थाप्यार्थकत्वं अत्यन्ताऽभेदशालिपदार्थकत्वं वाऽत्रास्तीति, अतः = त्वदुक्तदोषात्, पदेषु प्रत्येकं नलक्षणा = लक्षणा नाभ्युपगम्यत इत्यर्थः। तथाचाऽनभ्युपगमपक्षे दोषोपन्यासश्रमस्तव वृथैवेति भावः।. तर्हि कथमभिलषितसिद्धिस्तत्राह— भेदेति। यद्यपीति दर्शनात्तथापीत्यध्याहार्यम्। तथापि तानि = "यतोवा" इत्यादिपदानि, आकाङ्क्षाद्यनुरोधेन भेदसङ्गतिकानि = "जनिकर्तुः प्रकृतिः" इत्याद्यनुशासनात्, जन्मादिक्रियाकारकभावादिभेदसम्बन्धेन पररस्परान्वितानि सन्ति समेत्य = जगज्जन्मादिकर्त्रऽभिन्नोपादानकारणत्वविशिष्टैकार्थप्रतिपादनेन एकवाक्यतामापद्य, सत्यचिदद्वयं = "सर्वं खल्विदंब्रह्म" इति श्रुत्यन्तरोपदर्शितदिशा वक्ष्यमाणरीत्या च तादृशकारणत्वबललभ्यसत्यज्ञानाऽऽनन्दाऽद्वितीयमखण्डं ब्रह्म लक्षयेयुः = लक्षणयाबोधयेयुः। तत्कुतः? हि = यस्मात्कारणात्। तानि उपक्रमाद्यनुसारतः—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।

इति पूर्वाचार्योपदर्शित षड्विधलिङ्गाऽनुरोधात्, तत्पराणि = सत्यचिदद्वयाऽऽनन्दब्रह्मैकतात्पर्यकत्वेन प्रमितानीत्यर्थः। दण्डिपुरुषे शुद्धपुरुषस्येव जगत्कारणत्वविशिष्टे मायाशबलब्रह्मणि शुद्धस्याप्यन्तर्भावात् एकदेशत्वलक्षणस्य अधिष्ठानत्वलक्षणस्य च लक्षणसमसत्ताकसम्बन्धस्य शुद्धेऽपि सत्त्वान्न लक्षणत्वाऽनुपपत्तिः। लक्ष्यव्यक्त्यननुगतावेव तदनुगमाय लक्ष्यतावच्छेदकापेक्षा-

नियमात्, अखण्डैकव्यक्तावनुगमकापेक्षाविरहात्, भागत्यागलक्षणायां चोपस्थितार्थैकदेशत्यागव्यतिरेकेण अर्थान्तरोपस्थित्यपेक्षाभावेन शक्यार्थोपस्थित्या सम्बन्धितावच्छेदकरूपेणाऽशक्यार्थोपस्थापनायापि लक्ष्ये धर्मानपेक्षणात्, लक्षणसमसत्ताकलक्ष्यतावच्छेदकोक्तिसंभवाच्च न लक्षणाया अप्यनुपपत्तिः। वाच्यार्थसंसर्गबोधोत्तरकालं लक्षणाभ्युपगमाच्च न वाक्यभेदाऽऽपत्तिः, वाक्यमुख्यतात्पर्यविषयनानात्व एव वाक्यभेदनियमात्। विशिष्टविधौ विशेषणेष्विव द्वारभूतवाक्यार्थे अवान्तरतात्पर्यसत्वेपि दोषाऽभावात्। अत्रत्याऽवान्तर तात्पर्यसिद्धं सविशेषं ब्रह्मोपजीव्यैव हि दहराद्युपास्तिविधयः, फलप्रदेश्वरसिद्ध्यधीनकर्म विधयः, मन्त्रार्थवादस्मृति-पुराणादिषु जगदीश्वरमाहात्म्यवर्णनानि च प्रवृत्तानीति बहवः। केचित्तु-नास्त्येवाऽवान्तरतात्पर्यं, तथापि ज्ञानानां स्वतः प्रमाण्यात्प्रमाणान्तराऽविरोधाच्च ''वज्रहस्तः पुरन्दरः'' इत्याद्यर्थवादेभ्यः प्राशस्त्यमात्रतात्पर्यकेभ्यो देवताधिकरणन्यायेन इन्द्रादिविग्रहसिद्धिवदसत्यपि सविशेषतात्पर्ये व्यावहारिकसगुणब्रह्मसिद्धिः। तदुपजीव्यैव उपास्तिविध्यादिप्रवृत्तिश्चेत्याहुः।. अपरे तु दहरादिविद्यासु तत्र तत्राऽवान्तरववाक्यतात्पर्यात्, विशिष्टविधौ विशेषणांशेष्विववान्तरतात्पर्य कल्पनाद्वा सिद्धस्य सगुणेश्वरस्य निर्विशेषप्रकरणस्थजगत्कारणत्वादिलक्षणवैशिष्ट्येनाऽनुवादः तद्द्वारा निर्विशेषप्रतिपत्त्यर्थ इत्याहुः।। यत्तु सृष्टिवाक्यानामन्यशेषत्वाभावेन वायुक्षेपिष्ठात्वादिवाक्यवैषम्यमित्युक्तं। तन्न। वक्ष्यमाणरीत्या ''सत्यं ज्ञानम्'' इत्यादिवाक्याऽवगतसत्यत्वाऽऽनन्त्ययोरुपपादकत्वेन, महावाक्यान्तर्गततत्पदार्थव्युत्पादकतया वा तच्छेषत्वस्य स्पष्टत्वात्। वायुक्षेपिष्ठत्वादिवाक्यवत्सर्गादिवाक्यानामपि भूतार्थवादत्वाऽविशेषात्स्वार्थमात्रपर्यवसाने प्रयोजनाभावाच्च अन्यशेषतां विना गत्यभावात्।। नच वाक्यस्यैकपदार्थस्वरूपमात्रपरत्वाऽनुपपत्तिः। तथासति लक्षणवाक्यमात्रोच्छेद-प्रसङ्गात्। ''यत्परः शब्दः सशब्दार्थः'' इति न्यायाज्जिज्ञासानुरोधाच्च सास्नादिमती गौः, गन्धवती पृथिवीइत्यादिलक्षणवाक्यानामपि सर्वतो व्यावृत्ताखण्डगवादिस्वरूपमात्रार्थत्वात्। व्युत्पादयिष्यते चाखण्डार्थताप्रकृष्टप्रकाशादिवाक्येष्विति। साकाङ्क्षत्वं तु अवान्तरवाक्यार्थस्य महावाक्यैकवाक्यतायामनुकूलमेव न तु प्रतिकूलम्। महावाक्यस्य तु पदार्थमात्रनिष्ठत्वेऽपि दशमस्त्वमसीत्यादिवत्तद्गोचराऽज्ञाननिबर्हणेन जिज्ञासानिवर्तनात् पुरुषार्थपर्यवसानाच्च नान्याकाङ्क्षाप्रसक्तिः।। न च वाक्यान्निर्विशेषबोधाऽसिद्धिः, तादृशजिज्ञासातात्पर्ययोः सतोर्वारयितुमशक्यत्वात्। अन्यथा मद्वाक्यान्मदभिमतनिर्विशेषाऽबोधे तव तदपलापस्य तन्निरासोपायान्वेषणस्य चाऽनुदयप्रसङ्गात्। इत्थंचोपक्रमादेरपि तन्मात्रविषयत्वं सिद्धमिति न तात्पर्यग्राहकत्वाऽसंभव इति भावः।। १७।।

ननु यदि निर्विशेषमेव श्रुतेर्बोधयितुमिष्टं, तर्हि किमर्थं सविशेषं तत्र तत्र सा प्रस्तौति? किमर्थं वा प्रतिशाखं प्रतिप्रस्तावं च सृष्ट्यादीनेव मुहुः कीर्तयति?। नच प्रागदर्शितवाक्येमत्तमातङ्गादीनामिवाऽसाधारणलक्ष्यस्वरूपपरिचयार्थमेव तथाकीर्तनमिति वाच्यम्। "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" "अस्थूलमनणु" "यत्र नान्यत्पश्यति नान्यच्छ्रूणोति" इत्यादिस्वरूपपरवाक्यैरेव तत्परिचयसंभवात्। अन्यथा तटस्थलक्षणेनैव तत्परिचये स्वरूपलक्षणवैयर्थ्यात्। न च तटस्थलक्षणेन स्वरूपलक्षणपरिचयः तेन च लक्ष्यपरिचय इति परम्परयोपयोगः अस्य स्वरूपलक्षणस्य तु साक्षादेवेत्युभयसार्थक्यमिति वाच्यम्। अनेनैव साक्षाल्लक्ष्यपरिचयसंभवेन (१)"गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यात्" इति न्यायेन चाऽस्य स्वरूपलक्षणशेषत्वाऽयोगात्।। किञ्च। स्वरूपलक्षणवज्जगज्जन्मादिकारणत्वस्यापि ब्रह्मणि श्रुत्यैकसमधिगम्यत्वेन स्वविशिष्टलक्ष्यपरिचायकत्वात्कोहेतुः तटस्थलक्षणत्वे, परित्यागे वा। यदि तूभयरूपताविरोधाल्लक्ष्यासामञ्जस्यं, तर्हि सर्गादिश्रुतेः कोऽभिप्राय इत्याशङ्क्य तत्तात्पर्यं सङ्क्षेपतो वर्णयति— अक्षेति।।

मू०।। अक्षजादिबहिःप्रमाण - समेधितद्वयविभ्रमे
जाग्रति श्रुतिरद्वयप्रतिबोधने सहसाऽक्षमा।
व्यावहारिकवस्तुजातमिदं मृषेति विवक्षया
प्रक्रियां रचयांबभूव विसृष्टिसंहतिलक्षणाम्।। १८।।

अक्षेभ्यः = इन्द्रियेभ्यः जातः, आदिपदादनुमानादिभ्योऽपि जातो यो बहिर्वस्तुमात्रगोचरप्रमाणैः समेधितः = अनादिकालादारभ्य सम्यगत्यन्तदार्ढ्येन एधितः = वर्धितः, यो द्वयविभ्रमः = द्वैतगोचरः अन्तः करणदेहेन्द्रियपुत्रमित्राद्यभिमानलक्षणो विविधभ्रमः, तस्मिन् जाग्रति = इदमेव परमार्थसत्यं

(१) अग्न्याधान सन्निधौ पठितं वारणो यज्ञा व चरः वैकङ्कितोयज्ञावचर इति। यज्ञावचरो यज्ञ साधनम्। इदं पवमानेऽप्यङ्गमथवा यज्ञ साधन मात्राङ्गमिति संशये आधान सन्निधौ पवमानेष्टीनां पाठेनाधानाङ्गत्वादाधाने यागाभावेन यज्ञ साधनपात्राणामप्रसक्तेस्तत्सन्निधौ पाठ वैयर्थ्याद्वाजपेयस्य यूप इतिवत्तदङ्गे पवमानेष्टौ निविशत इति। बहिः पूर्व पक्षे सिद्धान्तमाह। गुणानामिति गुणानां वारण वैकङ्कतादि गुणानां परार्थत्वाद्यज्ञसाधन पात्रार्थत्वादाधाने यागाभावात्पवमानेष्टि सन्निधावस्य वाक्य पाठाभावेनासन्निधि पाठस्य समत्वाद्यज्ञान्तरैः पवमानेष्ट्यासाकमसम्बन्धोंङ्गाङ्गीभावो न। नापि वाजपेयस्य यूप इति न्याय प्रवृत्तिः। आधान पवमानेष्ट्योरङ्गाङ्गीभाव निराकरणस्याग्रे वक्ष्यमाणत्वात्। अतः सर्वयज्ञाङ्गम्।
(जै० त० अ० ३.पा० १ अधि० १२ सू० २१)

नान्यादृशं स्वरूपमस्तीति श्रोतृबुद्धौ विजृम्भमाणे सति, पुरुषार्थाय प्रवृत्ता निरपेक्षप्रमाणभूतापि श्रुतिः सहसा = विरोधिभ्रममनपाकृत्यैव, अद्वयस्य = सर्वद्वैतप्रपञ्चविधुरस्य सच्चिदानन्दैकरसस्य प्रत्यग्ब्रह्मणः, प्रतिबोधने = सप्रपञ्चमूलाऽज्ञानप्रतिकूलाऽखण्डाकारवृत्तिजनने, अक्षमा = असमर्था सती तदुपायत्वेन इदं = बाह्यप्रमाणगम्यं, व्यावहारिकवस्तुजातं = व्यवहारकालमात्रव्याप्तिसत्तास्फूर्तिकं पदार्थवृन्दं, मृषा = परमार्थसद्वस्तुव्यतिरेकेण नास्तीत्येवं, विवक्षया = तात्पर्येण, विसृष्टिसंहृतिलक्षणां = सृष्ट्यादिकल्पनारूपां प्रक्रियां रचयांबभूव = विरचितवतीति, बोधोपायमात्रत्वान्न तत्रैव श्रुतेर्निर्भर इत्यर्थः। अयंभावः,-त्रिविधपरिच्छेदशून्यसत्यज्ञानानन्दस्वरूपं हि ब्रह्म श्रुतेर्बुबोधयिषितं तत्रोक्तपरिच्छेदशून्यत्वस्य सर्वबाधाऽवधित्वलक्षणाऽलौकिकसत्यत्वस्य च न सर्वद्वैतबाधमन्तरेण संभवः। न च द्वैतस्य प्रत्यक्षादिभिः सत्यत्वाऽवधारणदशायां बाधः संभावयितुं शक्यः। नच द्वितीयवस्तुमात्राऽबाधे अद्वितीयत्वलक्षणमानन्त्यं सुवचमिति। तथा ब्रह्मबोधने उपायान्तरमपश्यन्ती श्रुतिः द्वैतबाधोपपादनाय प्रथमं प्रपञ्चस्य सावयवत्वादिना संभावितकर्त्रुपादानकस्य ब्रह्मैवाभिन्ननिमित्तोपादानमाकाशादिक्रमेणेति प्रतिपाद्य तद्बुद्धौ स्थिरायां कार्यस्य कारणाऽनन्यत्वोपपादनन्यायेन विकाराऽनृतत्वप्रदर्शनेन प्रथमं पञ्चभूतमात्रतां परिशेष्य ततस्तेषामपि स्वस्वप्रकृतिपूर्वपूर्वभूताऽनतिरेकोपदर्शनक्रमेण परमार्थसत्यब्रह्मव्यतिरेकेणाऽसत्त्वं दर्शयति।। अयमेव हि श्रुतेरभिप्राय इति चाऽऽविश्चकार भगवान्सूत्रकारः-"तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यादिना। इत्थं च सविशेषप्रस्तावोऽपि तदुपजीव्य तत्रतत्रानुषङ्गिकोपासनविध्यर्थः प्रवृत्तो न स्वप्राधान्येन। अनयैव च प्रक्रियया दर्शितवस्तुस्वरूपस्य श्रोतुर्बुद्ध्यारोहाय जन्मादिकारणत्वस्य तटस्थलक्षणता, स्वरूपलक्षणोपपादकता च, स्वरूपस्य च लक्ष्यभूतस्यैव लक्षणत्वोपचारात् पारार्थ्याऽभावेन न तटस्थलक्षणसमत्वं, नापि वैयर्थ्यमिति न कश्चिद्दोष इति।। १८।।

ननु सूत्रकृता "अथातो ब्रह्मजिज्ञासा" इतिप्रतिज्ञाय जिज्ञास्यं ब्रह्म किं स्वरूपमित्याकाङ्क्षायां "जन्माद्यस्य यतः" इति लक्षणाभिधानात्तन्मूलभूतयोः "तद्विजिज्ञासस्व" "यतोवा" इत्यादिश्रुत्योरपि सूत्रसमानार्थकत्वौचित्यात् (प०टि०)जन्मादिकारणत्वं स्वरूपलक्षणमेव किं न स्यादिति कस्यचिन्मन्दमतेराशङ्कां परिहरन्नुपक्रमादिप्रदर्शनेन सर्ववेदान्तगतसृष्टिवाक्यानामद्वितीये ब्रह्मणि तात्पर्येण समन्वयं दिदर्शयिषुरादौ स्वशाखीयोपनिषदमनुक्रामति— ब्रह्मेति।।

मू०।। ब्रह्म सच्चिदानन्दमेकमशेषवाङ्मनसाऽतिगं
पञ्चकोशगुहान्तरं च निगद्य शश्वदलौकिकम्।
तद्विसृज्य विवेश सत्यमसत्यमित्युभयं स्वतः
सत्यमित्यभिधायिनी श्रुतिरद्वयं स्फुटमभ्यधात्।।१९।।

उपक्रमे "ब्रह्मविदाप्नोति परम्" इति सर्वोत्कृष्टसुखप्राप्तये ज्ञातव्यत्वेन प्रस्तुतं ब्रह्म किं स्वरूपमित्याकाङ्क्षायां श्रुत्यैव "तदेषाऽभ्युकता, सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रोदाहरणेन सत्यज्ञानाऽद्वयस्वरूपमेव तन्नाऽन्यादृशमिति स्फुटीकृतम्। सविशेषस्यैव ज्ञेयत्वं श्रुत्यभिप्रेतं चेत् एतन्मन्त्रोदाहरणमसङ्गतं स्यात्। सूत्रकृतापि "(१)मान्त्रवर्णिकमेव च गीयत" इति सावधारणं निर्विशेषस्यैव प्रकरणित्वं दर्शितम् नान्यस्येत्यर्थः। एवमुपसंहारस्यापि तन्मात्रविषयत्वं दर्शयति-एकमिति। एकं = प्रत्यगभिन्नं अशेषा वाचः = वचांसि लौकिकवैदिकशब्दान् सर्वप्राणिमनांसि चाऽतिक्रम्य गतं = तदगोचरमित्यर्थः। वाङ्मनसेति (२)"अचतुरविचतुर" इत्यादिना अच्प्रत्ययान्तो द्वन्द्वो निपातितः। अन्ते "सयश्चायं पुरुषे, यश्चाऽसावादित्ये, स एकः" इति महावाक्येन तदेव प्रत्यगभेदेनोपदिश्य "एतमन्नमयमात्मानमुपसंक्रामति" इत्यदिना तस्मिन्नन्नमयादिसर्वप्रपञ्चप्रविलापनेन अद्वितीयत्वलक्षणमानन्त्यं समर्थ्य "यतोवाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। "नबिभेति कुतश्चन" "इति सर्ववाङ्मनसपरिच्छेद्यधर्मशून्यं "द्वितीयाद्वै भयं भवति" इति

---

(१) मान्त्रवर्णिकं एव च गीयते।। ब्र० सू० अ० १ पा० १ सू० १५।। सत्यं ज्ञानमनन्तं ब्रह्म।। तै०२। इत्यस्मिन् मन्त्रे यत्प्रकृतं ब्रह्म सत्यज्ञानानन्तविशेषणैर्निर्धारितं यदाकाशादि जगत्प्रसूतं यच्च शरीराणि सृष्ट्वा तत्राकाशादि शरीरान्तेषु जीवरूपेण प्रविष्टं यद्विज्ञानाय चान्योन्तरात्मेति प्रक्रान्तं तदेव मान्त्रवर्णिकं ब्रह्मेह गीयते नान्यन्मन्त्रब्राह्मणयोश्चैकार्थत्वस्य युक्तत्वादिति।

(२) अचतुरविचतुरसुचतुरस्त्रीपुंसधेनु + अनडूहक्र्साामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव पदष्ठीव नक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुष द्व्यायुषत्र्यायुषर्ग्यजुषजातोक्ष महोक्षवृद्धोक्षो पशुनगोष्ठश्वाः।। पा० अ० ५।४।७७।। अचतुर इत्यादि सूत्रस्य शेषः।। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। चतुराणां समीपे ये सन्ति ते उपचतुराः। तत एकादशद्वन्द्वाः स्त्रीपुंसौ। धेन्वनडूहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी चभ्रुवौच अक्षिभ्रुवम् दाराश्च गावश्च दारगवम्। ऊरुचाष्ठीवन्तौ च ऊर्वष्ठीवम्। निपातना ही लोपः। पदष्ठीवम्। निपातनात्पादशब्दस्यपद्भावः। नक्तं च दिवा च नक्तन्दिवम्। रात्रौ च दिवा च रात्रिन्दिवम्। रात्रेर्मान्तत्व निपात्यते। अहिन च दिवा च अहर्दिवम्।वीप्सायां द्वन्द्वो निपात्यते अहन्यहनीत्यर्थः। सरसिजमिति साकल्येऽव्ययीभावः। बहुब्रीहौ तु सरजः पंकजम्। निश्चितं श्रेयो निःश्रेयसम्। तत्पुरुष एव। ततो द्विगु। द्व्यायुषम्। त्र्यायुषम्। ततो द्वन्द्वः। ऋग्यजुषम्। ततस्त्रयः कर्मधारयः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपं उपशुनम्। टिलोपाभावः। संप्रसारणं न निपात्यते। गोष्ठेश्वा। गोष्ठश्वः।।

श्रुत्यन्तरादद्वितीयत्वादेव सर्वभयनिवर्तकं निरतिशयाऽऽनन्दैकरसं तदेवोपसंहृतमित्यर्थः। एतेन प्रत्यगभिन्नस्य तस्यैव ज्ञेयत्वे सर्वाऽनर्थनिवृत्ति निरतिशयाऽऽनन्दाऽवाप्तिलक्षणमोक्षफलमुपपद्यते न तटस्थस्यकारणस्येति चतुर्थमपि तात्पर्यलिङ्गं दर्शितं बोध्यम्। तस्य ताटस्थ्यं वारयन् सोपपत्तिकमभ्यासं दर्शयति— पञ्चकोशेति। अन्नमयप्राणमयमनोमय विज्ञानमयाऽऽनन्दमयाख्य पञ्चकोशा एव अपरिच्छिन्नमात्मानन्दं गूहन्ति = संवृण्वन्तीति गुहाः तेषामुत्तरोत्तरं सूक्ष्मत्वात्पूर्वेषां पूर्वेषामान्तराणामप्यान्तरं, अंतः स्वप्रकाशप्रत्यगात्मभावेनाऽऽधारत्वेन स्थितं "यो वेद निहितं गुहायाम्" इति मन्त्रवर्णोपदर्शितगुहानिहितत्वोपपादनाय "स वा एष पुरुषोऽन्नरसमयः" इत्यादि "ब्रह्मपुच्छं प्रतिष्ठा" इत्यन्तेन सर्वान्तरत्वेन तदेव ब्रह्म निगद्य = कोशेभ्यो विविक्तं स्वशब्देनैव स्पष्टमभिधायेत्यर्थः।। अत्र श्रुतौ यद्यप्यापातदर्शिनां पूर्वपर्यायेष्विव "तस्माद्वा एतस्मादानन्दमयात् अन्योऽन्तर आत्मा ब्रह्म" इत्यनभिधानात् (१)"आनन्दमयोऽभ्यासात्" इत्यादिसूत्रदर्शनाच्च आनन्दमयमेव ब्रह्मेति प्रतिभाति। तथाप्यानन्दमय इति मयटोऽन्नमयादिविकारार्थकप्रायपाठेन विकारार्थत्वस्यौचित्यात्। (२)"तत्प्रकृतवचनेमयट्" इति प्राचुर्यार्थकस्य चाऽऽनन्दैकरसे ब्रह्मणिअल्पाऽनानन्दसंवलितत्वरूपतत्प्राचुर्याभावेनाऽसंभवात्सूत्रोपदर्शिताऽभ्यासलक्षणतात्पर्यलिङ्गस्यचाऽऽनन्दमयशब्दे अदर्शनात्, "अन्नमय प्राणमय मनोमय विज्ञानमयाऽऽनन्दमयामात्मा मे शुद्ध्यन्ताम्" इति विरजाहोममन्त्रेऽन्नमयादिवदानन्दमयस्यापि शोध्यत्वदर्शनेनाऽशुद्धताप्रतीतेः, कोशत्वप्रसिद्धेश्च आनन्दमयो न ब्रह्म, किन्तु ब्रह्मपुच्छं प्रतिष्ठेति निर्दिष्टं सर्वाऽऽधारत्वादानन्दमयस्यापि पक्षिणः पुच्छमिवाऽऽधारभूतं ब्रह्म स्वशब्दोपात्तं निर्विशेषमेव। "अभयं प्रतिष्ठां विन्दते" इति तस्यैवोत्तरत्र मुख्यप्रतिष्ठात्वश्रवणात्। तस्यैव चोत्तरश्लोके, "असन्नेव स भवति, असद्ब्रह्मेति वेदचेत्। अस्ति ब्रह्मेतिचेद्वेद सन्तमेनं ततो विदुः।" इत्यभ्यस्यमानत्वाच्चेत्येतदभिप्रायेण पञ्चकोशगुहान्तरमित्युक्तम्।। पराक्रान्तं चात्र भगवद्भिर्भाष्यकारैः सूत्राणि च स्वपक्षे *योजयद्भिरित्युपरम्यते।

---

(१) आनन्दमयोऽभ्यासात्।। ब्र० सू० अ० १ पा० १ सू० १२।। पर एवात्माऽऽनन्दमयोभवितुमर्हति। कुतः। अभ्यासादिति तत्रैवानन्दशब्दस्य श्रुतिषु। रसो वै सः। रसो ह्येवायं लब्ध्वा। को ह्येवान्यात्कः प्राण्यात्। एष ह्येवानन्दयति। सैषानन्दस्य मीमांसेत्यादिषु। ब्रह्मण्येव बहुश आनन्दशब्दस्य रसादि शब्दापर पर्यायस्य प्रयोग दर्शनादिति भावः।।

(२) तत्प्रकृतवचने मयट्।। पा० अ० ५ पा० ४ सू० २१।। प्राचुर्येण प्रस्तुतं प्रकृतंतस्यवचने प्रति पादनं। भावेऽधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नमयम्। अपूपमयम्। यवागूमयी। द्वितीये। अन्नमयो यज्ञः। अपूपमयम् पर्व इति।

* योजतानि इति पा०।

दर्शिताभ्यासोऽपि तत् तात्पर्यलिङ्गमिति प्रदर्शनाय शश्वन्निगद्येत्युक्तम्। अपूर्वत्वप्रदर्शनाय विशिनष्टि— अलौकिकमिति। लोके प्रत्यक्षादिप्रमाणेन विदितं लौकिकं तद्विलक्षणमित्यर्थः। "लोकसर्वलोकाट्ठञ्" तथा च सविशेषस्य मानान्तरयोग्यत्वाऽदर्शनान्नालौकिकत्वमिति "नावेदविन्मनुतेतं बृहन्तं", "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्यादि श्रुत्यनुसारादज्ञातज्ञापकत्वलक्षणप्रामाण्यनिर्वाहकत्वाद्धर्म इव ब्रह्मण्यपि श्रुतेरेवाऽसाधारणमानत्वौचित्याच्च मानन्तराऽनधिगम्यं निर्विशेषमेव तत्तात्पर्यगोचर इति भावः।। एवं पञ्चभिर्लिङ्गैः। प्रकरणस्य निर्विशेषपरत्वे निश्चिते भूतार्थवादरूपाणां "तस्माद्वा एतस्मात्" इत्यादिसृष्टिवाक्यानामपि जगन्मिथ्या-त्वोपदर्शनमुखेन परमार्थसत्यनिर्विशेषतात्पर्यलिङ्गत्वमेवोचितं, उत्तरत्र "तत्सृष्ट्वा तदेवाऽनुप्राविशत् तदनु प्रविश्य, सच्चत्यच्चाभवत्" "इतिस्रष्टुः स्वसृष्टजगदनुप्रवेशेन सत्त्यच्छब्दवाच्य मूर्ताऽऽमूर्त व्याकृताऽव्याकृत जगद्भावाऽऽपत्ति-श्रवणात्प्रवेशस्य च व्यापकस्याऽधिष्ठानभाव तदन्तः स्थितिव्यतिरेकेण दुरुपपादत्वात् अविकारिणः कार्यभावाऽऽपत्तेः विवर्तव्यतिरेकेण दुरुपपादत्वाच्च। तदग्रे च तद्वदेव "सत्यं चानृतं च सत्यमभवत्, यदिदं किंच तत्सत्यमित्याचक्षते" इति परमार्थसत्यस्यैव व्यावहारिक प्रातिभासिक प्रपञ्चभावाऽऽपत्तिमुक्त्वा तदधिष्ठानस्य ब्रह्मविदभिल-प्यमानपरमार्थसत्यत्व निगमनाच्च जगदनृतत्वप्रतिपादनायैव सृष्टिवाक्यप्रवृत्तिरिति स्पष्टं प्रतीतेर्न त्वदभिलषितसिद्धिरित्यभिप्रेत्याह— तदित्यादिना। तत् = ब्रह्म, सत्यं = व्यावहारिकं, असत्यं = तद्विलक्षणं प्रातिभासिकमित्येवं रूपम् अखिलं = जगत्, स्वतः = स्वस्मादेव प्रकृतिभूतात्, विसृज्य = विविधवैचित्र्येण संसृज्य तदेव विवेश अधिष्ठानताव्यतिरिक्त प्रवेशानुपपत्तिश्च भाष्यवार्तिकादौ प्रपञ्चिता, स्वत इत्येतद्देहलीदीपन्यायेन उत्तरत्रापि सम्बध्यते, तद्ब्रह्म स्वत एव सत्यं, न जगदिवाधिष्ठानभानाधीनसत्यमित्यर्थः।। इति = दर्शितप्रकारेण अभि-धायिनी = प्रतिपादनशीला ब्रह्मवल्ली श्रुतिः। अद्वयं = निर्विशेषमेव स्फुटं = व्यक्तम् अभ्यधात् = तात्पर्येण प्रत्यपीपददित्यर्थः। तथा च सृष्टिवाक्यानां न स्वरूपलक्षणपरत्वसंभव इति भावः।। १९।।

किञ्चास्तामामूलाग्रं श्रुतिपर्यालोचनं, "यतोवा" इत्यादिसृष्टिवाक्यानां प्रकारान्तरेण प्रकृताऽसङ्गत्यापि यथोक्ततात्पर्यकत्वं सुबोधमिति तत्प्रवृत्तिप्रकारप्रदर्शनेन दर्शयति— ब्रह्मविदिति।।

मू०।। ब्रह्मवित्परमेति तत्खलु सच्चिदद्वयलक्षणं
वेदनं च गुहान्तरस्य निजस्वरूपतदाऽऽप्तये।
इत्युदीर्य सदद्वयत्वसमर्थनाय समाददे
विश्वसृष्टिमिमां श्रुतिर्न हि तत्समर्थनमन्यथा।। २०।।

ब्रह्म वेत्तीति ब्रह्मवित् अधिकारी, परं = सर्वोत्कृष्टसुखरूपं मोक्षम्, एति = प्राप्नोतीत्यर्थः। "ब्रह्मविदाप्नोति परम्" इतिहि सकलवल्यर्थसूत्रभूते प्रथमवाक्ये "बृह बृहि वृद्धौ" इति धातुनिष्पन्नब्रह्मपदेन परपदेन च सङ्को चकारणाऽभावात्सर्वतोऽपरिच्छिन्नं निरतिशयाऽऽनन्दरूपं वस्तु मोक्षहेतुज्ञानविषयत्वेन फलत्वेन च कण्ठतो निर्दिष्टं, परिच्छेदहेतुद्वैतप्रपञ्चस्य मिथ्यात्वं वेदितुर्जीवस्य ब्रह्माऽभेदश्च सूचित इति भावः। एवं सूचितस्य सर्ववल्यर्थस्य सङ्क्षेपविस्तराभ्यां विवरणाय प्रवृत्ते उत्तरसन्दर्भे किं रूपं तद्ब्रह्म? क्व? कथं वा तद्वेदनं? कीदृशी वा तत्प्राप्तिः? इति जिज्ञासायां प्रथमं पदार्थव्युत्पादनमुखेन सङ्क्षेपतो विवरणाय "तदेषाभ्युक्ता" इति उदाहरिष्यमाण मन्त्रस्य पूर्ववाक्यार्थविवरणरूपत्वोक्तिपुरस्सरं "सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमेव्योमन्। सोऽश्नुते सर्वान्कामान् सह। ब्रह्मणा विपश्चिता इति मन्त्रोदाहरणमिति दर्शयति तत् खल्विति तत् = ब्रह्म खलु। सच्चिदद्वयलक्षणं = सत्यज्ञानाऽद्वितीयस्वरूपं अस्य = ब्रह्मणः वेदनं = ज्ञानं, त्वर्थे खलुशब्दश्चशब्दश्च। गुहान्तः = बुद्धिगुहायां निजस्वरूपस्य = वेदितृवास्तवाऽऽत्मरूपस्य तस्य समस्तवैषयिकसुखलवसमुद्रापि तत्वात् सर्वकामस्वरूपस्य ब्रह्मणः आप्तये = प्राप्तये फलायेत्यर्थः। मन्त्रे परमे व्योमन्नित्यव्याकृताऽऽकाशमुच्यते। तस्मिन् ब्रह्म निहितं सदा सन्निहितमित्यर्थ इति केचित्। तन्न। "यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाशः दहरोऽस्मिन्नन्तराऽऽकाशः" इत्यादिश्रुतिषु ब्रह्मण एव हार्दाकाशत्वप्रसिद्धेः। अत्रापि तथैव न्याय्यत्वात्। तथा च व्यधिकरणसप्तम्या परमेव्योम्नि ब्रह्मण्यध्यस्तायां बुद्धिगुहायां प्रत्यगात्मभावेन स्थितमित्यर्थ इति सूचनाय गुहान्तरित्युक्तम्। सहेति न साहित्यार्थे निपातः। किन्तुयुगपदित्यर्थे।[1]सच विच्छित्तिपाठात्पूर्वान्वयी। तृतीयाद्वयं च समानाधिकरणमित्थंभावे। सार्वज्ञ्यप्रयोजकचिद्रूपब्रह्मभावेन युगपत् सर्व*काम्यसुखान्यश्नुत इत्यर्थः.

(१) सचेति। युगपदर्थकः सहेति निपातः विच्छित्तिपाठात् = विच्छिद्यतयोत्तरपठितोपि स विद्वान्ब्रह्मवित्सह = युगपत् सर्वान् कामान् आसार्वज्ञेनब्रह्मरूपेणाश्नुते इत्येवं प्रकारेण विच्छेद हेतु भुजिक्रियार्थकाश्नुत इति पदात्पूर्वान्वयति।।

*काम इति पाठः।

युगपत्सर्व प्राणिसुखानां प्रतिनियत देशकालशरीर विषयाऽदिसाध्यानां प्रातिस्विकरूपेण भोक्तुमशक्यत्वान्निकृष्टयोनिभोग्यसुखानां अधिकारिभिरनभिलषणीयत्वादन्यसुखस्याऽन्याऽभोग्यत्वाच्च "एतस्यैवाऽऽनन्दस्याऽन्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्यन्तरात् "को ह्येवाऽन्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवाऽनन्दयाती" त्युत्तर श्रुत्यनुरोधाच्च सर्वविषयसुखानामुपाधिवैशद्यतारतम्याधीनाऽभिव्यक्तितारतम्यशाल्याऽऽत्मसुखमात्रस्वरूपत्वात्, निरतिशयाऽऽनन्दरूपाऽत्मलाभ एव युगपत्सर्वकामाऽवाप्तिः श्रुत्यभिप्रेतेति सूचनाय निजस्वरूपेत्युक्तम्। इत्थं च स्वरूपलक्षणस्य मन्त्रेणैव स्फुटमभिधानात्तद्विरुद्धरूपान्तरस्य कल्पयितुमशक्यत्वाच्च निवृत्तायां स्वरूपलक्षणजिज्ञासायां इयमेव जिज्ञासा परिशिष्यते। कथं तद्ब्रह्म सत्यमित्युच्यते? कथं वा ज्ञानं? कथं वाऽनन्तं? यदि तत्प्रपञ्चसाधारण्येन सत्यं, तर्हि विशेषणवैयर्थ्यं, धर्म इव ब्रह्मण्यपि वेदबोध्ये आस्तिकस्याऽसत्यताबुद्ध्यप्रसक्तेः।

एवं ज्ञानत्वमपि कथं?, लोके नित्यज्ञानाऽप्रसिद्धेः। एवमनन्तत्वमपि कथं? अन्तो हि परिच्छेदः, स च नद्यन्तः क्षेत्रभक्तिः, मरणान्तं जीवितं, गोत्वाऽन्तमश्वत्वम्, इति देशतः कालतो वस्तुतश्चेति त्रिधा। तत्राऽऽद्यस्याऽऽकाशादावदर्शनेऽपि द्वितीयस्य संदिग्धत्वेऽपि तृतीयोऽस्त्येवेति न त्रितयशून्यं वस्तु संभावयितुं शक्यम्। यदि त्वाद्यद्वयशून्यत्वमात्रमभिप्रेतं स्यात्तर्ह्याकाशादिष्वतिप्रसक्तं लक्षणं। किञ्च। ब्रह्म आकाशादिभ्यो भिन्नं? न वा?। आद्ये परिच्छेदाऽऽपत्तिः। द्वितीये ब्रह्माऽभावाऽऽपत्तिः। अपि च। प्रत्यागात्मैव ब्रह्मेति गुहानिहितत्वेनोपदर्शितं। स च जीव एव। नह्येकस्मिन् शरीरे द्वौ प्रत्यगात्मानौ संभवतः। जीवस्य च परिच्छिन्नत्वं प्रत्यक्षसिद्धं नापलपितुं शक्यमित्याद्याशङ्कानिरासाय, कोशविवेकप्रसञ्जनाय च सृष्टिवाक्यावतार इति दर्शयति— इत्युदीर्येत्यादिना। स्वरूपलक्षणोक्त्यनन्तरमेतच्छङ्कानिरसनमेवाऽऽकाङ्क्षितमिति द्योतनाय क्त्वाप्रत्ययः। श्रुतिः सदद्वयत्वसमर्थनाय = मन्त्रोपदर्शितसत्यत्वानन्त्योपपादनाय, इमां = आकाशादिपुरुपान्तक्रमोपकल्पृप्तां विश्वसृष्टिं समाददे = वक्तुमुपचक्रमे इत्यर्थः। "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादेः— तस्मात् = ब्रह्मत्वेन प्रकृतात् = एतस्मात्प्रत्यक्त्वेन नित्यापरोक्षादतिसंनिहितात्, अतएवाऽऽत्मनः प्रकृतिभूतादाकाशः तत्सत्तया सन्नेव संभूतः सर्गादावाविर्भूतः। एवमाकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्याश्च पञ्चीकरणोत्तरमोषधयः, ताभ्योऽन्नं, अन्नात्पुरुषाकारं शरीरमिति क्रमेण संभूतमित्यर्थः। पञ्चम्यन्तानि चाकाशादिपदानि तत्तदुपहितब्रह्मपराण्येव। अत्र संभूतिग्रहणं च प्रकृतिपञ्चम्यनुरोधाद्भृगुवल्यां समानप्रकरणे त्रितयोपादानाच्च

स्थितिप्रलययोरप्युपलक्षणम्। तथाचाऽऽकाशादेः कालत्रयेऽप्युपादानब्रह्मणः पृथक्सत्त्वाऽभावेनाऽनृतत्वाद्देहादिजीवोपाधीनां च तत्कार्यत्वेन तत्साम्यात्सर्वोपाध्यनृतत्वे च जीवस्य ब्रह्मभावेनैव परिशेषाद्ब्रह्मैव परमार्थसत्यं, न प्रपञ्चवत्पराधीना सत्यं, कल्पितप्रपञ्चेन तस्य वास्तवाद्वितीयत्वाऽहानिः, नित्याऽपरोक्षप्रत्यगभेदात्सर्वजगत्कर्तृताबललभ्यसार्वज्ञ्याच्च तस्य नित्यज्ञानस्वरूपत्वोपपत्तिश्चेति श्रुतेस्तात्पर्यम्। प्रकारान्तरेण वर्णने त्वप्राप्तकालता, दर्शितशङ्काऽनपनयश्चेति भावः।।

ननु न सत्यशब्दस्य प्रकृते कालत्रयाऽबाध्यत्वलक्षणं सत्यत्वमर्थः। किंतु सदात्मकसर्वप्रपञ्चोपादानत्वात्सार्वात्म्यम्।। उत्तरत्र "सच्च त्यच्चाऽभवत्" इत्यादिना "तत्सत्यमित्याचक्षते" इत्यन्तेन तथैव तत्समर्थनात्। मान्त्रवर्णिकसत्यशब्दार्थ सार्वात्म्योपपादनायैव च सृष्टिवाक्याऽवतारः। एवमानन्त्यमपि गुणानन्त्यात् शक्त्यानन्त्यात् कार्यानन्त्याद्वा समर्थयिष्यामीति कस्य चिदन्यथा समर्थनाऽऽभासं निराचष्टे— नहीति। अन्यथा = त्वदुक्तेन प्रकारान्तरेण, तस्याः = विश्वसृष्टेः समर्थनं न संभवति। हिशब्दो हेतुप्रसिद्धिद्योतनार्थः। तथाहि— न तावत्सत्यशब्दस्य त्वदुक्तोऽर्थः। रूढिपरित्यागाऽयोगात्, कारणस्य वास्तवे अचेतनजगदात्मत्वे ज्ञानैकरसत्वायोगेन ज्ञान *पदार्थाऽसंघटनाच्च, सार्वात्म्येनैव ज्ञानतादात्म्यस्यापि लाभेन ज्ञानपदवैयर्थ्यात्। परिणामित्वेन ब्रह्मणोऽनित्यत्वप्रसक्ति निरवयवत्वशब्दकोपादिप्रसङ्गाच्च। विषयानुपादानान्मतुवाद्यश्रवणाच्च सर्वगोचरज्ञानवत्त्वं तदर्थ इत्यपि वक्तुमशक्यत्वात्। अनादिजीवात्मनां ब्रह्मकार्यत्वाऽभावेन सार्वात्म्याऽसिद्धेश्च।। न च विपश्चितेत्यग्रिमपदानुरोधेन "卐अर्शआद्यच्" कल्पनमिति युक्तं। "वेदो वा प्रायदर्शनात्" इति न्यायेनाऽसञ्जातविरोधिज्ञानपदाऽनुरोधात् विपश्चित्पदस्यैव ज्ञानमात्रपरत्वौचित्यात्। एवं सार्वात्म्यादेव शक्तिगुणाद्यानन्त्यलाभादनन्तपदस्यापि वैयर्थ्यम्। ब्रह्मपदसामानाधिकरणमनन्तपदं शक्तिगुणाद्यानन्त्यं प्रतिपादयतीति च विचित्रा व्युत्पत्तिः। नच नित्यार्थमेवाऽनन्तपदं। सङ्कोचे कारणाऽभावात्। यश्च "सच्चत्यच्चाभवत्" इत्युत्तरग्रन्थानुसारोपन्यासः सोऽपि सन्दर्भाऽपरिशीलननिबन्धनः। तथाहि— "असन्नेव स भवति, असद्ब्रह्मेति वेदचेत्" इति ब्रह्माऽसत्त्वदर्शिनो निन्दया "अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततोविदुः" इति तत्सत्त्ववेदिनः स्तुत्या च ब्रह्मसत्त्वमेव समर्थ्यते।। नच वेदबोधिते ब्रह्मण्यसत्त्वशङ्का, समर्थनापेक्षा वास्तीति वाक्यमेवानर्थकं स्यात् यद्यलौकिकी सत्ता नाभिप्रेता स्यात्। तदुत्तरमपि "अथातो नु प्रश्नाः' इति बहुवचनानुरोधांत् किं तद्ब्रह्मास्ति

* पदासंघटनाच्च इति पाठः।

卐 अर्शास्यस्य विद्यन्ते अर्शसः आकृतिगणोऽयम्। (अ० अ०५ प०२ सू०२७)

नास्ति वा?, अविद्वान्मृतो ब्रह्म प्राप्नोति न वा? विद्वानेव प्राप्नोति वा? इति प्रश्नत्रयं गम्यते। तत्राऽऽद्य-प्रश्नोत्तरत्वेनाऽऽकाशादिकार्यमुखेन ब्रह्मसत्यत्वसमर्थनाय "सोऽकामयत" इत्यादिसंदर्भः प्रवृत्तः। यद्यस्ति कुतो नोपलभ्यते इत्याशङ्कायां निर्विशेषत्वान्नोपलभ्यते, सविशेषकार्यानुप्रवेशेन तु सत्सदिति सर्वत्रोपलभ्यते, बुद्धिगुहायां तु स्फुटतरमुपलभ्यते। नचाऽप्रसिद्धस्याऽलक्ष्यस्य कल्पितेन वस्त्वन्तरानुप्रवेशेनोपलम्भाऽप्रसिद्धिः। आनुभविकेऽर्थेऽप्रसिद्धेरदोषत्वात्। तादृशस्यापि राहोः तथाविधेनापि चन्द्रानुप्रवेशेनोपलब्धिदर्शनाच्चेति प्रदर्शनाय माहवाक्यो-पयोगितया ब्रह्मणः प्रत्यक्त्वबोधनाय च "तत्सृष्ट्वा तदेवाऽनुप्राविशत्" इत्यादिना मूर्तामूर्तप्रपञ्चाऽनुप्रवेशेन तदात्मतोक्ता। परमार्थाभिप्रायेण च समर्थितार्थ निगमनाय च "तत्सत्यमित्याचक्षते" इति विद्वदनुभवसंवादिसत्यत्वमित्युच्यते। उत्तरत्रापि "कोह्येवान्यात्कः प्राण्यात्" इत्यादिना तर्केण "भीषास्मात्" इत्यादिना जगद्व्यवस्थालिङ्गेन च तदेव समर्थ्यते। अन्ते च महावाक्योपन्यासपूर्वकं विदुष एव ब्रह्मप्राप्तिर्नाऽविदुष इत्यवशिष्टप्रश्नद्वयोत्तरेण वल्लीसमाप्तेति सर्वसन्दर्भस्य सच्चिदानन्दाद्वय ब्रह्ममात्रपरत्वात् न त्वदुक्तरीत्या सृष्टिसमर्थनसंभव इति भावः। एवं ज्ञानोपायत्वेन तपः शब्दितविचारविधानाय प्रवृत्तायां भृगुवल्ल्यामपि "यतो वा" इत्यादिना ब्रह्मलक्षणत्वेन प्रस्तुतसर्वसृष्टेरन्न-प्राणमनोविज्ञानेषु भ्रान्त्या ब्रह्मत्वेन प्रसक्तेषु पर्यालोचनेन क्रमेण निरस्तेष्वन्ते "आनन्दो ब्रह्मेति व्यजानात्" इत्यादिना पूर्ववल्ली वदेवाऽपरिच्छिन्नाऽऽनन्दैकरसे ब्रह्मणि पर्यवसानं स्पष्टमवगम्यत इति तैत्तिरीयश्रुतेरद्वितीये ब्रह्मणि तात्पर्यं सिद्धम्।। २०।।

इत्थं स्वशाखीयोपनिषदः सृष्टिवाक्यसङ्घटनव्याजेन ब्रह्मणि समन्वयमुपपाद्य गतिसामान्यप्रदर्शनाय ऋग्वेदोपनिषदोपि तं तथैवोपपादयति— एकएवेति।।

मू०।। एक एव पुरा बभूव न चापरं स किलाऽखिलं
वीक्ष्य विश्वमिदं ससर्ज तनुं प्रविश्य निरीक्षते।
स्वप्नमावसथत्रयं सविचारतः प्रतिबुद्धवान्
स्वाऽऽत्मनैव समस्तकाममवाप्नुवन्नमृतोऽभवत्।। २१।।

उपक्रमे "आत्मा वा इदमेकएवाग्र आसीन्नान्यत्किञ्चन मिषत्" इत्येकशब्देन, एवकारेण इतरप्रतिषेधेन च सजातीयादिभेदशून्य आत्मैव निरूपयितुमारब्ध इति दर्शयति— एकएवेति।. पुरा = सृष्टेः पूर्वं, इदं = परिदृश्यमानं जगत्, एकः = अद्वितीय आत्मैव बभूव। अपरं = जगद्रूपं, न बभूवेत्यर्थः। तर्हि किमत्यन्ताऽसदेव जगत् सह स्वसत्तयोत्पद्यते? नेत्याह— स किलेति।।

अखिलं = जगत् सः = आत्मैव, आत्मेदंपदयोस्सामानाधिकरण्यादिदंपदपरामृष्टस्य जगतः पुरा आत्मरूपेण स्थितिबोधनादात्मसत्तैव जगत्सत्तेति इदानीमिव प्रागपि जगदासीदिति वक्तुं शक्यत्वान्नात्यन्तासत्त्वं, नापि स्वतः सत्वमित्यनिर्वचनीयत्वं श्रुतेरभिप्रेतमित्यर्थः। किलेति वै शब्दार्थे श्रौतप्रसिद्धिद्योतनाय। अत्रापि "स ईक्षत लोकान्नु सृजा" इति "स इमाँल्लोकानसृजत" इत्यादिसृष्टिवाक्यस्य तथाविधाऽऽत्मस्वरूपोपपादनायैवाऽवतार इति सूचयंस्तदर्थमाह— वीक्ष्येति।। सः = आत्मा सृज्यपदार्थपर्यालोचनरूपमायावृत्त्या वीक्ष्य = पर्यालोच्य इदं विश्वं = जगत्, सूक्ष्मभूतसृष्टिपञ्चीकरणाऽनन्तरं अम्भोमरीचिमरापशब्दितद्व्यन्तरिक्ष-भूपाताललोकात्मकविराजं, ततोऽग्न्यादीन्द्रियाद्यधिष्ठातृदेवान्, तेषामशनाया पिपासे, तदुपशान्तयेऽन्नाद्युपभोगाय प्रथमं धर्माऽपवर्गयोस्साधकंगवादिशरीरम्, अथतत्साधकं मनुष्यशरीरमिति क्रमेण ससर्ज। ततस्तस्मिन्देहे अग्न्यादीनां वागिन्द्रियादिभावेन प्रवेशानन्तरं स सर्वस्रष्टाऽऽत्मैव कार्यकारणसङ्घातं भोक्तारमन्तरेणाऽराजकं नगरमिव कथं स्यादित्यालोच्य जीवभावेन प्रविष्ट इत्यर्थः। "कथंन्विदं मदृते स्यात्" इत्यादि "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इत्यन्तश्रुतिप्रतिपाद्यं सङ्क्षिप्य दर्शयति— तनुं प्रविश्येति। श्रुतौ सीमानं = केशविभागान्तं ब्रह्मरन्ध्रस्थानं विदार्यैतया द्वारा परमात्मा प्रापद्यत प्रविष्ट इत्यर्थः। अस्य देहान्तसर्गस्य तत्प्रवेशप्रयुक्तजीवभावस्य च मिथ्यात्वप्रतिपादिकां "तस्य त्रय आवसथाः त्रयः स्वप्नाः" इति श्रुतिं वर्णयति-निरीक्षते स्वप्नमिति। आवसथत्रयं = नेत्रकण्ठ-हृदयस्थानत्रयोपलक्षित जागृत्स्वप्नसुषुप्त्याख्याऽवस्थात्रयं मिथ्यात्वेन स्वप्नसाम्यात्स्वप्नं, निरीक्षते = अनादिकालात्पौनः पुन्येन पश्यतीत्यर्थः। मृत्युमूर्च्छावस्थयोरप्युपलक्षणमेतत्। ननु तनुप्रवेशोत्तरकालमागन्तुकोऽस्य जीवभाव इति तदारभ्य पश्यतीति वक्तुं युक्तं, नाऽनादिकालादिति चेत्। न। अविद्याकामकर्म वासनासन्तानलक्षण संसारबीज परम्पराया अनादित्वेन संसारप्रवाहस्याप्यनादित्वे तत्प्रवाहपतितजीवस्याप्यना-दित्वौचित्यात्। कथं तर्ह्यविकृतस्यैव ब्रह्मणो जीवभावेन प्रवेशश्रुतेरुपपत्तिरिति चेत्? प्रलये सर्वकार्योपाधिविलयात् तत्संस्काराणां चाऽस्फुटत्वात् तदुपादाने ब्रह्मण्यविद्यामात्रव्यवधानेन एकतामापन्नानां जीवानां पुनरुपाधिप्रादुर्भावे तत्र प्रतिबिम्बभावेनाऽऽविर्भावलक्षणोऽनुप्रवेशो वास्तवब्रह्माऽभेदबोधनाय अभिनव इवोत्प्रेक्ष्यत इति।

अथवा यथा अनादिसिद्धसाधुशब्दव्युत्पादनायाऽत्यन्ताऽसतामेव प्रकृतिप्रत्यया-ऽऽगमविकारदीनां कल्पना, तथा श्रुतेरपीयं जीवस्य वास्तव ब्रह्मभाव-व्युत्पादनायाऽत्यन्ताऽसत्येव प्रवेशादिकल्पनेति बोध्यम्। तथाच महाभाष्ये—"यदि

नित्याः शब्दः किमर्थं शास्त्रम्" इत्याशङ्क्योक्तं—"किमर्थं शास्त्रमितिचेत्। निवर्तकत्वात्सिद्धम्" इति अपशब्दनिवर्तकत्वात्कल्पनयापि व्युत्पादकं शास्त्रं सप्रयोजनमित्यर्थः। हरिणाप्युक्तम्—

"उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।" इति।।

तथाचाऽत्रापि जीवस्य नित्यसिद्धे ब्रह्मभावे उपदेशवैयर्थ्यमाशङ्क्योक्तं भगवद्भिर्द्रमिडाचार्यैः—"सिद्धं तु निवर्तकत्वात्" इति। अमुमेव हि स्वाभिप्रायं स्फुटयन्ती श्रुतिराह—"तस्य त्रय आवसथास्त्रयः स्वप्नाः" इति। श्रीगौडपादाचार्यैरप्युक्तम्—

"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा"।। इति।।

एवं च सति श्रुत्यन्तरे "नान्योऽतोस्ति दृष्टा नान्योऽतोऽस्ति श्रोता" इत्यादिचेतनान्तरप्रतिषेधा अपि स्वरसत उपपद्यन्ते।। नन्वेवं सत्युत्तरत्र गर्भोत्पत्तिक्रमेण पुत्रजन्मप्रपञ्चनानन्तरं "सोस्याऽयमितर आत्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथाऽस्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति" इति पितापुत्रयोरात्मभेदश्रवणमनुपपन्नमिति चेत्। न उपाधिभेदनिमित्त भेदाऽनुवादित्वाच्छ्रुतेः। कथमन्यथा तत्रैव स्त्रियां निषेकः प्रथमं जन्म, कुमारात्मना द्वितीयं जन्मेति, पुत्रात्मजन्मद्वयपङ्क्तौ (१)"स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म" इति पितुरग्रिमजन्म तृतीयत्वेन गण्येतेति। एवं "कोऽयमात्मा" इत्यादि "सर्वान्कामानाप्त्वाऽमृतः समभवदमृतस्समभवत्" इत्यन्ताऽग्रिमश्रुतेरप्यद्वितीयसच्चिदानन्दात्मन्येव पर्यवसानं दर्शयति—स इत्यादिना। सः = उपाध्यनुप्रवेशाज्जीवभावमापन्नः परमात्मा कोऽयमात्मेति वयमुपास्महे, कार्यकारणसङ्घातेऽस्मिन्कतरः स आत्मेति गुरुपूर्वकस्वतत्त्वविचारतो दर्शनश्रवणादिसर्वव्यवहारमुख्यसाधनाऽन्तः करणोपहितं तद्वृत्तितादात्म्यात् संज्ञानमज्ञानमित्यादिशब्दवाच्यम्, स्वतस्तु ज्ञानैकस्वभावं इन्द्रादिसर्वदेवमहाभूतचतुर्विधशरीरादि सर्वजगदधिष्ठानसत्तास्फूर्तिनिर्वाहकं यन्मम प्रज्ञानैकरसस्वरूपं तदेव ब्रह्मेति तत्त्वतः स्वरूपं प्रति बुद्धवान्सन् तत्कालमेव सर्वसुखलवसमुद्रभूतेन स्वात्मनैव विस्मृत कण्ठगतचामीकरवज्ज्ञानमात्रतः प्राप्तेन समस्तं कामं अवाप्नुवन् = प्राप्तवान् सन्, अमृतः = अमरणधर्मा अभवत्। अत्र शतृप्रत्ययेन समकालत्वलक्षकेण प्रति बोधाऽऽनन्दाऽवाप्त्यनर्थनिवृत्तीनां यौगपद्य-

(१) 'स इतः प्रयन्नेव' इति श्रुतिः स इतः अस्मान् प्रयन्नेव शरीरं परित्यजन्नेव।।

बोधनेनाऽभेदेसूचनात् मुखं व्यादायस्वपितीतिवच्छ्रुतौ क्त्वाप्रत्ययेन पूर्वकालता न विवक्षितेति सूचितम्।। तथाहि श्रुत्यन्तरं—"ब्रह्म वेद ब्रह्मैव भवति" "तरति शोकमात्मवित्" इति। "अस्माल्लोकादुत्क्रम्याऽमुष्मिन्स्वर्गे लोके" इति लोकान्तरगमनमुच्यत इति न भ्रमितव्यम्। "न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते" इति श्रुत्यन्तरे ब्रह्मविदो गतिप्रतिषेधात्। पूर्वखण्डान्ते—"(१)अधः श्येनो जवसा निरदीयम्" इति "गर्भ एवैतच्छयानो वामदेव एवमुवाच" इति गर्भशयनदशायामेव वामदेवस्य ज्ञानसमकालिकसंसारनिर्गमनोक्तिविरोधाच्च। किन्तु ज्ञानेन शरीरोत्पत्तिहेत्वविद्याद्युपमर्देन पुनः शरीराद्यप्रसक्तिः, एतच्छरीराद्यभिमान-निवृत्तिश्चास्माल्लोकाच्छरीरभेदाच्चोत्क्रमणं, निरतिशयाऽऽनन्दाऽऽत्मस्वरूपमेव च स्वर्गलोकोऽत्राऽभिधीयते। अन्यस्य स्वर्गस्याऽनित्यत्वोपपादनादमृतत्वोक्ति-विरोधादिति।। २१।।

सृष्टिवाक्यसमन्वयप्रसङ्गेन ऋग्वेदोपनिषदोऽद्वितीये ब्रह्मणि तात्पर्यं प्रदर्श्य यजुर्वेदेऽपि बृहदारण्यके "स यथोर्णनाभिस्तन्तुनोच्चरेत् यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवाऽस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वेवेदाः सर्वाणि भूतानि व्युच्चरन्ति" इति सृष्टिश्रुतेः पूर्वोत्तरप्रर्यालोचनेन मूर्ताऽमूर्तब्राह्मणोपदर्शित निर्विशेषएव पर्यवसानमिति दर्शयति— स्थूलेति।।

मू०।। स्थूलसूक्ष्मविभागि मूर्तममूर्तमित्यखिलं जगत्
ब्रह्मणो द्विविधं हि रूपमिति प्रकल्प्य विभागतः।
आदिशन्त्यथ नेति नेति निषिध्य रूपमशेषतः
काण्व वाजसनेयक श्रुतिरप्यशेषयदद्वयम्।। २२।।

तस्य ह्येवमवतारः— अध्यायादौ "ब्रह्म ते ब्रवाणि" इति प्रतिज्ञाय, विमर्शे निरूपयितुमशक्तम् जिज्ञासुं बालाकिं प्रत्यजातशत्रुः "व्येवत्वाज्ञापयिष्यामि" इति प्रतिज्ञाय सुषुप्तावौपाधिकरूपं परित्यज्य स्वस्वरूपावस्थितं प्रत्यञ्चं ब्रह्मेति

(१) अधः श्येनोजवसानिरदीयमिति।। अध अथ = अधुनागुरुशास्त्रप्रसादाल्लब्धतत्त्वविवेकयुक्तः श्येनः श्येनवदवस्थितोहं श्येन इव जालं लोहनिर्मितं श्रृंखलामयसमानमसंख्यातसंख्याकं शरीरं भित्त्वा जवसा वेगेनात्मबोधाभ्यासकृतसामर्थ्यलक्षणेन निरदीयम् अविद्यामयाच्छरीरान्निर्गमं अनावरणमसङ्गं परिपूर्णानन्दमात्मानं जानन् निर्गतोस्मि इत्यर्थः। अध इति सांत पाठे पूर्वमज्ञानदशायामधोलोकेषु निकृष्टयोनिषु संस्थाप्य = मापुर आ-आयमीररक्षन्। मा मां शतं अनेकानि लोहनिर्मित श्रृंखलावदभेद्यानि पुरः शरीराणि अरक्षन् अपालयन् यथाऽहं शरीराद्व्यतिरिक्तमात्मानं न जानीयां तथा रक्षन्मामित्यर्थः। यद्वाऽसंख्यानि शरीराणि यथाऽहं मुक्तो न स्यां तथैव स्वात्माध्यासं दृढीकृत्य कारागारस्थिततस्करमिव बन्धनश्रृङ्खलाः संसारपाश निर्गमान्मां रक्षन्तीति अरक्षन्पदार्थः।।

बोधयिष्यामीति सुषुप्तपुरुषं गत्वा तमुत्थाप्य बालाकिं पप्रच्छ "यत्रैष एतत्सुप्तोऽभूत योऽयं विज्ञानमयःपुरुषः क्वैष तदाऽभूत् कुत एतदागात्" इति। तत्किल नाऽज्जानाद्बालाकिः। तत अजातशत्रुः स्वयमेव प्रश्नयोरुत्तरं वक्तुं प्रवृत्तः। "सयथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीत एवमैवैष एतच्छेते" इति क्वैष तदाभूदिति प्रश्नोत्तरत्वेन सर्वद्वैतदुःखातिघात्य-द्वितीयाऽऽनन्दावस्थालक्षणेस्वाभाविकरूपे स्थितिमुक्त्वा कुत एतदागादिति प्रश्नोत्तरव्याजेन द्वैतमिथ्यात्वप्रदर्शनपूर्वकं तस्याऽद्वितीयत्वं व्यवस्थापयितुं हि स यथोर्णनाभिरित्यादिना प्रतीच एवाऽभिन्ननिमित्तोपादानाज्जगतः सृष्टिं सदृष्टान्तमुपन्यास्थत्। तत्र "सर्व एवाऽत्मनः" इति श्रुतिपाठे उपाधिविलयात्सुषुप्तौ परेणैकीभूतानामपि जीवानां पुनः प्राणाद्युपाध्याऽऽविर्भावे औपाधिकं व्युच्चरणमिति योज्यम्।। यद्यपि प्रत्यक्षेणाऽन्यैस्तदा प्राणक्रियोपलम्भात्, "प्राणाग्नय एव तदा तस्मिन्पुरे जाग्रति" इति श्रुत्यन्तराच्च न सुषुप्तौ प्राणविलय इति, "सर्वे प्राणा व्युच्चरन्ति" इति तद्विरुद्धमिव प्रतिभाति। तथापि [१]तत्तदविद्याप्रयुक्त प्रपञ्चसृष्टिभेदादन्यदृष्ट्यनुवादिनी सा श्रुतिः, इयं तु सुप्तपुरुषप्रपञ्चविषयिणीत्यविरोध इत्युक्तम्। एवं प्रतीचो निखिलजगद्व्युच्चरणे देहेन्द्रियाद्युपाधिसिद्धौ तत एव जीवभावेनाऽऽगमनमित्य-र्थात्प्रदर्श्य व्युच्चरणाऽवधेः परमार्थसत्यत्वोपपादनाय अन्ते "तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" इति व्यावहारिकसत्यप्रसिद्धप्राणाद्यपेक्षयापि तस्य सत्यत्वे नामनिर्वचनेन प्रदर्शिते प्राणादिप्रपञ्चस्वरूपाऽवधारणाय तदपवादेन ब्रह्मणः परमार्थसत्यत्वाऽवधारणाय च मूर्ताऽमूर्तब्राह्मणाऽवतारः। तत्र स्थूलं = मूर्च्छितावयवत्वात् मूर्तं पृथिव्यादित्रयं, सूक्ष्मं = अमूर्च्छिताऽवयवत्वात् अमूर्तं वाय्वन्तरिक्षमिति पञ्चभूतप्रधानं अखिलं जगत् अध्यात्माऽधिदैवविभागित्वेन दर्शितम्। उत्पत्तिस्थितिलयाऽवस्थास्वपि ब्रह्माऽपृथक्सत्तास्फूर्तिकत्वात् ब्रह्मण एवेदं द्विविधं रूपमिति "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च" इत्यादिना प्रकल्प्य तयोर्धर्मविभागशो मर्त्यत्वाऽमृतत्वादीनधिदैवाऽध्यात्मविभागशोऽपि क्रमेण आदित्यं तदन्तः पुरुषरूपं, अक्षि तदन्तः = पुरुषरूपं च, रसयुग्मद्वयं माहा*रजतादिसदृशलिङ्गरूपाणि च प्रदर्श्य, निर्णीते प्राणादिप्रपञ्चरूपे, अथ = अनन्तरं अध्यारोपितं मूर्ताऽमूर्तादिरूपं, अशेषतः = निरवशेषेण "अथात आदेशो नेति नेति" इति वीप्स्यमान नञा निषिध्य = अपोह्य, अधिष्ठानमात्रं परिशिष्टप्रत्यक्चैतन्यं ब्रह्मेति आदिशन्ती = प्रतिज्ञा-

(१) तत्तदविद्याप्रयुक्तेति।। देवदत्त यज्ञदत्तादिपुरुषाविद्याप्रयुक्तो यः प्राणादिप्रपंचसृष्टिभेदस्तदन्येषां पार्श्वस्थ जाग्रत्पुरुषाणां दृष्टेरेव प्राणाग्नय एव तदेति श्रुत्यनुवादिनी। इयं प्रकृता "सर्वे प्राणा व्युच्चरन्ति" इत्यादि तु श्रुतिश्च सुषुप्तदेवदत्तादि प्रपंचविषयिणीत्यविरोध इत्यर्थः।।

* रजनादि इति पा.।

पूर्वक-मुपदिशन्ती काण्ववाजसनेयकश्रुतिः = काण्वमाध्यंदिनशाखाद्वयेऽपि समानानुपूर्वीका मूर्ताऽमूर्तब्राह्मणश्रुतिरपि अद्वयं = सजातीयादिद्वितीयवस्तुशून्यमेव प्रत्यग्ब्रह्म अशेषयत् = पर्यशेषयत्। निर्विशेषवस्तुबोधने प्राप्तसर्वविशेषप्रतिषेधेन तन्मात्रपरिशेषणव्यतिरिक्तस्फुटरोपायान्तराभावादिति श्रुतेस्तात्पर्यमित्यर्थः।।

अमुमेव श्रुत्यभिप्रायं वाक्यशेषोऽपि स्फुटयति—"न ह्येतस्मादिति नेत्य न्यत्परमस्ति" इति। इति शब्दद्वयेन मूर्ताऽमूर्तलक्षणद्वैतप्रपञ्चमात्रं परामृश्य वीप्स्यमान नञा त्रैकालिकतन्निषेधेनाऽधिष्ठानपरिशेषणलक्षणादेतस्मादादेश नादन्यत्परं उत्कृष्टं स्फुटमित्यर्थः, निर्विशेषवस्तूपदेशनं न ह्यस्तीति हि तदर्थः। नच वीप्स्यमान नञा सर्वनिषेधे ब्रह्मणोऽपि निषेधाऽऽपत्तिरिति भ्रमितव्यम्। निरधिष्ठाननिषेधाऽसंप्रत्ययात्। "ब्रह्म ते ब्रवाणि" इति प्रतिज्ञाविरोधात्, उत्तरत्र च "अथ नामधेयं सत्यस्य सत्यम्" इति नामनिर्वचनेनोपसंहाराऽसङ्गतेश्च। तथा च सूत्रं—(१)"प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इति। प्रक्रान्तमेतावत्त्वं परिच्छिन्नमूर्ताऽमूर्तरूपं प्रतिषेधति श्रुतिः नतु ब्रह्म हि यस्मात्ततः = तदनन्तरं, भूयःपुनरपि नामनिर्वचनेन परमार्थसत्यं ब्रह्म ब्रवीतीति सूत्रार्थः। अथवा न ह्येतस्मादित्यस्याऽन्यथा योजना। नेतिनेतीति स्वकृतमादेशनं श्रुतिः स्वयमेव वर्णयति— न हीति। एतस्मादित्यस्याऽनन्तरं व्यतिरिक्तमित्यध्याहार्यम्। तथा च नेति नेतीत्यत्र इतीत्येवमित्यर्थकनिपातद्वयेन धर्ममात्रपरामर्शात्, नञा तत्प्रतिषेधे एतस्माद्ब्रह्मणो व्यतिरिक्तं न हीति निषेधः पर्यवस्यति। तथाच परिशिष्टं निर्धर्मकं निषिध्यमानात्परं उत्कृष्टं परमार्थसत्यं ब्रह्माऽस्त्येव, न तु तदपि प्रतिषिद्धमित्यर्थः। अस्यां च योजनायां ततः = निषेधस्य प्रपञ्चमात्रविषयत्ववर्णनानन्तरं श्रुतिरेवाऽन्यत्परमस्तीति परिशिष्टं ब्रह्म ब्रवीतीति सूत्रार्थः।। तथाच दर्शितसृष्टिवाक्यस्य जगन्मिथ्यात्व एव पर्यवसानं

(१) प्रकृतैतावत्त्वं हि प्रतिषेधयति ततो ब्रवीति च भूयः।। ब्र० सू० अ० ३ पा० २ सू० २२।। प्रकृतं यदेतावतावर्त्त्वमियत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष अथात आदेश नेति नेति शब्दः प्रतिषेधयति। तद्धि प्रकृत प्रपञ्चितं च पूर्वस्मिन्ग्रन्थेऽधिदैवतमध्यात्मं च तज्जनितमेव वासनालक्षणमपरं रूपममूर्तरसभूतं पुरुषशब्दोदितं लिङ्गात्मव्यपाश्रयं महारजनाद्युपमाभिर्दर्शितम्। तदेतत्सप्रपञ्चं ब्रह्मणो रूपं सन्निहितालम्बनेनेति करणेन प्रतिषेधकं नञं प्रत्युपनीयते इति गम्यते। ब्रह्म तु रूप विशेषणत्वेन षष्ट्या निर्दिष्टं पूर्वस्मिन्ग्रन्थेन स्वप्रधानत्वेन प्रपञ्चिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रान्तम्। "अथात आदेशो नेति नेति" तत्रकल्पित रूपप्रत्याख्यानेन ब्रह्मणस्वरूपवेदनमिति गम्यते। युक्तं च कार्यप्रतिषेधनं वाचारम्भणादिभ्यस्तस्यासत्वावगमात्। न तु ब्रह्मणः प्रतिषेधस्तस्य सर्वमूलत्वात् तत्प्रतिषेधे शून्यवादप्रसक्तेरतः प्रतिषेधाद्भूयो ब्रवीति न अन्यत्परमस्तीति। तथा च नेति नेतीति ब्रह्मादिश्य तमेवादेशं पुनर्वक्तीति नेति नेतीत्यस्यकोऽर्थः। न हि एतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेति नेतीत्युच्यते न पुनः स्वयमेव नास्तीत्यर्थः। तंच्च दर्शयत्यन्यत्परमप्रतिषिद्धं ब्रह्मास्ति" इति भावः।।

स्फुटमिति भावः।। २२।।

एवं सामवेदेऽपि छान्दोग्ये उपक्रमादिपर्यालोचने सृष्टिवाक्यस्यैषैवगतिः प्रतिभातीति दर्शयति— यदिति।।

मू०।। यत्प्रबोधवशादशेषमिदं जगद्विदितं भवे-
त्तद्विवक्तुमुपक्रमोऽत्र सदेव सोम्यगिरा ततः।
सृष्टिनिरीक्षणपूर्विका जगतस्तदैक्यविवक्षया
मृत्तिकादिनिदर्शनानि तथाहि सङ्गतिमाप्नुयुः।। २३।।

"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इति शाण्डिल्यविद्याया-मन्यार्थमप्युक्तं सर्वप्रपञ्चस्य ब्रह्ममात्रत्वं स्वप्राधान्येन निरूपयितुं हि षष्ठप्रपाठ-काऽवतारः। तत्राऽऽदावेवमाऽख्यायिका— पित्राऽऽज्ञया द्वादशवर्षाणि गुरुकुले सर्वा वेदादिविद्या अधीत्य पितुरन्तिकमागतमनूचानमानिनं स्तब्धं श्वेतकेतुं, अधीतास्वपि सर्वविद्यासु आत्मज्ञानमन्तरेणाऽकृतार्थ एवायं, यतो देहाद्यभिमानेन गर्वितः स्तब्ध एवाऽऽस्ते, अतोऽस्याऽभिमानपनीयाऽऽत्मतत्त्वं कार्तार्थ्यहेतुं बोधयिष्यामीति मन्यमानः पिताऽऽरुणिः किलोवाच। "यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोसि उत तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं भवति" इति। ततस्तदविज्ञानात्प्रशान्तगर्वेण विनीतेन पुत्रेण सप्रणिपातं "कथं नु भगवः स अदेशो भवति" इति पृष्टस्य पितुर्मृदादिनिदर्शनोपन्यासपूर्वकं "सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्" इति सजातीयादिभेदशून्यसन्मात्रस्वभाव वस्तुनिरूपणायैवोपक्रम इत्याह— यदिति। हि = यस्मात्, अत्र = अस्मिन्प्रपाठके यस्य प्रबोधवशादशेषं = कृत्स्नं इदं = बहिः प्रमाणगम्यं जगद्विदितं = तत्त्वतोनिर्ज्ञातं भवेत्। नाऽन्यजिज्ञासाऽवशिष्येत इति यावत्। तत् = तादृशं वस्तु विव-क्तुं = आरोपितरूपविवेकेन बोधयितुं दर्शित "सदेव सौम्य" इत्यादि श्रुतिगिरा उपक्रमः स्पष्ट एव। ततः = तस्मात्कारणात्, "तदैक्षत बुहस्यां प्रजायेयेति तत्तेजोऽसृजत" इत्यादिना उत्तरत्र प्रक्रान्ता ईक्षणपूर्विका सृष्टिरपि तदैक्यविव-क्षया = एकमेवाऽद्वितीयमित्येकशब्देन एवकारेण अद्वितीयपदेन च प्रतिज्ञातसजातीया-दिभेदशून्यत्वोपपादनायैव वर्णयितुं युक्तेत्यर्थः। अन्यथा वर्णने न केवलं प्रतिज्ञाताऽनुपयोगः, दृष्टान्ताऽसङ्गतिश्चेत्याह— तथाहीति। तथाहि सति प्राग्दर्शितानि यथा "सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादीन्यध्यस्तस्याधिष्ठानमात्रं तत्त्वं तद्विज्ञाने च नाऽविदितं वस्तु परिशिष्यत इत्येकविज्ञानेन सर्वविज्ञानोपपादनपराणि मृत्तिकादिनिदर्शनानि =

मृत्पिण्ड सुवर्णपिण्ड कृष्णायसोदाहरणानि, सङ्गतिं = प्रकृतदार्ष्टान्तिकसम्बन्धम्, आप्नुयुः = लभेरन्। सविशेषस्यैव तत्त्वतो निरूप्यत्वे यावद्विशेषविशिष्टतत्स्वरूपस्य जन्मसहस्रेणाऽपि ज्ञातुमशक्यत्वात् सामान्यतो ज्ञानस्य च प्रत्युत विशेषजिज्ञासाहेतुत्वेन तदनिवर्तकत्वात्सदेकवस्तु विज्ञानेन सर्वविज्ञानोपपादनाऽसंभवात् विवर्तवादः एवसृष्टिश्रुतेर्दृष्टान्तश्रुतेश्चाऽभिप्रेत इति भावः। अयमेवाऽस्याः श्रुतेरभिप्राय इति दर्शयति भगवान्सूत्रकारः—''तदनन्यत्वमारम्भणशब्दादिभ्यः'' इत्यादिना।। २३।।

उत्तरत्र च वटबीजोत्पन्नवटशुङ्गकल्पस्य कारणपरम्परया कल्पितदेहान्त-कार्यशुङ्गस्य स्वस्वकारणव्यतिरेकेणाऽसत्त्वपर्यालोचनक्रमेण परमार्थ सत्यमूलकारणा-ऽन्वेषणे ब्रह्मैव तदित्थमद्वितीयं सत्पर्यवस्यतीति वक्तुं ''तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति तस्य क्व मूलं स्यात् अन्यत्रान्नादेवमेव खलु सोम्याऽन्नेन शुङ्गेनाऽपोमूलमन्विच्छ, अद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ, सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'' इत्यादिना उत्पत्त्यादिकालत्रयेऽपि जगतः सदव्यतिरेकमुक्त्वाऽन्ते ''स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'' इति निर्विशेषसन्मात्रस्वाभवस्यैव आत्मत्वदृढीकरणपूर्वकं प्रत्यगैक्योपदेशस्य नवकृत्वोऽभ्यस्यमानत्वाच्च सृष्टिवाक्यस्य नान्यपरत्वसंभावनापीत्यभिप्रेत्याह-सदिति।।

मू०।। सत्प्रसूतमिदं सति स्थितमस्तमेति सति स्वतः
सत्तया परिहीणमित्यखिलं सदेव पृथङ्मृषा।
कल्पितं हि पृथङ्नसन्मृगतृष्णिकोदकवन्मरो-
स्तत्सदद्वयमेव वस्त्विति सृष्टिवाक्यसमीहितम्।। २४।।

इदं = जगत् आदौ सद्रूपाद्ब्रह्मणः प्रसूतं = आविर्भूतं, स्थितिकाले च तस्मिन्नेव सति स्थितं, अन्ते च सत्येव अस्तं = अदर्शनं एति = प्राप्नोति। एवं कालत्रयेऽपि ब्रह्मसत्ताऽव्यतिरेकात्स्वतः सत्तया परिहीणं रहितम्, इति = एवं रीत्या अखिलं = सर्वं जगत्, सदेव परमार्थतः। सतः पृथक्क्रियमाणं तु मृषा असदेव ''अपागादग्नेरग्नित्वं *त्रीणि रूपाणीत्येव सत्यम्'' ''वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इति कारणाऽनतिरिक्तसत्ताकत्वात्कार्यस्य स्वतो मिथ्यात्वप्रतिपादनादित्यर्थः। तत्र कल्पितस्य तत्पृथक्सत्ताशून्यत्वे प्रसिद्धतरं दृष्टान्तमाह— कल्पितं हीति। मरोः = मरुभूमेः चण्डातपसन्तप्तात् पृथक् = मृग-तृष्णिकोदकं यथा असत् तद्वत्कल्पितं जगदप्यधिष्ठानसन्मात्रादित्यर्थः। हीति पृथक्सत्त्वे

* पृथ्वीजलतेजोरूपाणीति।

बाध्यत्वऽयोगादिति हेतुद्योतनार्थः। तत् = तस्मात् छान्दोग्येऽपि सदद्वयमेव परमार्थवस्त्विति सृष्टिवाक्यानां समीहितम् = तात्पर्यमित्यर्थः।

अत्राऽख्यातिवादी प्रत्यवतिष्ठते— मृगतृष्णिकोदकवदिति दृष्टान्ताऽसिद्धिः। भ्रान्त्यात्मकविशिष्टज्ञानाऽनभ्युपगमात्। तत्र हि इदमिति सलिलमिति च द्वौ प्रत्ययौ स्वतो विषयतश्चाऽगृहीतभेदौ। इदमिति हि मरुदेशसंपृक्ता मरीचयो दोषवशादगृहीतमरीचित्वादिविशेषा गृह्यन्ते। सलिलमिति च प्रागनुभूतं सलिलं मरीचिशौक्ल्यस्वाच्छ्यदर्शनोद्बुद्धसंस्कारकं दोषवशादेव प्रमुष्टतत्ताकं स्मर्यते। नच मरीचिबुद्धौ सलिलं गोचरं। अनुभवविरोधादसंनिकृष्टत्वाच्च। एवं सलिलबुद्धावपि न मरीचयः। ज्ञानानां विषयव्यभिचारे सर्वत्राऽनाश्वासप्रसङ्गात्। नच खलु पुरः सत्तामात्रेण, जनकत्वेन वा अर्थानां ज्ञानगोचरता। चक्षूरसयोरपि चाक्षुषत्वाऽऽपातात्। (प०टि०)अपितु ज्ञानभास्यत्वेन। नच सलिलप्रत्यये मरीचयो भासन्त इति सांप्रतम्। किञ्च, इन्द्रियाणां यथार्थप्रत्ययजननस्वाभाव्यं क्लृप्तं विपर्ययाभ्युपगमे हीयेत। सदोषाणां तेषां मिथ्याप्रत्ययहेतुतेति चेत्। न। दोषाणां कार्यप्रतिबन्धमात्रहेतुत्वेन कार्यान्तराऽप्रयोजकत्वात्। अन्यथा दुष्टात्कुटजबीजाद्वटाङ्कुरान्तरोत्पत्तिप्रसङ्गात्। नच पुरः सलिलाऽप्रतिभासे तदर्थिनस्तत्र प्रवृत्तेः, उत्तरत्र नेदं सलिलमिति बाध्यस्यचाऽनुपपत्तिः। तत्र प्रवृत्तेस्तद्विवेकाऽग्रहमात्रनिबन्धनत्वा卐द्बाध्यस्य च तत्प्रसञ्जितव्यवहारमात्रगोचरत्वात्। पीतश्शङ्ख इत्यादिस्थले तु ग्रहणयोरेव स्वतो विषयतश्चाऽसंसर्गाऽग्रहात्तथा व्यवहारः। इत्थं च सर्वेऽपि सन्देहविभ्रमत्वेनाऽभिमतप्रत्ययाः यथार्था एव प्रत्ययत्वात्, संमतवदिति मृगतृष्णिकोदकवदित्यदृष्टान्त इति। तदसारम्। विवेकाऽग्रहमात्रेण सलिलार्थिप्रवृत्तेः इदं सलिलमिति सामानाधिकरण्य व्यवहारस्य च विशिष्टग्रहणहेतुकत्वेन निरूढस्याऽनिर्वाहात्। अग्रहणमात्रस्य सदैव सुलभत्वेन उदासीनपुरुषस्यापि (१)तथाविधस्य पुरःप्रवृत्त्याऽऽपत्तेः।। ननु न विवेकाऽग्रहमात्रात्प्रवृत्तिः, किन्त्वगृहीतविवेकत्वेन विशिष्टयथार्थज्ञानसदृशाज्ज्ञानद्वयादेवेति चेत्। अत्रभवान्प्रष्टव्यः, किं (२)विशिष्टैकज्ञानसादृश्यं गृह्यमाणं तयोःप्रयोजकं? उतसत्तामात्रेणेति? आद्येऽपि इमे ज्ञाने विशिष्टज्ञानसदृशे इति सामान्यतो वा, इमे स्वतो विषयतश्चाऽगृहीतभेदे इति विशेषतो वा सादृश्यग्रहणम्?। न चोभयथापि

卐 बाधस्य इति पाठः।

(१) तथाविधस्य = विवेकग्रहवत इत्यर्थः।।

(२) विशिष्टैकज्ञानसादृश्यमिति। सलिलादि विशिष्टभूमिविषयं च तदेकविज्ञानं च विशिष्टैकज्ञानं तेन सादृश्यं यस्येदमिति सलिलमिति च ज्ञानद्वयस्य तत्तथा = तयोः सादृश्यं च पुरोवर्तिनि प्रवृत्तिजनकत्वधर्मेण स्वतो विषयतश्चागृहीतभेदत्वधर्मेण वा बोध्यम्। ज्ञानद्वयनिष्ठयत्सादृश्यं तत्किं ज्ञातं सत्प्रवृत्ति जनकत्वे प्रयोजकमुतसत्तामात्रेणेत्यर्थः।।

विशिष्टार्थिन[1]स्तत्सदृशेप्रवृत्तिसिद्धि। नहि सामान्यतो विशेषतो वा गोसदृशो गवय इति ज्ञानात्,गोप्रत्ययसदृशोऽयं गवयप्रत्यय इति बोधाद्वा गवार्थी गवये प्रवर्तते। अगृहीतभेदे इमे ज्ञाने इति तु व्याहतम्। नहि भेदाऽग्रहे इमे इति, अगृहीतभेदे इति वा भवति। अतः सत्तामात्रेणेति पक्षएव परिशिष्यते। नच विमर्शे विवेकाऽग्रहरूपात् विशिष्टज्ञानसादृश्याच्चेतनप्रवृत्तिः सिद्ध्यति। कथं हि तत्र प्रवर्तेत यदि न तदिच्छेत्। अन्यदिच्छत्यन्यत्करोतीति च व्याहतम्। न चेत्पुरोवर्तिनं जलमिति जानीयात्, कथं तदिच्छेत्। यद्यजलत्वेनाऽज्ञानात्प्रवर्तत इति ब्रूयाः, अथ जलत्वेनाऽज्ञानात्कुतोनो-पेक्षेत, तत्रोपादानोपेक्षाभ्यामुभयतः कृप्यमाणो विशिष्टजलारोपे सत्येव प्रवृत्तौ व्यवतिष्ठते इत्यारोपद्वारैव भेदाऽग्रहः प्रवृत्तिहेतुः। आरोपिते हि जले तज्जातीयस्य तृषोपशमहेतुतामनुचिन्त्य तज्जातीयतया पुरोवर्तिन्यपि तदनुमाय तदर्थी तत्र प्रवर्तते इति क्रमः सिद्ध्यति। तथा च प्रयोगः— विवादास्पदं जलादि ज्ञानं पुरोवर्तिविषयकं, जलाद्यर्थिनः पुरोवर्तिनि नियमेन प्रवर्तकत्वात्। यत् यदर्थिनं तथा प्रवर्तयति तज्ज्ञानं तद्गोचरं। यथोभयसंमतं नद्यां जलज्ञानमिति। तथाहि— अनुभविता क्वजलमिति पृष्टः पुरःप्रदेशमङ्गुल्या निर्दिशति। दृष्टं हि दवाग्निदाहदुष्टवेत्रबीजानां कदलीकाण्ड-रूपकार्यान्तरजनकत्वं। भस्मकरोगदुष्टजाठराग्नेश्च वह्न्नपानजरणहेतुत्वमिति सदोषैरिन्द्रियैर्मिथ्याप्रत्ययजननाऽविरोधः। प्रत्यक्षबाधितविषयं ह्याभासानां याथार्थ्यानुमानं वह्निशैत्यानुमानवत्। बोधकत्वेन हि ज्ञानानां स्वतः प्रामाण्यं नाव्यभिचारेणेति विपर्यस्य विषयव्यभिचारेऽपि न सर्वत्राऽनाश्वासः। नेदं जलमिति बाधाऽनुसारेण बाधार्हस्याऽनिर्वचनीयजलस्यैवाऽभ्युपगमात् नाऽत्यन्ताऽसद्विषयकत्वमपीति न दृष्टान्ताऽसिद्धिः।।

नन्वस्तु तर्ह्यन्यथाख्यातिः। तथाच गङ्गादौ प्रसिद्धस्यैव जलस्य जलत्वस्य वा स्मृत्युपनीतस्य पुरोदेशे मरीचिषु वा ग्रहः, तयोश्च देशान्तरे स्वविशेष्यात्पृथक्सत्त्वाद्दृष्टान्तासिद्धिस्तदवस्थैवेति चेत्। न। [2]तयोरसंनिकृष्ट-त्वेनेदमर्थाऽसंभिन्नत्वेन चापरोक्षेण इदमर्थोपरागेण च प्रतिभासाऽनुपपत्तेः। तत्र चाक्षुषादिवृत्तिव्याप्तिमन्तरेण तदवच्छिन्नचैतन्ये आवरणभङ्गायोगेनाऽना-वृतचैतन्यतादात्म्यलक्षणविषयाऽऽपरोक्ष्याऽसिद्धेः। वृत्तिषु च विषयाऽपरोक्ष-प्रयुक्तमेवाऽऽपरोक्ष्यं, न वैजात्यरूपं, नियामकाऽननुगमात्। पर्वतो वह्निमानित्या-

(१) तत्सदृशे = पुरोवर्तिसत्यसदृशे।।

(२) तयोरिति।। जलजलत्वयोरिदमर्थेन तादात्म्यापन्नत्वेन जलस्यपुरोदेशेऽपरोक्षेण प्रतिभासानुपपत्तेः तथा जलत्वस्यापि चेदमर्थोपरागेण भानानुपपत्तेरित्यर्थः।

द्यपरोक्षपक्षकानुमितौ पर्वतं पश्यामि वह्निमेवाऽनुमिनोमीत्यनुभवेन आंशिकत्वोपगमाच्च (१)करणनियम्यत्वाऽभ्युपगन्तुरपि करणाऽसंप्रयुक्त जलादौ तदसिद्धेश्च। न च (२)तत्र दोषनियम्यं तत्। दोषाणामननुगतत्वात्। तेषां भ्रमत्वमात्रप्रयोजकत्वेनाऽऽपरोक्ष्याऽप्रयोजकत्वात्। विशिष्टाऽऽरोपस्थले विशेषणे विशेषणताऽवच्छेदकवैशिष्ट्याऽवगाहनांशे भ्रमस्यापि प्रमात्वाऽऽपत्त्यातद्धेतोर्दोषस्य चक्षुरादिवत्प्रमाणान्तरत्वाऽऽपत्तेश्च। मनो हि यदसाधारणं कारणमासाद्य बहिर्गोचरां प्रमां जनयति, तदेव प्रमाणान्तरमिति परैरभ्युपगमात्। अन्यथाख्यातिभक्तेर्जलादेः पुरोवर्तिसंसर्गांशेऽनिर्वाहाच्च। न ह्यसौ जलादिप्रदेशसंसर्गः। तस्य तत्प्रदेशभानमन्तरेण भानायोगात्। संसर्गे संसर्ग्यनिरूपितसांसर्गिकविषयताया अप्रसिद्धेः। नापि पुरोवर्तिसंसर्गः। तस्य जलाद्यनिरूप्यत्वात्। तदनिरूप्योपि दोषात्तन्निरूप्यत्वेन भासत इति चेत्, तर्हि संसर्गे जलादिनिरूप्यत्वाऽऽरोपाय सम्बन्धान्तरमन्वेषणीयं तदपि तदवस्थम् अनवस्थितं च। विनैव सम्बन्धं तन्निरूपितत्वभानेऽभ्युपगते तु स एव पुनरुपस्थितोऽख्यातिवादः।। न च विशिष्टज्ञाने तन्निरूप्यत्वलक्षणः संबंधसम्बन्धो भासते इति त्वयाभ्युपगम्यत इति न प्रसिद्ध संसर्ग ख्याति सिद्धिः। अत एवाऽसत एव संसर्गस्य भानमिति न्यायटीकाकृतः। न च सोऽपि युक्तः। संसर्गांश इव प्रकार विशेष्यांशयोरपि असद्विषयत्वाऽवर्जनिन विज्ञानवादाऽऽपत्तेः। किञ्चाऽनुभविता मृगतृष्णिका नदीमनुभूतचर विलक्षण संस्थानवीची प्राकार संनिहित तरु गुल्मादि प्रतिबिम्ब सङ्कुलामति विततस्वच्छ भास्वर जलामनुभवन्नपूर्वेयमित्येवाऽध्यवस्यति। पृच्छ्यमानोऽपि तथैवाऽऽचष्टे। उत्तरकालं च समीपोपसृप्तौ नेदं जलमिति बाधमनुभवति। न तु गङ्गादावेव इदं जलमिति। प्रतीतिमात्रशरणैर्यावद्बाधं प्रातिभासिकमनिर्वचनीयमेव सलिलाद्यभ्युपेयम्। एवं च सत्यमिथ्याशब्दयोर्लोके भिन्नार्थकता, असति बाधे शङ्काविषादिना मरणमूर्च्छादिदर्शनं, स्वप्ने देवतानुग्रहादेः फलावाप्तिरित्येवमादीन्यर्थनिमित्तानि कार्याण्युपपद्यन्ते नान्यथेति बहुधा पराक्रान्तमत्र महद्भिः।

ननु तर्ह्यस्तु स्वसंवेद्यत्वादपरोक्षस्वभावविज्ञानपरिणाम एव मृगतृष्णिकादिः। तथाहि— यथाप्रत्ययमेव सर्वत्राऽर्थसत्ताऽवधारणमित्युत्सर्गो बाधकप्रत्ययबलात्क्वचिदपोद्यते। नेदं सलिलमिति बाधकप्रत्ययस्य चेदंतामात्रबाधेनोपपत्तेर्न सलिलगोचरता। तस्य धर्मिणो बाधे हि धर्मितद्धर्मसलिलत्वं चेत्युभयं बाध्येत।

(१) करणनियम्यत्वेति प्रत्यक्षस्येन्द्रिय लक्षणकरणनियम्यत्वाभ्युपगन्तुस्तार्किकस्य मते करणासम्पृक्तजलादौ प्रत्यक्षज्ञानासिद्धेरित्यर्थः।।

(२) तत्र। मरूमरीचिकायां जलादिभ्रमस्थले। तत् = अपरोक्षं दोषनियम्यमित्यर्थः।

तद्वरमिदंतैवाऽऽस्यैका बाध्यत इति कल्पनं। तथा च तज्जलं बहिर्बाधितम् अर्थादान्तरे विज्ञाने व्यवतिष्ठत इति ज्ञानाऽऽकारस्यैव बहिरध्यासः। तथाच न प्रागुक्तदोष इति। तदप्यसारम्। प्रातिभासिकार्थानां विज्ञानाऽऽकारता तदनुभवादुच्येत? उत तद्बाधकप्रत्ययबलात्? न तावदाद्यः। अनुभवो हि इदं काराऽऽस्पदं बाह्यं जलमित्यावेदयति, नान्तरविज्ञानम्। अहं जलमिति हि तदा स्यात्। भ्रान्तविज्ञानं स्वाकरमेव जलादि बाह्यत्वेनाऽध्यवस्यति, नाऽहंत्वेनेति चेत्। न। तर्हि तेन स्वाकरताऽसिद्धिः। नापि द्वितीयः नेदं जलमिति प्रत्ययो हि पुरोवर्ति द्रव्यं जलाद्विवेचयति न तु जलस्य ज्ञानाकारतां गोचरयति, अहमेव जलमिति हि तदा स्यात्। पुरोवर्तित्व प्रतिषेधेऽर्थाज्ज्ञानाकारतेति चेत्। संनिधान प्रतिषेधेह्यसंनिधानं स्यात्। अत्यन्तसंनिधानत्वं प्रतिपन्नात्मता लक्षणं दूरापास्तम्। न च मानान्तरं विज्ञानाकारताग्राहकमस्ति। किञ्च।। यत्तद्विज्ञानाकारे रजते इदमर्थसंवलनं भासते तच्चेद्बाह्यं? तर्ह्यन्यथाख्यातिः। अथाऽऽन्तरमेव?। तदेदमर्थस्याप्यान्तरत्वप्रसङ्गेन बाह्यार्थाऽभ्युपगमहानिरिति नाऽऽत्मख्यातिसिद्धिः।।

अस्तु तर्ह्यसत्ख्यातिरेव। आन्तरस्य विज्ञानस्याऽसद्बाह्यार्थप्रकाशनशक्तिरेवाऽदृष्टान्तसिद्ध स्वप्रत्यय सामर्थ्याऽऽसादितस्वभावोऽविद्येत्यभ्युपगमादिति चेत्। न। येयमसत्प्रकाशनशक्तिः, किं पुनरस्याः शक्यं? असदिति चेत् तत्। किमस्याःकार्यं? उत ज्ञाप्यं? नाद्यः। असत उत्पत्त्ययोगात् निरात्मकस्य आत्मलाभोक्तिव्याघातात्। नापि द्वितीयः। (१)ज्ञानान्तरानुपलब्धेरनवस्थापाताच्च। नोभयमपि। सदसतोः सम्बन्धाऽयोगात्। असदधीननिरूपणत्वं प्रत्यये तत्सम्बन्ध इति चेत्। न, तेनाऽनाहिताऽतिशयस्य तदधीनत्वोक्त्ययोगात्। अतिशयाऽऽधायकत्वे चाऽसत्त्वव्याघातात्। अर्थक्रियाकारित्यस्यैव त्वन्मते सत्त्वात्। असदन्तरेणाऽप्रथमानता प्रत्ययस्यैव स्वभावो, नत्वसता किंचित्क्रियत इति चेत्। विनैव हेतुं प्रत्ययस्याऽसत्पक्षपातोक्तेरुपहासाऽऽस्पदत्वात्। न च प्रत्ययेनाऽसति किञ्चिदाधीयते। तस्याऽऽधारत्वाऽयोगादिति नाऽत्यन्ताऽसतः प्रतिभाससिद्धिः। ननु तर्ह्यस्तु सदसदात्मकमेव सर्वं वस्तु। सत्त्वं तु स्वतः। असत्त्वं तु तस्य परतः। यथाहुः—

(१) ज्ञानान्तरानुपलब्धेरनवस्थापाताच्चेति। आन्तरविज्ञानस्य यदसत्प्रकाशनशक्तिस्तया ज्ञाप्यमसदिति द्वितीय पक्षे। ज्ञाप्यत्वं नामासदर्थगोचरज्ञानजनकत्वमेवशक्तेर्ज्ञापकम्। असतोऽर्थस्य च शक्तिजन्यज्ञानविषयत्वरूपमेव हि शक्तिज्ञाप्यत्वं तथा च शक्तिजन्यज्ञानं किं शक्त्याश्रयभूतं स्वयमेवोत ज्ञानान्तरं। नाद्यः तथाभूत ज्ञानस्य स्वोत्पत्तेः प्रागसिद्धत्वेन शक्त्याश्रयत्वानुपपत्तेः स्वसिद्ध्यर्थं स्वाश्रितशक्त्यपेक्षणादात्माश्रयापत्तेरिति। द्वितीये तु। ज्ञानान्तरमपि असत्प्रकाशनस्वभावत्वेन शक्तिद्वारा ज्ञानान्तर जनने स्वस्वोत्तरजननेनानवस्थापत्तिरिति भावः।।

"स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित्कदाचन।।" इति।।

न च विरोधः। भावस्याऽसत्त्वं भावान्तर स्वरूपमेवेत्यभ्युपगमात्।। यथाहुः—

भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्।। इति।

तथा च मरीचिकोदकप्रत्ययस्य सदसदात्मक वस्तुगोचरत्वान्नमिथ्याऽर्थावगाहितेति दृष्टान्ताऽसिद्धिरेवेति चेत्।। तर्हि किं मरीचिषु तोयप्रत्ययस्तत्त्वगोचरः? तथा सति न विपर्ययः स्यात्, नापि बाध्येत। स्यादेवं यदि मरीचीनतोयात्मकांस्तथैव गृह्णीयात्। तोयात्मनातुगृह्णन् कथमविपर्ययः स्यात् अबाध्यो वेति चेत्। हन्त तर्हि तोयाभावात्मनां मरीचीनां तोयात्मता न सती। अभावस्य प्रतियोग्यभेदाऽयोगात्। नाप्यसती। वस्त्वन्तराऽऽत्मनैवाऽसत्त्वस्य त्वया वाच्यत्वेन तादृशवस्त्वनिरूपणात्। द्वयोर्हि वस्तुनोरिहप्रसक्तिः गङ्गादितोयस्य मरीचीनां च। न तावदाद्यात्मना। गङ्गायां तोयमिति प्रत्ययाऽऽपत्तेः। गङ्गादिगतत्वाऽनुपस्थितौ तोयमित्येव प्रतिभासाऽऽपत्तेः। तदाऽऽत्मना असत्त्वे तद्भिन्नत्वाऽऽपत्तेश्च। नापि द्वितीयाऽऽत्मना। मरीचय इत्येव प्रतिभासाऽपत्तेः। तोयमित्यनापत्तेः। सन्मरीच्यात्मना असत्त्वव्याघाताच्च। मरीचीनामप्यन्यात्मना असत्वान्नव्याघात इति चेत्। तर्हि यदाऽत्मना मरीचीनामसत्त्वम् तोयात्मताया अपि तदाऽऽत्मनैवाऽसत्त्वं स्यान्न मरीच्यात्मना। वस्तुतस्तु मरीचीनामपि नाऽसत्त्वसिद्धिः। (१)व्याघातसाम्यादनवस्थानाच्च। नाप्यत्यन्ततुच्छा। अनुभवगोचरत्वाऽयोगात्। इत्थं चेयं न सती, नाऽसती, नापि सदसतीइत्यनिर्वचनीयैव मिथ्याऽपरपर्याया अधिष्ठानमात्र सत्त्वाऽधीनप्रतिभासा मरुमरीचिका नदी सिध्यतीति निरूढो दृष्टान्त इति भावः।। २४।।

एवमाथर्वण ब्राह्मणेऽपि सृष्टिप्रपञ्चनं ब्रह्मैक्यपारमार्थ्योपपादनार्थमिति दर्शयन्मुण्डकोपनिषत्तात्पर्यं सङ्गृह्णाति— विद्ययेति।

मू०।। विद्यया पराऽधिगम्यमुदीर्य धर्मविवर्जितं
सूक्ष्ममक्षरतस्ततः प्रभवत्यशेषं जगन्मृषा।
तद्धि सत्यमिति स्फुटं परिशेष्य वेदनमात्रत-
स्तत्स्वयं भवतीति नित्यमवाप्तमाह तुरीयगीः।। २५।।

(१) व्याघातसाम्यादनवस्थानाच्चेति।। मरीचिपदाभिधेयं वस्तु किञ्चिदस्ति न वा। आद्ये व्याघात एकस्यैव वस्तुनः सदसत्वरूपविरोधात्। मरीचिनां यद्वस्त्वात्मनासत्त्वं स्वीक्रियते तस्यापि वस्त्वन्तरात्मना सत्त्वं स्वीकार्यं स्यात्तथा च तस्यापि वस्त्वन्तरात्मना तथात्वं स्यादेवञ्च वस्तुपरम्परास्वीकारेणाऽनवस्था च स्यादिति भावः।।

तत्र हि छान्दोग्यवदेव "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इति प्रश्नमुपक्षिप्य "द्वेविद्ये वेदितव्ये पराचैवाऽपराच" इति प्रस्तुत ऋग्वेदाद्यपरविद्या प्रदर्शनानन्तरं "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः"।। इति ज्ञानकर्मेन्द्रियाऽविषयं अकारणकं नीलस्थूलत्वाऽदिरूपशून्यं चेतनत्वेऽपिचक्षुः श्रोत्रादिरहितमविनाशि विविधजगदात्मभूतं व्यापकं निरवयवत्वान्निर्गुणत्वान्निर्धर्मत्वाच्चाऽवयवतो गुणतो धर्मतश्च व्ययशून्यमिति अशेषधर्मविवर्जितं, पृथिव्यादिस्थूलस्य उत्तरोत्तर सूक्ष्मोपादानकत्वात् परमसूक्ष्मं च, प्रागदर्शिताऽपरविद्यातः परया = ज्ञानविद्यया अधिगम्यं = प्राप्यमिति उदीर्य = उपक्रमे सङ्कीर्त्य तदनन्तरं तस्य नित्यविभुत्वाद्युपपादनाय "यथोर्ण नाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह विश्वम्" इत्यादिना अक्षरतः = निर्विकारात्। ततः = प्रागनुत्क्रान्तांद्दृष्टान्तानुरोधेनाऽभिन्ननिमित्तोपादानभूताद्ब्रह्मणः, अशेषजगत् प्रभवति = उत्पद्यते। तच्चाऽक्षरोपादानत्वबलादेव विवर्तरूपमिति श्रुत्या सूचितमेवेत्यभिप्रेत्याह-मृषेति। अत एवाऽग्रे, "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्" इति प्रपञ्चितस्याऽपरविद्याविषयकर्मफलस्य निस्सारतां प्रतिपाद्य ततो निर्विण्णस्य "येनाऽक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इति खण्डान्ते परविद्याविषयस्याऽक्षरपुरुषस्य कर्मफलविलक्षणां परमार्थसत्यतां श्रुतिर्दर्शयतीत्यभिप्रेत्याह— तद्धीति। हि शब्दोऽवधारणे। तदेव परमार्थसत्यं, कर्माणि तत्फलानि च न तथेति श्रुतेराशय इत्यर्थः। एवमुत्तरखण्डेऽपि तदेतत्सत्यमित्येव प्रस्तुत्य अग्नेविस्फुलिङ्गादिदृष्टन्तेन जीवोपाध्याऽऽविर्भावर्णनानन्तरम् "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति जगदुत्पत्तिमुपवर्ण्य तदेतत्सत्यममृतम्" इति निर्विकारत्वेनैव परमार्थसत्यवत्वोद्घोषणात् "सत्यमेव जयति नानृतं" "यत्र तत्सत्यस्यपरमं निधानमिति" तत्समर्थनाच्च। सत्यत्वोपपादनायैव सृष्टिवाद इति सूचनाय वा हिशब्दः। एवं "पुरुष एवेदं विश्वं कर्म तपोब्रह्मपरामृतं। ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्" इति जगदपवादेनोत्तरत्र ब्रह्ममात्र परिशेषणेनाऽपि तस्योक्त एवाऽऽशय इत्याह— स्फुटं परिशेष्येति। किञ्च, "एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य" "स योहवैतत्परमं ब्रह्मवेद ब्रह्मैव भवति" इति ज्ञानसमकालमेव सर्वाऽविद्याग्रन्थि निवृत्ति नित्यसिद्ध ब्रह्मभावाप्तिश्रवणाच्च द्वैतस्याऽऽविद्यकत्वे प्रतीच एवाक्षरत्वे चाऽस्याः श्रुतेस्तात्पर्यं निर्णेतुं शक्यमित्यभिप्रेत्याह-वेदनमात्रत

इति। वेदिता वेदनमात्रतः = साक्षात्कारादेव तत् = ब्रह्म तदानीं भवत्येव न मृत्वाऽऽन्ते भविष्यतीति ''वेद'' ''भवति'' इति वर्तमानाऽर्थक लट्प्रत्ययाभ्यां तुरीयगीः = चतुर्थवेदरूपा। मुण्डकश्रुतिः वेदितुः स्वरूपभूतत्वेन नित्यप्राप्तं = अ-ज्ञानादप्राप्तप्रायं तदपनयेन नित्याऽवाप्तमाह। ततोऽपि दर्शिताऽर्थसिद्धिरिति भावः।। २५।।

माण्डूक्यश्रुतावप्येषैव तात्पर्यगतिरिति दर्शयति— भूतभावीति।।

मू०।। भूत भावि भवज्जगत्परमं च सत्प्रणवात्मकं
पादशः प्रविभज्य निह्नुत वाच्य वाचक भेदकम्।
पूर्व पूर्वमथोत्तरत्र विलाप्य तुर्यमलक्षणं
स्वात्मरूपमथर्वण - श्रुतिरभ्यधाच्छिवमद्वयम्।। २६।।

''ओमित्येतदक्षरमिदं सर्वम्'' इत्योङ्कारार्थत्वात्सर्वस्य जगत ओङ्कारात्मत्वं प्रस्तुत्य तस्योपव्याख्यानं ''भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चाऽन्य-त्रिकालाऽतीतं तदप्योङ्कारएवेति निह्नुत वाच्यवाचकभेदकं = त्यक्ताऽभिधेया-ऽभिधानभेदं यथा स्यात्तथाभूतं = अतीतकालसम्बन्धि, भावि = अनागतकालसम्बन्धि भवत् = वर्तमान कालसम्बन्धिचेति जगत् = कृत्स्नं चेतनाऽचेतनकार्यजातं तस्मा-त्परमं = उत्कृष्टं सत् = सच्छब्दवाच्यं कारणं चेति सर्वमपि प्रणवात्मकं ओङ्काराऽभिन्नमेवेति प्रस्तुतार्थं प्रपञ्च्य ''सर्वंह्येतद्ब्रह्मे'' ति प्रणवात्मकत्वेन कल्पितं कार्यकाररणरूपं सर्वं परमार्थतो ब्रह्मैवेति प्रपञ्चरूपापनयेनाऽधिष्ठानमात्रतां परिशेष्य ''अयमात्मा ब्रह्मे''ति महावाक्येन प्रत्यगात्मतत्त्वस्यैव परिशेषित ब्रह्मत्वं सर्ववेदान्ततात्पर्यविषयीभूतं प्रदर्श्य तदेव प्रविलापनप्रक्रिययापि व्युत्पादयितुं ''सोऽयमात्मा चतुष्पात्'' इत्यादिना प्रणवात्मकमेव सप्रपञ्चमात्मानं कार्षापणमिव प्रणवमात्रा तदर्थैकीकरणेन पादश्चतुर्धा प्रविभज्य, अथ = अनन्तरं विश्ववैश्वान-रात्मकमाद्यमकारपादे तैजसहिरण्यगर्भात्मकोकारपादे, तं च प्राज्ञाऽव्याकृता-ऽऽत्मकमकारपादे, तं चाऽर्धमात्रालक्ष्ये निष्प्रपञ्चे तुरीयपादे इति क्रमेण पूर्वपूर्वपादमुत्तरोत्तरस्मिन्विलाप्य = बुद्ध्या तद्व्यतिरेकेणाऽसत्वलक्षणां निस्स्वरूपतां सम्पाद्य तदनन्तरं ''अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म प्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा सविज्ञेयः।'' इति। तुर्यं = चतुर्थपादं ''चतुरश्छयतावाद्यक्षरलोपश्चे'' ति यत्। अलक्षणं = अलिङ्गं अद्वयं = द्वैतशून्यं शिवं = स्वप्रकाशपरमानन्दरूपं स्वात्मनः परमार्थसत्यस्वरूपं ज्ञेयत्वेन अथर्वणऋषेर्वेदस्य वा सम्बन्धिनी माण्डूक्यश्रुतिः अभ्यधात् = स्पष्ट-

मुक्तवतीति सर्वश्रुतीनां निर्विशेष एव गतिसामान्यात्तात्पर्यमिति भावः। अत्र यद्यपि "नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं नप्रज्ञं नाप्रज्ञम्" इति तैजसादेर्विश्वादेर्जागृत्स्वप्नान्तरालाऽवस्थायाः प्राज्ञादेश्च तुरीयपादएव निषिध्यमानत्वात्तत्रैव प्रविलापनमित्यक्षरात्प्रतीयते, तथापि मात्रापादैक्यकल्पनस्य दृष्टार्थत्वाऽनुरोधात्—

"अकारः पीड्यमानः सन्नुकारं प्रतिपद्यते"

इत्यादिशौनकीयस्मृत्यनुरोधात्पञ्चीकरणतद्वार्तिकादि संप्रदायानुसाराच्च मात्राक्रमेणैव प्रविलापने श्रुतेस्तात्पर्यमिति सूचनाय पूर्व पूर्वमुत्तरत्रेत्युक्तमिति बोध्यम्।। २६।।

इत्थं प्राधान्येन चतुर्णामपि वेदानां प्रसिद्धतरोपनिषत्सु सृष्टिवाक्यप्रसङ्गेन तात्पर्यं निर्णीय प्रतिवेदं शाखानां बहुत्वात्प्रातिस्विकरूपेण सर्वत्रतद्वर्णनस्य ग्रन्थविस्तराऽऽपादकत्वात्पुनरुक्तप्रायत्वाच्च दर्शितदिशैव तत्रापि तात्पर्यं सुग्रहमित्यतिदेशेन सर्वोपनिषदां गतिसामान्यं सूचयन्प्रपञ्चितं तटस्थलक्षणमुपसंहृत्य तत्फलं स्वरूपलक्षणव्यवस्थितिरिति दर्शयति—इत्थमिति।।

मू०।। इत्थमेव ततस्ततः श्रुतसृष्टिवाक्यकदम्बकं
प्रक्रियाद्यभिशीलनेन सदद्वयेन समानयेत्।
युक्तिभिः श्रुतिभिश्च सैष तटस्थलक्षणसङ्ग्रह-
स्तत्फले खलु लक्ष्यसत्त्वपरिच्छिदात्रयवारणे।। २७।।

ततस्ततः = तासु तासु शाखासु ब्रह्मविद्याप्रकरणे श्रुतं सृष्टिवाक्यानां कदम्बकं = वृन्दं प्रक्रियाद्यभिशीलनेन = तत्रत्योपक्रमादिपरिशीलनेन। पूर्वपूर्वाचार्य-संप्रदायसिद्धयुक्तिभिः समानप्रकरणस्थसंवादिश्रुत्यन्तरैः चकाराद्विद्वत्संवादा-ऽऽत्मानुभवोपबृंहणादिभिश्च, सदद्वयेन = अद्वितीयसन्मात्रस्वभावेन परमात्मना समानयेत् = संभाजयेत् तात्पर्येण सङ्घटयेदिति यावत्। सः = "हेतुत्वं लक्षणं यत्" *इत्यारभ्य प्रस्तुतः एषः = एतावत्कालं प्रपञ्चितो ब्रह्मणस्तटस्थलक्षणस्य सङ्ग्रहः = तात्पर्यवर्णनसङ्क्षेपः समाप्त इति यावत्।। युक्तिभिः श्रुतिभिश्चेत्येतदत्रापि सम्बध्यते। सैष इति [१]"सोऽचिलोपेचेत्पादपूरणम्" इति सुलोपः। तत्फले

*अपवाद प्रकरणस्थ प्रथम श्लोकादारभ्य इत्यर्थः।

(१) सोऽचि लोपे चेत्पादपूरणम्।। सस् इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येवपूर्येत। सेसाम (द्वादशाक्षरपादाजगतीछन्दः) विड्ढिप्रभृतिं य इषिषे। इह ऋकपाद एव गृह्यते। इति वामनः। अवशेषाच्छ्लोक पादोपीत्यपरे। सैष दाशरथी रामः। लोपे चेदिति किम्। स इतक्षेति। स एवमुक्त्वा सत्येवेत्यवधारणं तु स्यश्छन्दसि बहुलम्। ३, ५, २६ इति पूर्वसूत्राद्बहुलग्रहणानुवृत्त्या लभ्यते। तेनेह न। सोहमाजन्मशुद्धानाम्। अ० ६ पा० १ सू० १३४।।

तस्य = वर्णितस्य जगद्विवर्तोपादानकारणत्वरूपतटस्थलक्षणस्य फले = प्रयोजने द्वे। के ते इतितत्राह— लक्ष्येति। लक्ष्यस्य = ब्रह्मणः, सत्त्वं = परमार्थसत्यता, परिच्छिदात्रयस्य = त्रिविधपरिछेदस्य वारणं चेति द्वे बोध्यतया फले इत्यर्थः। खल्विति प्रसिद्धौ। तथाच जगतो ब्रह्माऽधिष्ठानकत्वाद्ब्रह्मणः सत्यत्वं, ब्रह्मातिरिक्त-सत्यवस्त्वपरिशेषाच्च त्रिविधपरिच्छेदराहित्यलक्षणमानन्त्यं च तटस्थलक्षणो-पदर्शनफलमिति भावः। इदं चोपादानत्वमात्रफलम्। कर्त्रभिन्नोपादानत्वस्य तु कर्तृत्वबललब्धचेतनत्वनिर्वाहक चिद्रूपत्वसिद्धिः, चेतनशरीरोत्पत्तेरानन्दहेतुकत्वनियमे आनन्दरूपत्वसिद्धिश्चोक्तलक्षणफले बोध्ये।। २७।।

इत्थमुपायभूतं तटस्थलक्षणं सविस्तरपरीक्षणेन व्यवस्थाप्य तदुपेयं "सत्यं ज्ञानमनन्तं ब्रह्म। आनन्दो ब्रह्मेति व्यजानात्। विज्ञानमानन्दं ब्रह्म" इत्यादिवाक्य-तात्पर्यविषयं ब्रह्मणः स्वरूपलक्षणमाह— सच्चिदिति।।

मू०।। सच्चिदद्वयसौख्यरूपममुष्य वास्तवलक्षणं
नाऽनृतेऽस्फुरणेऽसुखे पुरुषार्थतेति तदात्मता।
वारणीयविधाप्रकल्पितभेदलब्धपदैः पदै-
र्नैकरस्यहतिस्तथैव हि साधु पूर्वमवादिषम्।। २८।।

अमुष्य = "ब्रह्मविदाप्नोति परम्" इत्यादिना ज्ञेयत्वेन प्रकृतस्य ब्रह्मणः, सच्चिदद्वयसौख्यरूपं = सत्यज्ञानाऽऽनन्तानन्दस्वरूपं, वस्तुन इदं वस्त्वेव वा वास्तवं = परमार्थवस्तुस्वरूपं असत्याद्यारोपितरूपव्यावृत्तस्वरूपपरिचायकत्वा-लक्षणं = स्वरूपलक्षणमित्यर्थः। "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रे हि सत्यादिपदानि विशेषणार्थानि। ब्रह्मपदं च विशेष्यसमर्पकम्। ब्रह्मण एव वेद्यतया प्रस्तुतत्वेन प्राधान्यात्। तत्र "गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यात्" इति न्यायेन परस्पराऽनन्वितानां सत्यादिपदानां प्रत्येकं ब्रह्मपदसम्बन्धेसत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्मेति त्रिभिः सम्बध्यमानं ब्रह्मपदमनृतादिव्यावृत्ते वस्तुविशेषेऽवतिष्ठते। सत्यादिपदान्यपि ब्रह्मपदार्थव्यावर्तनेन कृतकार्याणि ब्रह्मपदलक्ष्यवस्तुन्येवाऽवतिष्ठन्त इति सर्वपदानामेकप्रातिपदिकार्थमात्रवृत्तित्वाद्वाक्यस्याऽखण्डार्थत्वम्। न च नीलस्थूलमुत्पलमितिवत् सत्यत्वादिविशिष्टतत्तत्पदवाच्यार्थत्रयसंसृष्टं ब्रह्मेत्येव वाक्यार्थः किं न स्यादिति वाच्यम्। तथा सत्यद्वितीयार्थकाऽनन्तपदाऽसङ्गटनात्। "अग्राह्यमलक्षणम्" "एकमेवाऽद्वितीयं" "यत्र नान्यत्पश्यति" इत्यादि धर्ममात्रप्रतिषेधपरश्रुत्यन्तरविरोधाच्च।। न चैवं—

"संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्।
न शैत्येन नचौष्ण्येन वह्निः क्वापि विशेष्यते।।"

इति न्यायाद्ब्रह्मणि सत्यत्वादिविशिष्टसंसर्गबाधात् तदुपलक्षितस्वरूपस्य चाऽसाधारणस्यऽव्यभिचारात्सत्यादिविशेषणवैयर्थ्यमिति वाच्यम्। विवक्षित-व्यावर्तकत्वाऽबाधेनाऽऽ(१)द्यदोषाऽभावात्। (२)संभवस्य व्यावृत्त्युपयोगितयैव विशेषणतोपपादकत्वात्। कथम(३)न्यथा शाखाग्रे चन्द्र इति वाक्ये चन्द्राऽसंसृष्टस्य शाखाग्रस्य वैयधिकरण्येन वा (४)चन्द्रविशेषकत्वं, शैत्यं तु न वह्निव्यावृत्त्युपयोगीति दृष्टान्तवैषम्यात्। (५)एवं लक्षणाऽऽत्मकविशेषणेषु विशेष्यतावच्छेदकधर्म-व्यभिचारोऽप्यनावश्यक इति (६)द्वितीयदोषस्याऽप्यभावात्। अन्यथा गौः सास्नादिमतीति वाक्येऽपि गोत्वस्य सास्नादिमत्त्वाऽव्यभिचारेण लक्षणपदवैयर्थ्याऽऽपादनाऽऽपत्तेः।. किञ्च। असौ व्यभिचारोऽव्याप्त्यापादकत्वाल्लक्षणस्य विरोध्येव, न तस्य विशेषणत्वेऽनुकूल इत्यव्यभिचारोऽत्र गुण एव, न दोषः। किञ्च। यत्र प्रसिद्धं किञ्चिदुद्दिश्यान्यद्विधातुं उद्देश्येऽतिप्रसङ्गवारणाय श्रोतुस्तत्सम्बद्धत्वेन प्रसिद्ध-विशेषणोपादानं, तादृशस्थल एव व्यभिचारस्य (७)विशेषणोपयोगः। यथा— नीलमुत्पलमानयेति विधेयाऽऽनयनोद्देश्ये उत्पले नीलमिति विशेषणं, उत्पलत्वस्य नैल्याऽव्यभिचारे व्यर्थं स्यादिति। यत्र तु विशेषणस्वरूपमेव तत्राऽज्ञातं ज्ञाप्यमानत्वाद्विधेयं, प्रसिद्धविशेषणमुखेन(८)विशेष्यस्वरूपमेव वा तथा, तत्र न व्यभिचारोपयोगः। यथा "शङ्खः पाण्डुरः" इति, 'गोसदृशो गवयः' इति च। कथमन्यथा उद्देश्यतावच्छेदकव्यापकत्वमौत्सर्गिकं विधेये भासत इति शास्त्रविदां प्रवादः। कथं वा ग्रहं संमार्ष्टीत्यत्र ग्रहैकत्वस्य विवक्षितत्वे वाक्यभेदाऽऽपाद-कत्वमित्यूह्यम्।

(१) आद्यदोषाभावादसम्भवदोषाभावादित्यर्थः।

(२) सम्भवस्य व्यावृत्त्युपयोगितया विशेषणतोपपादकत्वादिति।। विशेषणीभूतधर्मे योग्यं व्यावृत्तिबुद्धिजननयोग्यतालक्षणसम्भवो धर्मः स्वविशिष्ये वृत्तितायोग्यता सम्भावना विषयत्वलक्षणो धर्मस्तस्येत्यर्थः। स्वाश्रयीभूतविशेषणात्मकधर्मनिष्ठ सार्थकताया उपपादकत्वादित्यर्थः।

(३) अन्यथा।। सम्भवस्य विशेषणतोपपादकतया सार्थकत्वनियमानङ्गीकारे इत्यर्थः। वैयधिकरण्येन शाखाग्रस्य व्यधिकरणवृत्तित्वेन हेतुनावेत्यर्थः।।

(४) चन्द्रविशेषकत्वम्।। इतरव्यावृत्ततया चन्द्रस्वरूपबोधकत्वमित्यर्थः। शैत्यस्य जलादौ वृत्तित्वेन वह्निवृत्तित्वाभावेन च न बह्निव्यावृत्तिबुद्धिजनकत्वेनोपयोगः इति भावः।

(५) एवं = स्वविशेष्यासंसृष्टस्यापि विशेषणस्य व्यावृत्त्युपयोगितया सार्थकत्वोपपत्तौ।।

(६) द्वितीयदोषस्य = विशेष्यतावच्छेदकाव्यभिचारदोषस्याभावादित्यर्थः।।

(७) विशेषणोपयोग। व्यभिचारस्यार्थवत्त्वे उपयोग इत्यर्थः।।

(८) विशेष्यस्वरूपमेव वाऽज्ञातं सज्जायमानत्वाद्विधेयमित्यन्वयः।।

अथवा। न वास्तवावेव संभवव्यभिचारौ विशेषणाऽर्थवत्त्वोपपादकौ किन्तु भ्रान्त्यादिसंभावितावपि। उष्णोदकमाहर शीतोदकमाहरेति विशेषणार्थदर्शनात्। तौ चात्र सर्वव्यावृत्तलक्षणवाक्याऽखण्डार्थनिर्णयात्प्राक् ब्रह्म सत्यज्ञानानन्दरूपमन्यादृशं वेति संशयसंभाव्यमानावापातदर्शिनां स्त एव। लक्षणेन व्यावृत्तवस्तुपरिचये च परं व्यावर्तेते इति सन्तुष्यताम्। नचैवं ब्रह्मपदाऽनतिरिक्तार्थकत्वात्सत्यादिपदानां लक्षणार्थत्वाऽनुपपत्तिः। अवकाशरूपमाकाशमितिवदप्रसिद्धस्य प्रसिद्धार्थकपदोपस्थाप्यतया स्वव्यावर्तकत्वेनैकस्यैव लक्ष्यलक्षणरूपत्वेन तदुपपत्तेः। न चैवं विशेष्यस्य ब्रह्मणो जगद्विलक्षणस्य परमार्थसत्यस्य निर्विषयज्ञानस्य त्रिविधपरिच्छेदशून्यवस्तुनश्चाऽप्रसिद्धौ—

"मृगतृष्णाऽम्भसि स्नातः शशशृङ्गधनुर्धरः।
एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।।"

इति वाक्यादिवाऽप्रसिद्धपदार्थकादस्माद्वाक्यात् बोधाऽनुपपत्तिरिति वाच्यम्। सर्वतो व्यावृत्तसाधारणरूपेण संसारदशायामप्रसिद्धावपि बृहधात्वर्थाऽनुगमानुरोधादात्मत्वाच्च सामान्यतोऽर्थस्य प्रसिद्धत्वेन मानान्तराऽबाधितविषयत्वेन च वैषम्यात्। सत्यादिपदानामप्यबाध्येऽर्थे लोकप्रसिद्धत्वेन तथैव ब्रह्मणि प्रवृत्तौ द्वैतमात्रप्रतिषेधबलादेव व्यावहारिकसत्यवैलक्षण्यपर्यवसानेन पूर्वं तथाप्रसिद्धेरनुपयोगात्। सर्वज्ञानस्यापि सर्वविषय प्रतिषेधे निर्विषयत्वेन पर्यवसानबोधोपपत्तेः न तथा प्राक् प्रसिद्ध्यपेक्षा। अनन्तपदस्यापि प्रसिद्धाऽन्तत्रयप्रतिषेधकत्वान्नाऽप्रसिद्धार्थकतेति विषमो दृष्टान्तः। वाक्यार्थभूतस्याखण्डवस्तुनः स्वाभाविकरूपेणाऽप्रसिद्धिस्तु अनधिगतार्थे प्रमाणभूतवेदवाक्यस्य प्रामाण्येऽनुकूलैव न प्रतिकूला। व्यावृत्तरूपस्य प्रागेव प्रसिद्धौ लक्षणवाक्यवैफल्याऽऽपत्तिश्चेति न कश्चिद्दोषः। जगदुपादानत्वात्परिणामित्वे अनृतोपादानत्वादनृतत्वे वा ब्रह्मणः प्राप्ते तद्वारणाय सत्यमिति विवर्ताधिष्ठानत्वाऽबाध्यत्वयोः प्रदर्शनाय। परिणामविवर्तयोर्मृच्छुक्त्यादिजडेष्वेव दर्शनात्तद्वज्जडत्वप्रसक्तिवारणाय ज्ञानमिति ज्ञप्तिर्ज्ञानं। भावे ल्युट्। ततो लौकिकघटादिज्ञानवदेव व्यावहारिकत्वाऽन्तवत्त्वयोः प्राप्तावनन्तमिति देशादिपरिच्छेद-वारणाय। तद्बलादेव हि सत्यपदस्य पारमार्थिकसत्यपर्यवसानं। आनन्त्यमेव हि पूर्णता, सैव भूमेत्युच्यते। छान्दोग्ये—"यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति सभूमा" इति दर्शनादिक्रियाकारकफलादिद्वैतमात्रप्रतिषेधाऽवधौ सुखैकरसे भूमशब्ददर्शनात्। नच तत्राऽन्यदर्शनादिकमेव प्रतिषिध्यते, नतत्कारकफले न वा स्वात्मदर्शनमिति भ्रमितव्यम्। कर्तृकर्मतयोरेकत्र विरोधादेव दृष्टृगोचरदर्शनाऽप्रसक्तेः। अन्यदर्शनमात्रनिषेधे चाऽभिप्रेते

"यत्र न पश्यति न श्रृणोति" इत्याद्युक्त्यैव सिद्धेऽन्यपदत्रयवैयर्थ्यप्रसङ्गात्। तद्बलादेव त्रिपुटीनिषेधसिद्धेः। एवमपि लौकिकघटदुःखादिज्ञानसाम्यप्राप्तमस्पृहणीयत्वं द्वेष्यत्वं च निवारयितुं "यो वै भूमा तत्सुखं" "आनन्दो ब्रह्मेति व्यजानात्" इत्यादिश्रुतिसिद्धमानन्दात्मकत्वादिरूपमपि विशेषणं लक्षणे आवश्यकम्।

"[१]आनन्दादयः प्रधानस्य" इत्यधिकरणे आनन्दादिभावरूपविशेषणानां "[२]अक्षरधियां त्वविरोधः" इत्यधिकरणे अस्थूलाद्यभावरूपविशेषणानां च शाखान्तरोक्तानामवश्योपसंहर्तव्यताव्यवस्थापनादित्यभिप्रेत्य सौख्य रूपमित्युक्तम्।। न च केवलमानन्दरूपत्वविशेषणेनैवेष्टसिद्धिः। परमपुरुषार्थतायास्तावताप्यलाभादित्युपदर्शयन्व्यतिरेकमुखेनाऽपि विशेषणत्रयसार्थक्यमुपपादयति— नेति। अनृते = मिथ्याभूते। अस्फुरणे = अनपरोक्षे। असुखे = सुखभिन्ने च वस्तुनि। पुरुषार्थता = मुमुक्षुपुरुषाऽभिलषणीयता परमपुरुषार्थता वा न संभवतीति हेतोः ब्रह्मणः तदात्मता = सत्यादिस्वरूपता उच्यते श्रुत्येत्यर्थः। अयं भावः— न सुखमित्येव पुरुषार्थः। शत्रुसुखस्य स्वपुरुषार्थत्वाऽदर्शनात्। किन्तु स्वस्य अपरोक्षं सुखमेव स्वपुरुषार्थः। तस्यापि बाधितत्वे परिच्छिन्नत्वेवा मानोरथिकसुखवद्विषयसुखवद्वा न परमपुरुषार्थत्वं, सर्वविरक्तस्य स्पृहणीयत्वं वा। नित्यसुखस्यापि कादाचित्कस्फुरणत्वे साधनाऽधीनाऽभिव्यक्तिकत्वाद्विषयसुखाऽविशेषः। स्फुरणस्यापि नित्यत्वे सम्बन्धभेदकल्पनवैयर्थ्यगौरवाभ्यां सुखस्याऽपरिच्छिन्नसत्यस्वप्रकाशरूपत्वकल्पनमेवोचितमिति परमपुरुषार्थ वस्तुविशेषपरिचयार्थमेव सत्यादिविशेषणो-

(१) किमानन्दादयो ब्रह्म धर्मायत्रयावन्तःश्रूयन्ते तावन्तः एव तत्र प्रतिपत्तव्याः किंवा सर्वे सर्वत्रेती संशये तत्र यथा श्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायामिदमुच्यते। आनन्दादय प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः कस्मात् सर्वत्र हि तदेवैकं प्रधानं ब्रह्म विशेष्यं विद्यते। तस्मात् सार्वत्रिकत्वं ब्रह्मधर्माणां देवदत्त शौर्यादि निदर्शनिन प्रतिपत्तव्यमिति भावः।। ब्र०सू०अ०३पा०३ सू०११।।

(२) ननु एतद्वै तदक्षरं गार्गि ब्राह्मणा इत्यादिकासु श्रुतिपु विशेष निराकरण द्वारेणाक्षरं परं ब्रह्म श्राव्यते तत्र च क्वचित् केचिदतिरिक्ता विशेषा प्रतिषिध्यन्ते तासाम् विशेष प्रतिपेध बुद्धीनां किं सर्वासाम् सर्वत्र प्राप्तिरुत व्यवस्थेति संशये श्रुतिविभागाद्व्यवस्था प्राप्तावुच्यते। अक्षर विषयास्तु विशेष प्रतिपेध बुद्धयः सर्वाः सर्वत्रावरोद्धव्या उपसंहर्त्तव्याः। सामान्यतद्भावाभ्याम्। समानो हिं सर्व विशेष निराकरण रूपो ब्रह्म प्रतिपादन प्रकारः। तद्भावो नाम तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते। तथा च ताभ्यां हेतुभ्यां सर्वासाम् यथोक्त बुद्धीनां प्रसक्तिः। आनन्दादय इत्यत्र विधिरूप धर्माणामुपसंहार उक्तः। इह तु प्रतिषेध रूपाणामिति न पुनरूक्तिः। औपसद्वदिति। यथा जामदग्न्येहीने पुरोडाशि नीषूपसत्सचोदितासु पुरोडाश प्रदानमन्त्राणां। आग्नेवेर्होत्रंवरेध्वरमित्येवमादीनामुद्गतृ वेदोत्पन्नामप्यध्वर्युभिरभिसम्बन्धो भवति। अध्वर्युकर्तृकत्वात्पुरोडाश प्रदानस्य प्रधानतन्त्रत्वाच्चाङ्गानाम्। एवमिहाप्यक्षरतन्त्रत्वात्तद्विशेषणानां यत्र क्वचिदप्युत्पन्नानामक्षरेण सर्वत्राभिसम्बन्ध इत्यर्थः। (ब्र०अ०३पा०३ सू०३३)

पादानमिति।। नन्वेकरसं ब्रह्मेति मुहुर्ब्रवीषि, सत्याद्यनेकरसतां च विशेषणैः प्रतिपादयसि, यदि च लक्षणया विशेषणपदानामेकरसवस्तुमात्रार्थकतां ब्रूषे, तर्हि द्वितीयादिपदवैयर्थ्यमित्यादिशङ्कायास्तु नाऽवसरः। प्रागेव परिहृतत्वादित्याह–वारणीयेति। वारणीयाः = व्यावर्तनीयाः, याः प्रपञ्चेप्रसिद्धाः असत्त्वजाड्यपरिच्छेदद्वेष्य-त्वोपेक्ष्यत्वादिलक्षणाः विधाः = प्रकाराः, ताभिर्निमित्तभूताभिर्व्यावर्त्यवस्तुनि प्रकल्पिता = उपचरिता ये भेदास्तेभ्यो लब्धपदैः = प्राप्ताऽवकाशैः सत्यज्ञानादिपदैः वास्तवस्य एकरसस्य हतिः = क्षतिर्नास्त्येव। हि = यस्मात्, तथा = उक्तप्रकारेणैव साधु = सोपपत्तिकं यथास्यात्तथा पूर्वं = "सच्चित्सौख्यैकरस्येऽपि" इति श्लोके अवादिषं = अभिहितवानस्मीत्यर्थः।। २८।।

तटस्थलक्षणबललब्धमपि स्वरूपलक्षणं युक्त्यन्तरैरपि स्थूणानिखननन्यायेन दृढीचिकीर्षुः सत्यत्वादित्रयं क्रमेण त्रिभिः श्लोकैः श्रौतलौकिकहेतुभिः समर्थयिष्यन् प्रथमं सत्यत्वं तथा समर्थयते— सत्यत्वमिति।।

मू०।। सत्यत्वं तस्य सौक्ष्म्यान्नभस इव जगन्नीलिमाधारभावा-
दव्यावृत्तेरवृत्तेरखिलदृशितया सर्वबाधाऽवधित्वात्।
निस्सङ्गत्वाऽविरोधात्सकलगततयाऽऽत्मत्वतः साक्षिभावा-
दन्यद्रष्टुर्निषेधात्स्फुटवचनशतैः स्वानुभूत्या च सिद्धम्।। २९।।

तस्य = ब्रह्मणः सत्यत्वमेतेभ्योहेतुभ्यः सिद्धमिति सम्बन्धः। तानेवाह-सौक्ष्म्यादित्यादिना। सूक्ष्मं = पटुकरणैरपि दुर्लक्ष्यं तस्य भावः सौक्ष्म्यं। निरुपपदं हि सूक्ष्मपदमीश्वरादिपदवदुत्कर्षकाष्ठामवलम्बते। सा चाकाशादिस्थूलपृथिव्यन्तस्य उत्पत्तिक्रमवैपरीत्येन पर्यालोच्यमाना ब्रह्मण्येव विश्राम्यति। स्थूलसूक्ष्मभूतेभ्योऽपि सूक्ष्मतमादव्यक्ताद्वेद्यत्वेन वासनागुणादिसंवलितत्वेन च स्थूलप्रायात्तदधिष्ठानस्य चिदेकरसस्य परमसूक्ष्मत्वात्। प्रात्यक्षो यौक्तिकः श्रौतश्च बाधो भ्रान्तिकाललक्ष्यस्य तत्कालदुर्लक्ष्याऽधिष्ठानाऽवधिकः प्रसिद्धः। 'नेदं रजतं' 'नभो न नीलं' 'अपागादग्नेरग्नित्वम्' इत्यादि यथा तथैव हि श्रुतिः "अन्नेन सोम्य शुङ्गेनाऽपो मूलमन्विच्छ" इत्यादिना क्रमेणाऽन्विष्टे मूलभूते सति "स य एषोऽणिमा" इति परमसूक्ष्मतां प्रदर्श्य "तत्सत्यं स आत्मा" इति तादृशस्यैव परमार्थसत्यतां दर्शयतीति भावः।। यदि सौक्ष्म्येनाऽधिष्ठानतां निगमय्य सत्यता साध्यते, तर्हि कृतंपरम्परान्वेषणेन, जगदधिष्ठानत्वेनैव साक्षात्तत्साधनसंभवादित्यभिप्रेत्याहनभस इवेति। नभः पक्षे गच्छतीव दृष्टसंनिहितदेशादन्यत्र दूरैकदृश्यत्वादिति जगदिति नैल्यविशेषणम्। यथा नभस आध्यासिकनैल्याधारत्वात्तदपेक्षया सत्यत्वं, एवं

सकार्यमाया नीलिमाऽधिष्ठानत्वात् ब्रह्मणो जगद्विलक्षणसत्यतेत्यर्थः। किञ्च रज्जुसर्पभूप्रदरजरल्लतादण्डछायादिक्रमिकनानाकल्पनासु अनुवर्तमानस्य नदीवप्राऽवलम्बितरुमूलस्य व्यावर्तमानरज्ज्वाद्यपेक्षयेव व्यावृत्तसर्ववस्तुषु सत्त्वेनाऽनुवर्तमानत्वादपि तस्य परमार्थसत्यता सुसाध्येत्याशयेनाह–अव्यावृत्तेरिति।। अनेन रज्ज्वादिवदेव व्यावृत्तेः जगद्रूपस्य मिथ्यात्वमपि दर्शितमेव।। ननु दूरान्माषराशावखण्डनीलशिलाध्यासे व्यावृत्तमाषाणां सत्यत्वम्, अनुवर्तमानशिलायां मिथ्यात्वमिति वैपरीत्यमपि दृष्टमिति व्यभिचार इति चेत्—न। तत्राऽन्वयव्यतिरेकाभ्यां राशेरेवाऽधिष्ठानत्वात्। तस्मिंश्च पूर्वोत्तरकालाऽनुवृत्ते शिलाया एव व्यावर्तमानत्वात् माषेष्वपि बाधोत्तरकालं शिलाऽनुवृत्त्यदर्शनान्मिथ्यात्वव्यापकव्यावृत्तत्वव्यतिरेकस्य त्रैकालिकाऽनुवृत्तत्वस्य च सत्यत्वसाधकत्वाऽक्षतेः।। ननु रजताद्यारोपाधिष्ठानस्य शुक्त्यादेः सिद्धान्ते मिथ्यात्वादधिष्ठानत्वमव्यावृत्तत्वं च सत्यत्वव्यभिचार्येव, व्यावहारिकसाधारणसत्यताव्याप्यत्वोक्तौ तु ब्रह्मणि पारमार्थिकसत्यत्वाऽसिद्धिः। यदि त्वधिष्ठानान्तरशून्यत्वे सत्यधिष्ठानत्वं तादृशमव्यावृत्तत्वं वा तद्व्याप्यमुच्येत, तर्हि कृतं विशेष्येण, तावन्मात्रस्यैव व्याप्यत्वसंभवादित्यभिप्रेत्याह— अवृत्तेरिति।। वृत्तिः आधेयता तच्छून्यत्वादित्यर्थः। नेदमत्र नेदमिदमित्याधारे कस्मिंश्चिन्निषेधाद्धिरजतादिर्मिथ्येत्यध्यवसीयते। न तु निराश्रयं ब्रह्म तथाऽध्यवसातुं शक्यम्। धर्म्यनुल्लेखिनिषेधाऽयोगात्तदधिष्ठानस्य (१)तदव्यावृत्तस्य चाऽप्रसिद्धेरिति भावः।. अथवा।। अवृत्तेरिति षष्ठ्यन्तं पक्षविशेषणं। तथा च तयोर्व्यावहारिकसाधारणसत्यत्वमात्रव्याप्यत्वेऽपि अवृत्तित्वविशिष्टपक्षधर्मताबलात् पारमार्थिकसत्यत्वसिद्धिरिति भावः।। नन्वस्तु ब्रह्मणोऽप्याधारस्तत्रबाधश्चेत्याशङ्क्याह— अखिलदृशितयेति।। सर्वार्थप्रकाशकचिद्रूपतयेत्यर्थः।

अयंभावः— ब्रह्मणोऽप्याधारस्तत्र बाधश्च सिध्यन् द्रष्ट्रन्तरस्य मानान्तरेण सिध्येत्।। न च ब्रह्मव्यतिरिक्तो द्रष्टाऽस्ति "नान्योतोऽस्ति द्रष्टा" इत्यादिना चेतनधात्वन्तरस्य प्रतिषेधात्। तत्तत्प्रमाणजन्यवृत्त्यवच्छिन्नब्रह्मचैतन्यस्यैव सर्वार्थप्रकाशमानत्वेन तद्व्यतिरिक्तस्य (२)तयोः साधकस्याऽभावाच्च। ब्रह्मण एव तदुभयसाधकत्वोक्तौ च बाधकालावस्थायिनो बाधानुपपत्तेर्बाधोक्तिव्याघातात् "स भगवः कस्मिन्प्रतिष्ठितः इति स्वे महिम्नि यदि वा न महिम्नि इति

(१) तदव्यावृत्तस्य तदधिष्ठानस्य चेति तत्पदार्थ ब्रह्मावृत्तस्य ब्रह्मप्रतियोगिक व्यावृत्यात्मकभेदानधिकरणस्य तथा ब्रह्माधिष्ठानस्य चेत्यर्थः। ब्रह्मव्यावृत्तिशून्यस्य ब्रह्माभिन्नतया ब्रह्माधिष्ठानत्वानुपपत्त्यातदधिष्ठानाप्रसिद्धेरित्यर्थः।।

(२) तयोः बाधाधारयोरित्यर्थः।।

अन्योह्यन्यस्मिन्प्रतिष्ठित'' इति तदाधारनिषेधाच्च। [१]पूर्वहेत्वसिद्धिशङ्का-निवर्तकस्याप्यस्य [२]स्वातन्त्र्येणापि सत्यत्वव्याप्यत्वाद्धेत्वन्तरत्वं। विनापि मानं व्यसनितयैव ब्रह्मणोऽप्याधारकल्पनेऽ[३]नवस्था च स्यादिति तस्यैव सर्वाऽऽधारा-ऽऽधेयपरम्पराविश्रान्तिस्थानतोचितेति सर्वबाधाऽवधित्वमपि तस्यैव युक्तं। तेनापि सत्यता सिद्धेत्यभिप्रेत्याह— सर्वबाधाऽवधित्वादिति।। ननु शुक्तिरजतादिबाधस्य शुक्त्याद्यवधिकत्वात् नष्टघटादेर्बाधाऽप्रसिद्धेश्च कथं ब्रह्मणः सर्वबाधाऽवधित्वमिति चेत्। न। शुक्त्याद्यवच्छिन्नचिन्निष्ठाऽज्ञानस्यैव रजताद्याऽऽकारपरिणामितया तादृशचित एव प्रातिभासिककार्यबाधाऽवधित्वात् ''ब्रह्मैवेदꣳ सर्वं'' ''सर्वं खल्विदं ब्रह्म'' ''नेह नानास्ति किञ्चन'' इति श्रुतयो हि ब्रह्मण एव सर्वबाधाऽवधित्वं दर्शयंति। अविद्यातत्कार्ययोरेक एव बाध इति प्रागुपपादनाच्च। मूलाऽविद्याबाध एव नष्टघटस्यापि बाध इत्यभ्युपगमात्। यदि तु ''अपागादग्नेरग्नित्वं त्रीणिरूपाणीत्येव सत्यम्'' इति श्रुत्यक्षराऽवलम्बेन शुक्त्यादेरपि रजतादिबाधाऽवधित्वमुच्येत तदा सर्वेषां बाधानां अवधित्वात् = परम्पराविश्रान्तिस्थानत्वादित्यर्थो बोध्यः। इत्थं च नष्टघटबाधाप्रसिद्धावपि न क्षतिः।। अथवा।। अस्तु सर्वपदं बाध्यस्यैव विशेषणं। अवधित्वं तु परम्पराविश्रान्तिस्थानत्वमेवेत्यदोषः। नष्टघटादेश्च निरन्वयनाशाऽनभ्यु-पगमात्कारणे तिरोहितस्यैव बाधप्राक्काले सत्त्वात् ब्रह्मज्ञानेन बाधोपपत्तिरित्यदोषः। बाधात्मिका वृत्तिः स्वसम्बद्धं स्वविरोधिनं बाधेत। न चाऽसङ्गस्य सर्वान्तरस्य ब्रह्मणस्तत्सम्बन्धस्तद्विरोधो वाऽस्तीति अतोऽपि सत्यत्वसिद्धिरित्यभिप्रेत्याह-निस्सङ्गत्वाऽविरोधादिति।। निस्सङ्गत्वसहितादविरोधादिति कर्मधारयः समाहारद्वन्द्वो वा। निस्सङ्गत्वादविरोधाच्चेत्यर्थः। अप्रसिद्धप्रसञ्जनाऽयोगादपि तद्बाधाऽप्रसक्तेः सत्यतेत्याशयेनाह-अखिलगततयेति। अभावप्रत्ययो हि बाधः नच सर्वगतस्याऽभावः प्रसिद्धो यत्प्रत्ययोऽस्य बाधः स्यादित्यर्थः। बाध्यबाधतत्प्रमातृणां प्रत्यगात्मत्वादपि न बाधप्रसक्तिः। स्वात्मनः केनाप्युपमर्दितुमशक्यत्वात्ततोऽप्यस्य सत्यता सिद्धिरित्याशयेनाह— आत्मत्वत इति।. बाधपरिशेषितं हि रूपं बाध्यस्याऽत्मा। न च तस्मिन्भस्मनीव वह्नेर्बाधस्य व्यापारः संभवति। न वा स्वात्मनि। बाधस्यैव तदा बाधापत्तेः। स्वात्मनि क्रियाविरोधात्। नापि प्रमातुः। आत्मनि निष्प्रमातृ-

(१) पूर्वहेत्वसिद्ध्याशंकेति।। पूर्वस्य हेतोरधिष्ठानत्वादित्यस्याव्यावृत्तत्वादित्यस्य वा हेतोः स्वरूपासिद्ध्याशंकावारकस्य निराधारत्वहेतोरित्यर्थः।।

(२) स्वातन्त्र्येण = अधिष्ठानत्वादि पूर्वनिरपेक्षतया।

(३) अनवस्थास्यादिति।। निराधारवस्त्वप्रसिद्धिरूपाद्धेतोः ब्रह्मणोऽप्याधारतया कल्प्यमान-वस्त्वोरप्याधारवस्त्वन्तरकल्पनायां तस्य तस्यापि वस्तुविशेषाधारान्तरकल्पनेऽनवस्था स्यादित्यर्थः।।

कबाधाऽसिद्धेरिति भावः। एवं "बुद्धेः साक्षी मनसः साक्षी सर्वस्य साक्षी" इत्यादिश्रुतिषु ब्रह्मणः सर्वसाक्षित्वमाम्नायते। नच बाधकालाऽसतस्तदुत्तरभाविनश्चाऽर्थं प्रति साक्षितासंभवः। नच निस्साक्षिकं किञ्चित्सिध्यतीति तस्य सत्यतैवेत्य-भिप्रेत्याह— साक्षिभावादिति।। ननु जीवा एव तद्बाधादिसाक्षिणः सन्तु, तत्राह-अन्येति।। "नान्योऽतोस्ति द्रष्टा नान्यदतोस्ति द्रष्टृ" इत्यादिना चेतनधात्वन्तरप्रतिषेधात् "तत्त्वमसि" इत्यादिनाजीवानामपिपरमार्थतो ब्रह्मैक्यबोधनात्साक्षिबाधे जगदान्ध्या-ऽऽपत्तेर्बाधसाक्षिचेतनधातुपरिशेषे तस्यैव ब्रह्मत्वात् न तस्य बाधसंभावनापीति तस्य सत्यैकरूपत्वमित्यर्थः। न केवललिङ्गैरेवाऽस्य सत्यतासिद्धिः, अपित्वा-ऽऽगमानुभवाभ्यामपीत्या-स्फुटवचनशतैः स्वानुभूत्याचेति। "तदेतत्सत्यं" "तत्सत्यं स आत्मा" इत्यादिभिः स्फुटैः श्रुतिवचनशतैः विद्वदनुभवैश्चेत्यर्थः। अथवा-स्वानुभूत्या आगोपालाङ्गनं प्रसिद्धेनाऽहमित्याऽऽत्मप्रतिभासेन च ब्रह्मणः सत्यत्वं सिद्धम्। विमर्शे प्रतीच एव ब्रह्मत्वात्, ब्रह्माऽसत्त्वे प्रतीचोऽप्यसत्त्वप्रसङ्गात्। तथाच श्रुतिः— "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्" इति "को ह्येवाऽन्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति चेत्यर्थः।। २९।।

एवं ब्रह्मणश्चिद्रूपत्वमपि दृढीकुर्वन्नाह— आत्मत्वादिति।

मू०।। आत्मत्वादीक्षितृत्वादखिलवशितया शास्त्रयोनित्ववादात्
कामाऽभिध्योपदेशाच्छशितपनमुखद्योतिभारूपतोक्तेः।
साक्षादेवाऽपरोक्षादसुकृतसुकृताऽऽध्यक्ष्यसाक्षित्ववादात्
सर्वज्ञ ज्ञादिशब्दात्स्फुटवचनशतैश्चापि सच्चित्स्वभावम्।। ३०।।

एकादश हेतुभिः सत् = सद्रूपत्वेन निश्चितं ब्रह्म, चित्स्वभावं = चैतन्यै-कस्वरूपमिति सम्बन्धः। तत्राऽदौ सर्ववादिनां लौकिकानां च चेतनधर्मत्वेन प्रसिद्धमात्मत्वमेव विमर्शे तादूप्यसाधनक्षममित्याऽऽशयेनाऽह— आत्मत्वादिति। श्रुतिषु च सर्वत्र ब्रह्मण्याऽत्मशब्दप्रयोगात् जडस्याऽऽत्मत्वनिरासाच्चेति भावः।। "भूतात्म चेन्द्रियाऽऽत्मा च" इत्यादिवदाऽऽत्मशब्दस्य श्रुतिषु गौणत्वं (१)मन्दमति-भिरित्याशङ्क्येतेत्यत आह— ईक्षितृत्वादिति। "तदैक्षत बहुस्यां प्रजायेय" इत्यादौ श्रुतस्य ईक्षितृत्वस्य चैतन्यनिर्वाह्यत्वात्तदन्यांऽशकल्पने प्रमाण प्रयोजनयोर-भावाच्चिन्मात्रपरिशेष सिद्धेरिति भावः। तथा च "सर्वस्य वशी सर्वस्य ईशानः" "एतस्यैवाऽक्षरस्य प्रशासने गार्गि सूर्या चन्द्रमसौ विधृतौ तिष्ठतः" "भीषाऽस्माद्वातः पवते" इत्यादि श्रुतं सर्वजगन्नियन्तृत्वमपि निष्कर्षे चिद्रूपत्वे

(१) मन्दमतिभिराशङ्क्येतेत्यत आह। मन्दमतिभिराशङ्क्यते इति पाठो यथा श्रुतस्थाने बोध्यः।।

पर्यवस्यतीत्यभिप्रेत्याह- अखिलवशितयेति।। अखिलं = जगत् वशयितुं = स्वायत्तयितुं शीलमस्याऽस्तीत्यखिलवशी तद्भावेनेत्यर्थः। शक्तिमांश्चेतनो हि राजादिरन्यान्वशयति, तत्र स्वतोऽशक्तस्यापि प्राज्ञस्य स्वेतर कोशबलादि शक्तिसाचिव्यान्मुख्यमेव नियन्तृत्वं दृष्टं नत्वचेतनस्य। शक्तस्याऽपि परप्रज्ञासाचिव्येन तथेति मायाशक्तिभिरपि जगन्नियमनसंभवादस्थूलादिवाक्यैः प्रतिषिद्धशक्त्यादिधर्मकस्याऽक्षरस्य श्रुतं नियन्तृत्वं चिदेकरसत्वे पर्यवसितमिति भावः।। एवं सर्वाऽर्थावद्योतकत्वात्सर्वज्ञकल्पस्य वेदस्य पुरुषनिः श्वासवदनायासेनाऽऽविर्भावयितृत्वमपि तस्य सार्वज्ञ्यमुखेन सर्वार्थप्रकाश-क्षमचिद्रूपत्वे पर्यवसितमित्याऽऽशयेनाह-शास्त्रयोनित्ववादादिति।। अथवा। "तंत्वौपनिषदं पुरुषं पृच्छामि" "नावेदविन्मनुते तं बृहन्तम्" इत्यादि वेदैकवेद्यत्व-वादादित्यर्थः। तथा चाऽन्यादशत्वे नैय्यायिकेश्वरवदनुमानादिगम्यत्वाऽऽपत्तेः वेदैकवेद्यत्वं प्रमाणान्तराऽगम्यचिदेकरसत्वे पर्यवसितमिति भावः।। एवं "सोऽकामयत बहुस्यां प्रजायेय" इत्यादिना श्रुतौ कामशब्दोदिताऽवश्यस्रष्टव्याऽर्थगोचर सृष्टिसंकल्पलक्षणाऽभिध्यानोपदेशादपि तस्य तथात्वमित्याह-कामाऽभिध्योपदेशादिति।। पूर्णकामस्य सुखतत्साधनरागलक्षणकामाऽसंभवादभिध्येत्युक्तम्।। एवं "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वंतस्य भासा सर्वमिदं विभाति" इति श्रुतं सूर्यादिसर्वाऽवभासकत्वं भौतिके तेजस्यप्रसिद्धं तस्य चित्प्रकाशाऽऽत्मकत्वे पर्यवस्यतीत्यभिप्रेत्याह-शशीत्यादि।। शशी = चन्द्रः तपनः = सूर्यः मुखमिव प्रधानं येषां अग्निविद्युत्तारकादितेजसां तानि द्योतयितुं शीलं यस्य तथाविधभारूपत्वोक्तेरित्यर्थः।

किञ्च।। "यत्साक्षादपरोक्षाद्ब्रह्म" इति अन्यनिरपेक्षप्रत्यक्षता तस्य श्रूयते, सा च चैतन्यस्यैव। विषयाऽपरोक्षस्य चैतन्यसापेक्षत्वेनाऽतथात्वात्। अतोऽपि तस्य चिद्रूपताऽवगतिरित्याह-साक्षादेवेति।। एवं "कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" "एष ह्येवसाधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते" "एष ह्येवाऽसाधु कर्म कारयति तं यमधो निनीषते" इति सर्वकर्मसु प्रेरकत्वफलप्रदातृत्वसाक्षित्वानि तस्य श्रूयन्ते। तान्यपि प्रत्येकं चिद्रूपतायां पर्यवसितानीत्याऽऽशयेनाऽऽहअसुकृतेत्यादि। असुकृतं = सुकुतभिन्नं देहयात्रानुकूलं अविहिताऽनिषिद्धं दुष्कृतं च, सुकृतं = पुण्यं तयोः आध्यक्ष्यं = साधनस्वरूपा-ऽऽश्रयपरिपाकफलादिपरिज्ञानस्वातन्त्र्यं, साक्षित्वं = विशेषाऽनुपादानात्सर्वस्य साक्षाद्रष्टृत्वं तयोः वादात् = व्यक्तं प्रतिपादनादित्यर्थः। अखिलवशित्वाऽऽदिभिः सार्वज्ञ्याऽऽक्षेपद्वारा चिद्रूपत्वं साधितं। "यः सर्वज्ञः सर्ववित्" "ज्ञः कालकालो गुणी सर्वविद्यः" इत्यादिसाक्षात्तच्छ्रुतिभिरपि चिद्रूपता स्वध्यवसानेत्यभिप्रेत्याह-

सर्वज्ञज्ञादिशब्दादिति।। एवं पर्यवसानगत्या चिद्रूपत्वे साधितेऽपि मन्दमतीनां तत्र कर्तृप्रत्ययादिश्रवणाद्विवक्षितविवेकांशो न सुबोध इतिकण्ठोक्तिरप्यस्तीत्याह- स्फुटवचनशतैरिति।। परश्शतैः "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" "चिन्मात्रोऽहं सदा-शिवः" चिदेकरसो ह्ययमात्मा" "प्रज्ञानं ब्रह्म" इत्यादि श्रुतिवचनैः "आह च तन्मात्रं" (१)"चिति तन्मात्रेण तदात्मकत्वादित्यौ-डुलोमिः" इत्यादि सूत्रवचनैः,

"चैतन्यमात्मनो रूपं यत्तत्पश्यन्ति सूरयः"।
"तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्"

इत्यादिस्मृतिवचनैश्च स्फुटतरैः चकारात् विद्वदनुभवैश्च सत् = ब्रह्म चित्स्वभावं सिद्धमित्यर्थः। अपिशब्दो हेतुसमुच्चये।। ३०।।

एवमानन्दरूपतामपि प्रमाणैर्द्रढयन्नाह-सौख्येति।।

मू०।। सौख्योत्कर्षाऽवधित्वान्निखिलसुखकणाऽम्भोनिधित्वश्रुतिभ्यो
मुक्तप्राप्यत्ववादान्निरवधिपरमाऽऽनन्दभूमात्मकत्वात्।
सर्वप्रत्यक्त्ववादान्निधि निलय वधू साम्यवादात्सुषुप्ता
वानन्दे ब्रह्मतोक्तेरपि च रसतया तत्सदाऽऽनन्दरूपम्।। ३१।।

अत्राप्येतैर्हेतुभिः तत् = प्रस्तुतं ब्रह्म आनन्दरूपमिति सम्बन्धः। तान्दर्शयति- सौख्येति।। सोत्कर्षपरम्पराणां हि पदार्थानामवश्यं उत्कर्षपरमावधिरस्त्येव। यथा न्यायनये परिमाणोत्कर्षपरमावधिराकाशादिः। यथा वा स्थौल्याद्युत्कर्षे लौकिकदृशापि महापृथिवी। प्रकाशोत्कर्षेऽपि सूर्यः। सुखमपि तथाविधमेव प्रसिद्धम्। तत्परम्पराऽवधिश्च श्रुत्या हैरण्यगर्भाऽन्ते उत्कर्षपरम्परामुपवर्ण्य "यतो वाचो निवर्तन्ते" इति ब्रह्माऽऽनन्द एव प्रतिपाद्यते। न च तत्र ब्रह्मण आनन्द इति षष्ठ्या तादृशाऽऽनन्दधर्म्येव ब्रह्म इत्यनानन्दरूपं तत्प्रतिपादितमिति भ्रमितव्यम्। उपक्रमगताऽऽनन्त्यविरोधात् "यदेष आकाश आनन्दो न स्यात्" इत्यादि सामानाधिकरण्यनिर्देशविरोधाच्च षष्ठ्याः राहोः शिर इतिवदविवक्षितार्थत्वस्याऽऽचार्यैर्व्यवस्थापनात्। "एषोऽस्य परम आनन्दः" इति श्रुत्यन्तरमप्येवं समजसमिति भावः। तथा मात्रा तद्वतोर्लोकेसमानस्वभावता

(१) चिति = चैतन्य तन्मात्रेण चैतन्यमात्रस्वरूपेण साक्षात्कारात्मकाभिनिष्पत्तिरात्मनो युक्तः। कुतः? अपहत्पाप्मादि निषेधमुख धर्मेषु तत्तत्पाप्मादिस्वरूपनिवृत्तेर्गम्यमानत्वेन सत्याकामत्वादि विधिमुख्य धर्माणां सापेक्षतयाऽसत्वेन च चैतन्यस्वरूपत्वस्यैव पारमार्थिकत्वसम्भवात्तद्रूपेणात्मनः प्रतिपत्तिः युक्त इत्यौडलोमिराचार्यो मन्यते इति भावः।।

दृष्टा। यथा- अग्निविस्फुलिङ्गयोः। विषयसुखानि च सर्वप्राण्युपजीव्यानि शीकरा इव समुद्रस्य ब्रह्म मात्राः श्रूयन्ते। "एतस्यैवाऽऽनन्दस्याऽन्यानि भूतानि मात्रामुपजीवन्ति" इति। अतोऽपि तस्याऽऽनन्दरूपत्वं स्वध्यवसानमित्याशयेनाह- निखिलेति। विषयसुखानां निरवयवब्रह्मसुखमात्रारूपत्वमौपाधिकमिति तु प्राक् प्रपञ्चितमेव। परमपुरुषार्थत्वश्रुतेरपि तस्य तथात्वमित्याह-मुक्तेति। "ब्रह्मवेद ब्रह्मैव भवति" "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" "यदाह्येवैष एतस्मिन्नदृश्ये ऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अत सोऽभयं गतो भवति" इत्यादिश्रुतिषु ब्रह्मभाव एव मुक्तप्राप्यः पुरुषार्थभूतः प्रतिपाद्यते। न चसातिशयसुखविरक्तानां निरतिशयसुखाऽतिरिक्तः पुरुषार्थो भवतीति अतोऽप्युक्तसिद्धिः। उत्कृष्टसुखार्थिनां हि तत्प्रतिकूल निकृष्टसुखे जिहासा, तदनुकूलेषु (१)क्लेशबहुलेष्वपि श्रवणमननयमनियमप्राणनिरोधादिषु प्रवृत्तिश्चोपपद्यते। अन्यथा तदुभयाऽनुपपत्तिः तद्बोधकशास्त्राऽप्रामाण्यं च स्यादिति भावः।।। एवं "यत्र नाऽन्यत्पश्यति नाऽन्यच्छृणोति नाऽन्यद्विजानाति स भूमा, यो वै भूमा तत्सुखं, नाल्पे सुखमस्ति" इति श्रुत्या निरस्तत्रिविधाऽवधिनिरतिशयाऽऽनन्दत्वे-नोपवर्णितभूमाऽऽत्मस्वरूपत्वादपि तत्सिद्धिरित्याह- निरवधीति।। किञ्च। प्रत्यगात्मैव परमप्रेमास्पदत्वेन सर्वानुभवसिद्धः। तथाविधत्वं त्वानन्दस्यैव नान्यस्येत्युपपादितम्, उपपादयिष्यते च। ब्रह्मण एव हि सर्वशरीरे प्रत्यगात्मभावेन स्थितिः श्रुतिस्मृत्यादिप्रसिद्धेत्यतोऽप्युक्ताऽर्थसिद्धिरित्यभिपरेत्याह- सर्वप्रत्यक्त्ववादादिति। "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः" "सर्वव्यापी सर्वभूतान्तरात्मा" "यदेवेह तदमुत्र यदमुत्र तदन्विह" इत्यादि परः शतश्रुतिषु

"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।"
"अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः।।"
"शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते।।"

इत्यादिस्मृतिषु, "(२)अवस्थितेरिति काशकृत्स्नः।" "आत्मेतितूपगच्छन्ति-ग्राहयन्तिच" इत्यादिसूत्रेषु च ब्रह्मण एवाऽविकृतस्य प्रत्यक्त्वेन स्थितेर्व्यक्त मुक्तत्वादित्यर्थः। तथा "तद्यथापि च हिरण्यनिर्धिनिहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो नविन्देयुः। एवमेव इमाः सर्वाः प्रजा अहरहर्ब्रह्म गच्छन्त्य एतं ब्रह्म लोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः" इति छान्दोग्ये हिरण्यनिधिसाम्यवादात् "तद्यथा

(१) निकृष्ट सुख जिहासा क्लेश बहुलेषु यमादियोग साधनेषु प्रवृत्तिः इत्युभयानुपपत्तिरित्यर्थः।।
(२) अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते इति।।

श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्यपक्षौ सल्लयायैव ध्रियते एवमेवाऽयं पुरुष एतस्मा अंताय धावति यत्र सुप्तो न कञ्चन कामं कामयते नकञ्चन स्वप्नं पश्यति'' इति बृहदारण्यके सुखविश्रान्तिस्थानसँल्लयशब्दितनीडगृहसाम्यवादात्, तत्रैव ''तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्।'' ''तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्'' इति प्रियवधूसाम्यवादाच्च सुषुप्तौ जीवेन *स्वाऽप्ययस्य ब्रह्मण आनन्दरूपतेत्याह निधिनिलयवधूसाम्यवादादिति।। निधिः = निखातो धनसञ्चयः, ꣵनिलीयतेऽस्मिन्पक्ष्यादिरिति निलयः = नीडं, वधू = जाया, एतैः साम्यप्रतिपादकश्रुति (१)वादादपि सुखाऽऽत्मतासिद्धिरिति भावः।। किञ्च।। सुषुप्तो जीवाऽप्ययाऽऽधारे ''स यो मनुष्याणां राद्धः समृद्धो भवति'' इत्यादिना सर्वाऽऽनन्दोत्कर्षकाष्ठात्वेन प्रतिपादिते ''स एव ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः'' इति श्रुत्या लोक्यत इति लोको ब्रह्मैव लोको ब्रह्मलोक इति व्युत्पत्त्या ब्रह्मत्वोक्तेरपि तस्य तथात्वमित्याह - सुषुप्तावानन्दे ब्रह्मतोक्तेरिति।। व्यधिकरणे सप्तम्यौ। तथा तैत्तिरीयाणामुपनिषदि यद्रसलाभादधिकारी आनन्दीभवति तादृशरसत्वेन प्रतिपादनादपि तस्याऽऽनन्दरूपतेत्याह - रसतयेति।। ''रसोवै सः रस ह्येवाऽयं लब्ध्वाऽऽनन्दी भवति'' इति हि तत्र श्रूयते। अपि = शब्दात् ''को ह्येवाऽन्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्'' ''आनन्दो ब्रह्म योनिः'' ''नित्यं विज्ञानमानन्दं ब्रह्म'' विज्ञानमानन्दं ब्रह्म'' आनन्दो ब्रह्मेति व्यजानात्'' इत्याद्याः कण्ठोक्त्यैव तस्य निरतिशयाऽऽनन्दरूप-त्वाऽभिधायिन्यः समुचीयन्ते। चकारो हेतुसमुच्चये।। ३१।।

।। इति तत्पदार्थव्युत्पादनसङ्क्षेपः।।

अखण्डवाक्यार्थज्ञानोपयोगितया शोधिततत्पदार्थ स्वरूपलक्षणं पूर्वपरिच्छेदे चार्वाकादिमतनिरासमुखेन देहेन्द्रियादिभ्यः परिशोध्य दर्शिते त्वंपदार्थेऽपि दर्शयति- सच्चिदिति।

मू०।। सच्चित्सौख्यैकरस्यं निगदितमिह यद्ब्रह्मणो लक्षणं त-
त्प्रत्यक्तत्वेऽपि जैवे सममखिलदृशस्तस्य बाधाद्ययोगात्।
मुख्यप्रेमाऽऽस्पदत्वादुपधिविभिदया वस्तुभेदाद्यसिद्धे-
र्ब्रह्मांऽशत्वप्रवादात्तनुकरणदृशः स्वप्रकाशत्वतश्च।। ३२।।

* स्वाप्यय प्राप्यस्य इति पा०।

(१) वादादित्यर्थः। निध्यादिनां च सुखहेतुनामाभिमानिकी सुखात्मतैव लोके प्रसिद्धेति तत्तत्प्रकरण पर्यालोचनावधारित तादृक् तात्पर्यकात्तत्साम्य।

ꣵपक्ष्यादिभिरिति पा०।

इह = अस्मिन् तत्वंपदार्थपर्यालोचनपरग्रन्थसन्दर्भे। ब्रह्मणो यत्सचित्सौख्यैकरस्यं लक्षणं निगदितं = प्रपञ्चितम्। तज्जैवे = जीवसंबन्धिनि प्रत्यक्तत्वे = प्राक्देहादि-विज्ञानान्तेषु उत्तरोत्तरं प्रत्यक्तादात्मत्वेन प्रसक्तेषु ततोऽप्यान्तरस्वप्रकाशत्वात् तत्त्वत: प्रत्यगात्मत्वेन व्यवस्थापिते तत्साक्षिण्यपि समं = अविशिष्टं। तत्कुतस्तत्राहतस्येति।। अखिलमवस्थात्रयं पश्यतीत्यखिलदृक्, तथाविधस्य तस्य बाधस्य आदिपदात् भावविकाराणां चाऽयोगात्। बाधादेस्तद्विषयस्य चाऽवस्थान्तर्गतत्वेन तद्धीनसिद्धिकत्वेन मोक्ष श्रुतिप्रामाण्येन च तस्य सत्यस्वाभाव्य सिद्धेरिति भाव:।। एवमस्याऽऽनन्दरूपतापि प्रसिद्धेत्याह-मुख्यप्रेमाऽऽस्पदत्वादिति। अपारार्थ्यं चेह मुख्यत्वं, विषयादिविज्ञानान्ते तु तादर्थ्येनैव प्रेमेति "प्रेयान्य: सदनधनात्मजप्रियादे:" इत्यत्र प्रपञ्चितमेव। श्रुतिरपि "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति" इति प्रतीच एव तादृशप्रेमाऽऽस्पदतां सर्वाऽनुभवसिद्धामनुवदन्ती सुखस्वभावतां दर्शयतीति भाव:।। एवमस्याऽऽनन्त्यमपि विमर्शे सिद्ध्यतीत्त्याहउपधिविभिदयेति। उपधि: = छद्म, मिथ्याभूतं सकार्यमज्ञानं तत्प्रयुक्तया विभिदया = दैशिकादिपरिच्छित्या प्रत्यग्वस्तुनो भेदादे: = *द्वैताल्पत्व-कादाचित्कत्वानाम सिद्धे:। उपाधिप्रयुक्तधर्माणां वस्त्वसंस्पर्शित्वादुपाधीनां च मिथ्यात्वादानन्त्यसिद्धेरित्यर्थ:।। ननु मास्तु मायिकेन जगताऽस्य सद्वयत्वं, ब्रह्मणा तु स्यादित्याशङ्क्याऽऽह- ब्रह्मांशत्वप्रवादादिति। "यथा अग्ने: क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवाऽस्मादात्मन: सर्व एवाऽऽत्मानो व्युच्चरन्ति।" "ममैवांशो जीवलोके जीवभूत: सनातन:"। (१)"अंशो नानाव्यपदेशात्"। "अन्यथाचापि दाशकितवादित्वमधीयत एके" इति श्रुतिस्मृतिसूत्रेषु जीवस्य सच्चिदद्वय-ब्रह्मांशत्वप्रवादान्निरंशस्य मुख्यांशाऽसंभवात् घटाऽऽकाशे महाकाशांऽशतावदु-पाध्यनुविधायि तत्कीर्तनस्य ऐक्ये पर्यवसानाद्भेदाऽसिद्धेरिति भाव:।।

*द्वैतात्मत्व इति पाठ:।

(१) अंशो नाना व्यपदेशादिति।। ननु जीवेश्वरयो: प्रयोज्यप्रयोजकभाव सम्बन्ध: किं स्वामिभृत्ययोरिवाग्नि विस्फुल्लिगयो रिव वेत्या काङ्क्षायामाह। अंश इति जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फुल्लिगास्त द्वदंशइवांशो न तु वास्तवोंऽशो निरवयवस्य मुख्यांशांशिभावासम्भवात्। कुत:। नाना व्यपदेशात्। सोन्वेष्टव्य:। सविजिज्ञासितव्य:। एतमेव विदित्वामुनिर्भवति य आत्मनि तिष्ठ नित्यादिषु श्रुति वाक्येषु ज्ञातृज्ञातव्यादिभेदव्यपदेशात्संकीर्तनात्। ननु स्वामिभृत्यभावेपि भेदव्यपदेशोपपत्ते:। किमंशांशी भावसम्बन्ध कल्पनयेत्यत आह। अन्यथेति नानात्वतोऽन्यथाऽनानात्वेनाभेदेनापि व्यपदेशदर्शनादंशांशि भाव एव सम्बन्धो युक्त:। एके शाखिन आथर्वणिका ब्राह्मणो दाशकितवादिभावं ब्रह्मदांशा ब्रह्मदासा ब्रह्मैवेमे कितवा इत्यादिनाम्नन्त्यतोपि जीवेश्वरयोरंशाशिभाव एवेति ज्ञायते। दाशा: कैवर्त्ता: प्रसिद्धा:। ये च स्वामिष्वात्मानमुपक्षिपन्ति ते मी दासा:। कितवो द्यूतकृता:।। इति।। (ब्र०सू०अ०२,पा०३सू०४३)

अंशांऽशिभावोक्त्यापि अग्निविस्फुलिङ्गयोरिव प्रत्यग्ब्रह्मणोः स्वरूपलक्षणसाम्यं दृढीकृतं बोध्यम्। एवमस्य चिद्रूपतापि सिद्धेत्याह- तन्विति। तनु; = शरीरं करणानि = इन्द्रियाणि च पश्यति अपरोक्षयतीति तनुकरणदृक् तस्येत्यर्थः। एतदपि " बाह्यार्थान्करणगणेन" इत्यत्र व्युत्पादितमेव। अथवा।। ईश्वरस्य सर्वदा सर्वज्ञत्वादस्तुज्ञानस्वरूपत्वं, जीवस्यत्विन्द्रियाऽधीनजन्यार्थप्रकाशकत्वात्कथं नित्यज्ञानस्वरूपतेत्याशङ्क्याहतन्विति। तथाचाऽज्ञानाऽवृतबाह्यार्थप्रकाशस्य चाक्षुषादिवृत्तिसापेक्षत्वात् इन्द्रियाऽधीनत्वेऽपिदेहेन्द्रियाऽन्तः करणप्रकाशस्य तदनधिनत्वात्स्वयंज्योतिष्ट्वश्रुत्याऽऽनुगुण्याच्च प्रतीचोऽपि स्वप्रकाशनित्यचिद्रूपता-सिद्धेरिति भावः।।

इत्थं हेतुभिः प्रतीचोऽपि सिद्धं ब्रह्मसमानस्वरूपलक्षणत्वं स्थिरीकर्तुं दर्शितहेतूपपादनेन त्रिभिः श्लोकैः प्रत्येकं सच्चिदानन्दरूपतां स्थूणानिखननन्यायेन दृढयति- स्वाप्नार्थैरिति।।

मू०।। स्वाप्नार्थैबाध्यमानैरयमपि सह यद्बाध्यमानो न दृष्टो
बाधद्रष्टा स्वयं सन्कथमिव कलयेदात्मबाधं दृगात्मा।
दृग्भेदे यन्नमानं यदपि न च समा दृग्दृशेर्गोचरो वा
यच्चाऽसौ निर्विकारस्तदयमनवधिः प्रत्यगात्मा सदात्मा।। २३।।

यत् = यस्मात्कारणात्। जागरे बाध्यमानैः = स्वप्नदृष्टपदार्थैः सह, अर्थ = स्वप्नसाक्षी प्रत्यगात्माऽपि बाध्यमानो न दृष्टः। किन्तु योऽहं स्वप्नमपश्यं स एवाऽहं जागर्मीति प्रत्यभिज्ञानादबाधित एव दृष्ट इत्यर्थः। तथा च बाधपरिशेषिते नबाधप्रसक्तिरिति तस्य सत्यतेति भावः।। बाधकाऽव्याप्यत्वादबाध्यत्वमुक्त्वा, ग्राहकाऽभावादपि तदाह-बाधद्रष्टेति। यत् = यस्मात् दृगात्मा = दृग्रूपः प्रत्यगात्मा स्वयमन्येषां बाधस्य द्रष्टा सन् आत्मनः = स्वस्य बाधं कथमिव कलयेत् = जानीयात्। बाधकाले असतो ग्राहकत्वाऽसंभवादित्यर्थः। दृगन्तरमेव तद्ग्राहकमस्त्वि-त्याशङ्क्याहदृग्भेदे इति। विषयकरणभेदाधीन एव लोके दृग्भेदप्रतिभासो न स्वतः। सच दर्पणाधीन मुखभेदप्रतिभासवन्न दृग्भेद सिद्धिक्षमः।। न च दृशमगृहणता तद्भेदः सुग्रहः। न च स्वप्रकाशदृशो मानव्याप्यता। मानफलाऽनाधारत्वात्। तत्त्वे वा अनवस्थापातादिति भावः।। अथवादृग्भेदे इति। यद्यस्मादृशो भेदे = नानात्वे उच्छेदे वा मानं = प्रमाणं नास्ति। चक्षुराद्ययोग्यत्वात्।। न च पुरुषभेदात्तत्संभवः "नान्योऽतोऽस्ति द्रष्टा" इत्यादिना दृगतिरिक्तद्रष्टृपुरुष-प्रतिषेधात्। "एष हि द्रष्टा श्रोता" इत्यादिना विज्ञानात्मन एव पुरुषत्वोक्तेः।। न च विषयप्रतिभा-

सव्यवहारव्यवस्थया दृशः पुरुषस्य वा भेदसिद्धिः। तदैक्येऽपि चक्षुरादिद्वारभेदेन रूपरसादिप्रतिभासव्यवस्थावदन्तः करणभेदादेव व्यवस्थोपपत्तेः। एवं दृगुच्छेदेऽपि मानाऽभावः। प्रतियोग्यनुल्लेखिमानेन उच्छेदाऽसिद्धेरिति भावः। दृगन्तराऽभ्युपगमेऽपि न पूर्वदृग्बाधसिद्धिः। तस्यापि प्रतियोगिग्रहणाऽसामर्थ्येन बाधाऽसाधकत्वादित्यभिप्रेत्याह-यदपीति। तत्र हेतुगर्भं विशिनष्टिसमेति। यत् = यस्मात् एकादृक् अपरस्या दृशेः गोचरः = विषयः न भवति प्रदीपद्वयवत्समत्वेन परस्परप्रकाश्यत्वाऽयोगादितिभावः।। ननु प्रतीचोऽबाधादुच्छेदो न सिध्यतु, बाल्यजागरादिविकाराऽऽस्पदत्वात्तुघटादिवत्परिच्छिन्नत्वेन तत्सेत्स्यतीत्याशङ्क्यप्रतिषेधति यच्चेति।। असौ = प्रत्यक्। यत् = यस्मात्, निर्विकारः = बाल्यजागरादेरौपाधिकत्वेन मिथ्यात्वेन चाऽऽत्मधर्मत्वाऽभावात्। "अशीर्यो न हि शीर्यते असङ्गो न हि सज्यते असितो न व्यथते नरिष्यति" इति श्रुतेः "अविकार्योऽयमुच्यते" इति स्मृतेश्चेतिभावः।। तत् तस्मात्। अनवधिः = अपरिच्छिन्नः, अयं = सर्वाऽनुभवसिद्धः प्रत्यगात्मा सदात्मा = परमार्थसत्यस्वरूप इत्यर्थः।। तथाच श्रुतिः- "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्"। नैव स्त्री न पुमानेष नैव चाऽयं नपुंसकः"। "न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्नबभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति।। ३३।।

एवमवस्थाभेदसाक्षित्वं प्रपञ्चयंश्चिद्रूपतामप्यस्य द्रढयति-यदिति।

मू०।। यद्बाल्यादिष्ववस्थास्वहमहमिति भात्येकरूपो विभिन्ना
स्वध्यक्षंजागृदर्थानिव निजमहसा यच्च सुप्तोऽपि वेत्ति।
यच्चाऽहङ्कारमोषेऽप्यपरिमुषितचित्सुप्तिसौख्यादिसाक्षी
द्रष्टुर्दृष्टेरलोपे श्रुतिरपि तदसौ प्रत्यगात्मा दृगात्मा।। ३४।।

अत्राप्येतैर्हेतुभिः प्रत्यगात्मा = दृगात्मा अपरोक्षज्ञानस्वरूप इति सम्बन्धः। यत् = यस्मात्, विभिन्नासु = वैधर्म्यशालिनीषु बाल्ययौवनाद्यवस्थासु। योऽहंबाल्ये पित्राद्यन्बभूवं स एवाऽहं यौवने स्त्रीपुत्राद्यनुभूय वृद्धो नप्तृ प्रनप्तृननुभवामि इत्यनुभवनीयविषयदेशकालाऽवस्था वैचित्र्यव्यावृत्त्योरप्यनुभविता अहमहमित्येकरूप एवाऽनुवर्तमानो विभाती = प्रत्यभिज्ञावृत्तौ स्फुरति ततःचिद्रूप इत्यर्थः।। ननु करणादिसंवलितस्यैव बाल्याद्यनुभवितृत्वात्करणाद्यधीनैव तथाप्रत्यभिज्ञा न वास्तवचिद्रूपताप्रयुक्तेत्याशङ्क्याह-अध्यक्षमिति।। यत् = यस्मात्, सुप्तः = उपरतकरणग्रामोऽपिसन्, निजमहसा = स्वयंज्योतिषा, स्वप्ने जाग्रदर्थानिव जागृदवस्थाऽनुभूत गजादिसदृशान् वासनामय पदार्थान्, अध्यक्षं = प्रत्यक्षमेव, वेत्ति = जानाति। तथा

च तत्र करणानामुपरतत्वात् "अहमनुभवामि" इत्यपरोक्षप्रत्ययस्य चाऽविशिष्टत्वान्न-करणाऽधीना तथाप्रत्यभिज्ञा। नापिकरणानामापरोक्ष्यप्रयोजकता। तत्रैव व्यभि-चारादित्यात्मैव अपरोक्षचिद्रूपः तत्साक्ष्यवश्यमभ्युपेय इति भावः।

ननु स्वप्ने अहङ्कारसंवलितत्वादहङ्कार प्रयुक्तैव बाल्यस्वप्नादिप्रत्यभिज्ञा-ऽस्त्वित्याशङ्क्याह-यच्चेति।। यत् = यस्मात्, अहङ्कारस्य मोषे = लयेऽपि अपरिमुषिता = अविनष्टा, चित् = स्वरूपचैतन्यं यस्य स तथाविधोऽसौ सुप्तेः = सुषुप्तेः तत्रत्यस्वरूपसौख्यस्य आदिपदादज्ञानस्य च साक्षी = साक्षाद्द्रष्टा भवतीति शेषः। तथा च 'सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति प्रत्यभिज्ञायां सुषुप्तिकालाऽवृत्तेरहङ्कारस्याऽपि न प्रयोजकतेत्यवस्थात्रयसाक्ष्यात्मैव तथाऽभ्युपेय इति भावः।। ननु सुषुप्तौ ज्ञानमेव नाऽस्ति, ज्ञानसामान्यहेतोस्त्वङ्मनोयोगस्य तदानीमनभ्युपगमात्पुरीतन्मनोयोगस्य प्रतिबन्धकत्वाद्वा। जीवस्य नित्यज्ञानसद्भावे तु नास्ति प्रमाणमिति प्रलपन्तं निरस्यन्नाह - द्रष्टुरिति।। सर्वव्यवहारद्रष्टुरात्मनः स्वरूपभूतदृष्टेः, अलोपे = अविनाशे "यद्वै तन्नपश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्" इत्यादिश्रुतिरस्त्येवमानं। ज्ञानशून्यत्व एव तु प्रत्युत नास्ति मानं। सुषुप्तेरेवाऽप्रसिद्ध्याऽऽपत्तेरितिभावः।। अपि शब्दः सुप्तोत्थितस्य सुखमहमस्वाप्समित्याद्यनुसन्धानमपि तत्र प्रमाणमिति समुच्चयार्थः।। तत् = तस्मात् प्रत्यगात्मनश्चिद्रूपत्वं निरूढमिति भावः।। ३४।।

तथैव परम प्रेमास्पदत्वमपि प्रपञ्चयन्प्रतीच आनन्दरूपतामपि स्थिरीकरोति-यच्चेति।।

मू०।। यच्चाऽऽत्मान्यद्ब्रुवाणं प्रियमिति तव तद्रोत्स्यतीति ब्रवीति
प्राज्ञेनैक्यं सुषुप्तौ निगदति च यदाऽऽनन्दसंविन्मयेन।
इच्छा यत्स्वाऽनुकूले त्रिजगति विदिता स्वप्रतीपे जिहासा
यच्च स्यां सर्वदेति स्पृहयति तदसौ प्रत्यगात्मा सुखात्मा ।। ३५।।

यत् = यस्मात् श्रुतिः "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति आत्मनः परमप्रेमाऽऽस्पदत्वमुक्त्वा तत्स्थिरीकरणाय श्रुतिः"सयोऽन्यदात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यति" इति वाक्यशेषे आत्माऽन्यत्प्रियमस्ति तथा विधमिति ब्रुवाणं पुरुषं प्रति तव तत्प्रियमनात्मवस्तु रोत्स्यति = नङ्क्ष्यतीति प्रतिब्रूयात् आत्मैकप्रियवादी इति ब्रवीति व्यक्तं वदति चकारात् "आत्मानमेव प्रियमुपासीत आत्मनस्तु कामाय सर्वंप्रियं भवति" इत्यादि श्रुत्यन्तरस्य तथैव सर्वाऽनुभवस्य च सङ्ग्रहः। सुषुप्तौ प्रतीचो निरतिशयाऽऽनन्द-

रूपत्वेन प्रसिद्धब्रह्मस्वरूपेण ऐक्यप्राप्ति श्रुतेरपि वस्तुतस्तत्स्वभावतेत्याह-प्राज्ञेनेति।। यत्-यस्माच्च, सुषुप्तौ आनन्दसंविन्मयेन = परमाऽऽनन्दाऽऽत्मकज्ञानप्रचुरेण प्राज्ञेन = ईश्वरेण सह तस्मिन्नुपाध्यप्ययेन सम्पन्नस्य प्रतीचः ऐक्यं = अत्यन्ताऽभेदं चकारात्तदानीमौपाधिकसर्वदुःखनिवृत्तिं च निगदति = व्यक्तं वदति श्रुतिः "सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति" इति तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति इति च। तथा यत् = यस्मात् त्रिजगति = *तात्स्थ्यात्ताच्छब्द्यं त्रैलोक्यस्थप्राणिष्वित्यर्थः। स्वाऽनुकूले = स्वोपकारके वस्तुनि, इच्छा = रागः, स्वप्रतीपे = स्वप्रतिकूले च जिहासा = द्वेषश्च विदिता = सर्वानुभवप्रसिद्धा ततोऽप्यस्य तथात्वं। सुखोपयुक्ते हि वाञ्छा, सुखविरोधिनि च लोके जिहासा प्रसिद्धेत्युक्तम्। अनपाये इच्छादर्शनादपाये द्वेषदर्शनाच्च तथात्वमित्याह-यच्चेति।। यत् = यस्माच्च अहं "सर्वदैवस्यां मा कदाचिदपि माभूवम्" इति सर्वोऽपि स्पृहयति। सुखाऽनपाये हि तथा प्रीतिः, तदपाये द्वेषश्च लोके प्रसिद्ध इति ततोऽप्यस्य सुखरूपत्वमित्यर्थः। चकारादौदासीन्याऽवस्थायामात्माऽऽनन्दाऽनुभवस्य सर्वसिद्धस्य सङ्ग्रहः। यथाहुः-

"न काऽपि चिन्ता मेऽस्त्यद्य सुखमासे इति ब्रुवन्।
औदासीन्ये निजानन्दभानं वक्त्यखिलो जनः।।" इति।।

इत्थं प्रतीचः सुखाऽऽत्मत्वं निरूढमिति भावः।। ३५।।

एवं पूर्वपरिच्छेदे निर्णीतमपि प्रतीचः सच्चिदाऽऽनन्दरूपत्वं, तत्पदार्थेन सह लक्षणैक्यव्यवस्थापनाय पुनः प्रपञ्चितं। अद्वयत्वमपि तस्याऽवस्थात्रयस्य द्रष्टृदृश्य साक्षिसाक्ष्याऽवध्यवधिमत् दुःखिप्रेमास्पदत्व लक्षण तापनीयोपदर्शित चतुर्विधाऽन्वयव्यतिरेकैर्मिथ्यात्वनिर्णयात्सिद्धमेवेति तत्त्वंपदार्थयोः शोधितयोरखण्डै-करस्येनाऽन्वये योग्यताऽवधारणे असंभावनारूपप्रतिबन्धकाऽपगमान्महावाक्या-नामखण्डोऽर्थः सुप्रबोध इत्याह इत्थमिति।।

मू०।। इत्थं मीमांस्यमाने श्रुतिगुरुवचनैर्युक्तिभिश्चाऽनुभूत्या
शश्वजीवेशतत्वे निपुणमधिगते वस्तुतो लक्षणैक्ये।
निष्प्रत्यूहं निजार्थं समधिगमयितुं तत्वमस्यादिवाक्या-
न्याद्यन्ताऽवेक्षणाद्यैरधिगतहृदयान्यञ्जसैव क्षमन्ते।। ३६।।

इत्थं = दर्शितप्रकारेण, श्रुतिगुरुवचनैः = श्रुतिवाक्यैः गुरूणां व्याख्यावचनैः, युक्तिभिः = वादरायणाद्याऽऽचार्यपरम्परोपदर्शितयुक्तिभिः, अनुभूत्या = स्वानुभवेन,

*तत्स्थपर तच्छब्दात् इति पाठ।

चकारात् विद्वत्सतीर्थ्यसंवादपरिशीलनादिना च, शश्वत = निरन्तरं मीमांस्यमाने = विचार्यमाणे ''卐गुप्तिज् किद्भ्यः सन्'' ''इत्यतः सन् इत्यनुवर्तमाने'' ''मान्वध'' इत्यादिना मानेर्जिज्ञासायां सनि कर्मणि शानच्। जीवेशयोः = प्रत्यग्जगत्कारणयोः तत्वे = वास्तवस्वरूपे विषये, वस्तुतः = परमार्थतः, लक्षणैक्ये = स्वरूपलक्षणाऽभेदे, निपुणं = निरुढं यथा स्यात्तथा अधिगते = निश्चिते सति, आद्यन्ताऽवेक्षणाद्यैः = उपक्रमोपसंहारपरिशीलनादिभिः, अधिगतहृदयानि = निश्चिततत्तात्पर्यकाणि तत्त्वमस्यादिमहावाक्यानि = अञ्जसा = शीघ्रमेव परमतात्पर्यविषयीभूतं निजार्थं = स्वप्रतिपाद्यमखण्डार्थं, समधिगमयितुं = सम्यक्बोधयितुं सकार्याऽविद्योच्छेदक्षममात्मतत्त्वाऽपरोक्षज्ञानं जनयितुमित्यर्थः।। क्षमन्ते = समर्थानि भवन्त्येव। पटुतराणां सा धनानां प्रतिबन्धकाऽपाये कार्ये क्षेपाऽयोगादितिभावः।। ३६।।

पदेभ्यः प्रतीयमानाऽर्थेषु विवक्षितवाक्यार्थबोधोपयोगाऽनुपयोगाभ्यां कतमोपादानं कतमहानमिति विमृश्य विशेषोपादानाय आदौ प्रकरणप्रदर्शनपूर्वकं तत्वंपदवाच्यलक्ष्यार्थान् असिपदार्थं च दर्शयति–प्रागिति।।

मू०।। प्राक्सर्गाद्यत्सदासीदसृजदथ च यत्तेज आदि प्रविष्टं
जीवस्तस्मिन्यदासीद्यदखिलमनृतं नामरूपं वितेने।
तत्सत्तच्छब्दवेद्यं त्वमिति निगदितः श्वेतकेत्वाऽऽख्यजीवो
वाक्यार्थं नित्यसिद्धं गमयदसिर्पदं वर्तमानं ब्रवीति।। ३७।।

''सदेव सोम्य'' इत्युपक्रमात् सर्गात् = जगत्सृष्टेः प्राक् यत्सदेव वस्तु आसीत्। अथ = अनन्तरं च यत् वियद्वायुसर्गोत्तरं तेजआदि = तेजोऽवन्नाऽऽख्यं असृजत्। तस्मिन् = स्वसृष्टभूतवर्गे देहाकारपरिणते, प्रविष्टं सत् प्राणधारणोपाधिना प्रथमजो हिरण्यगर्भाख्यो जीव आसीत्। तथाविधं च भूत्वा यत् अखिलं = समस्तं अनृतं = वाचारम्भणमात्रं स्वतस्त्वपरमार्थभूतं नामरूपात्मकं जगत्, वितेने *वितस्तार। तत् = तादृशं सद्वस्तु, तत्त्वमसिवाक्यस्थतच्छब्देन वेद्यं = प्रतिपाद्यं, सर्वनाम्नस्तच्छब्दस्य उपस्थितधर्मवत्परोक्षार्थे शक्तत्वादुपस्थितजगत्कारणत्वादिविशिष्टरूपेण शक्त्या, पारमार्थिकसद्रूपेण तु लक्षणयेत्यर्थः। युष्मच्छब्दस्य बुद्धिस्थाधर्मवत्सम्बोध्यचेतन वाचित्वात् त्वंपदेन श्वेतकेत्वाख्यः = देहेन्द्रियाऽहङ्कारादिविशिष्टो जीवः शक्त्या, लक्षणया तु अवस्थात्रयसाक्षिचिन्मात्रस्वरूपः

卐गुप्तिज् किद्भ्यः सन्।। पा० अ० ३ पा० १ सू० ५।। मान वध दान शानभ्यो दीर्घश्चाभ्यासस्य। अ० ३ पा० १ सू० ६। सूत्र द्वयेभ्यः सन् स्यान्मानादीनामभ्यासस्येकारस्य दीर्घश्च।।

*विस्ततार इति पा०।।

प्रत्यगात्मा निगदित इत्यर्थः। असीति पदं तु सत्तार्थकाऽसधातुत्तरवर्तमानत्वाऽऽश्रयादिबोधकलण्मध्यमपुरुषान्तत्वात् तत्त्वंपदसङ्घटनलभ्यं वाक्यार्थं साध्यविलक्षणत्वान्नित्यसिद्धं गमयत् = बोधयत् सत् वर्तमानं = प्राक्सिद्धत्वे सत्यसमाप्तस्थितिकत्वरूपवर्तमानताऽऽस्पदं ब्रवीति = व्यक्तं वदतीति पदार्थानां स्थितिरित्यर्थः।। ३७।।

पदार्थस्थितिं प्रदर्श्याऽनभिमतेष्वन्वयप्रकारेषु दोषोद्घाटनपूर्वकं निर्दुष्टमभिमतं प्रकारं परिशेषयति- बाधेति।।

मू०।। बाधाऽध्यासविशेषणैक्यविषयं नाम्नोश्चतुर्धा मतं
सामानाधिकरण्यमाद्यमिह न व्यर्थोद्यमा स्याच्छ्रुतिः।
ध्यानाद्यश्रवणादनित्यफलतादोषाच्च नाऽध्यासधीः
तादात्म्यं न विरुद्धयोरिति बलाद्वस्त्वैक्यपक्षस्थितिः।। ३८।।

न तावदत्र महावाक्ये पदानां वैयधिकरण्येन सङ्घटनप्रसक्तिः। नामाऽर्थयोरभेदेनैवाऽन्वय इति व्युत्पत्तेः। अतः सामानाधिकरण्येनैव घटनं वाच्यम्। (१) भिन्नप्रवृत्तिनिमित्तकत्वे सति एकार्थप्रतिपादकत्वं हि शब्दानां सामानाधिकरण्यम्। तच्च लोके नाम्नोः = समानविभक्तिकप्रातिपदिकयोः, चतुर्धा = चतुर्विधं विदुषां मतं = संमतमित्यर्थः।। चातुर्विध्यमेव विभज्य दर्शयन्विशिनष्टि- बाधेत्यादिना।। (२)पूर्वोत्पन्नमिथ्याप्रत्ययस्य उत्तरेण यथार्थप्रत्ययेन विषयाऽपहारो बाधः। यथा - यत्र मन्दाऽन्धकारे अपरिशीलितचर स्थाणुचक्षुः संप्रयोगे चोरभ्रमात् "चोरोऽयम्" इति भीत्या क्रोशन्तं कंचित्प्रति निर्ज्ञातस्थाणुरन्य आह - 'न्चोरोऽयं स्थाणुः' इति। तत्र चोरत्वेन प्रतीतमनूद्य स्थाणुविधाने पूर्वोत्पन्नचोरबुद्धिविषयस्य

(१) भिन्न प्रवृत्ति निमित्तकत्वे सत्येकार्थ प्रतिपादकत्वं हि शब्द सामानाधिकरण्यम्।। अत्र विशेषणांशानुपादाने पर्यायशब्दानां घटः कलश इत्यादीनामपि सामानाधिकरण्यं स्यात्तच्चानभ्युपगतं सहप्रयोगापत्तेः तद्वारणाय विशेषणभागोपादानम्। तावन्मात्रस्य लक्षणत्वे घटः पट इत्यादीनामपि सामानाधिकरण्यं स्यात्तच्च लोकविरूद्ध मतो विशेष्यांशोपादानमित्यर्थः।।

(२) पूर्वोत्पन्नमिथ्या प्रत्ययस्योत्तरेण यथार्थ प्रत्ययेन विषयापहारो बाध इति। अत्र विषयापहारो बाध इत्येतावन्मात्रोक्ते मुद्गरप्रहारादि जन्य घटादि नाशेपि बाधव्यवहारापत्तिदोषस्तद्वारणाय प्रत्ययेनेत्युक्तम्। तावन्मात्रोक्ते रजतभ्रमोत्तर जायमानेन भोङ्गभ्रमेण सम्पद्यमान रजतनिवृत्तौ बाध व्यवहारापत्तिस्तद्वारणाय यथार्थेति प्रत्ययविशेषणम्। यथार्थ प्रत्ययेन विषयापहारो बाध इत्युक्तौ यथार्थ प्रत्ययोत्तर जायमाने बुद्धिपूर्वक घटादि वस्तुनाशे बाध व्यवहारः स्यात्तद्वारणायोत्तर यथार्थ प्रत्ययेनेति। सुखदुःखाद्युत्पत्त्यनन्तर जायमानेन दुःख तज्ज्ञानादिनोत्पद्यमान सुखादिध्वंसे बाध व्यवहारापत्तिस्तद्वारणाय पूर्वोत्पन्नमिथ्या प्रत्ययस्येत्युक्तम्।

स्थाणुबुद्ध्या अपहारात् बाधविषयं पदयोः सामानाधिकरण्यं। अतस्मिंस्तद्बुद्धिरध्यासः। स द्विविधः दोषज आहार्यश्चेति। तत्राऽऽद्यो भ्रान्तिज्ञानरूपः। द्वितीयस्तु भेदादिग्रहेऽपि इच्छया क्रियमाणत्वान्मानसक्रियारूपः। स त्रिविधः- शास्त्रकृतः साङ्केतिको गौणश्चेति। तत्राऽऽद्यो द्विविधः- संपदुपास्तिः प्रतीकोपास्तिश्चेति। तत्राऽऽरोपाधिकरणं बुद्ध्या स्वेनरूपेण तिरोभूय आरोपणीयाऽऽत्मनैव सम्पाद्याऽनुसंधानलक्षणा आद्या। यथा- गुरौ मनुष्य बुद्धि परित्यागेन देवताबुद्धिः। यथा वा पञ्चाग्न्यादिविद्यासु द्युपर्जन्यपृथिवीपुरुषयोषिदादिषु आहवनीयादिबुद्धिः। आरोप्यविशेषित-स्याऽऽरोपाऽधिकरणस्य प्राधान्येनोपास्तिः द्वितीया। यथा- "य एवाऽसौ मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे" "य एवाऽसौ तपति तमुद्गीथमुपासीत" इति। अत्रहि "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथाऽवयवस्य ओङ्कारस्यैवोपास्य-त्वेनोपक्रमात्प्रतीकस्य प्राधान्यमिति। लिप्यादावयंककार इत्यादिवृद्धसङ्केतकृतत्वात् साङ्केतिकः। सिंहो माणवक इत्यादौ मुख्यार्थ गुणयोगनिमित्तत्वादगौणः। येषु चाऽन्यत्राऽन्यतादात्म्याऽध्यासनिमित्तत्वादध्यासविषयं पदयोः सामानाधिकरण्यं। यत्र ह्येकपदोत्पन्नसामान्यबुद्धिः पदान्तरेणाऽविवक्षितांशव्यावर्तनेन स्वार्थसंसृष्टे विशेषेऽवस्थाप्यते, यथा- 'नीलमुत्पलं, दण्डी पुरुषः' इति तत्र विशेषणविषयं सामानाधिकरण्यम्। एवम् "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यत्रापि सर्ववेदव्याप्योङ्कारः उद्गीथपदेन उद्गीथावयवोङ्कारे व्यवस्थाप्यत इति विशेषणविषयमेव सामानाधिकरण्यम्। यत्र तु पदानि तात्पर्याऽविषयवाच्यार्थांऽशपरित्यागेन परस्पराऽर्थ-विरूद्धांऽशपरित्यागेन वा असंसृष्टवस्तुमात्रपराणि तत्रैक्यविषयं सामानाधिकरण्यं। यथा - 'प्रकृष्टप्रकाशश्चन्द्रः, सोऽयं देवदत्तः इति च। उपपादयिष्यते च उभयत्रापि वस्तुमात्रपरत्वम्। दर्शितेचाऽस्मिन्सामानाधिकरण्यचातुर्विध्ये आद्यं बाधविषयं सामानाधिकरण्यं इह = एषु तत्त्वमसीत्यादि महावाक्येषु न संभवति। तथाहि सति श्रुतिः = मोक्षोपायोपदेष्ट्री, व्यर्थोद्यमा = व्यर्थः = पुरुषार्थशून्यः उद्यमः = तात्पर्येण प्रवृत्तिलक्षणः उद्योगो यस्याः तथाविधा स्यात् = भवेत्। बाधायां सामानाधिकरण्यं हि प्रकृते ब्रह्मबाधेन जीवपरिशेषणाज्जीवबाधेन ब्रह्मपरिशेषणाद्वा। आद्ये, निर्दुःखनिरतिशयाऽऽनन्दस्वरूपब्रह्मण एव परमपुरुषार्थ-रूपत्वेन तद्बाधे ज्ञानफलाऽपरिशेषात् व्यर्थोद्यमत्वम्।। द्वितीये तु जीवस्य मोक्षभाजः तत्त्वतोऽप्यपरिशेषात्स्वीयपुरुषार्थाऽनुपयुक्ते मोक्षशास्त्रे कस्यापि प्रवृत्तिरेव न स्यात्। प्रत्युत स्वात्मघातिनि तस्मिन्प्रद्वेष एव स्यादित्युभयथापि श्रुतेर्व्यर्थोद्यमत्वमित्यर्थः।

अध्यासपक्षं निरस्यति- ध्यानादीति। "वाचं धेनुमुपासीत" "मनो ब्रह्मेत्युपासीत" "आदित्यो ब्रह्मेत्यादेशः" इत्यादिष्विव यद्यत्रोपास्त्यादिपदेन

ध्यानादिकंविधेयमश्रोष्यत्, तदा वाक्यस्य विधेयैकनिष्ठत्वात्पदार्थैक्ये तात्पर्याऽभावादाध्यासिकैक्येनापि ध्यानसिद्धेः मुख्यार्थसङ्कोचाऽयोगात् अध्यासेनैव सामानाधिकरण्यमुपपाद्येत। न चात्र ध्यानादि श्रूयते, वाक्यस्य वस्तुमात्रतात्पर्य-स्योपपादितत्वाच्च। ध्यानादिकल्पनेश्रुतहान्यश्रुतकल्पनादोषप्रसङ्गात। अतो ना-ऽध्यासस्य धीः = बुद्धिः, अत्रयुक्तेत्यर्थः।। ननु "तमैवैकं जानथ आत्मानं" आत्मेत्येवोपासीत" "मन्तव्यो निदिध्यासितव्यः" इत्याऽऽत्मविद्याप्रकरणेऽपि क्वचिद्ध्यानादिश्रवणमस्त्येवेत्याशङ्क्याह - अनित्यफलतादोषाच्चेति।। ध्यानस्य मानसक्रिया विशेषरूपत्वात्क्रियाफलानां चाऽनित्यत्वनियमादित्यर्थः। क्वचिद्ध्यानादिश्रवणं तु "द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यत्र दर्शनोद्देशेन साधनानां विहितत्वात् तदेकपरत्वविधानार्थं, न तु महावाक्यस्य स्वातन्त्र्येण ध्यान विधिपरत्वप्रापकमिति भावः।। चकारोऽप्रसिद्धाऽसाधारण-स्वरूपस्याऽन्यत्राऽऽरोपयितुमशक्यत्वात् महावाक्यादेवतत्प्रसिद्धौ तावतैव वाक्यस्य चरितार्थत्वेन अध्यास परत्वप्रयोजनयोरभावादिति युक्त्यन्तरसमुच्चयार्थः। विशेषणपक्षं निरस्यति- तादात्म्यमिति।। तत्त्वं पदवाच्ययोः असंसारित्वसंसारित्वरूपविरूद्ध धर्म वैशिष्ट्यात्विरुद्धयोस्तावत्तादात्म्यं न संभवति। अन्यतरपदलक्षणा पक्षस्य प्रत्याख्यास्यमानत्वात् पदद्वयलक्ष्ययोरपि स्वरूप लक्षणैक्यव्यवस्थापनात् भेदकारणाऽभावाच्च अत्यन्ताऽभिन्नयोः अत एव भेदसहिष्ण्वभेदलक्षण तादात्म्म-विरुद्धयोः तादृशं तादात्म्यं न संभवतीत्यर्थः।।

ननु उपहितशुद्धयोरस्त्येव तादात्म्यं, यथा-घटाकाशो महाकाश एवेति। तथा कार्यकारणोपाध्योस्तादात्म्यात् तदुपहितयोरपि जलतरङ्गाऽऽकाशयोरिव तादात्म्यमस्त्येवेति त्वंपदवाच्यार्थस्य तत्पदलक्ष्येण तत्पद वाच्येन वा सहाऽन्वये न कश्चिद्दोषः।। विरोधश्च किञ्चिज्ज्ञत्वादिकृतोऽत्यन्तैक्यमात्रविघाती न तादात्म्यस्य। अन्यथा अल्पत्वमहत्त्वाभ्यां विरोधात्समुद्रतरङ्गयोरपि अतादात्म्याऽऽपत्तेरिति चेत् न। "वाचारम्भणंविकारो नामधेयम्" "एकमेवाऽद्वितीयमैतदात्म्यमिदंसर्वम्" इत्यादिना उपाध्यनृतत्वोपपादनपूर्वकस्य अभेदोपदेशस्य औपाधिकभेदघटित-तादात्म्यपरत्वाऽयोगात्, उपाधिनिरासे तत्प्रयुक्तभेदस्यापि निरस्तत्वात्। तथा वाक्यार्थ ज्ञानस्य पुरुषार्थाऽनिर्वाहकत्वात् "एकधैवाऽनुद्रष्टव्यम्" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक् पश्यंस्तानेवाऽनुविधावति" "नाऽत्र काचन भिदाऽस्ति।" "उदरमन्तरं कुरुते अथ तस्य भयं भवति" सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेद" इति अनेकशो भेदांशदर्शनस्य प्रतिषिद्धत्वात् अनर्थाऽनुबन्धित्वकीर्तनाच्चेति गत्यन्तराऽभावात्

चतुर्थकल्प एवाऽवतिष्ठत इत्यभिप्रेत्याह- इति बलादिति। इति दर्शितपरिशेषा-दुपक्रमादितात्पर्यलिङ्गबलाच्चेति वस्त्वैक्यपक्षस्य = अखण्डैकरसवस्तुमात्रप्रतिपादन विषयं सामानाधिकरण्यमिति कल्पस्य प्रकृते स्थितिः = प्रतिष्ठितत्वमित्यर्थः।। ३८।।

अखण्डैक्यमेव महावाक्यार्थ इत्युक्तम्। तत्किं तत्त्वंपदवाच्यार्थयोः? उत वाच्यलक्ष्ययोः? अथलक्ष्ययोरेव? इति संशयः। लक्षणापक्षेऽपि सा किं गङ्गायां घोष इत्यत्रेवाऽत्यन्तंजहत्स्वार्था? उत यष्टीः प्रवेशयेत्यत्रेव स्वार्थ विशिष्टाऽर्थान्तरविषया?, उत सोऽयं देवदत्त इत्यत्रेव जहदजहत्स्वार्था? इति विप्रतिपत्तिः। यदापि तृतीया तदापि सा किं तत्पदस्यैव? उत त्वं पदस्यैव? अथ उभयोरपि? इति संशये विमृश्य निर्दोषं पक्षं व्यवस्थापयति- अभिधेयमत्रे-त्यादिश्लोकत्रयेण।।

मू०।। अभिधेयमत्र पदयोरसङ्गतं न
विरुद्धधर्मियुगमैक्यमेति यत्।
उपयोग मूलघटनाद्ययोगतो न
परस्परार्थघटितेऽपि लक्षणा।। ३९।।

अभिधेयमिति। अत्र = अस्मिन्महावाक्ये तत्त्वंपदयोः अभिधेयं = वाच्यं तेजोऽबन्नादि सर्वप्रपञ्चोपादानकर्तृ श्वेतकेत्वाख्यदेहादिसंवलित चेतनं च परस्परं असङ्गतं = न यथोक्तप्रकारेणान्वययोग्यम्। तत्कुतः? यत् = यस्मात् विरुद्धं = (प०टि०)(१)निरवच्छिन्नवृत्तिक परस्पराऽत्यन्ताऽभावव्याप्यधर्मविशिष्टं धर्मियुगं = वस्तुद्वयं, ऐक्यं = अभेदं नैति = न प्राप्नोति। तद्धर्माणां च सार्वज्ञ्यत्व किञ्चिज्ज्ञत्व, नित्यमुक्तत्व बद्धत्व, सुखैकरसत्व दुःखित्व, सर्वनियन्तृत्व पारतन्त्र्यादीनां परस्परविरुद्धत्वादित्यर्थः। तथा च तयोस्तादात्म्यमपि स्वरसतो दूरे, किमङ्ग! पुनरत्यन्तैक्यमिति भावः। अस्तु तर्ह्यन्यतरपदस्य लक्षणा, सापि प्रतीतस्य मुख्यार्थस्य विनाबाधकं त्यागाऽयोगादजहत्स्वार्थैव। तत्राह-उपयोगेति। अत्र पदयोः परस्परा-ऽर्थघटिते एकपदार्थविशिष्टाऽपरपदार्थे लक्षणा न संभवति। कुतः? उपयोगस्य मूलघटनादेश्चाऽयोगतः। साक्षात्परम्परया वा पुरुषार्थपर्यवसानमुपयोगः, मूलघटना = उपक्रमाऽऽनुकूल्यं, आदिपदात् तात्पर्यलिङ्गान्तराऽऽनुकूल्यसंग्रहः।

(१) निरवच्छिन्न वृत्तिक परस्परात्यन्ताभाव व्याप्य धर्म विशिष्टमिति।। निरवच्छिन्न अवच्छेदक धर्म शून्यावृत्तिर्यस्य स तथा व्याप्यवृत्तिरिति यावत्। व्याप्यवृत्तिर्यो जीवधर्मिणी वर्तमानेश्वरात्यन्ता भावस्तथेश्वरे च धर्मिणि वर्तमानो जीवात्यन्ताभावस्तयोरीश धर्मिकात्यन्ताभाव व्याप्य धर्माः। सर्वज्ञत्वादयस्तथा जीवधर्मिकात्यन्ता भाव व्याप्य धर्मा अल्पज्ञत्वादयस्तद्विशिष्टमित्यर्थः।।

तेषामयोगतः अभावादित्यर्थः।। अथवा। उपयोगः = आकाङ्क्षा मूलं = लक्षणाबीजं तात्पर्यं, घटना = लक्षणानिर्वाहकः सम्बन्धविशेषः। आदिपदात् लक्षणाफलं तेषामयोगतः असंभवादित्यर्थः। तथाहि - न तावत्तत्पदस्य यष्टिपदस्य यष्टिधरेष्विवजगत्कारणवति लक्षणा। तद्धि जगद्रूपमेव किञ्चित् स्यात्? जीवो वा? आद्ये समानविभक्तिकपदयोर्भेदेनाऽन्वये असामर्थ्यात् अभेदस्य च बाधितत्वेन निराकाङ्क्षत्वम्।। द्वितीये वैशिष्ट्यनियामक सम्बन्धविशेषाऽपरिचयादव्यवस्था। न तावत्सम्बन्धसामान्येन यत्किञ्चित्सम्बन्धेन वा सर्वकारणवानहमिति वाक्यार्थोऽत्राऽभिप्रेतः। तथा निश्चयेऽपि पुरुषार्थाऽदर्शनात् तस्य स्वाऽज्ञानसंसारा-ऽविरोधित्वेन मोक्षोपयोगस्य कल्पयितुमप्यशक्यत्वात्। न चाऽदृष्टद्वाराऽग्रे तत्कल्पनं, "ब्रह्म वेद ब्रह्मैव भवति" "तथा विद्वान्पुण्यपापाद्विमुक्तो निरञ्जनः परमं साम्यमुपैति" "अभयं वै जनक प्राप्तोसि" "तरति शोकमात्मवित्"

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।"

इत्यादि श्रुतिस्मृतिभिर्ज्ञानस्याऽज्ञाननिवर्हणलक्षणदृष्टद्वारैव इहैव पुरुषार्थहेतु-त्वनिर्णयात्। अत एव न सम्बन्धविशेषेणापि सोऽभिप्रेतः। लक्षणानियामक तादृशसम्बन्धविशेषाऽपरिचयाच्च। नचांऽशांशित्व, नियम्यनियामकत्व, स्वस्वामित्वादि सम्बन्धविशेषेणैव तद्वैशिष्ट्यबुद्ध्या इष्ट सिद्धिः। अंशाऽशित्वस्य निरस्तत्वात्। कर्मकाण्डप्रामाण्याऽनुरोधेन "सर्वस्य वशी सर्वस्येशानः" "एष सेतुर्विधरणः" इत्यादि श्रुत्या च कर्मफलदातुः सर्वनियन्तुः स्वामिन ईश्वरस्य ज्ञातत्वेन आ गोपालाङ्गनं प्रसिद्धत्वेन च तथा तद्बोधनाय सपरिकरं नवकृत्वः तत्वमसीत्युपदेशा-ऽनपेक्षणात्। न च तादृशस्वामिकोऽहमिति ज्ञानमात्रात्पुरुषार्थो दृश्यते। तदुत्तरकालमप्याऽऽस्तिकानां तदनुग्रहाय तपक्लेशसंयमादियत्नदर्शनात्। पुराणा-ऽऽख्यायिकासु च बहुशः साक्षात्कृतेश्वराणामपि तमेवेश्वरं गुरूकृत्य तत्त्वबुभुत्सया श्रवणमननादिना पश्चात्तत्त्वनिर्णयेन मुक्तिश्रवणाच्च। इत्थमेव त्वंपदस्याऽपि जीववति लक्षणाप्रसक्तिर्निरसनीया। अद्वितीयवस्तूपक्रमः एकविज्ञानात् सर्वविज्ञानप्रतिज्ञा, कार्यमात्रस्य वाचारम्भणत्वोपपादनं, अविकृतस्यैव ब्रह्मणो जीवभावेन उपाध्यनुप्रवेश-श्रवणं च नैकतरस्मिन्नपि पक्षे उपपद्यत इति।। ३९।।

माभूत्तर्ह्यजहत्स्वार्था। जहत्स्वार्थैव तु सा अत्राऽन्यतर पदयोरुभयोर्वाऽस्तु। तत्राह-नचेति।

मू०।। नच गाङ्गतीरमिव वाच्यसङ्गि वा
प्रथितं तृतीयमिह योग्यमन्वये।
पदयोर्नचैकतर भागलक्षणाऽ
ध्यवसानलिङ्ग मुपपद्यतेऽपि वा।।४०।।

यथा 'गङ्गायां घोषः' इति वाक्ये पदद्वयवाच्यार्थाऽपेक्षया तृतीयं तीरं गङ्गापदवाच्यप्रवाहेन सङ्गि = संयुक्तं तात्पर्यविषयीभूतघोषाऽऽधारताऽन्वये योग्यं प्रसिद्धं, तथेह महावाक्ये तत्त्वंपदद्वयाऽन्यतरवाच्यार्थेन सङ्गोऽस्याऽस्तीति सङ्गि प्रसिद्धतरसम्बन्धेन सम्बद्धं वाच्यार्थद्वयाऽपेक्षया तृतीयं षड्विधलिङ्गाऽवगताऽखण्ड-वस्तुगोचर तात्पर्यविषयाऽऽत्यन्तिकैक्यविषयेऽन्वये योग्यं = निर्वाहकं किञ्चिद्वस्तु न प्रथितं = न प्रसिद्धं। चकारस्तादृशलक्षणानिर्वाहक शक्यसम्बन्धविशेषस्या-प्यप्रसिद्धिसमुच्चयार्थः।। ननु तर्ह्यन्यतर पदस्यैव जहदजहत्स्वार्थाख्याभागलक्षणाऽस्तु, नतु प्रदद्वयस्यापि। सर्वलाक्षणिकवाक्यस्य अननुभावकत्वादित्याशङ्क्याह- पदयोरिति।। तत्त्वं पदयोरेकतरस्य = तत्पदस्य त्वंपदस्यैव वा अस्यैव नियमेन भागलक्षणेत्यध्यवसाने निर्णये, लिङ्गं = असाधारणं गमकं नचाऽस्ति। सर्वतात्पर्यलिङ्गानां निर्विशेषैक-निष्ठत्वस्य उपपादितत्वात्। न केवलं गमकाऽभाव, अपित्वनुपपद्यमानत्वमपीत्याह- उपपद्यतेऽपिवेति।। तथाहि- यदि तत्पदार्थ एव सा, तर्हि यदि चिदंशो हीयेत तदा चैतन्यघटितसार्वज्ञ्यादिधर्माणां पृथगवस्थानात् मृदादिवदचेतनं जगदुपादानं शिष्येत, नचेतनं जगदुपादानं शिष्येत। नच तस्य चेतनजीवाऽभेदो, नवा जगदनुपादानजीवोपाध्यभेद इति नान्वयोपपत्तिः।। एवं जडांशहानेन चैतन्यपरिशेषेऽपि शुद्धस्य तस्य उपाधिकलुषजीवेन अभेदाऽनुपपत्तिः। नच चैतन्यांशएवाऽभे-दान्वयोऽस्त्विति युक्तम्। तस्य पदार्थैकदेशत्वात्। पदार्थः पदार्थेनैवाऽन्वेति नतु पदार्थैकदेशेनिति व्युत्पत्तेः। नच नीलो घट इत्यत्र घटत्वपरिहारेण शुद्धघटएव योग्यतया नैल्याऽन्वयवत् विशेषणोपाधिपरित्यागेन प्रत्यकचैतन्यांशएवाऽभेदेन तस्याऽन्वयोऽस्त्वति शंङ्क्यम्। अन्योन्यतादात्म्याऽध्यासेन संवलित रूपस्यैव अन्योन्यविनिमयाऽध्यस्तकर्तृत्वभोक्तृत्वादिधर्मविशेष्यतया चैतन्यमात्रस्यविशेष्यत्वा-भावात्। एतेन च "विनैव लक्षणा विशेष्यमात्राऽभेदेन महावाक्याऽन्वयोपपत्तिः" इति परिभाषाकृदुक्तिः प्रत्युक्ता।। तथाऽन्वयबोधस्याऽविरोधेन संसाराऽ-निवर्तकत्वाच्च। नच त्वंपदवाच्यमेव तत्पदलक्ष्यचिति अन्वेतु, दण्डिपुरुषस्य शुद्धपुरुषेणेव संवलितस्य शुद्धेन तादात्म्यादिति वाच्यम्। निर्धर्मितावच्छेदक-संसर्गशाब्दबुद्ध्ययोगात्। अखण्डार्थतायाः त्वंपदार्थबाधमन्तरेण दुरुपपादत्वा-

त्प्रागुक्तदोषाऽऽपत्तेः। स्वयंज्योतिष्ट्वव्यवस्थापनेन अवस्थात्रयधर्माऽनन्वागतत्वादिना च कृतस्य त्वंपदार्थशोधस्य वैयर्थ्याऽऽपत्तेश्च। अत एव न त्वंपदमात्रलक्षणयापि निर्वाहः। तत्राप्येकतरांशयोः प्रत्येकं जगत्कारणत्वादिविशिष्टेन सहाऽभेदान्वये अयोग्यत्वात्। पदार्थैकदेशेऽन्वयाऽसंभवेन च चैतन्यमायाभ्यामप्यभेदान्वयाऽघटनात्। मायाशबलस्यैव सार्वज्ञ्यजगत्कारणत्वादिधर्मान्प्रति विशेष्यत्वेन चिन्मात्रस्य मायामात्रस्य वा अविशेष्यत्वात्। वाचारम्भणादिश्रुत्या "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यादिसूत्रैश्च कृतस्य तत्पदार्थशोधस्य वाक्यार्थबोधाऽनुपयोगेन वैयर्थ्याऽऽपत्तेः। तथा बोधेऽपि प्रतीचो ब्रह्ममात्रेण ब्रह्मणो वा प्रत्यङ्मात्रेणाऽपरिशेषात् परिच्छेदक-पारोक्ष्यादि संसारभ्रमाऽनिवृत्तेः, पुरुषार्थपर्यवसानाऽभावाच्चेति भावः।। ४०।।

अस्तु तर्हि "निरञ्जनः परमं साम्यमुपैति" "मुक्तः शिवसमो भवेत्" इत्यादिश्रुतिस्मृतिभिर्जीवस्य ब्रह्मसदृशं मुक्तिदशायां प्रतिबन्धकनिवृत्तौ अभिव्यक्तं उत्पद्यमानं वा रूपान्तरं, तत्पदस्य च तस्मिन् गौणी वृत्तिः। *इत्थं च त्वं ब्रह्मसदृशोऽसीति महावाक्यार्थोऽस्तु पुरुषार्थपर्यवसायीति कस्यचित्कल्पनामाशङ्क्य प्रतिषेधति–नत्विति।।

मू०।। नतु मानसिद्धमपरं परोपमं
निजरूपमस्य नच भाविनोऽस्तिता।
श्रुतहानिरश्रुतगतिश्च नोचिते-
त्युचिता द्वयोरपि हि भागलक्षणा।। ४१।।

अस्य = जीवस्य परोपमं = जगत्कारणेश्वरसदृशं अपरं = प्रसिद्ध-रूपाद्ब्रह्मणश्चान्यत् सांसारिकरूपेणाऽऽवृतं निजं = वास्तवं रूपं तु श्रुत्याद्यन्यतमेन मानेन न सिद्धं, येन त्वदुत्प्रेक्षितोऽर्थः संभाव्येतेत्यर्थः। प्रत्युत "नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "नात्र काचन भिदाऽस्ति" "स एष इह प्रविष्टः आनखाग्रेभ्यः" "आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति" इत्यादिश्रुतिस्मृतिसहस्रस्य तत्प्रतिषेध-कत्वादितिभावः।। ननु मास्तु प्राक् सिद्धं तादृशरूपान्तरं। मुक्तिसमकालं तूत्पद्यताम्। तत्र च मानं श्रुति स्मृती दर्शिते। एवं भाविनीं च वृत्तिमाश्रित्य तदभेदोऽस्योपासनाय गौण्या उपदिश्यताम्। तत्राह–नचेति।। भाविनः = मुक्तिकालोत्पत्तिकत्वेन त्वया कल्प्यमानस्याप्युपदेशकाले न च अस्तिता = विद्यमानता नच। असीति

*इत्यर्थे च इति पा०।।

वर्तमानार्थकलटोऽसङ्घटनादित्यर्थः। (१)"समानतीर्थेवासी" "समानोदरे शयित ओचोदात्तः" इत्यादिव्याकरणसूत्रे लोकवेदयोस्तदुदाहरणेषु 'अनयोः समा जातिः, समंगोत्रं, समं कुलं, समो ग्रामः' इत्यादिव्यवहारेषु च ऐक्येऽपि समानादिशब्ददर्शनात्, त्वदुदाहृतश्रुतौ "यथा नद्यः स्यन्दमानाः समुद्रेअस्तं गच्छन्ति नामरूपे विहाय" इति प्रागुपन्यस्तदृष्टान्ताऽऽनुगुण्यात् परमं साम्यमित्याऽऽत्यन्तिकाऽभेदद्योतक-परमपदस्वारस्यात्, भेदप्रतिषेधकश्रुतिस्मृतिसहस्राऽनुरोधाच्च साम्यपदस्य ऐक्याऽर्थकत्वे स्मृतेस्तन्मूलिकायाः तत्समानार्थकत्वे च निश्चिते अनन्तकोटितादृशरूपाऽन्तरकल्पनं, आवरणोत्पत्यादिकल्पनं, सर्वशाखागतेष्वभ्य-स्यमानेषु महावाक्येषु ब्रह्मबोधकपदस्य लक्ष्यमाणगुणसम्बन्धनिमित्तक जघन्यतमगौणीवृत्तिकल्पनं, लडादिव्यत्ययकल्पनं च काशकुशाऽवलम्बनप्रयुक्तं सर्वथाऽनुचितमिति ध्वनयन्नाह- श्रुतहानिरिति।। श्रुतस्य = मुख्यवृत्या प्रतीतस्य प्रकरणित्वात्स्वप्राधान्येन उपदेशाऽर्हस्य ब्रह्मणो वर्तमानकालस्य च हानिः त्यागः, अश्रुतस्य = रूपान्तरस्य कालान्तरस्य च गतिः = अवगतिश्च कल्पयितुं नोचिता प्रामाणिकानामित्यर्थः। किञ्च।। कल्पितेऽपि रूपान्तरे त्वंपदस्य तत्र कथमन्वयः? मुख्यार्थस्य तदभेदविरोधात्। तादृशसविशेषरूपस्य प्रसिद्धरूपाऽघटकत्वेन भागत्यागलक्षणयाऽखण्डाऽन्वयाऽयोगाच्च। बाधायां सामानाधिकरण्ये च सांसारिकरूपस्य मिथ्यात्वाऽऽपत्तिः, प्रागुक्तदोषश्च। निर्विशेषस्य च तद्गतभूयोधर्म वत्त्वरूपसादृश्याऽनिरूपकत्त्वात् अद्वितीयत्वाऽन्वयाऽनभ्युपगमाच्च नाऽन्वयोपपत्तिरपीति भावः।। अतः परिशेषात् पदद्वयाऽर्थभागत्यागलक्षणापक्ष एव ज्यायानिति सैद्धान्तिकं पक्षं दर्शयति- इत्युचितेति।। इति = उक्तहेतोः द्वयोरपि पदयोः विरुद्धाऽविरूद्धां-ऽशत्यागोपादनाभ्यां जहदजत्स्वार्थाख्या भागत्यागलक्षणैवोचितेत्यर्थः। हिशब्दः तात्पर्याऽनुगुणत्वात्सोपपत्तिकत्वाच्च युक्ततमत्वद्योतनार्थः।। ४१।।

पदद्वयाऽर्थेऽपि हेयांऽशविवेचनेन उपादेयांऽशं दर्शयन् सदृष्टान्तमखण्डार्थे पदसमन्वयं दर्शयति- अपहायेति।।

(१) समानतीर्थवासी।। साधुरिति निवृत्तम्। वसतीति वासी समाने तीर्थे गुरौ वसतीति सतीर्थ्यं। "समानोदरे शयित ओ चोदात्तः। ४/४/१०८।। समाने उदरे शयितः स्थितः समानोदर्यो भ्रातानिपातनाण्णिनिः।। गृहादेराकृतिगणत्वान्नन्दी गृहीत्यनेन वा सतीर्थ्येति। तीर्थ्ये ये इति समानस्य सभावः। तरन्त्यनेनेति तीर्थम्। तरतेस्थक्। तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्याय मन्त्रिपु योनौ जलावतारे चेति विश्वः। इह तूपाध्याय वाचिन एव गृहणं नान्यस्य संज्ञाधिकारात्। शयितः स्थितः इति। शीधातुः स्थित्यर्थे वर्तते। जलाशयः कुशेशयमिति प्रयोगादिति भावः। समानमुदरमिति पूर्वापर प्रथम इत्यादिना तत्पुरुषः। ततो यत् तित् स्वरापवाद ओकारस्योदात्तः। इतिं तत्त्वबोधिनी।

मू०।। अपहाय धर्मनिचयं विरोधिनं
तनुबुद्धिसाक्षि सदनन्तचिद्घनम्।
उपलक्ष्य सोऽयमिति वाक्यवत्ततो
घटयेदखण्डविषये पदद्वयम्।।४२।।

पदद्वयाऽर्थयोः परस्पराऽभेदविरोधिनं तात्पर्यविरोधिनं च कारणकार्योपाधिद्वयम्, तत्प्रयुक्तसर्वज्ञत्व किञ्चिज्ज्ञत्व नियन्तृत्व नियम्यत्वाऽऽदिधर्माणां निचयं = वृन्दं चेत्यर्थः। अपहाय = प्राग्दर्शितशोधनप्रकारैरपहाय मिथ्यात्वनिश्चयेन परित्यज्य, तनुः = शरीरं, बुद्धिः = अन्तःकरणं चेति स्थूलसूक्ष्मोपाधिद्वयस्य, तनुः = विलयेनाऽतिसौक्ष्म्यं आपन्ना बुद्धिः यस्मिन् सौषुप्ताऽज्ञाने तस्य च साक्षिणं नित्याऽपरोक्षचिन्मात्रं त्वंपदेन, सदनन्तचिद्घनं = सर्वप्रपञ्चाऽपवादाऽवधिभूतं अद्वितीयाऽऽनन्दचिदेकरसं तत्पदेन, उपलक्ष्य = लक्षणया उपस्थाप्य, ततः = तदनन्तरं 'सोऽयं देवदत्तः' इति वाक्ये तदिदंपदवाच्यतदेतद्देशकालविशिष्टाऽर्थयोः विरुद्धदेशकालविशेषणपरित्यागेन तदुपलक्षितव्यक्तिलक्षणोत्तरं तदिदं पदद्वयाऽऽत्मकं वाक्यं अखण्ड देवदत्तव्यक्ताविवपदद्वयं अखण्डविषये = असंसृष्टाऽपरिच्छिन्ना-ऽऽनन्दबोधाऽद्वयप्रत्यगाऽऽत्मैकवस्तुनि अवधारितैदम्पर्यविषये, घटयेत् = सङ्गमयेत्। तथाघटितं हि महावाक्यं पुरुषार्थपर्यवसायि सप्रपञ्चमूलाऽज्ञानोच्छेदक्षमं अखण्डाऽऽत्मगोचरं ज्ञानं जनयिष्यतीति भावः।।४२।।

ननु यद्येकमेव वस्तु पदद्वयेनाऽपि लक्ष्यते तदेव च वाक्यार्थः, तर्हि तत्त्वंपदयोः एकतरवैयर्थ्यम्। न चैकेन पदेन लक्षणयाऽखण्डपदार्थस्मृतिसंभवेऽपि तस्य शाब्दबुद्धिजनने पदान्तरस्याऽप्यपेक्षणान्न वैयर्थ्यमिति वाच्यम्। असिपदसमभिव्याहारमात्रेणापि तदन्यथासिद्धेः। नच पदान्तरमन्तरेण विरुद्धार्थाऽनुपस्थितौ अन्वयाऽनुपपत्तिरूपबीजाऽभावेन लक्षणैव न स्यादिति वाच्यम्। सदेवेत्याद्यैतदात्म्यमिदंसर्वमित्यन्त सन्दर्भपर्यालोचनाऽधिगततात्पर्याऽनुपपत्त्यैव शुद्धे लक्षणायाः सुवचत्वादित्याशङ्कां परिहरन् पदद्वयोपादानप्रयोजनमाह— परोक्षेति।।

मू०।। परोक्षाऽनवाप्तत्वबुद्धिं परस्मि-
न्नपूर्णत्व दुःखित्व मोहे प्रतीचि।
निहन्तुं निजाऽलौकिकं चाऽऽत्मतत्त्वं
पदे वक्तुमन्योऽन्यतः साऽभिलाषे।।४३।।

परस्मिन् = ब्रह्मणि, परोक्षत्वं = अप्रत्यक्षत्वं, अनवाप्तत्वं = अलब्धत्वं

चेति श्रोतृणां, बुद्धिम् = भ्रान्तिज्ञानं, तथा प्रतीचि = प्रत्यगात्मनि स्वस्मिन्नित्यर्थः अपूर्णत्वं = अनवाप्तकामत्वं परिच्छिन्नत्वं वा, दुःखित्वं = अनादिकालादारभ्य नैरन्तर्येण जन्ममरणादिदुःखभोक्तृत्वं। [१]नित्ययोगे इनिः। इति मोहं = भ्रमं तन्मूलमज्ञानं वा, निहन्तुं = निश्शेषमुन्मूलयितुं, तथा निजं = सर्वप्रपञ्चाऽव स्थाबाधाऽवधिभूतं अत एव अलौकिकं = लोकप्रसिद्धाऽप्रसिद्धविलक्षणं, आत्मनस्तत्त्वं वास्तवस्वरूपं, वक्तुं = असन्दिग्धाऽपरोक्षतया बोधयितुं तत्त्वं पदे द्वे अपि अन्योन्यतः = परस्परं, साभिलाषे = सापेक्षे नाऽन्योन्यसाहाय्यमन्तरेण शक्नुत इत्यर्थः। अयंभावः—मुमुक्षोः सर्वाऽनर्थनिदान जीवभाव निवृत्त्या स्वप्रकाश परमानन्दाऽद्वय ब्रह्मभाव प्रापणाय हि महावाक्य प्रवृत्तिः, नतु गिरि समुद्रादि वर्णनपर काव्यवत् औत्सुक्यमात्र परिहाराय "तरति शोकमात्मवित्" "रस ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति" इत्यादि श्रुतिशतेभ्यः।। इत्थं च त्वंपदाऽभावे मध्यमपुरुषाऽसंभवात् तदस्तीत्येव वाक्यं स्यात्। तेन चोपक्रान्ताऽद्वितीय ब्रह्म सद्भावमात्र बोधे तदसत्त्वाऽऽपादकाऽज्ञान निवृत्तावपि तदभानाऽऽपादकाऽज्ञाना-ऽनिवृत्तेः तत्पारोक्ष्याऽनवाप्तत्वभ्रमाऽनिवृत्त्या नाऽभिलषितसिद्धिः। किञ्च।। एवं सति ब्रह्मसद्भावस्य "सत्यं ज्ञानमनन्तं ब्रह्म" इत्याद्यवान्तरवाक्यैः "तत्सत्यम्" इत्यन्त प्रकृत सन्दर्भेण च सिद्धतया महावाक्यवैयर्थ्यं च। एवं तत्पदाऽभावे त्वमसि श्वेतकेतो इत्येतावन्मात्रेण सम्बोध्यश्वेतकेतु जीव सद्भावाऽवगमेऽपि तस्याऽपरिच्छिन्नाऽऽनन्दरूप ब्रह्मभावाऽनवगमात् अपूर्णत्व दुःखित्वादि संसारभ्रमा-ऽनिवृत्तेः अभिलषिताऽसिद्धिः, वाक्यस्य ऐकात्म्यपरसन्दर्भाऽसङ्गतिश्च स्यादिति उपाधिद्वयोपलक्षिताऽखण्ड प्रत्यग्ब्रह्म बोधाय पदद्वयमप्यावश्यकमिति।। अथवा।। ननु यत्पदस्य यस्मिन्नर्थे यत्पदव्यतिरेक प्रयुक्ताऽभिमतस्वार्थाऽन्वयाऽननुभावकत्वं, तत्पदस्य तेन पदेन सह साकाङ्क्षत्वं। आकाङ्क्षा च सर्वत्र शाब्द बोधे हेतुरिति सर्वसंमतम्। नच तत्त्वंपदयोरेकार्थ लक्षकयोः साऽस्ति। अखण्ड वस्तुनो भेदाऽभावेन भिन्नप्रवृत्तिनिमित्ताऽघटितत्वेन च भेदेनाऽभेदेन चाऽन्वयाऽभावात्। लाक्षणिक पदानामननुभावकत्त्वस्य स्वाभाविकत्वेन पदान्तर व्यतिरेकाऽप्रयुक्तत्वात्। एवमेकपदार्थे अपरपदार्थसंसर्गवत्त्व रूप योग्यतापि नाऽखण्डैकार्थे संभवतीत्याश-ङ्क्याहपरोक्षेति।। तत्त्वं पदे स्वार्थयोः परोक्षत्वाऽपूर्णत्वादिभ्रमं वारयितुं तात्पर्यविषया-ऽपूर्वार्थं बोधयितुं चाऽन्योन्यतः साभिलाषे = साकाङ्क्षे इत्यर्थः। तथा च न

---

(१) नित्ययोगे इनिरिति।।अष्टा० ५।२।९४।। तदस्यास्त्यस्मिन्निति मतुप्। अस्य वार्तिकम्। भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने। संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादय इति। आदिपदान्नित्ययोगे इनिः प्रत्ययः।।

त्वदभिहितमाकाङ्क्षालक्षणं साधु। प्रकृष्टप्रकाशादिवाक्यस्थ पदाकाङ्क्षाऽव्यापनात्। किन्तु यत्पदस्य यत्पदव्यतिरेकप्रयुक्त श्रोतृजिज्ञासोच्छेदकशाब्दबुद्ध्यजनकत्वं, प्रकृततात्पर्यविषयाऽर्थशाब्दबुद्ध्यजनकत्वं वा, तत्पदस्य तेन साकाङ्क्षत्वमित्येव लक्षणमुचितमिति भावः।। न वा सर्वलाक्षणिकपदं वाक्यमननुभावकमेवेति नियमे प्रमाणमस्ति। "वायुर्वै क्षेपिष्ठा देवता" इत्याद्यर्थवादवाक्येषु सर्वेषां पदानां अखण्डप्राशस्त्यलक्षकत्वेऽपि साकाङ्क्षत्वस्य अनुभावकत्वस्य च भाट्टसंमतत्वात्।। अन्योक्त्यादिकाव्येऽप्रकृतशाब्दबुद्धेः सर्वपदलक्षणाधीनायाः सर्वानुभवसिद्धत्वाच्च। अत एव योग्यतापि न त्वदुक्तलक्षणा युक्ता, किन्तु तात्पर्यविषयाऽबाधरूपैव युक्तेति दिग्विजयः।। ४३।।

अखण्डविषये पदद्वयं सङ्घटयेदित्युक्तम्। किं तदर्थेऽखण्डत्वं? किंवा वाक्ये अखण्डार्थकत्वम्? इत्याऽऽशङ्क्य, तदुभयलक्षणोक्तिमुखेन परिहरन् तदप्रसिद्धिमुदाहरणेन वारयति— असंसर्गीति।।

मू०।। असंसर्गिसत्यार्थता स्यात्पदाना-
मनन्यार्थतावाऽप्यखण्डार्थताऽत्र।
प्रसिद्धा ह्यसौ चन्द्रमात्रप्रबोधात्
प्रकृष्टप्रकाशः शशीत्यादिवाक्ये।। ४४।।

अत्र = अस्मिन्शास्त्रे दर्शिताआकाङ्क्षादिमत्पदानां सम्बन्धिनी अखण्डश्चासौ अर्थश्च अखण्डार्थः तद्भावः अखण्डार्थता असंसर्गिसत्यार्थता = अन्यसंसर्गाऽघटिता-ऽबाधितवस्तुस्वरूपतेत्यर्थः। विशिष्टवारणाय अन्यसंसर्गाऽघटितेति। सर्वं लक्षणवाक्यमखण्डार्थकमिति मते सम्बन्धिद्वयाऽऽश्रितो वैशिष्ट्य बुद्धिहेतुः सम्बन्धो वाक्यार्थ इति वाक्यार्थभूतसंसर्गे अव्याप्तिवारणाय अन्येति। गौः सास्नादिमती इति वाक्यार्थ नानागोव्यक्तिषु 'त इमेभ्रातरः' इति प्रत्यभिज्ञावाक्यार्थ नानाभ्रातृव्यक्तिषुचाऽव्याप्तिवारणाय संसर्गेति। अध्यस्तरजतादिस्वरूपवारणाय सत्येति। सत्यत्वं चात्र व्यावहारिकसाधारणं ब्रह्मज्ञानेतराऽबाध्यत्वरूपं विवक्षितम्। यदितु गवादिलक्षणवाक्ये प्रत्येकं गवामन्याऽघटितत्वात् संसर्गेति व्यर्थमिति शङ्क्येत, तदा एकदेशप्ररूढा वृक्षा वनमित्यादि लक्षणवाक्यार्थ उदाहार्यः। एकैकवृक्षस्य वनव्यवहाराऽविषयत्वात् एकदेशस्थितेः उपलक्षणत्वेऽपि तस्य वृक्षान्तरघटितस्वरूपत्वात्। यदि त्वेकदेशस्थितिवत् वृक्षान्तरसाहित्यमप्युपलक्षणम्, अखण्डवृक्षा एव तु वनमित्युच्येत तदाप्याह— अनन्यार्थतावेति। बहुब्रीहिघटित-कर्मधारयात् तल्। अन्याऽघटितवस्तुत्वं अखण्डत्वमित्यर्थः। एवंचाऽध्यस्तरजता-

दिव्यक्तिमात्रस्यापि केनचिदखण्डत्वाऽभ्युपगमेऽप्यदोषः। वस्तुपदं तु शून्यवारणाय। नन्वन्याऽघटितं वस्त्वेवाऽप्रसिद्धं, सर्ववस्तूनां जातिगुणादिघटितत्वादित्याशङ्क्याह— प्रसिद्धेति। असौ = ईदृश्यखण्डता, 'प्रकृष्ट प्रकाशः शशी' इत्यादि चन्द्रादिस्वरूपमात्रपरे वाक्य श्रुते सति प्रसिद्धा = चन्द्राद्यर्थे सर्वानुभवसिद्धेत्यर्थः।।

ननु चन्द्रादिस्वरूपमपि प्रकर्षप्रकाशचन्द्रत्वादिघटितमेव तत्र बुध्यताम्, तत्राह— चन्द्रमात्रेति। जिज्ञासातात्पर्ययोरनुरोधेन चन्द्रमात्रस्यैव तत्र बुद्ध्यमानत्वात्। "यत्परः शब्दः स एव शब्दार्थः" इतिं न्यायात्। नच प्रकर्षादिघटितरूपात् अन्यच्छुद्धं चन्द्रस्वरूपं नास्त्येवेत्यपलपितुं शक्यम् तथा सति चन्द्रपदेन (१)तादृशरूपस्यैव अवश्यं बोधनीयतया प्रकृष्टादिविशेषणपदवैयर्थ्याऽऽपत्तेः। तद्व्यावर्तनीयविशेष्यचन्द्रस्वरूपाऽभ्युपगमे तु तदेव उपलक्षणत्यागे शुद्धं प्रसिद्धमिति भावः। इयंचाऽखण्डार्थस्वरूपलक्षणपरत्वेन योजना। अन्यादृशलक्षणपरत्वेऽपि पदानां सम्बन्धिनी असंसर्गिसत्यार्थता = संसर्गाऽगोचरशाब्दप्रमागोचरता अन्याऽगोचरशाब्दधीविषयता वा अखण्डार्थता। यथा प्रकृष्टप्रकाशादिवाक्यजन्यशाब्दधीगोचरे चन्द्रस्वरूपे सा प्रसिद्धेति योज्यम्। एतदेव लक्षणद्वैविध्यमभिप्रेत्योक्तं कल्पतरौ—

"अविशिष्टमपर्यायाऽनेकशब्दप्रकाशितम्।
एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे"।इति।।

तत्राऽविशिष्टमिति स्वरूपाऽभिप्रायेण असंसृष्टं अन्याऽघटितं वेत्यर्थात्। अपर्यायाऽनेकशब्दप्रकाशितमेकमिति तु तदन्यलक्षणाऽभिप्रायेण, अपर्यायाऽनेकशब्दजन्यैकमात्रगोचरशाब्दधी विषयत्वमित्यर्थपर्यवसानादिति बोध्यम्। स्वामिनस्तुअखण्डपदेनैव अन्याऽघटितस्वरूपस्य सुज्ञानत्वात् न पृथकप्रदर्शनापेक्षेत्यभिप्रेत्य अद्वैतसिद्धितच्चन्द्रिकानुरोधेन (२)सांसर्गिकविषयताशून्य शाब्दधीविषयत्वं स्वजनकस्मृतिगोचराऽन्याऽविषयकशाब्दधीविषयत्वं वेति निष्कृष्टलक्षणद्वयमुपवर्ण्य तात्पर्यगत्या तदुभयसंमतित्वेन इमं श्लोकमुदाजह्रुः। (३)अनयोराद्यलक्षणे

(१) तादृशरूपस्यैवेति।। प्रकृष्टप्रकाशादिघटित स्वरूपस्यैवेत्यर्थः।।

(२) सांसर्गिकविषयताशून्या संसृष्टार्थानवगाहिनी या शाब्दधीस्तद्विषयत्वमखण्डार्थत्वम्। स्वजनकस्मृतिगोचरेति = स्वयं शाब्दीप्रमातज्जनकीभूताया पदार्थस्मृतिः तस्या गोचर एव गोचरो यस्याः शाब्दीप्रमाया सा तथा अन्याऽविषयका वस्तुस्वरूपातिरिक्त संसर्गाद्यगोचरा या शाब्द धीस्तद्विषयत्वं वाऽखण्डार्थत्वम्।।

(३) आद्यलक्षणे शाब्दधीरित्युपरञ्जकम्। इच्छादीनां सांसर्गिकविषयताशून्यत्वविशेषणासम्भवात्त्रातिव्याप्त्याभावेन शाब्दधीपदस्य तदवारकत्वादुपरंजकत्वमेवेति भावः।।

शाब्दधीरित्युपरञ्जकं प्रकृताभिप्रायेण, निर्विकल्पकप्रत्यक्षविषयत्वस्य अनतिप्रसक्तत्वात्। इच्छादीनां च सांसर्गिकविषयताशून्यत्वाऽसंभवेनाऽव्यावर्तकत्वात्।। द्वितीये तु यत्र स्रगादिस्मरणाऽनन्तरं तत्रेच्छा, तत्रेच्छाव्यक्तेः स्वजनकस्मृतिगोचराऽन्याऽविषयकत्वात् तद्विषये स्रक्त्वादिविशिष्टेऽतिव्याप्तिवारणाय धीपदम्। पुनः पुनः स्मरणेन दृढतरसंस्कारप्रसिद्धेः स्मृतेरपि स्मृतिहेतुत्वेन द्वितीयादिस्मरणे स्वजनकस्मृतिगोचराऽन्याऽविषयकेऽतिव्याप्तिवारणाय शाब्दपदम्। वनराश्यादिपदार्थानां संसृष्टरूपत्वमतेऽपि न क्षतिः। पारिभाषिकाऽखण्डत्वस्य तत्रापि सत्त्वे बाधकाऽभावात्।। नच लघुभूतत्वात् आद्यमेव लक्षणमस्तु किं द्वितीयेनेति वाच्यम्। गुरुणापि लक्ष्यसिद्धेरानुभविकत्वेनाऽदोषात्। [१]इतरभेदाऽनुमितिव्यसनिनां धूमप्रागभाववदवैयर्थ्यात्। विषयताविशेषस्यैव लक्षणत्वेन स्वजनकेत्यादेस्तत्परिचायकत्वेन प्रत्युत लघुतरत्वाच्चेति।।

वाक्यस्य अंखण्डार्थकत्वव्युत्पादनपरत्वेनापि अयमेव श्लोको योज्यते। वाक्यघटकसर्वपदानां [२]असंसर्गिसत्यार्थता = [३]नञ्तत्पुरुषघटितात्रिपदबहुव्रीहेस्तल्। अन्यसंसर्गाऽघटिताऽबाधितार्थप्रतिपादकता अनन्यार्थता। त्रिपदबहुव्रीहेः बहुव्रीहिघटितबहुव्रीहेर्वा तल्। अन्याऽघटितवस्तुप्रतिपादकता वा [४]अत्राऽखाण्डार्थकवाक्येषु अखण्डार्थता। अखण्डार्थकता हि = यस्मात्प्रकृष्टप्रकाशादिवाक्ये असौ चन्द्रमात्रस्य प्रबोधात्प्रसिद्धेत्यर्थः। अत्र आद्यलक्षणे 'दण्डीपुरुषः' इति वाक्येऽतिव्याप्तिवारणाय अघटितान्तम्। सम्बन्धलक्षणवाक्येऽव्याप्तिवारणाय अन्येति। 'गौः सास्नादिमती' इति वाक्येऽव्याप्तिवारणाय संसर्गेति। बाधितार्थकवाक्यवारणाय अबाधितेति। एकैकपदवारणाय वाक्यत्वमित्यपि बोध्यम्। द्वितीयेऽपि 'दण्डीपुरुषः' इत्यादिवाक्यवारणाय अन्याऽघटितेति। 'खपुष्पं शशश्रृंगम्' इत्यादिवाक्यवारणाय

---

(१) इतरभेदानुमिति व्यसनिनामिति।। यथा वह्निं पक्षीकृत्य वह्निधर्मिकेतरप्रतियोगिकभेदानुमितेर्धूमप्रागभाववत्त्वादितिहेतु नाप्युपपत्तेस्तादृशानुमितिकारणाभिनिवेशमतां मते धूमप्रागभावस्य गुरुभूतस्यापिहेतोर्न वैयर्थ्यमभ्युपेयते। तद्वद्गुरुभूतस्यापि लक्षणस्य स्वलक्ष्यानुभाविकत्वोपपत्तौ न वैयर्थ्यमुपपद्यते इति भावः।।

(२) न संसर्ग्यसंसर्गी तथा भूतोऽवाधितः सत्योऽर्थो यस्य तत्तथा तस्य भावोऽसंसर्गि सत्यार्थतेति।

(३) नञ् तत्पुरुपघटित त्रिपदबहुव्रीहि समासपक्षः। अनन्यार्थतेति, द्वितीयलक्षण वाक्येपि न विद्यतेऽन्योवस्तुस्वरूपादतिरिक्तः संसर्गादिलक्षणो विपयतया पदार्थो यस्य यस्मिन्निति वा तत्तथा तस्य भावस्तथेति। न विद्यतेऽन्यो यस्मात्सोऽन्यस्तथाभूतोऽर्थः प्रतिपाद्यता सम्बन्धेन विपयोयस्य वाक्यस्य तत्तथा तस्य भावस्ततेति बहुव्रीहिघटित बहुव्रीहि समास पक्षः इत्यर्थः।।

(४) अत्र वाक्यस्याखण्डार्थत्व पक्ष इत्यर्थः।।

वस्तुपदमित्यादि बोध्यम्।।

अथवा।। असंसर्गिसत्यार्थता = सांसर्गिकविषयताशून्याऽबाधितार्थकतेत्यर्थः। तथाच सांसर्गिकविषयताशून्यशाब्दप्रमाजनकवाक्यत्वं अखण्डार्थकत्वमिति फलितम्।। 'दण्डीपुरुषः' इति वाक्य वारणाय शून्यान्तम्। समूहातिरिक्ताऽखण्डसमूहाऽभ्युपगन्तृणां पदसमूहात्मकस्य नीलोत्पलादिवाक्यस्य विषयविधया तदेवेदं वाक्यमिति प्रत्यभिज्ञात्मकप्रत्यक्षजनकत्वात् तद्वारणाय शाब्देति।। नच वनराश्यादिषु अखण्डसमूहस्य कैश्चिदभ्युपगमेऽपि वर्णपदाऽतिरिक्ताऽखण्डपदवाक्ययोः वैयाकरणेतरैरनभ्युपगमात् न तत्प्रत्यभिज्ञाप्रसक्तिरिति वाच्यम्। सर्वं लक्षणवाक्यं अखण्डार्थकमेवेत्यभ्युपगन्तृणां अद्वैतसिद्धिकारादीनां मते वर्णसमूहः पदं पदसमूहो वाक्यमिति पदवाक्यलक्षणवाक्ययोः अखण्डार्थकत्वस्य अखण्डपदवाक्ये अनभ्युपगम्य निर्वोढुमशक्यत्वात्।। मतान्तरे तु शाब्देत्युपरञ्जकमेव। अदेवदत्ते देवदत्तोऽयमिति भ्रममूलके 'सोऽयं देवदत्तः' इतिवाक्ये अध्यस्तदेवदत्तस्वरूपमात्रबोधकेऽतिव्याप्तिवारणाय अबाधितविषयकत्वरूपप्रमात्वनिवेशः। तादृशप्रमायां पदानामपि स्वार्थस्मृतिद्वारा जनकत्वं प्रत्येकमप्यस्तीति वाक्यत्वमिति। यदि तु वनदेवतापत्यादिपदार्थानां संसृष्टैकस्वभावत्वं नातिरिक्तत्वमिति मतम् तल्लक्षणवाक्येषु अखण्डार्थकत्वव्यवहारश्चास्ति, तदा तेष्वव्याप्तिवारणायाह— अनन्यार्थता वेति। पदानामनन्यार्थता = एकपदार्थाऽनतिरिक्ताऽर्थकतेत्यर्थः। तथाच एकपदाऽर्थानतिरिक्तगोचरशाब्दधीजनकवाक्यत्वं तदिति फलितम्। दंशदाडिमादिवाक्यवारणाय शाब्दधीजनकमिति। नीलोत्पलादिवाक्यवारणाय गोचरान्तम्। पदार्थत्वं च वृत्त्या पदजन्यशाब्दधीहेतुस्मृतिविषयत्वं, अतः पदार्थाऽतिरिक्तस्याऽप्रसिद्धेः एकेति। प्रकृतवाक्यघटकैक*पदं पदविशेषणम्। तेन प्रमेयपदार्थाऽतिरिक्ताऽप्रसिद्ध्या असंभवतादवस्थ्यं नाऽऽशङ्कनीयम्। शाब्दधीहेतुस्मृतिविषयत्वोक्त्या च भाट्टमते वाक्यार्थस्य सर्वपदलक्ष्यत्वेऽपि तत्स्मृतेः शाब्दबुद्ध्यहेतुत्वान्नाऽखिलवाक्येष्वतिव्याप्तिः। एतेनाऽन्विताऽभिधानवादे अन्वयस्य शक्यत्वनिबन्धनोऽपि दोषः प्रत्युक्तः। एकपदेन एकपदमात्रजन्यस्मृतिविषयत्वमिति तु न विवक्षणीयम्। प्रकृते असंभवाऽऽपत्तेः। नीलोत्पलादिवाक्यस्यापि सङ्केते नियतोद्बोधकविधया क्वचित् अखण्डोत्पलादिस्मारकत्वसंभवात् शाब्देति। यदितु केनचित्कलशपदस्य कश्चिदर्थोऽस्तीति निश्चित्य तत्स्वरूपजिज्ञासया 'कः कलशः' इति पृष्टे 'घटः कलशः' इत्यन्येन उत्तरिते वाक्ये अखण्डघटमात्रबोधकता अनुभवसिद्धा, तैर्थिकानां च तत्राखण्डार्थकत्वव्यवहारो नास्ति, तदा पूर्वलक्षणे अत्र चाऽपर्यायपदघटितत्वेनापि

* परमिति पाठ।

वाक्यं विशेषणीयम्। एतदेवाऽभिप्रेत्य उदाहृतकल्पतरुश्लोके "अपर्यायाऽनेकशब्द-प्रकाशितम्" इत्युक्तम्। अन्यैस्तु एतादृशस्थले अखण्डार्थकत्वे इष्टाऽऽपत्तिरित्यभिप्रेत्य तन्नोपात्तमिति बोध्यम्।। इदमेव लक्षणद्वयमुक्तं तत्त्वदीपिकाकारैः—

(१)"संसर्गाऽसङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता।।" इति

इदं च सर्वं ज्ञायमानशब्दस्यैव शाब्दधीकरणत्वमित्यभ्युपगच्छतां भाट्टादीनां मतमाश्रित्योक्तम्। त्रैक्षणिकशब्दवादिकणभक्षाऽक्षचरणादिनये अतीताऽनागतशब्दानां शाब्दबुद्धिजनकत्वाऽसंभवेऽपि यावत्तद्व्यवहारकालाऽनुच्छितिकाऽऽनुपूर्वीक नित्यवर्णसमुदायात्मक शब्दवादे ताल्वाद्यनभिव्यक्तस्यापि स्मृत्याद्युपस्थापितस्य तस्य शाब्दधीजनकत्वे बाधकाऽभावादिति। शब्दज्ञानस्यैव करणत्वमिति नवीन नैयायिक मतमभ्युपेत्याऽपि अनयोर्लक्षणयोर्निष्कर्षः स्वामिभिरखण्डार्थवादे प्रपञ्चितः। तथाहि-सांसर्गिकविषयताशून्य शाब्दधी निरूपितजनकतावच्छेदकं यत्पदोत्तरत्वप्रकारक यत्पदविशेष्यक ज्ञानत्वं तत्पदोत्तरत्वविशिष्ट तत्पदत्वं अखण्डाऽर्थकत्वम्। अवान्तरवाक्ये सत्यादिपदानां चिन्मात्र लक्षकत्वोपपादनाच्च भवति उक्तविध-शाब्दधीजनकतावच्छेदकं सत्यादिपदोत्तरत्वप्रकारक ज्ञानादिपदविशेष्यक ज्ञानत्वमिति लक्षणसमन्वयः। एवं महावाक्येष्वपि योज्यम्। अत्र लक्षणघटकजनकता वस्तुगत्या शाब्दत्वाद्यवच्छिन्ननिरूपिताऽपि न तेन रूपेण निवेशिता। गौरवात्, फलाभावाच्च। तथाचोक्तविषयताशून्यं घटादिकमिति तज्जनक दण्डादावतिव्याप्तिवारणाय यत्पदेत्यादि। संसर्गपरवाक्यवारणाय निरूपितान्तम्। अपत्यदेवतादि संसृष्टैक-स्वभावपदार्थानां लक्षणवाक्येष्वव्याप्तिवारणाय स्वजनक स्मृतिगोचराऽन्याविषय-कनिरूपित जनकताऽवच्छेदकं यत्पदोत्तरत्वप्रकारक यत्पदविशेष्यक ज्ञानत्वं तत्पदोत्तरत्वविशिष्ट तत्पदत्वमिति वा लक्षणमस्तु। स्वपदं प्रकृतशाब्दधीपरं तज्जनिका या पदार्थस्मृतिः तद्गोचराऽन्याविषयिणी सैव शाब्दधीः तज्जनकतावच्छेदकं सत्यादिपदोत्तरत्वप्रकारक ज्ञानादिपदविशेष्यक ज्ञानत्वमिति लक्षणसमन्वयः। विशिष्टपर वाक्यजन्य शाब्दबुद्धेः तज्जनकस्मृति गोचरैकपदार्थाऽन्यपदान्तरार्थ संसर्गविषयकत्वात्

(१) संसर्गासंगिसम्यग्धीहेतुतेति।। या गिरां अपर्यायशब्दानां संसर्गागोचरप्रमिति जनकता सेयमखण्डार्थकतोक्ता। यद्वा अपर्यायशब्दानामेक प्रातिपदिकार्थमात्रपर्यवसायिता सेयमखण्डार्थतेति। लक्षणसंग्राहक श्लोकार्थः। तत्र हस्तः कर इत्यादौ व्यभिचारवारणायापर्यायतेति इन्द्रियव्यावृत्त्यैशब्देति। गामानयेत्यादि व्यवच्छेदार्थं संसर्गागोचरेति। वाक्याभासव्यावृत्यर्थं प्रमेति।।

नाऽतिप्रसङ्गः। अखण्डाऽर्थस्याऽपि कुतश्चिदन्यत्वादसंभवः स्यात्। अतः स्वजनकस्मृतिगोचरेति। सर्वस्यैव पदार्थाऽऽदिपदात् स्मृतिसंभवेन स्मृतिगोचराऽन्याऽप्रसिद्धिनिबन्धनाऽसंभववारणाय स्वजनकेतिस्मृतिविशेषणम्। नचैवं पदार्थसामान्यलक्षणवाक्ये अव्याप्तिः। व्यावृत्तवस्तुबोधस्यैव लक्षणफलत्वेन व्यवहारमात्राङ्ग पारिभाषिकलक्षणवाक्यानां अखण्डार्थत्वाऽभावेऽप्यदोषात्। नीलोत्पलादिवाक्यस्य यदि स्वसमानविषयक स्मृतिजन्योत्पलादिमात्रगोचरस्मृतौ नियतोद्बोधक*विधया जनकत्वं प्रसिद्धं तदा अन्याऽविषयकेत्येतदुत्तरं शाब्देत्यपि देयमेवेति। यदि तु सत्यादिवाक्यानां महावाक्यानां चाऽखण्डार्थकत्वे कस्य चिन्मन्दमतेर्विप्रतिपत्तिः स्यात् तदा स इत्थं प्रयोगेन प्रतिबोधनीयः। उक्तवाक्यानि सांसर्गिकविषयताशून्य प्रमाजनकानि स्वघटकैकपदार्थाऽनतिरिक्तगोचरशाब्दप्रमाजनकानि वा तादृशाऽर्थमात्रतात्पर्यकत्वात् प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति। एतदेवसूचयन् दृष्टान्तप्रसिद्धिं दर्शयति- प्रसिद्धेति। 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्ये आदिपदात् सोऽयं देवदत्त इति प्रत्यभिज्ञाऽभिलापकवाक्ये घटाऽऽकाशो महाकाश इत्यौपाधिकभेदभ्रमनिरासके आकाशैक्यपरवाक्ये च असौ उक्तहेतुसमानाधिकरणा अखण्डार्थता प्रसिद्धेत्यर्थः। तत्राऽनुभवं प्रमाणयति— चन्द्रमात्रेति। एवं देवदत्तमात्र प्रबोधादाकाशमात्र प्रबोधादित्यपि बोध्यम्।। ४४।।

तादृशव्युत्पत्यभावादनुभवे विप्रतिपद्यमानं प्रकृष्टप्रकाशादिवाक्ये साध्यसाधनवैकल्यमाशङ्कमानं वाक्यप्रवृत्तिप्रकारव्युत्पादनेन समाधत्ते— प्रकर्षेति।

मू०।। प्रकर्षप्रकाश - त्वचन्द्रत्वयोग-
व्यवच्छेदभेदादयो नैव पृष्टाः।
न वा शाब्दधीरस्त्यजिज्ञासितेऽर्थे
ततो वाक्यतश्चन्द्रमात्रप्रबोधः।। ४५।।

यदा चन्द्रशब्दार्थश्चन्द्रः स चाऽस्मिन् ज्योतिर्मण्डलेऽस्तीति प्रमाणाऽन्तरेण निश्चित्य प्रत्यक्षेण च नभसि परस्परवैधर्मक ज्योतिर्गणंतत्र विजातीयं प्रकृष्टप्रकाशं मण्डलं चाऽवलोकय कश्चिदन्यं पृच्छति— अस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति? तदाऽन्यः प्रकृष्टप्रकाशश्चन्द्र इति तस्मै चन्द्रं बोधयतीति हि वाक्यप्रवृत्तिः। तत्र जिज्ञासुना प्रकृष्टपदस्य प्रवृत्तिनिमित्तं प्रकर्षः प्रकाशपदस्य प्रकाशत्वं, चन्द्रपदस्य चन्द्रत्वं चेत्येतानि वा, एषां धर्मिणि योगः =संसर्गः, धर्मिणां वा परस्परं संसर्गः,

*विषया इति पा०।

एषां धर्माणां व्यवच्छेदः = चन्द्रेतराऽवृत्तित्वम्, [१]एतद्धर्मान्तरत्वस्य वा चन्द्राऽवृत्तित्वं, भेदः चन्द्रे इतरेभ्यः इतरेषु वा चन्द्रात्। आदिपदाच्चन्द्रादिपदशक्तिः चन्द्रलक्षणानि च गृह्यन्ते, एतेनैव पृष्टाः, यतः शक्त्यन्ताः प्रागेव निश्चिताः। लक्षणमपि लक्ष्ये ज्ञाते न जिज्ञासितं निष्फलत्वात्। अज्ञाते तु लक्ष्यमेव जिज्ञासितं प्रश्नार्हं चेति तस्यैव प्रश्नो युक्त इत्यर्थः। पदार्थतावच्छेदकविशिष्टे पदसम्बन्धाऽग्रहे हि प्रश्नवाक्यप्रयोगस्यैवाऽनापत्तिः उत्तरवाक्यादबोधाऽनापत्तिश्चेति तेषां प्राङ्निश्चितत्वमवश्यं वाच्यम्। नचैषां प्राक् परोक्षेण निश्चयेऽपि प्रत्यक्षीकरणाय प्रश्न इति युक्तम्। किं शब्दस्य एकवचनान्तस्य जिज्ञासितैकवस्तुमात्र बोधनसमर्थत्वेन चन्द्रपदसामानाधिकरण्येन च प्रश्नवाक्यस्य चन्द्रेतरबोधनाऽसामर्थ्यात् अन्यादृशप्रश्नवाक्य प्रयोगाऽऽपत्तेः। उत्तरवाक्यस्य च परमते प्रत्यक्षजननाऽसमर्थत्वेन अप्रयोगापत्तेः। शाब्दाऽपरोक्षवादेऽपि अयं चन्द्र इति साङ्गुलिनिर्देशवाक्येनाऽपि जिज्ञासानिवृत्तिदर्शनाऽनुरोधात् तस्याश्चन्द्रमात्रविषयत्वकल्पनौचित्यात् प्रत्यक्षेणैव बिम्बविशेषस्य तत्र प्रकर्षप्रकाशत्वेतरवैजात्यभेद तद्वैशिष्ट्यानां निश्चितत्वेनाऽजिज्ञासितत्वाच्च। अत एव पदार्थानां संसर्गोऽपि न जिज्ञासितः। तदैषां कः संसर्ग इति प्रश्नाऽऽपत्तेश्च। एवं व्यवच्छेदभेदयोरप्यशब्दार्थत्वात् प्रश्नोत्तरवाक्याऽननुगुणत्वात् प्रत्यक्षीकृतत्वाच्चाऽप्रश्नार्हता उपपादनीया।। नन्वेवं सति चन्द्रस्वरूपमपि प्रत्यक्षीकृतमेवेति न प्रश्नार्हंस्यादिति चेत्। सत्यम्। तथापि तदुत्तरकालमपि चन्द्रं नजानामीति तदज्ञानाऽनुभवात् जिज्ञासाप्रश्नयोर्दर्शनाच्च प्राक्तनचन्द्रप्रत्यक्षस्याऽनिर्द्धारणात्मकत्वात्। श्रीमन्नृसिंहाऽऽश्रमस्वामिभिः एककोटिकसंशयास्यापि युक्तिभिः समर्थित्वेन कोट्यन्तराऽनवगाहनमात्रेण निश्चयत्वाऽसिद्धेः। न च तर्हि प्रकृष्टप्रकाशादिपदार्थतद्धर्मेष्वपि अनिर्धारणात्मकमेव प्रत्यक्षं वृत्तमिति तेषां प्रश्नार्हताऽस्त्विति वाच्यम्। चन्द्रं नजानामीत्यज्ञानाऽनुभवोल्लेखवत् तदुत्तरं प्रकृष्टप्रकाशादिपदार्थं न जानामीत्यज्ञानाऽनुभवोलेल्खयोरदर्शनेन वैषम्यात्। न च कवचन्द्रत्वमिति नजानामीति चन्द्रत्वेऽप्यज्ञानाऽनुभवोऽस्तीति वाच्यम्। चन्द्र एव चन्द्रत्वमिति प्रागेव परोक्षतो निश्चयात्। प्रकृष्टप्रकाशव्यक्तौ इतरवैजात्यस्यैव चन्द्रत्वेन तस्य प्रत्यक्षीकृतत्वात्। अत्र इतरवैजात्यं न जानामीत्यननुभवाच्च। निर्धारितव्यक्तिधर्मतया चन्द्रत्वाऽज्ञानं तु असाधारणचन्द्रस्वरूपानिर्धारणप्रयुक्तमेवेति तस्यैव प्रश्नविषयत्वम्।।

---

(१) एतद्धर्मान्तरत्वस्येति।। एतस्मात्प्रकृतात्प्रकृष्टप्रकाशत्वचन्द्रत्वादन्यधर्म एतद्धर्मान्तरं तस्य भाव एतद्धर्मान्तरत्वं तस्य वेत्यर्थः। चन्द्रावृत्तित्वं नाम चन्द्रनिष्ठाधारतानिरूपिताधेयताशून्यत्वमित्यर्थः।। धर्मांतरत्वस्थ इति पा०।।

नन्वेवं सति कथं विशेषणानां व्यावर्तकत्वप्रसिद्धिः? व्यावृत्त्यबोधे कथं वा विशेषणादि सार्थक्यमिति चेत्। शृणु। सर्ववाक्येषु जातिशक्तिवादे पदात् जातेरेव प्रथममुपस्थितौ जातेर्व्यक्त्याऽऽक्षेपमन्तरेण व्यवहारानङ्गत्वात् विनिगमका-ऽभावेन सर्वव्यक्त्याऽऽक्षेपप्रसक्तौ, प्रकरणादिनेव विशेषणेन स्वसंवलितव्यक्तिः, उपाधिना स्वावच्छिन्नव्यक्तिः, उपलक्षणेन च स्वोपलक्षितव्यक्तिरिति व्यक्तिविशेषा एवाऽऽक्षिप्यन्ते। ततस्तेषामेव शाब्दबुद्धौ भानं, नान्येषां। तत्रोपाधिविशेषणयोः यद्यपि शाब्दबुद्धौ भानप्रसक्तिरस्ति, तथापि नोपलक्षणस्य तत्प्रसक्तिः। जातिविशिष्टा-दिव्यक्तिशक्तिवादेऽपि पदात्सामान्यतः सर्वव्यक्तिस्मृतावपि विशेषणादिभिः स्वसंवलितादिव्यक्तय एव शाब्दबुद्धिविषया नियम्यन्त इति व्यक्त्यन्तराणामभानमेव व्यवच्छेदः, न तु शब्दादितरभेदभानं। भेदस्य प्रमाणगोचरत्वनिरासात्, अपदार्थस्य शाब्दधीप्रकारत्वाऽयोगाच्च।। ननु उत्पलादौ नीलादिविशेषणैः अनीलादिभेदाऽप्रत्यायने कथमनीलादिभ्रमसंशयनिवृत्तिरिति चेत्। न। भ्रमसंशययोः बोध्यमात्रगोचराऽज्ञानकार्यत्वेन उत्पलादिविशेषज्ञानेन तदज्ञाननाशादेव निवृत्त्युपपत्तेः। भेदज्ञानस्यैव तदितरसंशया-दिविरोधित्वाऽभ्युपगमे [१]व्यावृत्ततद्व्यक्तीरनिश्चित्य तदितरत्वनिश्चयाऽयोगात् इतरत्वाऽनिश्चये च प्रतियोगितावच्छेदकविशिष्ट प्रतियोग्यनुपस्थितौ इतरभेदज्ञाना-ऽसंभवात् वस्तुतत्त्वाऽवधारणसमकालमेव अनुभूयमाना भ्रमसंशयादिनिवृत्तिरनुपपन्ना स्यादिति वस्तुतत्त्वज्ञानमेव तदज्ञानमुन्मूलयत् तन्मूलकभ्रमसंशयाद्युच्छिनत्तीति युक्तम्। एवं च प्रकृष्टप्रकाशादिपदानां प्रकर्षाद्युपलक्षितव्यक्तिविशेषबुद्धौ उपयोगान्न वैयर्थ्यमित्यपि दर्शितमेव।।

ननु किंशब्दस्य जिज्ञासितधर्मवति शक्तत्वात् विशिष्टस्यैव प्रश्नोऽस्तु, लक्षणवाक्यस्य च जिज्ञासितप्रकृष्टप्रकाशादिधर्मविशिष्टधर्मिपरताऽस्तु। चन्द्रेतरभेद चन्द्रपदवाच्यत्वयोरपि चन्द्रधर्मत्वादेव जिज्ञासितत्वेऽपि तयोर्लक्षणवाक्येन साक्षाद्बो-धयितुमशक्यत्वात् अनुमानोत्थापनेन तद्बोधोऽस्तु। तथा च प्रयोगः—"चन्द्रः इतरेभ्यो भिद्यते चन्द्रपदवाच्यो वा, अस्मिन् ज्योतिर्मण्डले प्रकृष्टप्रकाशत्वात्, यन्नैवं तन्नैवं यथा तमः" इति चेत्। न। किंशब्दस्य जिज्ञासितधर्मवति शक्तिमपेक्ष्य जिज्ञासित एव लाघवात् शक्तिकल्पनौचित्यात्। जिज्ञासितधर्मेयत्ताऽपरिज्ञानेन संशयेन च प्रतिवचनप्रयोगाऽनुपपत्तेश्च। नच तदादिपदवच्छक्तिलाघवं, प्रकरणादिना धर्मविशेषोपस्थितिश्चेति न दोष इति वाच्यम्। प्रष्टुः तेषां धर्मविशेषाणामज्ञाने परं प्रति तद्बोधयिषया पदप्रयोगानुपपत्तेः, ज्ञाने च जिज्ञासानुपपत्तेस्तदादिपदवैषम्यात्।

(१) व्यावृत्ततद्व्यक्तीरनिश्चित्येति, व्यावृत्ततया तारकादिभ्यः पृथक्तयाऽसाधारणाकारेणावच्छिन्नतया चन्द्रव्यक्तिरनिश्चित्य तारकादौ चन्द्रेतरत्वनिश्चयायोगादित्यर्थः।।

जिज्ञासाया: शक्यतावच्छेदककोटिनिवेशावश्यकत्वे जिज्ञासिते शक्तेरेव लघीयस्त्वादिति न प्रश्नवाक्यस्य त्वदुक्तोऽभिप्राय:। यच्च भेदाद्यनुमानोत्थापकत्वमुक्तं, तदपि न। अप्रमिते चन्द्रे तत्र भेदस्य चन्द्रपदवाच्यत्वस्य चाऽनुमानाऽयोगात्। पक्षतावच्छेदक-विशिष्टपक्षे हेतुमत्ताज्ञानस्यैव परामर्शत्वेन तस्य तत्राऽऽवश्यकत्वात्। प्रमितेऽपि तस्य प्रमाणान्तरात् प्रमिति:? लक्षणवाक्यादेव वा? आद्ये सामान्यत: प्रमितौ सामान्यत एव इतरभेदसिद्धिरित्यभिमताऽसिद्धि:। विशेषत: प्रमितौ विशेषग्राहिप्रमाणेनैव भेदसिद्धि:, व्यतिरेक व्याप्त्यनिश्चयाच्च न चन्द्रपदवाच्यत्वानुमितिरित्यु-भयथाप्यनुमानवैयर्थ्यम्। द्वितीयेतु लक्षणवाक्यस्य चन्द्रस्वरूपप्रमितावेव पर्यवसानात् तावतैव श्रोतृजिज्ञासानिवृत्तेरितरभेदादौ तात्पर्याऽभावादानुषङ्गिकसिद्धेश्च नानुमानोत्थापकताचेति। यत्तु कल्पतरौ—'न चन्द्रशब्दवाच्यत्वं साध्यते, अचन्द्रे चन्द्रशब्दवाच्यत्वसाधने व्याघातात्। अथ चन्द्रत्वमप्यभिप्रेत्य चन्द्रशब्दवाच्यत्वं साध्यते, तर्हि चन्द्रत्वमेव साध्यतां, अवश्यापेक्षितत्वात्' इति, तस्य कोऽभिप्राय:, वाक्यस्य चन्द्रत्वांशेऽपि तात्पर्यस्याऽनिष्टत्वात् वाक्याच्चन्द्रमात्रत्वसिद्धौ अनुमानानपेक्षणाच्चेति चेत्। अयमभिप्राय:—

"व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्"।

इति तैर्थिकव्यवहारात् यो लक्षणवाक्यस्य इतरभेदाद्यनुमानोन्नयन एव तात्पर्यं मन्यते, यश्च वैशेषिकादि: अनुमापकत्वेनैव शब्दप्रामाण्यमाह ताभ्यामपि तावत्प्रत्यक्षप्रसिद्धये चन्द्रत्वं तावदवश्यमनुमेयम्। तच्च विमर्शे चन्द्रस्वरूपमेव। एकव्यक्तिमात्रसमवेतजात्यभावात्। चन्द्रत्वं नानेत्यप्रतीते: [१]तन्निष्ठगुणाद्यात्म-कत्वोक्त्यसंभवात्। जलादर्शादिप्रतिबिम्बभेदेषु अनुगतचन्द्रत्वस्य च [२]कल्पित-भेदेष्वनुवर्तमानाधिष्ठानस्यैव तत्सामान्यतया वास्तवचन्द्रमात्रत्वाच्चानुमिते: चन्द्रमात्रविषयत्वावर्जने लक्षणवाक्यमेव लक्षणया चन्द्रस्वरूपबोधकमित्येव कल्पनं वरं, नानुमितिकल्पनम्। स्वरूपाऽनुमितौ तस्यैव पक्षतया प्राकप्रसिद्धेरावश्यकत्वात् वाक्येनैव प्रसिद्ध्यति तस्मिन्नर्थात्साक्षिणैव इतरभेदादिसिद्धे: वस्तुतो नानुमानोपयोग इति।। ननु चन्द्रपदस्य वाच्य: कश्चिदर्थोऽस्तीति सामान्यतो निश्चयेऽपि [३]नैतद्वाक्यार्थज्ञानात् प्राक् शक्तिपरिच्छेदोऽस्ति एतदर्थज्ञानानन्तरं च अति

(१) तन्निष्ठगुणाद्यात्मकोक्त्यसंभवादिति। चन्द्रत्वस्य चन्द्रनिष्ठप्रकृष्ट प्रकाशत्वादि गुणा-द्यात्मकत्वोक्त्यसम्भवात्।

(२) कल्पितो जलादर्शाद्युपाधिप्रयुक्तभेदो येषां प्रतिबिम्बानां ते तथा तेष्वनुवर्तमानाधिष्ठानस्य बिम्बत्वधर्मावच्छिन्न चन्द्रव्यक्तेरेव चन्द्रत्वलक्षण सामान्यतयेत्यर्थ:।

(३) एतद्वाक्येति प्रकृष्ट प्रकाश इति वाक्यार्थ ज्ञानादिति। एतदर्थाज्ञानान्तरमिति प्रकृष्ट प्रकाशार्थ ज्ञानान्तरमिति।।

देशवाक्यार्थज्ञानानन्तरं गवयादिपदानामिव उपमित्या तच्छक्तिग्रहः, साधर्म्यवैधर्म्यविशिष्टपिण्डज्ञानवत् असाधारणधर्मविशिष्टपिण्डज्ञानस्यापि उपमितिकरणत्वादित्यसाधारण्येन शक्तिग्रहस्यैवाऽभावे कथं लक्षणा? कथं वा अखण्डचन्द्रशाब्दबुद्धिः? इति चेत्। न। सिंहादिपदेष्विव अनुमानप्रवादाद्युपस्थितवैजात्यशालिन्यनिर्धारितस्वरूपे प्रागेव व्यवहारादिना गवयादिपदशक्तिग्रहसंभवेन उपमितेः शक्तिग्राहकत्वे मानाभावात्। कथमन्यथा 'गवयः कीदृशः' इति प्रश्नवाक्यस्य प्रयोगः, 'गोसदृशो गवयः' इत्याद्यतिदेशवाक्यार्थस्य वा बोधः। गवयपदवाच्ये गवयपदलक्षणाज्ञानस्यापि शक्तिग्रहोत्तरकालत्वसाम्यात्। अत एव गवय संनिकर्षोत्तरं अतिदेशवाक्ये स्मृते तेन गोसादृश्योपलक्षिताऽखण्डगवयव्यक्तेरपरोक्षः शाब्दबोधो निर्धारणात्मक उत्पद्यते। तदुत्तरं चोपमितिः। अत एव हि सदृशदर्शनोद्बुद्धसंस्कारस्मारिते अतिदेशवाक्यस्मारिते वा गवि गवयसादृश्यज्ञानमेव उपमितिरिति भाट्टाः। इत्थमेव हि चन्द्रपदेऽपि प्रागेव शक्तिग्रहः। इदं च व्यक्तिशक्तिवादे चन्द्रादिपदानां सावच्छिन्नां शक्तिमभ्युपगम्योक्तम्।

वस्तुतस्तु नानाव्यक्तिषु एकशक्तेरेकमवच्छेदकमन्तरेण अतिप्रसङ्गाऽप्रसङ्गयोरवर्जनात् व्यवहितविप्रकृष्टव्यक्तिषु परिचयाऽसंभवाच्च एकशक्यतावच्छेदकाऽपेक्षायामपि चन्द्राद्येकव्यक्तिमात्रनिरूपितायाः चन्द्रादिपदशक्तेः नाऽवच्छेदकापेक्षा। अतएव जातिशक्तिवादे गोत्वादौ गवादिपदानां निरवच्छिन्नामेव शक्तिमभ्युपेत्य लाघवमाहुर्भट्टादयः। नच वृद्धिह्रासयोः परिमाणभेदात् चन्द्रद्रव्यभेदेन प्रतिकल्पं चन्द्रव्यक्तिभेदेन च तदनुगतचन्द्रत्वजातिः तस्याः शक्यतावच्छेदकत्वं चाऽऽवश्यकमिति वाच्यम्। परिमाणभेदस्य रूपरसादिभेदस्येव द्रव्यभेदकत्वे मानाऽभावात्। प्रत्यभिज्ञाविरोधाच्च। वृद्धिक्षयाद्यवस्थानुगताऽखण्डचन्द्रव्यक्तेः तस्या एव प्रतिकल्पं आविर्भावतिरोभावयोर्लाघवात् श्रुत्याद्यनुरोधाच्चाऽभ्युपगन्तुं शक्यत्वात्। यदा अवस्थोपाध्यादिप्रयुक्तविशेषेषु घटादिपदं आक्षिप्तव्यक्तिष्विव चन्द्रपदं वर्तते, तदा तदुत्तरत्वप्रत्ययेन तद्विशेषाऽनुगताऽखण्डचन्द्रव्यक्तिरेव तद्धर्मत्वेनोच्यत इति।। एवमाकाशसच्चिदानन्दादिपदानामपि निरवच्छिन्नैव शक्तिः। तदुत्तरत्वप्रत्ययेनापि घटचित्तवृत्त्याद्युपाधिभिन्नतत्तद्धर्मत्वेनापि सैव अखण्डाऽऽकाशादिव्यक्तिरुच्यत इति सुवचत्वात्। व्यवहाराङ्गोपहितव्यक्त्याऽऽक्षेपे च प्रचुरप्रयोगाऽनुसारात् आनन्दपदेन विजातीयाऽन्तःकरणवृत्त्युपहितं, ज्ञानपदेन च तद्विजातीय वृत्त्युपहितं, सत्पदेनचोपहितमात्रं आत्मरूपमाक्षिप्यते कूपश्वभ्रपरिखाद्वारादिशब्दैः तत्तदुपहिताऽऽकाशस्वरूपमिवेत्यनादिसंस्कारादेव व्यवस्थोपपत्तेः न व्यवहारसङ्करः। नापि सच्चिदानन्दपदानां पर्यायताऽऽपत्ति। अथवा।

सदात्मादिपदानामेव निरवच्छिन्ना शक्तिः। चिदानन्दादिपदानां त्वध्यस्ततत्त-द्वृत्तिवैजात्याऽवच्छिन्नचिद्वाचितेति न दोषः।।

ननु प्रश्नानुरोधाज्जिज्ञासा शुद्धचन्द्रस्वरूप एवाऽस्तु, तथापि लक्षणवाक्यात् संसृष्टबोधसामग्रीबलात्संसृष्टार्थ एव बुध्यतां, प्रत्यक्षवच्छब्दस्यापि अजिज्ञासितबोधकत्वे दोषाऽभावात्। तत्राह— न वेति। अजिज्ञासिते = जिज्ञासाविषयभिन्ने, शाब्दधीः = पर्य-वसितशाब्दबोधः नवा अस्ति, शब्दानां जिज्ञासितविषय एव पर्यवसानस्वा-भाव्यादित्यर्थः। द्वारभूता तु विशिष्टार्थबुद्धिः बाधिताऽर्थकसाधारिणी लक्षणवाक्यादपि भवत्येव। अस्मन्मते तात्पर्यज्ञानस्य योग्यताज्ञानस्य च सर्वत्र शाब्दबुद्धौ हेतुत्वाऽभावात्। 'वह्निना सिञ्चति' 'गङ्गायां घोषः' इत्यादिवाक्यैरपि प्रथमं भ्रमाऽऽत्मकशाब्द-बुद्धेरनुभवसिद्धत्वात्। किन्तु बाधप्रतिसंधानोत्तरकालं तस्या अप्रामाण्यग्रहः, ततो लक्षणया अर्थान्तरबोधश्च। नचैवं सति शब्दस्य विरम्यव्यापाराऽऽपत्तिः। सति तात्पर्यज्ञाने तात्पर्यविषयार्थबोधमन्तरेण शब्दप्रवृत्तेरविरामात्। अन्यथा अवान्तर-वाक्यार्थघटितमहावाक्यार्थबोधाऽनापत्तेः। शब्दानामवान्तरवाक्यार्थबोधेनैव विरामप्रसङ्गात्। नचैवं युगपद्वृत्तिद्वयविरोधः। तात्पर्यविषयार्थबोधस्य अत्र लक्षणामात्रसाध्यत्वेन तत्र वृत्तिद्वयाऽनपेक्षणात् द्वारभूतबोधस्य च लक्षणाऽनपेक्षत्वात्, एकत्र उभयाऽपेक्षायामेव तस्य दोषत्वात्। अन्यथा अर्थवादवाक्यात् वाच्यार्थाऽन्वय-बोधद्वारकलाक्षणिकप्राशस्त्यशाब्दबुद्ध्यनापत्तेः। एतदेव ह्यभिप्रेत्योक्तं कल्पतरौ- "उपायस्तु वैशिष्ट्यमखण्डचन्द्रसिद्धौ सचाऽविरोधाच्चन्द्रेऽनुज्ञायते। सत्यादिवाक्ये त्वनन्तादिपदैर्बाध्यते वैशिष्ट्यम्" इति। इत्थं च परिशेषात् पर्यवसितबोधः चन्द्रमात्रगोचर इति निगमंयन्नुपसंहरति— तत इति।। ततः = उक्तयुक्तेः प्रकृष्टप्रकाशवाक्यात् .न्द्रस्वरूपमात्रस्य पर्यवसितबोधः सिद्ध इत्यर्थः।।

ननु विशिष्टज्ञानस्य कथं द्वारत्वेन उपयोगः। शुद्धचन्द्रव्यक्तेः अज्ञातज्ञापनलक्षणे विधाने उद्देश्यसमर्पकत्वेन उपयोग इति तु न शक्यं वक्तुम्। द्वयोरेकज्ञानविषय-त्वमन्तरेण उद्देश्यविधेयभावस्यैवाऽयोगात्। अखण्डे ज्ञातत्वाऽज्ञातत्वघटितयोः तयोर्युगपदसंभवाच्च। एवं लक्ष्यलक्षणभावोऽपि कथं? प्रागज्ञातस्य लक्षणत्वादर्शनात्। ज्ञाते च प्रश्नजिज्ञासयोरनुपपत्तेः। ज्ञातस्य लक्षणस्य लक्ष्याऽन्यत्वे च स्वरूपलक्षण-त्वप्रवादाऽनुपपत्तेरिति चेत्। श्रृणु। कल्पतरुकाराणां मते द्वारभूतंविशिष्टचन्द्रगोचरं लक्षणज्ञानं, फलीभूतं च चन्द्रमात्रगोचरं। पूर्वोत्पन्नविशिष्टगोचरवृत्तिस्थितिकाल एव शुद्धगोचरवृत्त्युदयाऽभ्युपगमात्। क्षणमात्रं पूर्वोत्तरवृत्त्योः संवलनेन पूर्ववृत्तिविषयस्य उद्देश्यत्वं, उत्तरवृत्तिविषयस्य च शुद्धस्य विधेयत्वं, ज्ञानभेदेऽप्युपपद्यत एव।

"यच्छब्दयोगः प्राथम्यमित्याद्युद्देशलक्षणम्"

इत्यभियुक्तोक्त्या सर्वत्रैव उद्देश्यस्य प्रथमबोधस्य गुणत्वात्, विशिष्टस्य च चन्द्रस्वरूपाऽबहिर्भावादबाधाच्च स्वरूपलक्षणत्वमप्यव्याहतम्। जगज्जन्मादिकारणत्वस्य तु बाह्यजगद्घटितत्वाद्बाधाच्च न स्वरूपलक्षणत्वमिति। एतदेवाऽभिप्रेत्योक्तं कल्पतरौ—"न हि चन्द्रद्वयमस्ति। न च लक्षणस्य विशिष्टत्वाल्लक्ष्यं विशिष्टं स्यात्" इति। वाच्यार्थनानात्वेष्टत्वात्, लक्ष्यस्य चैकत्वात्। अद्वैतसिद्धिकारादीनां मते तु पर्यवसितबोधविषयशुद्धचन्द्रस्यैव प्रागज्ञानोपहितचिद्विषयत्वेनोद्देश्यता, अज्ञाननिवर्तकवृत्तिविषयत्वेन विधेयतेति वा, विशिष्टाऽन्तर्भावेण प्रसिद्धत्वादुद्देश्यता, स्वरूपेणत्वपूर्वत्वाद्विधेयतेति वा एकस्याप्युभयथा व्यवहारोपपत्तिः। उद्देश्यत्वं प्राधान्यव्याप्यं, विधेयत्वं च गुणत्वव्याप्यमिति नियमश्च अप्रवृत्तप्रवर्तनरूपविधावेव, न सिद्धार्थबोधे। भूतले घट इत्यादिवाक्ये (१)वैपरीत्यस्यापि दर्शनात्। अत एव नसांसर्गिकविषयतानिरूपकनिष्ठत्वनियमोऽपि। नीलमुत्पलमित्यादौ सति तात्पर्ये संसर्गमात्रस्यापि विधेयताप्रत्ययेन तत्र व्यभिचारात्। एवं (२)तस्यैव विशिष्टान्तर्भावेण निश्चितत्वादसाधारणत्वाच्च लक्षणत्वं, व्यावृत्तबुद्धिग्राह्यत्वाच्च लक्ष्यत्वं, प्रकर्षप्रकाशत्वोपलक्षितत्वेन लक्षणत्वम्, चन्द्रत्वोपलक्षितत्वेन लक्ष्यत्वमिति वा बोध्यम् इति। सर्वथापि वाक्यस्य चन्द्रस्वरूपमात्रनिष्ठत्वात् न दृष्टान्ते साध्यसाधनवैकल्यमिति भावः। केचित्तु अलौकिके ब्रह्मण्यलौकिकीमेव प्रमाणप्रवृत्तिमभ्युपगम्य अखण्डाऽद्वितीयपरमार्थवस्तुनिष्ठानां अवान्तरवाक्यमहावाक्यानामेव अलौकिकमखण्डार्थत्वं विद्वदनुभवैकवेद्यमाहुः।। ४५।।

इत्थं लक्षणस्वरूपप्रमाणैः सत्यादिवाक्यानां महावाक्यानां चाऽखण्डार्थत्वं प्रसाध्य तमनुभावयितुं चतुर्ष्वपि वेदेषु प्रसिद्धमहावाक्येषु तात्पर्यमालोच्याऽभिलप्य दिदर्शयिषुरादौ आग्वेंदिके "प्रज्ञानंब्रह्म" इति वाक्ये दर्शयति—य इति।

मू०।। यः प्राग्विसृज्य भुवनं तनुमाविवेश
यः पञ्चभूत सुर मानुष तिर्यगाऽऽत्मा।
येनाऽवलोकयति वक्त्यभिमन्यते च
प्रज्ञानमात्र विभवोऽहमसौ पराऽऽत्मा।। ४६।।

---

(१) वैपरीत्यस्यापीति।। भूतले घट इत्यत्रोद्देश्यस्य भूतलस्य सप्तम्यन्तपदबोध्यत्वेनोपसर्जनत्वम्। तथा विधेयस्य घटस्य प्रथमान्तपदबोध्यत्वेन प्राधान्यत्वमिति। वैपरीत्येत्यर्थः।।

(२) तस्यैव = शुद्धचन्द्र व्यक्तेरेव।।

तत्र सृष्टिवाक्यवर्णन प्रसङ्गेन अस्याः श्रुतेस्तात्पर्यस्य विस्तरेण वर्णितत्वात्स-ङ्क्षिप्य उच्यते। यः = परमात्मा, प्राक् = सर्गादिकाले, भुवनं = लोकादिशरीरं विराजं, विसृज्य = स्वगतविशेषैर्नानाप्रकारं सृष्ट्वा। तनुं = कर्मज्ञानाऽधिकृत पौरुषशरीरं आविवेशेति ब्रह्मपदवाच्यं कारणोपाधिचैतन्यं तदेव प्रतिबिम्बभावेन कार्योपाधिप्रविष्टं प्रज्ञानपदवाच्यं चेति भागत्यागलक्षणायां अखण्डैक्ययोग्यौ पदयोर्वाच्यार्थौ दर्शितौ। यः = परमात्मा स्वाध्यस्तानां पञ्चभूतानां सुर मानुष तिरश्चां = देवमनुष्य पश्वादि चतुर्विधशरीराणांच, आत्मा = पारमार्थिकं स्वरूपमिति "एषब्रह्मैषइन्द्रः" इत्यादि संदर्भतात्पर्यविषयोऽपरिच्छिन्नचैतन्यात्मा प्रत्यङ्मात्र पर्यवसितो ब्रह्मपदलक्ष्यार्थो दर्शितः। येनैवाऽऽत्मना सर्वोऽपि लोकः अवलोक-यति = विषयान्साक्षात्करोतीति चक्षुरुपलक्षित सर्वबाह्येन्द्रिय वृत्तिप्रतिफलनेन आत्मन एवाऽर्थप्रकाशकत्वमुक्तम्। येनैवाऽऽत्मना वक्ति = वचनादिना व्यहरतीति तस्यैव वागुपलक्षितसर्वकर्मेन्द्रिय व्यापारेषु अयस्कान्तवत्संनिधिमात्रेण निमित्ततोक्ता। येनाऽभिमन्यतइत्यन्तः करणे प्रतिफलनादान्तराभिमानादिवृत्ति प्रकाशवृत्त्योर्निमित्त-तोक्ता। अनेन चाऽवलोकनादिकर्तुरुपहिताच्छुद्धस्य येनेतिपृथक्कृत्य प्रदर्शनात् सर्वाऽधिष्ठानपर्यवसितः शोधितः प्रज्ञानपदलक्ष्यार्थ उक्तः। ईक्षणपूर्वक सर्वसृष्टेः इन्द्रियाऽऽदिद्वारकेसर्वव्यवहारस्य चोभयत्राऽपि विमर्शे चैतन्यमात्रनिर्बाह्यत्वात् तद्दृश्यस्य च तद्व्यतिरेकेण सत्तास्फूर्त्त्योरसिद्ध्या तदध्यस्तत्वेन मिथ्यात्वात् परमार्थतः प्रकृष्टं सर्वोपाधिकृताऽपकर्षशून्यं स्वरूपज्ञानमेव परमानन्दरूपत्वात् सर्वनिर्वाहकत्वाच्च विभवः = ऐश्वर्यं यस्य सः प्रज्ञानमात्रविभव इति शोधस्य परस्परैक्यपर्यं तत्त्वप्रदर्शनाय शोधितयोरैक्येन निर्देशः। एवं च सति प्रज्ञानं ब्रह्मेति महावाक्यस्य अखण्डैक-वस्तुमात्रपरत्वमेव सम्पन्नमित्यभिप्रेत्य वाक्यार्थं दर्शयति— अहमसौपरात्मेति। असौ = कोऽयमात्मेत्यादिना विमृष्टः प्रज्ञानैकरसत्वेन परिशेषितः अहङ्कारसाक्षी प्रत्यक्, परात्मा = "आत्मा वा इदं" इत्यादिप्रकृताऽपरिच्छिन्नज्ञानैकरसं ब्रह्मैव नाऽन्यदिति वाक्यार्थ इत्यर्थः।। ४६।।

इत्थमेव याजुर्वेदिक काण्वमाध्यंदिनोभयशाखीय बृहदारण्यकाऽन्तर्गतस्य "अहं ब्रह्मास्मि" इति महावाक्यस्यापि तात्पर्यपर्यालोचने अखण्डैक्यपरत्वमेवेति दर्शयन् सपरिकरं तदर्थमभिलप्य दर्शयति— यदिति।

मू०।। यद्व्याकृतं जगदभूत्तमसाऽऽनखाग्रा-
द्यच्च प्रविष्टतनु कृत्स्नमकृत्स्नमासीत्।
प्रेयस्तदेव परमं परमार्थतोऽहं
ब्रह्मास्मि तद्विदितवद्धि तदेव सर्वम्।।४७।।

तत्राऽऽदौपदयोर्वाच्यार्थौ तयोः शोधनादैक्यपर्यवसानं च दर्शयितुं "तद्धेदंतर्ह्यव्याकृतमासीत्" इत्यादि "तदेतत्प्रेयः पुत्रात्" इत्यन्त श्रुतिसंदर्भप्रवृत्तिरिति दर्शयति— यदित्यादि परमार्थ इत्यन्तेन। यत् = ब्रह्म प्रलये अव्याकृतनामरूपं जगद्बीजमद्वितीयमेव सर्गादौ प्राणिकर्मादिवशात् व्याकृतनामरूपाऽवस्थं सत् स्वयमेव जगदभूत्। अनेन जगज्जन्मादिकारणं ब्रह्मपदवाच्यार्थ इति दर्शितम्। यदेव च ब्रह्म चतुर्विधशरीरसृष्ट्यनन्तरं प्रविष्टा तनुः = उपभोगस्थानं शरीरं येन तत् तथाभूतं सत् वस्तुतः कृत्स्नं = अपरिच्छिन्नाऽनन्दरूपमपि, ब्रह्म अकृत्स्नं = परिच्छेददुःखाऽदिधर्मि आसीदित्यर्थः। अनेन "स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुराधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाय" इति वाक्यलब्धमुपाधिप्रवेशाज्जीवभावाऽऽपन्नं प्रकृतं ब्रह्मैव अहंपदस्य वाच्यार्थ इति दर्शितं। श्रुतौ क्षुरधाने = कोशे, अवहितः = स्थापितः विश्वंभरः = अग्निः, कुलायो = कुलायवदाश्रये काष्ठादौ।। नन्वविकारिणो ब्रह्मणः कथं जगज्जीवभावौ? विकारित्वे च कथं न अनित्यतादि? इत्याशङ्क्याह— तमसेति। इदं च देहलीदीपन्यायेन पूर्वोत्तरान्वयि। तमोवदावरणविक्षेपशक्तिमता अज्ञानेनैव ब्रह्मणो जगज्जीव भावौ कल्पितौ, नवास्तवावित्यदोष इत्यर्थः। प्रदर्श्यतेचाऽयमर्थः श्रुत्यैव, "तं न पश्यन्त्यकृत्स्नो हि सः प्राणन्नेव प्राणोनाम भवति वदन्वाकपश्यंश्चक्षुः श्रृण्वन् श्रोत्रं मन्वानो मनः" इति। इहोपाधौ प्रविष्टमात्मानं जना न पश्यन्ति निरुपाधिकवास्तवरूपेण न पश्यन्तीति मूलाऽज्ञान प्रदर्शनं। तत्कुतः? हि = यस्मात् परिच्छिन्नोपाधिवशः स आत्माऽपि अकृत्स्नः = परिच्छिन्नः तद्धर्मानेव आत्मन्यभिमन्यते। यथा प्राणन्नेव प्राणोनाम भवति प्राणे प्राणनव्यापृते सति तदुपाधिकोऽपि प्राणस्तद्धर्मेण प्राणो नाम स्वयमेव भवति। अत एवह्यशनायापिपासाद्यात्मनः इति मन्यते। एवं वाचि वदन्त्यां स्वयमपि वदन्वागेव भवति। अत एव हि वाचालमूकत्वाद्यात्मनि मन्यते। एवं पश्यंश्चक्षुः सन्नान्ध्यमान्द्यकाणत्वाद्यभिमन्यते। एवं श्रोत्राऽऽत्मासन्वाधिर्याद्यभिमन्यते। एवं मन्वानो मनोभूतः तद्धर्मसङ्कल्पविकल्पशोकमोहादीन् मन्यत इत्यज्ञानमेव सर्वाऽनर्थमूलमिति श्रुतेराशयः। जीवभाववज्जगद्भावस्याऽप्यकृत्स्नताऽऽपत्तिरूपत्त्वात् विराडादिजीवोपाधित्वाऽविशेषाच्च तस्याप्यज्ञानमूलत्वं दर्शितमेव। अत एवोत्तरत्र "स योऽत एकैकमुपास्ते न स वेद अकृत्स्नो ह्येषः अत एकैकेन भवत्याऽऽत्मेत्येवोपासीत" इति परिच्छिन्नप्राणाद्येकैकदृष्टिनिन्दापूर्वकं आत्मैकनिष्ठायामादराऽतिशयं विधाय श्रुतिः "तदेतत्पदनीयमस्य सर्वस्य" इति सर्वपदार्थानां मध्ये आत्मन एवाऽवश्यं ज्ञेयत्वमुक्त्वा "अनेन ह्येतत्सर्वं वेद" इत्याऽऽत्मविज्ञानेनैव सर्वविज्ञानं तेनैव च कृत्स्नतां सदृष्टान्तं दर्शयति। द्वैतमात्रस्य

आत्माऽज्ञानकार्यत्वे हि तज्ज्ञानस्य सकार्याऽज्ञाननिवर्तकत्वेन पूर्णाऽऽत्मभाव-लक्षणकृत्स्नताप्रापकत्वमुपपद्यते नान्यथेति जगज्जीवभावयोराविद्यकत्वप्रदर्शनेनैव मिथ्यात्वबोधनात् तद्विनिर्मुक्तकृत्स्नात्मैव पदयोर्लक्ष्यार्थ इति दर्शितम्। नित्यदुःखित्वेन सर्वाऽनुभवसिद्धे प्रतीचि परमानन्दैकरस ब्रह्माऽभेदाऽसंभावनावारणाय प्रेयस्त-मत्वलिङ्गेन तस्यापि सुखैकरूपतां दर्शयति— प्रेय इति। देहपुत्रमित्राद्यनात्मवर्गोऽपि आत्मोपकारत्वात्प्रियः। आत्मापिप्रियः। तयोरात्मा अनन्यार्थत्वादुत्कृष्ट इति (१)"द्विवचनविभज्योपपदे तरवीयसुना" विति ईयसुन्। (२)"प्रियस्थिरे" इत्यादिना प्रादेशः। अनेन "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इत्येतद्वाक्यार्थसङ्ग्रहेण अहंपदार्थशोधस्य ब्रह्मपदाऽर्थपर्यन्तता दर्शिता। एवं ब्रह्मपदार्थशोधस्यापि अहंपादर्थपर्यन्ततां दर्शयितुमाह–तदेव परममिति। परमार्थतः = बाध्यसामान्यनिष्कर्षे परमं = ब्रह्मतत्त्वमपि तदेव = प्रत्यग्रूपमेव पर्यवस्यतीत्यर्थः। अन्यथा "स योऽन्यदात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियं रोत्स्यति" इतिवाक्यात्प्रत्यगन्यस्य नश्वरत्वोक्तिव्याघातादिति भावः।। एवं च सत्यखण्डवस्तुन्येव वाक्यं पर्यवसन्नमित्यभिप्रेत्योदाहरति— अहं ब्रह्मास्मीति। अत्र "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवाऽवेत्" इत्यत्र ब्रह्मपदेन कार्यं ब्रह्म, ब्रह्मविद्याधिकृतब्राह्मण-जातिर्वोच्यते ओदनं पचतीतिवद्भाविनीं वृत्तिमाश्रित्य। मनुष्याणामेव विशेषतो विद्याधिकारात्। "यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते" इति तेषां प्रस्तुतत्वाच्च। न तु परं ब्रह्म। तस्य नित्यमुक्तत्वेन विद्याऽनधिकारात्। अतोऽहं ब्रह्मास्मीति संसारिण एव ब्रह्मभावं सम्पाद्य उपासनार्थ उपदेशः तत्फलं च सर्वभावाऽवाप्तिरिति केचित्। तान्निराकुर्वन्नाह— तद्विदितबद्धीति। हि यस्मात् तत् = ब्रह्मैव स्वात्मानं विदितवत् = साक्षात्कृतवत् सत् सर्वं = पूर्णं सदवतिष्ठते। तथा च ब्रह्मैव स्वाविद्यया संसरतीव, स्वविद्ययामुच्यते इव। न संसारी नामाऽन्योऽस्तीति श्रुतेरभिप्राय इत्यर्थः। उपासनाफलत्वे हि सर्वभावाऽऽपत्तिलक्षणा मुक्तिरनित्या स्यात्। किञ्च।। पूर्ववाक्ये "यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तत् ब्रह्माऽवेत्" इति ब्रह्मभावयोग्या अधिकारिणो यादृशब्रह्मगोचरविद्यया

(१) द्विवचनविभज्योपपदे।। अष्टा० अ० ५ पा० ३ सूत्र ५७।। द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे। सुप्तिङन्तादे तौस्तः। पूर्वयोरपवादः। अयमनयोरतिशयेनलघुर्लघुतरः लघीयान्। उदीच्याः प्राचेभ्यः पटुतराः पटीयांसः।।

(२) प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फबर्हिगर्वर्षित्रप्द्रघिवृन्दाः।।अ०६ पा०४ सू०१५७।। प्रियादीनां क्रमात्प्रादयस्युरिष्ठादिषु।। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रिपिष्ठः। द्रघिष्ठः। वृन्द वृन्दिष्ठः। एवमीयसुन्।। प्रेयान्।। प्रियोरूबहुलंगुरुदीर्घाणां पृथ्वादित्वादि मनिच्।। प्रेमेत्यादि।।

स्वयमपि ब्रह्मभविष्याम इति मन्यन्ते, तद्ब्रह्म "किमवेत्" इति वेद्यब्रह्मकर्तृकवेदनस्य वेद्यान्तरम् अस्ति? नास्ति वा? इति विमर्शाय प्रश्ने तदुत्तरवाक्येऽपि वेद्यब्रह्मण एव परामर्शो युक्तः, नाऽपृष्टमनुष्यादेः। "तदात्मानमेवावेत्" इति वेद्यान्तर-प्रतिषेधोऽपिह्येवंसति स्वारसिकः स्यादिति मुधैव ब्रह्मशब्दस्याऽमुख्या-ऽप्रकृतार्थकल्पना।। किञ्च।। नाऽज्ञाते ब्रह्मणि संसारिणस्ताद्रूप्यं संपादयितुं शक्यम्। ज्ञाते तु ज्ञानेनैव कृतार्थत्वात्सम्पादनवैयर्थ्यमित्यसकृदुक्तमेवेति भावः।। ४७।।

तैत्तिरीयश्रुतौ तु प्रत्यग्ब्रह्मणोरखण्डैक्यं कण्ठोक्त्यैव प्रतिपादितमिति न सन्देहलेशोऽपीत्याह—य इति।

मू०।। यश्चाऽयमत्र पुरुषे प्रथते गुहान्त-
र्यश्चाऽप्रमेयसुखभूः सवितुश्च बिम्बे।
एकः स इत्यभिदधुः स्फुटमैक्यमेके
तद्वेदनाच्च विलयं जगतश्च तत्र।।४८।।

एके = तैत्तिरीयाः "स यश्चाऽयं पुरुषे यश्चाऽसावादित्ये स एकः" इति महावाक्ये प्रथमेन यच्छब्देन अत्र = अस्मिन् पुरुषे = ज्ञानाऽधिकारिणि गुहान्तः = पञ्चकोशगुहामध्ये यः = प्रत्यक्चेतनधातुः प्रथते = अवस्थात्रयसाक्षी स्वतः प्रकाशते इति कोशाऽवतारणश्रुतितात्पर्यविषयीभूतः शोधितः प्रत्यगुच्यत इत्यर्थः। द्वितीयेन तु यच्छब्देन "सोऽकामयत" इत्यादिना यतो वेत्यादिना च जगत्प्रकृतिकर्तृत्वेन उपपादितः अप्रमेयसुखभूः = अपरिच्छिन्नाऽऽनन्दैकरसत्वेन मानुषाऽऽनन्दाद्युत्कर्षपरम्परोपपादनेन परिशेषितो जगन्मुख्याधिकारस्थाने सवितुः = सूर्यस्य बिम्बे च जगद्व्यापारनिर्वाहकसार्वज्ञ्यप्रयोजकाऽनावृता-ऽपरिच्छिन्नचैतन्य धातुः स्वत एव प्रथते = प्रकाशते स उच्यत इत्यर्थः। स इति च यच्छब्दद्वयोपात्ते प्रत्यग्ब्रह्मणी अनूद्याऽखण्डैक्यमेव *एकशब्देन उच्यत इति स्फुटं = कण्ठोक्त्यैव व्यक्ततरं प्रत्यग्ब्रह्मणोरखण्डैक्यं अभिदधुः = उक्तवन्तः। उत्तरत्र ज्ञानफलवर्णनेनाप्येतदेव दृढीकृतमित्याह— तद्वेदनादिति। तस्य = उक्तरीत्या एकस्याऽऽत्मनः, वेदनात् = साक्षात्कारात्, जगतः = अन्नमयादिप्रपञ्चस्य, तत्र = तादृशे प्रत्यगात्मन्येव, विलयं = घृतकाठिन्यवन्मरीचिकोदकवद्वा विलयं तद्व्यतिरेकेण असत्त्वलक्षणं बाधं चकारात्तत्प्राप्त्या निरतिशयाऽऽनन्दावाप्ति आत्यन्तिकाऽभयप्राप्तिञ्च "स य एवंवित्। अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मान-मुपसङ्क्रामति" इत्यादिना "यतो वाचो निवर्तन्ते" इति श्लोकेन च स्फुटमभिद-

*ऐक्यशब्देन इति. पा.।

धुरित्यर्थः। न हि प्रतीचो ब्रह्माऽन्यत्वे ब्रह्मोपादानकं प्रपञ्चं विद्वान् स्वस्मिन्नुपसंक्रामयितुं शक्तः, न वा निरतिशयं ब्रह्मानन्दं स्वयं भोक्तुं, न वा द्वितीयसद्भावे तादृशाऽभयं प्राप्तुम्। ''द्वितीयाद्वै भयं भवति'' इति श्रुत्यन्तरात् ''उदरमन्तरं कुरुते अथ तस्य भयं भवति'' इत्यत्रापि भेददर्शिनो भयाऽवश्यंभाव श्रवणादिति भावः।। ४८।।

सामवेदप्रसिद्धस्य तत्त्वमसीति महावाक्यस्य अखण्डार्थत्वं प्राग्विस्तरेण वर्णितमेव। दर्शितैक्याऽसंभावनाशङ्कादिनिरासार्थः तत्रत्यो नवकृत्वोऽभ्यासः प्राङ्न्वर्णित इति दशभिः श्लोकैः तद्वर्णनेन छान्दोग्यषष्ठप्रपाठकाऽभिप्रायसर्वस्वमुद्घाटयति— आसीदिति।।

मू०।। आसीत्सदेव हि भवाननृतं विधाय
तेजोमुखं तदभिमत्य बभूव जीवः।
देहान्तशुङ्गमवधूय विलोकय स्वं
सद्ब्रह्म तत्त्वमसि बोधसुखाऽद्वितीयम्।। ४९।।

तत्र अस्मिन् श्लोके ''सदेव सोम्य'' इत्यादि ''सदायतनाः सत्प्रतिष्ठाः'' इत्यन्तसन्दर्भनिर्गलितार्थप्रदर्शनपूर्वकं प्रथमाऽभ्यासो वर्ण्यते। हेश्वेतकेतो! सृष्टेः प्राक् भवान् सैन्धवखिल्यः सिन्धाविव उपाधिप्रविलयात्पारमार्थिकस्वात्मभूते सति सम्पन्नो वस्तुतः सजातीयादिभेदशून्यं सदेवाऽऽसीत्, तथाभूतो भवान्विमर्शे वाचारम्भणमात्रत्वान्मायिकत्वाच्च अनृतं = मिथ्याभूतं, तेज एव मुखम् = मूर्तेष्वाद्यं यस्य तथाभूतं श्रुत्यन्तरानुसारात् आकाशादिभूतभौतिकचतुर्विधशरीरान्तं प्रपञ्चं विधाय = त्रिवृत्करण श्रुतेरुपलक्षणत्वात् पञ्चीकरणक्रमेण सृष्ट्वा तत् = स्वसृष्टं कार्यकारण सङ्घातं अभिमत्य = अन्योन्याऽध्यासेनाऽत्मसात्कृत्य, जीवो बभूव। तथाचाऽनृतोपाधिप्रयुक्तो जीवभावोऽप्यनृत एव, पररूपाऽऽपत्तिर्हि परमात्मनः सः। अत एव सुषुप्तौ ''सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति'' इत्यादिना उपाधिप्रविलये स्वरूपे स्थितिं दर्शयतीति भावः।. यद्येवं तर्ह्यनर्थहेतोर्जीवभावस्यआत्यन्तिकोच्छेदे क उपायः? तत्राह— देहान्तेति। ''यदग्ने-रोहितं रूपम्'' इत्यादिना श्रुत्योपदर्शितया कारणव्यतिरेकेण कार्याऽसत्त्व-पर्यालोचनयुक्त्या ''अन्नेन सोम्य शुङ्गेनाऽपो मूलमन्विच्छ, अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ'' इति वाक्यदर्शितक्रमेण देहः अन्तः = चरमोत्पन्नो यस्मिंस्तद्देहान्तं शुङ्गम् = अङ्कुरः, तत्सदृशं कार्यद्वैतजातं अवधूय = मिथ्यात्वदृष्ट्या निरस्य। परममूलभूतं स्वं = वास्तवमात्मानं विलोकय = प्रत्यग्दृष्ट्या पश्य। तत एवौपाधिकजीवभावनिवृत्तिर्भविष्यतीति भावः। तथा-

चोक्तं वार्तिके—

"तस्मात्संभावनामात्रः संसारः प्रत्यगात्मनि।
उक्तेऽर्थे संशयश्चेत्स्यात्प्रत्यग्दृष्ट्या निरीक्ष्यताम्''।। इति।।

तथादर्शने च वाक्यमेव साधनमित्यभिप्रेत्य तत्पदलक्ष्यार्थकीर्तनपूर्वकं-वाक्यमुदाहरति— सद्ब्रह्म तत्त्वमसीतिं।। श्रुत्यन्तरे बोधसुखाद्वितीयत्वेन प्रसिद्धं सदेवेत्युपक्रान्तं सजातीयादिभेदशून्यं यद्ब्रह्म तत्त्वमेवाऽसि नान्य इत्यर्थः।। ४९।।

ननु उक्तायां सत्सम्पत्तौ संशयः— यदि सुषुप्तिप्रलययोः सति सम्पद्यन्ते? तर्हि वयं सति सम्पन्नास्स्म इति सर्वे जानीयुः, उत्थिताश्च स्मरेयुः, नत्वेतत्प्रसिद्धम्। पुनरुत्थाने वा कोहेतुरिति? तन्निराकरणाय "यथा सोम्य मधु मधुकृतः" इतिखण्डिकोत्थितिः। तत्तात्पर्यं सङ्गृह्णन् द्वितीयाऽभ्यासं वर्णयति— सम्पद्येति।।

मू०।। सम्पद्य यत्र मधुनीव रसाः सुषुप्तौ
सौख्यैकरस्यमधिगम्य जना न विद्युः।
यत्प्रच्युताः पुनरमी बहुदुःखभाजः
सद्ब्रह्म तत्त्वमसि नाऽसि कदापि दुःखी।।५०।।

जनाः = जननधर्माणो जीवाः। रसाः = नानाजातीयप्रसूनमकरन्दाः मधुकरैरुपनीताः मधुनि सम्पद्य = मधुभावं प्राप्य मधुरैकरस्यमुपगम्येवसुषुप्तौ सौख्यैकरस्यं प्राप्याप्यविद्याऽऽवृतत्वान्न विद्युः। [१]प्राप्तकालतायांलिङ्। प्राप्तिकालमपि प्रतिसन्धानं न लभन्त इत्यर्थः।। वक्ष्यति हि श्रुतिः—"त इमे सत्याः कामा अनृतापिधानाः" इति, "तद्यथापिहिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो नविन्देयुः। एवमेव इमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यऽनृतेन हि प्रत्यूढाः" इतिच। यतो नविद्युः अत एव वासनाकर्मादिवशात्पुनरुपाध्याऽऽविर्भावे यत्प्रच्युताः = यस्मादानन्दैकरसस्वरूपात्प्रच्युताः अमी = जनाः पुनः = भूयोऽपि पूर्ववद्व्याघ्रसिंहवृकवाराहदंशमशकादि देहभावाऽध्यासात् जननमरणक्षुत्तृषारोग-भयादिबहुदुःखभाजो भवन्ति, युगसहस्रकोट्यन्तरायेऽपिजन्तोः पुराभाविते वासनाकर्मणी विनाज्ञानं मूलोच्छेदेन ननश्यत इतिभावः।। अतः परमानन्दैकरसं सद्ब्रह्मैव त्वमसि। आविद्यकं तव दुःखित्वं। ऐक्यज्ञानेन अविद्यानिवृत्तौ तु न कदापि दुःखी त्वमसीत्यर्थः।।५०।।

---

(१) प्राप्तकालतायां लिङ्। यच्छब्दे उपपदे कालसमयवेलासु लिङ् प्रत्ययः स्यादित्यर्थः।।

ननु गृहे सुप्तः स्वस्य गृहाऽवस्थितिमिव सुषुप्ता अपि सतिसम्पत्तिं निद्रामूढत्वान्नविन्दन्तु, सुप्त्वोत्थाय गृहादागच्छन्पुरुषः स्वस्य गृहदागमनमिव सत उत्थाय जागरादावागच्छन्तः 'सत आगच्छामः' इति कुतो न विजानन्तीत्याशङ्कां दृष्टान्तोपन्यासेन निराकर्तुम् "इमाः सोम्य नद्यः" इति खण्डिकोत्थानम्। तत्तात्पर्यं सङ्गृह्णन् तृतीयाभ्यासं वर्णयति— अब्धिरिति।।

मू०।। अब्धिर्यथा जलधरैरपनीय नीतो
नद्यादिभावमुदधित्वमतिं जहौ स्वाम्।
एवं भवानुपधिभिः खलु विस्मृतः स्वं
सद्ब्रह्म तत्त्वमसि संस्मर पूर्णभावम्।।५१।।

यथा अब्धिः = समुद्रः सदा पूर्णस्वभावोऽपि प्राणिकर्मप्रयुक्तैर्जलधरैर्वर्षासु पीतो जलधिभावात् प्रच्याव्य देशान्तरं प्रत्यपनीय वृष्टिद्वारा नद्यादिभावं नीतः पुनः कालान्तरे समुद्रभावे पूर्वं च समुद्रोऽयमिति स्वाभाविकरूपेण ग्रहणाऽर्होऽपि कूलद्वयान्तः प्रवाहोपाधिना 'नदीयम्' इत्येव धियं धत्ते स्वां अनाद्यनन्तपूर्वोत्तर-कालाऽनुवृत्तत्वात् स्वाभाविकीं उदधित्वमतिं = समुद्रताबुद्धिं जहौ। नदीभावे समुद्रत्वेनाऽव्यवहारादित्यर्थः। यथाऽयं दृष्टान्तः, एवं अमुनैव प्रकारेण भवान् सदेव सन्, उपधिभिः = अविद्यान्तःकरणशरीरादिलक्षणैरुपाधिभिः। स्फटिकं जपाकुसुमोपरागात् स्वाभाविकं शौकल्यमिव, स्वं = सदाऽत्मभावं, विस्मृतः = नाऽनुसन्धत्त इति सत आगमनमपि न वेत्तीत्यर्थः। अत एव हि श्रुत्या बोध्यते, तद्विशुद्धं पूर्णसद्ब्रह्मैव त्वंमसि स्वस्य पूर्णभावं स्वाभाविकं संस्मर = नि-रन्तरमनुसंधत्स्व। तदनुसन्धानादेव व्याधकुलवर्धितराजसूनोराजभावानुसंधाने व्याधभाव इव तव जीवभावोऽप्यपैष्यतीति भावः।। इह यद्यपि श्रुतौ "ताः समुद्रात्समुद्रमपियन्ति स समुद्र इत्येव भवति ता यथा तत्र न विदुरियमहमस्मि" इति नदीनां समुद्रभावाऽपत्तौ नदीभावाऽस्मृतिर्दृष्टान्तिता, तथापि स पूर्वावस्थाऽप्रतिसन्धानमात्रे दृष्टान्तः, सर्वांशे दृष्टान्त्लाऽऽञ्जस्यं तु नदीभावेसमुद्रभावाऽप्रतिसंधान एवोपपद्यत इति तथैवोक्तमिति बोध्यम्।।५१।।

ननु यदि जीवाः सत उत्थाय सत्येव सम्पद्यन्ते तर्हि जलादुत्थाय जल एव संपद्यमाना बुद्बुदतरङ्गादय इवाऽनित्यास्स्युः। देहादेरपि सत उत्थानाऽविशेषा-दहंबुद्धिविषयत्वाच्च जीवो देहाद्यतिरिक्तश्च न स्यात्। समुद्रवत् सतोऽपि सविकारत्वाऽऽपत्तिश्चेत्याद्याऽऽशङ्काऽपाकरणाय "अस्य सोम्य महतो वृक्षस्य" इति खण्डिकोत्थानं। तत्तात्पर्यं संगृह्णन् चतुर्थाऽभ्यासं वर्णयति— जीवेति।।

मू०।। जीवप्रहीण तरु शोषविशेष लिङ्गा-
दात्मा परोऽस्ति तनुतः सच नित्य एकः।
विद्ध्यैतदात्म्यमखिलं वितथद्वितीयं
सद्ब्रह्म तत्त्वमसि मुञ्च विभेदमोहम्।।५२।।

जीवेन प्रहीणस्य = क्रमात् त्यक्तस्य, तरोः = वृक्षस्य, शोषविशेषः = शोषणवैचित्र्यं यथा एकशाखात्यागे तावन्मात्रशोषो, द्वितीयशाखात्यागे तस्या अपीति वैचित्र्यं एतस्मात् लिङ्गात् = गमकात् एकशाखात्यागे तदतिरिक्तजीवस्य शाखान्तरादिप्रदेशे स्थितिवत्सर्ववृक्षत्यागेऽपि वृक्षशरीराऽतिरिक्तस्य जीवस्या-ऽन्यत्राऽवस्थितिरनुमीयते। तथैव अस्मदादितनुतः = शरीरादपि परोऽन्यो जीवात्मा अस्ति यथैव च शाखाभिमानत्यागे शाखाविनाशे वा वृक्षजीवो न नश्यति। एवं सुषुप्तिमरणयोर्देहाद्यभिमानत्यागे प्रविलये च जीवः पारमार्थिकस्वरूपतो न नश्यतीति बुद्बुदादिवैषम्यमित्यभिप्रेत्याह— सचेति।। सः जीवश्च नित्यः = अनश्वरः। "अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरारे" इति च काठकश्रुतिर्भगवद्वचनं च। यथा शाखाभेदेऽपि जीवैक्यं, एवं देहभेदेऽप्यात्मैकयमप्यनेनैव श्रौतदृष्टान्तेन सिद्धमित्यभिप्रेत्याह— एक इति।। न केवलमात्मान्तराऽभावात् अस्यैक्यम्, अपितु वस्त्वन्तराऽभावादपीत्या-ऽऽशयेनाह— विद्धीति। अखिलं = जगत् एष आत्मैव ऐतदात्म्यं चतुर्वेदादित्वात् [१]स्वार्थेष्यञ्। नैतद्व्यतिरेकणाऽस्तीति विद्धि = जानीहि ननुप्रतिभासमानं जगत्कथं नास्तीत्युच्यते तत्राह— वितथेति।। वितथं = अनृतं शून्यसत्ताकं द्वितीयं यस्मात्तत्तथोक्तम्। नाऽप्रतिभासान्नास्तीत्युच्यते, किन्तु युक्तिश्रुतिभ्यां बाधितत्वादित्यर्थः। तथाच न समुद्रवत्सविकारत्वाऽऽपत्तिरिति भावः अतो यो नित्यैकात्मा तत्सद्ब्रह्म त्वमेवासि। अहमन्योदेहीति भेदमोहं मुञ्च = त्यजेत्यर्थः।।५२।।

ननु जगन्मिथ्यात्वेन ब्रह्मैक्यं जगतो ब्रह्मोपादानकत्वे सिद्ध्येत्। "स य एषोऽणिमा" इतिसूक्ष्मतरं हि ब्रह्मोपदिश्यते, तत्कथं स्थूलतमस्य जगत उपादानं। मृदादेः स्थूलस्यैव स्थूलघटाद्युपादानत्वदर्शनात्। कारणात्मना सत एव च कार्यस्याऽऽविर्भावः श्राव्यते। तत्कथं वा स्थूलतरस्य सूक्ष्मतमात्मना स्थितिः

(१) वर्णदृढादिभ्य ष्यञ्च।। पाणि० अ० ५ पा १ सू० १२३।। इति सूत्रात् ष्यञ् प्रत्ययः। चादिमनिच्।। शौक्ल्यं शुक्लिमा दार्ढ्यम्। चतुर्वर्णादीनां स्वार्थ उपसंख्यानमितिवार्तिकं यथा तथा यथा पुरयोः पर्यायेण।। ७।३।३१।। नञः परयोरेतयोस्तु पूर्वोत्तरपदयोः पर्यायेणादेरचोवृद्धि ञिदादौ।। इति सूत्रस्य वार्तिकानुसारेण स्वार्थे ष्यञ् प्रत्यय इत्यर्थः।।

संभावयितुं शक्यत इत्याऽऽशङ्कां दृष्टान्तेन निराकर्तुं "न्यग्रोधफलमतआहर" इतिखण्डिकाऽवतारः। तत्तात्पर्यं संङ्गृह्णन् पञ्चमाऽभ्यासं वर्णयति— धानान्तरिति।।

मू०।। धानान्तरुन्नततरोरुवटः पुरेव
यस्मिन्निदं जगदवस्थितमाविरासीत्।
श्रद्धावता समधिगम्यमणोरणीयः
सद्ब्रह्म तत्त्वमसि सत्यमसत्यमन्यत्।।५३।।

नायमसंभाव्योऽर्थः। श्रृणु अत्रापि दृष्टान्तं— यथा धानायाः = वटबीजस्याऽतिसूक्ष्मस्य अन्तः = मध्ये यदतिसूक्ष्मतरं इन्द्रियाऽगम्यं बीजाऽवस्था नाशेऽपि अङ्कुरादिभावेनाऽनुवर्तनार्हतदेव न्यग्रोधोपादानं तदेव हि देशकालाऽऽदिविशेषे जलादिना उपबृंहितं बीजपुटं भित्त्वाऽङ्कुरादिक्रमेण ऊर्ध्वमानेन उन्नततरः परिणाहेन च उरुः = स्थूलो वटः = न्यग्रोधतरुः आविरासीत् = प्रादुर्बभूव। एवं यस्मिन् = परमात्मनि अति सूक्ष्मेऽपि तद्भावेनैव अवस्थितम् = जगत्सर्गकाले प्राण्यदृष्टाद्युपबृंहितं आविरासीत् = सूत्रविराडादिक्रमेण प्रादुरासीत्। यद्यप्याऽऽगमार्थाऽपरिशीलिनां बाह्यविषयाऽऽसक्तबुद्धीनां अश्रद्दधानानां कुतार्किकाणां बोध्यमानोऽप्येषोऽर्थो दुर्बोधः, तथाप्याऽऽगमाऽनुसारिभिरन्तर्मुखैः श्रद्दधानैरधिकारिभिः अधिगन्तुं शक्य एवेत्यभिप्रेत्याह— श्रद्धावतेति।। "श्रद्धत्स्वसोम्य" इति हि अत्र श्रवणाङ्गत्वेन श्रद्धा विधीयते। "श्रद्धावित्तः समाहितो भूत्वा आत्मन्येवाऽऽत्मानं पश्येत्" इति च श्रुत्यन्तरम्।।

"अश्रद्दधानाः पुरुषा धर्मस्याऽस्य परंतप।।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि"।।

इत्यादिस्मृतिवचनं च श्रद्धाया आवश्यकत्वं दर्शयतीति श्रद्धावता एतदधिगन्तुं शक्यं नान्येनेत्यर्थः। ननु प्रमाणेनाऽर्थसिद्धौ न श्रद्धोपयोगः। चक्षुरादेः घटाद्यर्थप्रकाशने तदपेक्षाया अदर्शनादित्याऽऽशङ्क्याह— अणोरणीय इति।। अस्तु स्थूलेष्वनियमः, शब्दैकसमधिगम्ये तु धर्मादावप्यश्रद्दधानस्य निश्चयो नोत्पद्यते। किं वाच्यं अतिसूक्ष्मे प्रत्यक्षादिविरुद्धप्रायेवादिसहस्रकुतर्कशङ्काव्याकुले परमात्मवस्तुनीत्यर्थः। एवमतिसूक्ष्ममद्वितीयं च यत्सद्ब्रह्म तत्त्वमेवासि अतस्त्वमेव सत्यं, अन्यत् = त्वद्व्यतिरिक्तं जगदसत्यमित्यर्थः।।५३।।

ननु यद्यत्र कार्यकारणसङ्घाते प्रविष्टं ब्रह्म प्रत्यग्रूपमस्ति, तर्हि कुतो नोपलभ्यते। यदि च अतिसौक्ष्म्यस्वाभाव्यात्तदनुपलभ्यमेव, तर्हि तद्दर्शनसाधनोपदेशवैयर्थ्यमनिर्मोक्षश्चेत्याद्याशङ्कापनोदाय दृष्टान्तोपन्यासपुरस्सरं तददर्शनदर्शनयोः कारणं

वक्तुं "लवणमेतदुदके निधाय" इति खण्डप्रवृत्तिः। तत्तात्पर्यं सङ्गृह्णन् षष्ठाभ्यासं वर्णयति— अप्स्विति।।

मू०।। अप्सु प्रलीनमिव सैन्धवखिल्यमक्ष्णा
पश्यन्ति यन्न करणैरपि हृद्विभातम्।
विन्दन्ति यद्रसनयेव रसं गुरुक्त्या
सद्ब्रह्म तत्त्वमसि दृश्यमिदं तु न त्वम्।।५४।।

यथा पटुतरचक्षुषोऽपि पुरुषाः, अप्सु = उदके प्रक्षिप्तं, प्रलीनं = विलीय उदकैकरूप्यमापन्नं सैन्धवखिल्यं = लवणखण्डं, अक्ष्णा = चक्षुषा करेण च विमृश्य, न पश्यन्ति = नोपलभन्ते तद्यथा उद्भूतरूपस्पर्शवत्त्वात् योग्यमपि जलैक्याऽध्यासमूढदृष्टयो जलाद्विविच्य गृहीतुं न शक्नुवन्तीत्यर्थः। एवं हृदि = अन्तःकरणोपाधौ आवरणाऽभावात् विभातं स्वप्रकाशत्वात् स्वाध्यस्ताऽहङ्कारादिसामरस्येन सदा स्फुरदपि पराग्दृष्टयः पराक्प्रवणैः करणैः = बाह्यान्तः करणैः न पश्यन्ति = उपाधिभ्यो विविच्य ज्ञातुं न शक्नुवन्तीत्यर्थः। न चैतावता तस्याऽबोध एव। उपायान्तरेण बोद्धुं शक्यत्वादितिएतद्दृष्टान्तेनाऽप्युपपादयन्दर्शयति— विन्दन्तीति। चक्षुराद्यवेद्यमपि जलप्रलीनं लवणरसं रसनया = जिह्वया आस्वाद्येव यदात्मतत्त्वं, गुरूक्त्या = अपरोक्षीकृतश्रुतितात्पर्यरहस्यतया सद्यः प्रतिबोधनचतुरतर श्रीगुरुवचनोपपत्तिभिः प्रतिबोध्यमानाः विन्दन्ति = विस्मृत कण्ठचामीकरमिव तत्कालमेव लभन्तइत्यर्थः। इदमेव दर्शयति श्रुतिः "आचार्यवान्पुरुषो वेद" इति "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" इति चाऽन्यत्र। तद्गुरुकृपैकलभ्यं ब्रह्म त्वमेवाऽसि। लवणव्यामोहोपाधिभूतं लवणैक्याऽऽपन्नं जलं यथा न लवणं, तथा अध्यासेन सदैक्याऽऽपन्नं इदं दृश्यं = बुद्ध्यादि द्वैतजातं तु सर्वथा त्वं न भवसीत्यर्थः।।५४।।

संसारबन्धनिवृत्तौ सद्गुरूपदेश एवोपायः, तस्य शिष्यप्रज्ञाजिज्ञासे अपि सहकारिण्यावित्येतद्दृष्टान्तेन द्रढयितुं "यथा सोम्य पुरुषं गन्धारेभ्यः" इति खण्डस्योत्थानं। तत्तापर्यं स्फुटीकुर्वन् सप्तमाभ्यासं वर्णयति— चोरैरिति।।

मू०।। चोरैरिवाऽसि पुरुषो विपिने विसृष्टो
रागादिभिस्तनुषु नद्धविशुद्धदृष्टिः।
पान्थैरिवैष गुरुणाऽसि विमुक्तबन्धः
सद्ब्रह्म तत्त्वमसि याहि सुखं स्वधाम।।५५।।

हेसोम्य! यथा कश्चिन्महार्हरत्नविभूषितो गन्धारदेशीयः पुरुषः स्वगृहाऽङ्गणे प्रमत्तः सुप्तो निशि चोरैर्भूषणाऽपहाराय बध्वा देशान्तरं दूरं नीतो भूषणान्यपहृत्य अभिनद्धाऽक्षिहस्तपादः तथैव विपिने = विषमकुश कण्टक व्याल वृश्चिक व्याघ्रादि सङ्कुले महारण्ये विसृष्टः = त्यक्तः स यथा व्याल व्याघ्राद्युपघात भयाऽतुरः शिलाविषमकण्टकादिविलुठनविशीर्णसर्वाङ्गः क्षुत्तृषाऽऽतपदवानलादिना दन्दह्यमानो बन्धनमुक्तौ स्वदेशप्राप्तौ चोपायमपश्यन् चिरमाक्रोशन् तिष्ठति। एवं त्वमपि रागादिभिः अरिषट्कैः नद्धा = दृढं पिहिता विशुद्धा = निरवद्या- दृष्टिः = अपरिच्छिन्नाऽऽनन्दचित्स्वरूपदृष्टिर्यस्य तथाकृतः सन् स्वरूपात्प्रच्याव्य तनुषु = सर्वदुःख निदानाऽविद्यादिदेहत्रयेषु चतुरशीतिलक्षजातिप्रभिन्नयोनिविशेषेषु वा प्रवेशितो विसृष्टः = अनादिकालादारभ्य विविधं सृष्टः जन्ममरणाद्यनर्थपरम्परां अविच्छेदेनाऽनुभवन् अद्याप्यविद्यादिबन्धनिवृत्तौ स्वरूपाऽवाप्तौ चोपायमपश्यन् शोचसीत्यर्थः। यथाचैष उक्तगन्धारपुरुषो दैवाच्चिरेण तत्र प्राप्तैर्दयालुभिः कैश्चित्पान्थैः विमुक्तदृष्ट्यादिबन्धः सन् तदुपदिष्टमार्गेण शनैः शनैः ग्रामाद्ग्रामान्तरं पृच्छन् गान्धारान् गत्वा स्वधाम प्राप्य पूर्ववत्तत्रसुखीभवति, एवं त्वमपि बहुतरजन्म- परम्पराऽऽर्जित सुकृतराशिपरिपाक महाभाग्योदयप्राप्तेन ब्रह्मविन्मूर्धन्येन श्रीगुरुणा = सम्यक् प्रतिबोधनोपायेन विमुक्तबन्धः = विच्छिन्नाऽज्ञानादिसर्वबन्धनः असि। यतस्त्वं परमार्थतो निष्प्रपञ्चं सद्ब्रह्मैवाऽसि, अतः स्वबुद्ध्या विचार्य मत्त्वा निदिध्यास्य च सुखं तासु तासु भूमिकासु विश्रम्य प्रारब्धसमाप्तौ स्वधाम = अ- परिच्छिन्नाऽऽनन्दरूपमाऽऽत्मज्योतिः याहि = प्राप्नुहीत्यर्थः।। ५५।।

अविदुषो मरणे सत्सम्पत्तिक्रमः श्रुतौ प्रागुक्तः। विदुषोऽपि स एव क्रमः? उताऽन्यः? इति जिज्ञासाप्रशमनाय "पुरुषं सोम्योपतापिनम्" इति खण्डप्रवृत्तिः। तदर्थं सङ्गृह्णन् अष्टमाभ्यासं वर्णयति— सम्पद्येति।।

मू०।। सम्पद्य यत्र करणादिलयक्रमेण
मूढो मृतः पुनरुपैति जनिप्रबन्धम्।
प्राज्ञस्तु वञ्चयति मृत्युमुदस्तमोहः
सद्ब्रह्म तत्त्वमसि निस्तर मृत्युबन्धम्।।५६।।

मूढः = आत्मतत्त्वाऽनभिज्ञपुरुषः, मरणे सुषुप्ताविव करणादिलय- क्रमेण = वागादिकरणानि मनसि, मनस्तु प्राणे, प्राणांस्तु परमात्मदेवताया- मित्येवमुपाधिलयक्रमेण, यत्र = यस्मिन् परमात्मनि सम्पद्य मृतः = मृत्युना ग्रस्तः। प्राक्तनवासनाकर्माऽनुसारात् उत्क्रमणपूर्वकं पुनरपि जनिं = तत्रत्य-

कर्मभिर्प्राक्तनकर्मभिश्च प्रकर्षेण बन्धनं चेत्यनर्थपरम्परां प्राक्दर्शित व्याघ्रादिभावलक्षणां उपैति = प्राप्नोतीति श्रुतौ प्रागुक्तमेवेत्यर्थः। एष एव हि विदुषामपि सत्सम्पत्तिपर्यन्तः क्रमः, तत्रयो विशेषः तमाह–प्राज्ञस्त्विवति। प्राज्ञस्तु = तत्त्वज्ञस्तु उक्तक्रमेण सति सम्पन्नः सम्पत्तिसमकालमेव मृत्युं वञ्चयति– स्वतत्त्वसाक्षात्कारेण बाधते। तत्कुतस्तत्राह– उदस्तमोह इति।। यतः प्रागेवाऽयं निर्दग्धमृत्युबीजाऽज्ञानः प्रारब्धमात्रभोगाय धृतशरीर इत्यर्थः। यत्सम्पन्नः प्राज्ञो मृत्युं वञ्चयति तत् सद्ब्रह्म त्वमेवाऽसि। अतो मृत्युं = तत्प्रयोजककामं कर्मादिबन्धं च निस्तर = अतिक्रमस्वेत्यर्थः।। ५६।।

ननु विदुषोऽविदुषश्च देहयात्रादिनिर्वाहक भोजनादि व्यवहारसाम्येऽपि विद्वान् तद्धेतुभिः कर्मभिर्न बध्यते, अविद्वांस्तु बध्यते इत्यत्र विशेषे कोहेतुरित्याशङ्कां दृष्टान्तेन अपाकर्तुं ''पुरुषं सोम्योतहस्तगृहीतम्'' इति खण्डाऽवतारः। तत्तात्पर्यं सङ्गृह्णन् नवमाभ्यासं वर्णयति– स्तेन इति।

मू०।। स्तेनः प्रतप्तपरशोरिव दाहबन्धा-
वाप्नोति मूढमतिरप्यनृताऽभिसंधः।
सत्याभिसंधिरथ न व्यथते यदाऽत्मा
सद्ब्रह्म तत्त्वमसि निर्णुद बन्धशङ्काम्।। ५७।।

यथा स्तेनोऽयमिति कश्चित् राजभटैर्गृहीतो 'नाहं स्तेनः' इति निह्नुवानोऽग्निदिव्येन परीक्षणाय प्रतप्तपरशुग्रहणे नियुक्तो वस्तुतः स्तेनश्चेद्भवति अनृतमेव स्वस्य अस्तेनत्वं परवञ्चनाय ब्रूते सोऽनृताऽस्तेनत्वाऽभिसंधो मोहात् गृहीतात्प्रतप्तपरशोर्निमित्तात् दाहबन्धौ ग्रहणकाले दाहं तदूर्ध्वं च स्तेनोऽयमिति निश्चयात् बन्धनं च यथा प्राप्नोति एवं मूढमतिः = आत्मतत्त्वाऽनभिज्ञोऽपि वास्तवं सच्चिदानन्दाऽद्वयब्रह्मभावं आत्मानं ''नाहं ब्रह्म इत्यपलपन् देहादावनृते आत्मत्वाऽभिमानात् अनृताऽभिसंधः मोहात्प्राप्तात् मृत्योः सकाशात् दाहं निरतिशयपीडां पुनर्देहादिबन्धं च प्राप्नोतीत्यर्थः। एतदेवाऽभिप्रेत्य स्मरन्ति–

''योऽन्यथासन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणाऽऽत्मापहारिणा।।'' इति।।

अथपक्षान्तरे, स यद्यस्तेन एव वस्तुतो भवतीति पक्षे इत्यर्थः। स राजभटगृहीतपुरुषः अस्तेनोऽहमिति दृढतरसत्याभिसंधिः तप्तपरशुं गृह्णन्नपि सत्याऽभिसंधित्वादेव न व्यथते न दाहबन्धदुःखमनुभवति। प्रत्युतराजप्रभृतिभिः

अपराधप्रशमनाय वासोलङ्कारादिना संभाव्य प्रशस्यते। एवं यदात्मा = यत् सद्ब्रह्मैव आत्मा स्वात्मत्वेन निश्चितो यस्य स तत्त्ववित् परमार्थसद्वस्तुन्येव आत्मभावनिश्चयादेव सत्याऽभिसंधिः सन् प्राप्तान्मृत्योरपि न व्यथते। मायाऽभिज्ञ इव मायाव्याघ्रात्। दाहबन्धशङ्कात्वस्य कुतः? प्रत्युत ब्रह्मादिभिरपि पूज्यते। यादृशसत्यात्माभिसंधित्वात् तत्त्ववित् मृत्योर्नव्यथते, तत् सद्ब्रह्म त्वमेवाऽसि बन्धशङ्कां = पुनर्जननमरणादिसंभावनां निर्णुद = सत्यात्मबुद्धिदार्ढ्येन अपनय।। "न जायते म्रियते वा विपश्चित्" इति श्रुत्यन्तराज्जन्मबीजनाशाच्चेति भावः।।५७।।

श्रवणाद्यभ्यासस्य अधिकारिविशेषाणां सद्यः साक्षात्कारफलकत्वं पितापुत्रसंवादस्य साक्षात्कारफलकत्वकीर्तनेन प्रदर्श्य प्रस्तुतमहावाक्या-ऽभ्यासवर्णनमुपसंहरन् ज्ञानादेव इदानीन्तनाऽधिकारिणामपि कृतकृत्यता अवश्यं भवतीत्येतद्दर्शयति— पित्रेति।।

मू०।। पित्रा सुतः सुवचनैरिति बोधितः स्वं
सत्याऽद्वितीय सुख बोधघनं विजज्ञौ।
एतद्विमृश्य विदिताऽद्वयदृक्परोऽपि
स्वाराज्यसौख्यमधिगम्य भवेत्कृतार्थः।।५८।।

इति = प्रागुक्तरीत्या, पित्रा = आरुणिना सुतः = श्वेतकेतुः उपपत्ति-दृष्टान्तादिभिः सुवचनैः = सस्नेहमधुरवाक्यैः प्रतिबोधितस्सन् स्वं = आत्मानं सत्याऽद्वितीयसुखबोधघनं = अबाधिताऽपरिच्छिन्नाऽऽनन्दबोधैकस्वभावं विजज्ञौ = तत्कालमेव करतलाऽऽमलकवत्साक्षाच्चकार ततः कृतकृत्यो जीवन्मुक्तः कालेन प्रारब्धशेषमनुभूयाऽन्ते विदेहकैवल्यं प्रापेत्येतत् गन्धारखण्डशेषे "तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ सम्पत्स्ये" इति श्रुत्या दर्शितमेवेति नेह पुनर्दर्शितमिति भावः। एतत् = वर्णितं बोधनप्रकारं विमृश्य = श्रद्धया सोत्साहं पुनः पुनः परिशील्य विदिता = साक्षात्कृता अद्वयदृक् = अद्वितीयप्रत्यक्चिदात्मा येन सः तथाविधः परः = अन्यः इदानीन्तनोऽप्यधिकारी श्वेतकेतुरिव स्वयमेव राजते इति स्वराट् स्वप्रकाशः तद्भावः स्वाराज्यं तदेव सौख्यं = परमपुरुषार्थः तमधिगम्य कृतार्थः = कृतकृत्यो भवेदितिछान्दोग्यषष्ठप्रपाठकस्यापि अखण्डैक-वस्तुपरत्वं सिद्धमिति भावः।।५८।।

एवमाथर्वणप्रसिद्धस्य "अयमात्माब्रह्म" इति महावाक्यस्याप्यखण्डार्थकत्वं माण्डूक्योपनिषत्तात्पर्योद्घाटनेन वर्णयति— ऐक्यमिति।।

मू०।। ऐक्यं प्रकल्प्य प्रणवेऽखिलस्य
पादान्विभज्य प्रविलाप्य शिष्टः।
एकः स आत्मा जगदेऽयमात्मा
ब्रह्मेति विस्पष्टमथर्ववाण्या ।।५९।।

अथर्ववाण्या = अथर्ववेदमूर्धन्यया माण्डूक्यश्रुत्या "ओमित्येतदक्षरमिदं-सर्वम्" इत्युपक्रमे अखिलस्य = जडाजडस्य सर्ववस्तुनः ओङ्कारप्रतिपाद्यत्वात् ओङ्कार एवेति प्रणवे ऐक्यं प्रकल्प्य = आरोपेण सम्पाद्य तस्य वैश्वानर हिरण्यगर्भाऽव्याकृतलक्षणान् त्रीन्पादान् अकारादिमात्रात्रयक्रमेण प्रविभज्य अर्ध-मात्रालक्ष्यचतुर्थपादे पूर्वपादत्रयात्मकं सर्वद्वैतं प्रविलाप्य शिष्टः, परिशिष्ट "शिव-मद्वैतं चतुर्थं मन्यन्ते* स आत्मा सविज्ञेयः" इत्यन्त यः प्रत्यङ्मात्रो ज्ञेयत्वेन उपसंहृतः स एव प्रागपि "अयमात्मा ब्रह्म" इति महावाक्यस्थपदैर्लक्षयित्वा अखण्डैकरसो विस्पष्टं = असंदिग्धं जगदे = प्रत्यपादीत्यर्थः। अतश्चतुर्णामपि वेदानां प्रतीचो निष्प्रञ्चब्रह्माऽभेदएव विश्रान्तिरिति सिद्धमिति भावः।।५९।।

इत्थं सर्वमहावाक्यानां प्रत्येकं प्रत्यग्ब्रह्माऽखण्डैक्यबोधकत्वं व्युत्पाद्य "आनन्दादयः प्रधानस्य" इत्यधिकरणोक्तन्यायेन सर्वशाखीयानि आनन्दादि-भावरूपविशेषणानि, "अक्षरधियां त्ववरोधः" इत्यधिकरणोक्तन्यायेन अस्थू-लत्वाद्यभावरूपविशेषणानि चोपसंहृत्य सर्वाऽवान्तरवाक्यानां स्वस्वसंनिहितत-त्तन्महावाक्यैकवाक्यतायां सर्वमहावाक्यैः संभूय, प्रतिपादितं सर्वतो व्यावृत्तं सकार्याऽविद्यानिर्मूलनक्षमं सर्वश्रुतिपरमतात्पर्यविषयार्थमनुसंधानसौकर्याय पिण्डीकृत्य दर्शयन् तदवगमफलं त्रैकालिकद्वैतबाधरूपं अपरिच्छिन्नाऽऽनन्दात्मावाप्तिरूपं 卐चाभिलप्य दर्शयति— नित्यमिति।।

मू०।। नित्यं शुद्धं विबुद्धं विकृतिविरहितं नित्यमुक्तस्वभावं
सत्यं सूक्ष्मं निरस्तद्वयमनवयवं पूर्णमानन्दरूपम्।
प्रत्यग्ब्रह्माऽहमस्मि स्वरसदृशि रवौ ध्वान्तवद्विश्वमेत
न्नासी**दास्ते भविष्यत्यपि मयि सुखसज्ज्योतिरात्मन्यसङ्गे।।६०।।

नित्यं = उत्पत्तिनाशरहितं, शुद्धं = निर्दोषं विबुद्धं = स्वप्रकाशज्ञानस्वरूपं, विकृतिविरहितं = षड्भावविकारशून्यं नित्यमुक्तस्वभावं = कालत्रयेऽपि बन्ध

*एकोऽद्वैतश्शिवस्सजगत्सारः इति क्वचिन्पाठान्तरं दृश्यते।।
卐अत्र "फलम्" इति क्वचिदधिकपाठो दृश्यते।।
**"नासीदस्ति भविष्यत्यपि" इति क्वचित्पाठः।।

संभावनाशून्यं सत्यं = अबाध्यं, सूक्ष्मं = अस्थूलादिधर्मकं निरस्तद्वयं = अद्वितीयं, अनवयवं = स्वगतभेदशून्यं, पूर्णं = सबाह्याभ्यन्तरव्यापि आनन्दरूपं = सुखैकस्वभावं, प्रत्यक् = अन्तःकरणादिसाक्षि यदात्मतत्त्वं, तदेव ब्रह्म अहमस्मीति सर्वश्रुतिनिर्गलितार्थ इत्यर्थः। अत्र च "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" "अस्नाविरं शुद्धमपापविद्धम्" "सत्यं ज्ञानमनन्तं ब्रह्म" "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "गुहाशयंनिष्कलमद्वितीयम्" "नेह नानास्ति किञ्चन" इत्यादिवाक्यानि सर्वमहावाक्यानि च यथाप्रज्ञमनुसंधेयानि। यतोऽहमीदृशं ब्रह्मैवाऽस्मि अतः स्वरसदृशि = सहजप्रकाशे रवौ = सूर्ये ध्वान्तेन तुल्यं ध्वान्तवत् एतत् = दृश्यं विश्वं = जगत् सुखसज्ज्योतिरात्मनि = आनन्दैकरसपरमार्थबोधैकस्वभावे, असङ्गे = अवस्थात्रयसम्बन्धशून्ये मयि पूर्वमपि नासीत्। इदानीमपि नास्ते अग्रेऽपि न भविष्यतीति सदैव निष्प्रपञ्चसच्चिदानन्दस्वरूपोऽहमित्यर्थः। तथाचश्रुतिः—

"न निरोधो न चोत्पत्तिर्नबद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता।।" इति।।

"तदेतत् ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यमयमात्माब्रह्मसर्वानुभूः" इति च। "ज्ञाते द्वैतं न विद्यते" इति च।। श्रीगौडपादीये वार्तिकेऽप्युक्तम्—

"तत्त्वमस्यादिवाक्योत्थसम्यक्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति"।। इति।।
तस्मादयमेव परमपुरुषार्थलाभ इति भावः।। ६०।।

नन्वस्त्वखण्डाऽऽकारवृत्त्या मूलाऽज्ञाननाशे तत्कार्यसर्वप्रपञ्चबाधः तथापि नाद्वितीयवस्तुपरिशेषः, ब्रह्माकारवृत्तेर्नाशकाऽभावेन परिशेषे तयैव सद्वितीयताया दुर्वारत्वात्। यदि च तद्बाधाय वृत्त्यन्तरमपेक्ष्येत तर्हि तस्या एव परिशेषः स्यात्। अन्याऽन्यवृत्त्यभ्युपगमे त्वनवस्था स्यादिति सर्वथा सद्वितीयपरिशेषो दुर्वार इत्याशङ्कामपाकुर्वन्नाह— इत्थमिति।।

मू०।। इत्थं वाक्याद्विमृष्टादरणिविमथनाद्वह्निकीलेव सद्यः
संभूताऽखण्डवृत्तिस्तृणमिव निखिलद्वैतजालं समोहम्।
दग्ध्वा निर्वाणसंज्ञे निरतिशयसुखे नित्यसिद्धाऽऽत्मतत्त्वे
सद्यो याति प्रणाशं कतकरज इवोदस्य पङ्कं जलस्य।। ६१।।

इत्थं = दर्शितप्रकारेण, विमृष्टात् = सम्यग्विचार्य निर्धारिततात्पर्यकात् ऐकमत्येन निश्चितात् सर्ववेदान्तवाक्यात् संभूताऽखण्डब्रह्माकारा साक्षात्कारवृत्तिः

अरण्योर्विमथनात् = सङ्घर्षात् संभूता वह्नेः कीला = ज्वाला स्वोपस्कन्दितं शुष्कतृणमिव समोहं = मूलाऽज्ञानसहितं निखिलद्वैतजालं = समस्त द्वैतवागुराम्। सद्यः = स्वोत्पत्तिसमकालमेव दग्ध्वा = भस्मीकृत्य परिशिष्टे निर्वाणसंज्ञे = कैवल्याख्ये नित्यसिद्धे = अनागन्तुके आत्मतत्त्वे, सद्यः = सहसैव, प्रणाशं = अत्यन्ताऽदर्शनं दग्धदाह्यज्वालावदेव प्रशममित्यर्थः। प्रयाति = गच्छति। स्वनिवर्त्येन सह निवृत्तौ दृष्टान्तान्तरमाह— कतकेति।। यथा कतकबीजस्य, रजः = रेणुः पङ्किले जले क्षिप्तः जलस्य पङ्कं उदस्य = निराकृत्य स्वयमपि सह पङ्केन निवर्तते तद्वदित्यर्थः। "स्वाध्यायोऽध्येतव्यः" इति विधेः स्वपरविधिप्रवर्तकत्ववद्भेदस्य स्वपरभेदकत्ववदविद्यायाः स्वपरनिर्वाहकत्ववत् चैतन्यस्य स्वपरप्रकाशत्ववत् "नेहनानास्ति" इति वाक्यस्य स्वपर साधारण सर्वद्वैतनिषेधकत्ववच्च वृत्तेरपि स्वपरसाधारण सर्वद्वैतबाधकत्वाऽभ्युपगमे दोषाभावात्। चित्संवलितरूपेण बाधकता जडमात्रांशेन बाध्यतेति भेदसंभवाच्च। नचैवं वृत्तेः स्वबाधकत्वे स्वात्मनि क्रियाविरोधः उत्पत्तिध्वंसयौगपद्याऽऽपत्तिश्चेति वाच्यम्। मूलाऽज्ञानबाधस्यैव सर्वद्वैत बाधाऽऽत्मकत्वाऽभ्युपगमेन आद्यदोषाऽभावात्। बाधस्य त्रैकालिकत्वेन ध्वंसवैलक्षण्याऽभ्युगपमाच्च द्वितीयदोषस्याप्यभावादिति। इदं च बोधेद्धा बुद्धिरेव अज्ञाननिवर्तिकेति मतमाश्रित्योक्तम्। यदि च तृणादिसंधुक्षितो वह्निरिव बुद्धीद्धो बोध एव सर्वद्वैतबाधक इति सिद्धान्तः पर्यालोच्यते तदा तु न कश्चिद्दोषः। एतन्मतभेदसूचनायैव हि श्लोके दृष्टान्तद्वयोपादानमिति भावः।। ६१।।

एतावदेव सर्वश्रुतीनां परमरहस्यम्, इयमेवात्यन्तिकाऽनर्थनिवृत्तिपरमानन्दाऽवाप्तिलक्षण परमपुरुषार्थलाभात् कृतकृत्यता नाऽतःपरं किञ्चिदन्वेष्टव्यं ज्ञातव्यं प्राप्तव्यं वाऽवशिष्यत इति प्रदर्शनाय पुनर्बन्धसंभावनावारणाय च वाक्यार्थाऽपरोक्षज्ञानमेव उत्कर्षकाष्ठायां व्यवस्थापयति— एषेति।।

मू०।। एषाऽनादि त्रितापज्वर विषमभवव्याधिसम्यक्चिकित्सा
ह्येषा स्वाराज्यसम्पन्निरवधिपरमानन्दसंदोहदोग्ध्री।
भस्मीभूतं तथाऽस्यां प्रभवति न पुनः कर्मबीजं प्ररोढुं
सन्देहग्रन्थिभेदावपि च निगदितावेतदाऽऽसादनेन।। ६२।।

एषा = दर्शिताऽखण्डाकाराऽपरोक्षवृत्तिरेव अनादेः आध्यात्मिकाऽऽधिदैविकाऽऽधिभौतिकदुःखलक्षणैः त्रिभिस्तापज्वरैः = वातादित्रयप्रकोपप्रभवसांनिपातिकज्वरस्येव विषमस्य = दुश्चिकित्स्यस्य भवव्याधेः = संसाररोगस्य सम्यक्चिकित्सा = मूलोच्छेदिनी प्रतिक्रिया अनेन आत्यन्तिकसर्वाऽनर्थनिवृत्तिलक्षणं

ज्ञानफलमुक्तम्।। एषैव = उक्ताऽवगतिः स्वयमेव राजत इति स्वराट्, स्वः स्वर्गः तस्य राजा च तद्भावः [१] स्वाराज्यं सैव सम्पत् = पामरदृशा स्वर्गराज्यसम्पदिव इयं विवेकिदृशा [२]निरतिशयाऽऽनन्दसम्पदित्यर्थः। वस्तुतस्तु स्वर्गराज्यसम्पत् जलपरमाणुरिव महोदधेर्मोक्षसम्पदः कोट्यंशेनापि न समानेत्यभिप्रेत्याह— निरवधीति। निरवधेः = त्रिविधपरिच्छेदशून्यस्य परमस्य = सर्वोत्कृष्टहैरण्यगर्भाऽऽनन्दादपि वाङ्मनसागोचरनिरतिशयोत्कर्षशालिनो ब्रह्मस्वभावाऽऽनन्दस्य दोग्ध्री = प्रपूरयित्री। अज्ञानाद्युपाधिप्रतिबन्धनिरासेनाऽऽविर्भावयित्रीत्यर्थः।।

ननु दावाग्निप्लुष्टतृणादेर्वर्षासु पुनःप्ररोहवत् तत्त्वज्ञानाऽपनीतस्यापि द्वैतबन्धस्य कालान्तरे पुनरुद्भवः स्यादित्याशङ्क्याह— भस्मीभूतमिति। अस्यां = आत्माऽवगतिज्वालायां भस्मीभूतं = प्रारब्धांशमात्रपरिशेषात्, अधिष्ठानमात्रपरिशेषाद्वा भस्मेव सम्पन्नं कर्मबीजं पुनरपि प्ररोढुं = लिङ्गाद्यङ्कुरानारब्धुं न प्रभवति = न समर्थ भवति। "सर्वपाप्मानं तरति" "तद्यथा इषीकातूलमग्नौ प्रोतं प्रदूयेतैवहैवंविदः "सर्वेपाप्मानः प्रदूयन्ते" "एतं ह वाब न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति"। "तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवंहैवंविदि पापं कर्म नश्लिष्यते" इत्यादि श्रुतिभिः,

"यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"।।

इत्यादि स्मृतिभिः, [३]"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ" इति सूत्रात् "न स पुनरावर्तते न सपुनरावर्तते" इत्यसकृदपुनरावृत्तिश्रुतिलिङ्गाच्च बाधितस्य कर्मबीजस्य न पुनः प्ररोहसंभावनेत्यर्थः। स्वप्नदृष्टपुरुषकुलगोत्रादिसंशयस्य प्रबोधेनेव आत्मज्ञानेन सन्देग्धुः सन्देह्यस्य साधारणादिधर्मस्य कोटीनां सन्देहस्य च बाधितत्वादेव तत्त्वज्ञस्य सर्वसंशयनिवृत्तेरर्थसिद्धत्वात् न जिज्ञास्यान्तरमप्यवशिष्यत इत्याह— सन्देहेति। सन्देहः = नानाविधः आत्मतत्त्वविषये लौकिक वैदिकविषयान्तरे च

(१) गुणवचनब्राह्मणादिभ्यः कर्मणि च ।।५।१।१२।। चाद्भावे। जडस्य कर्मभावो वा जाड्यम्। मूढस्य कर्मभावो वा मौढ्यम्। ब्राह्मण्यम्। अर्हतोनुम् च। अर्हत भावः कर्म वा आर्हन्त्यम्। आर्हती। ब्राह्मणादिराकृति गणः।।५।१।१२४।।

(२) "निरतिशयाऽतिशयाऽऽनन्दसंपदित्यर्थः" इति क्वचिदधिकपाठो दृश्यते।

(३) तदधिगम उत्तरपूर्वाघयोरश्लेष विनाशौ। तस्य ब्रह्मणोऽधिगमे साक्षात्कारे सत्युत्तर पूर्वाघयोरश्लेषविनाशौ भवतः। उत्तरस्याश्लेषः पूर्वस्य विनाशः। कस्मात्। तद्व्यपदेशात्। यथा पुष्करपलाश आपो न श्लिष्यन्ते इत्यादि श्रुत्योत्तर कर्माश्लेषप्रतिपादनात्। तथा तद्यथेषीकातूलमित्यादि श्रुत्यापूर्वाघस्य विनाश प्रतिपादनात्।। (ब्र०सू०अ०४, पा०१,सू०१३)

संशयः। स च, सर्वसंशयादिविकल्पनामूलभूतहृदयग्रन्थिः अन्तःकरणतादात्म्याऽध्यासलक्षणा सा च सन्देहग्रन्थी [1]"अजाविभ्यांथ्यन्" इति निर्देशात् द्वन्द्वेघीत्यस्यपूर्वनिपातस्याऽनित्यता ज्ञायते। तेन ग्रन्थिशब्दस्य परनिपातः। तयोर्भेदौ = आत्यन्तिकनिवृत्ती अपि एतदासादनेन = आत्मसाक्षात्कारप्राप्त्यैव निगदितौ श्रुत्येति शेषः। तथाच श्रुतिः—

"भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"।। इति

"गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति" इतिच।


तस्मादभ्यर्हिततमं ब्राह्मणादिजन्म प्राप्य सर्वप्रयत्नैरात्मज्ञानमेव सर्वैस्सम्पादनीयम्, नविषयासक्तैः अत्यन्तकर्मजडैर्वा भूत्वा सर्वोत्तमं जन्म शुनकसूकरादिजन्मवद्व्यर्थं नेयमिति भावः।। ६२।।

"अपोह्य निखिलं द्वैतं पदार्थपरिशोधतः।
सच्चिदानन्दपूर्णात्मा वाक्यार्थोऽत्र निदर्शितः।।"

इति श्रीमत्परमहंस परिव्राजकाऽऽचार्य श्रीरामचन्द्र सरस्वती
पूज्यपाद शिष्येण श्रीसर्वज्ञसरस्वती पूज्यपाद प्रशिष्येण
गङ्गाधर सरस्वत्याख्य भिक्षुणा विरचितायाम्
स्वाराज्यसिद्धि व्याख्यायाम्
कैवल्यकल्पद्रुमाख्यायाम्
अपवादप्रकरणम्
सम्पूर्णम्।।

(१) अजाविभ्यांथ्यन् ।५।१।८। अज शब्दः इह पुल्लिंगः उपात्तः। अतएव द्वन्द्वे घि इत्यविशब्दस्य पूर्वनिपातं बाधित्वा अजाद्यदन्तम्। इति अजशब्दस्य पूर्वनिपातः कृतः। "प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि" इति स्त्रीलिंगादपि थ्यन् तसिलादिषुथ्यनः परिगणनात्पुंवद्भावे रूपं तुल्यम्।।

इति श्रीमत्परहंस परिव्राजकाचार्य श्री स्वामि ब्रह्मानन्दगिरि पूज्यपाद शिष्येण विरक्त शिरोमणि परमहंस श्री स्वामिवामदेवेन विरचितायां श्री वामदेवप्रसादिन्याख्यटिप्पण्यां अपवादाख्यं द्वितीय प्रकरणं सम्पूर्णम्।।



।।कैवल्यप्रकरणम्।।

ॐ श्रीगणेशाय नमः।।

।कैवल्यप्रकरणम्।।

योधत्ते निजमाययैव भुवनाकारं विकारोज्झितो
यस्याहुः करुणाकटाक्षविभवौ स्वर्गापवर्गाभिधौ।
प्रत्यग्बोधसुखाद्वयं हृदि सदा पश्यन्ति यं योगिनः
तस्मै शैलसुताञ्चितार्द्धवपुषे शश्वन्नमस्तेजसे।।१।।

करुणामृतकल्लोलं शरणागतवत्सलम्।
आनन्दवारिधिं विष्णुमाश्रये श्रीनिकेतनम्।।२।।

अध्यारोपापवादाभ्यां निष्प्रपञ्चं ब्रह्म परिशेष्य तस्य प्रत्यगभेदलक्षणो महावाक्यार्थः सपरिकरं निरूपितः। अथेदानीं शब्दाऽऽपरोक्ष्यसमर्थनपूर्वकं मन्दमध्यमतराधिकारिणामपि चित्तनिग्रहद्वारा ज्ञानावाप्तिं जीवन्मुक्तिचर्यां विदेहकैवल्यावाप्तिं वर्णयितुमिदमारभ्यते। ननु वाक्यार्थज्ञानादेव विचारजनिताद-परोक्षात्परमपुरुषार्थसिद्धिरित्ययुक्तम्। शब्दस्य परोक्षज्ञान मात्रजननस्वाभाव्यात्। लोके शब्दजन्यापरोक्षज्ञानाऽप्रसिद्धेश्च। किंच। यदि वाक्यादेव साक्षात्कारस्तर्हि श्रवणानन्तरं मननिदिध्यासनविधानवैयर्थ्यम्। "ततस्तु तं पश्यते निष्कलं ध्यायमानः" "मनसैवाऽनुद्रष्टव्यम्" इत्यादिश्रुतयश्च सावधारणं मनस एवाऽपरोक्षज्ञानकरणत्वं दर्शयन्तीति कथं शब्दाऽऽपरोक्ष्यमित्याशङ्क्याह— अपरोक्षेति।।

मू०।। अपरोक्षवस्तुविषयेति शब्दजा
प्यपरोक्षतां न विजहात्यखण्डधीः।
निपुणं निशम्य दशमस्त्वमित्यदो
वचनं नहि स्वमुपलब्धुमिच्छति।।१।।

अखण्डधीः = दर्शिताऽखण्डवाक्यार्थबुद्धिः, शब्दजा = वाक्यजन्यापि सती, अपरोक्षवस्तुविषया "यत्साक्षादपरोक्षाद्ब्रह्म" "अत्रायं पुरुषः स्वयं ज्योतिर्भवति" इत्यादिश्रुतेः प्रतीचि पारोक्ष्याऽप्रसिद्धेः सदा स्वापरोक्ष्यप्रसिद्धेश्च नित्यापरोक्षा-ऽऽत्मवस्तुमात्रविषयेति हेतोः विषयानुरोधात्प्राप्तामपरोक्षतां न विजहाति = न त्यजति। प्रमाणानां विषयपारतन्त्र्यस्वाभाव्याद्विषयस्यापरोक्ष्ये तद्बुद्धेः पारोक्ष्य-

स्योक्तिसंभवाभावादित्यर्थः।

अप्रसिद्धिं वारयन्दृष्टान्तसद्भावमर्थान्तरन्यासेन दर्शयति-निपुणमिति।। यथा किल गुरुणा दश ऋजुबुद्धयः शिष्याः ग्रामान्तरं प्रति कार्यविशेषे प्रेषिता अन्तरा नदीमुत्तेरुः, ततस्सर्वे उत्तीर्णास्स्मः उत कश्चिन्नः प्रवाहेणाऽपवाहित इति परिज्ञानाय तेष्वेकैकः स्वेतरान्नव पुरुषान्गणयित्वा स्वात्मगणने व्यामूढा विषसाद, इत्थं सर्वेऽपि दशमं प्रवाहापनीतं मत्वा शोकाकुलास्तमन्वेषयन्तो नदीस्रोतोऽनुगच्छन्तः तत्र किञ्चिदन्यपुरुषं दृष्ट्वा पप्रच्छुः—"त्वं किमस्माकं दशमं नदीस्रोतसा प्रवाह्यमाणमद्राक्षीः" इति.. स एतान्गणयित्वोवाच "दशैव यूयं स्थ न *कश्चिद-पवाहितः" इति।। तच्छ्रुत्वा तेष्वेकः पूर्ववन्नवगणयित्वा पप्रच्छ—"को दशमः" इति। स प्रत्याह—"दशमस्त्वमसि" इति। स दशमस्त्वमित्यदः = एतद्वचनं, निपुणम् = अवहितं यथा स्यात्तथा निशम्य = श्रुत्वाप्रत्यक्षमेव दशमं स्वात्मानं ज्ञात्वा विशोक आसीत्, एवमन्येऽपि। तत्र शब्दादपरोक्षज्ञानं प्रसिद्धमित्यर्थः। ननु तत्रापि दशमोहमिति परोक्षज्ञानमेव जन्यतां, तत्राह—नहीति।। न तत्परोक्षं, हिं = यस्मात्तादृशज्ञानानन्तरं स्वम् = दशममात्मानं, उपलब्धुं = साक्षात्कर्तुं नेच्छति, तस्य परोक्षत्त्वे दशमदिदृक्षा नोच्छिद्येत। इष्टविषये परोक्षज्ञानस्य प्रत्युत दिदृक्षाहेतुत्वादिति भावः। नच शाब्दपरोक्षज्ञानाव्यवहितोत्तरक्षणोत्पन्नात् "दशमोऽहम्" इति स्वसाक्षात्कारादेव दिदृक्षानिवृत्तिः, क्षणविलंबस्य दुर्लक्ष्यत्वाच्च तात्कालिकत्वभ्रम इति वाच्यम्। अननुभूयमानपरोक्षज्ञानकल्पने गौरवान्मानाभावात् 'असौमामेव दशममदर्शयत्, अस्य वाक्यान्मे मोहोऽपगतः' इति तदनुभव-व्यवहारविरोधाच्च। नच क्लृप्तेन्द्रियव्यतिरेकेण शब्दस्यापि साक्षात्कारकरणत्वकल्पने गौरवम्। परोक्षज्ञानरूपधर्मिकल्पनातः शब्दस्य करणत्वरूपधर्मकल्पनाया लघीयस्त्वात्, बहूनां ज्ञानानां भ्रान्तत्वकल्पनागौरवाधिक्याच्च।।

नच शब्दस्य परोक्षज्ञानमात्रजनकत्वनियमोऽस्ति। अनुमित्यादिसाधारणपारोक्ष्यस्य शब्दजन्यताऽनवच्छेदकत्वात्, अयोग्याऽसन्निकृष्टविषयकज्ञानस्यैव पारोक्ष्यदर्शनेन विषयपारोक्ष्यस्यैव ज्ञाने पारोक्ष्यप्रयोजकत्वेन तस्य करणानियम्यत्वाच्च। विषयपारोक्ष्याऽऽपरोक्ष्ययोस्तु आवरणाऽनावरणे एव प्रयोजिके, अनावरणं तु आवरणध्वंसः, तदत्यन्ताभावश्च। बाह्य घटादौ सन्निकर्षादिसामग्रीप्रयोज्य आद्यः। साक्षिणि तदध्यस्तान्तः करणतद्वृत्त्यादौ तु द्वितीय इति बोध्यम्। नच प्रत्यक्षे चक्षुरादिषट्कस्य करणत्वं क्लृप्तं, तदतिरेकेण शब्दस्यापि करणत्वकल्पने

---

* न कश्चित्प्रवाहितः इति पाठ।।

प्रत्यक्षप्रमाणवृद्ध्यापत्तिरित्यन्यत्र क्लृप्तं पारोक्ष्यमेव सन्निकृष्टशाब्दबुद्धावपि स्वीक्रियते, भ्रान्तिनिवृत्त्यनुभवनिर्वाहाय च तदव्यवहितोत्तरक्षणे मानसादिप्रत्यक्षं शाब्दबुद्धि समानाकारं कल्प्यते, मनस आत्मसाक्षात्कारकरणत्वस्य क्लृप्तत्वादिति वाच्यम्। एवं सति प्रमाणवृद्धिभीरुभिरात्मतत्समवेतसुखादिसाक्षात्कारे करणत्वेन क्लृप्तस्य मनस एव लाघवाद्बाह्यसर्ववस्तुप्रत्यक्षेऽपि चक्षुरादिघटितमनस्संयुक्तसंयोगादि-सन्निकर्षान्तरकल्पनेनाऽपि लाघवात्करणत्वस्याभ्युपगन्तव्यत्वापत्तेः। चक्षुषा पश्यामीत्यादिप्रतीतेः द्वारत्वेन चक्षुरुपयोगमात्रेणापि निर्वोढुं शक्यत्वाच्चक्षुरादीनां प्रत्यक्षप्रमाणत्वापलापापत्तेः। संयुक्तविशेषणताद्यनेकसंनिकर्षानभ्युपेत्य अनुपलब्धि-प्रमाणं प्रत्याचक्षाणस्य तव संयुक्तसंयोगाख्यैकसन्निकर्षाभ्युपगमेन प्रमाणपञ्चक-प्रत्याख्याने का लज्जा।। किंच।। प्रत्यभिज्ञाविषयतत्तादौ चन्दनसौरभादौ च साक्षात्करोमीत्यनुव्यवसायानर्हे प्रत्यक्षतोक्तेस्तव पारिभाषिकतया पारोक्ष्यावर्जनात्, तत्रैव चक्षुरादीनां परोक्षज्ञानजनकत्वस्य त्वन्मते क्लृप्ततया घटादावपि तादृशपरोक्षज्ञानजनकत्वाऽऽपत्तिः। साक्षात्करोमीति प्रत्ययस्य च तदव्यवहितोत्तरक्षणो-त्पन्न घटमानस साक्षात्कारगोचरत्वकल्पनापत्तिः। साधकबाधकानां शाब्दापरोक्ष-साधारणत्वात्। अनुभवापलापस्य च तुल्यत्वादिति।। शब्दादेवाऽपरोक्षसाक्षात्कारे वृत्तेऽपि श्रवणानन्तरं मनननिदिध्यासनयोर्विधानं तु प्रमेयाऽसंभावनाद्यप्रतिबद्ध-साक्षात्कारजननाय। प्रतिबद्धसाक्षात्कारस्याऽविद्यानिवर्तनाऽक्षमत्वात्। यथाहुः संक्षेपशारीरकाचार्याः—

"पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदिताऽपि यथा।
न फलाय भर्छुविषया भवति श्रुतिसंभवापि च तथात्मनि धीः।।" इति।

यथा कश्चिद्राजा भर्छुनामानं स्वमित्रं दैवाद्वियुक्तं चिरेण वटबृक्षे दृष्ट्वाऽपि ब्रह्मराक्षसोऽयमिति मन्त्रिभिः प्रतार्यमाणो न श्रद्दधे इति नतद्विषयाऽज्ञानं विपरीतबोधप्रतिबद्धं राज्ञो निवृत्तं तथा महावाक्यश्रुतिजन्याप्यापातदर्शिनामा-त्मसाक्षात्कारधीरिति तदर्थः।। १।।

ननु यथा तत्तत्पुरुषसुखदुःखादेस्तं तं प्रत्यापरोक्ष्येऽपि अन्येन शब्दलिङ्गादिना गृह्यमाणस्य पारोक्ष्यं तथा स्वतोऽपरोक्षस्याप्यात्मनः शब्दलिङ्गादिगम्यतायां पारोक्ष्यमप्यस्तु। क्वचित्परोक्षं ज्ञानं जनयतश्चप्रमाणस्य नापरोक्षज्ञानजनकत्वं दृष्टम्। उपनीतभानस्य पारोक्ष्यानभ्युपगमाच्च न चक्षुरादौ व्यभिचारः। 'सौरभं चक्षुषा साक्षात्करोमि' इत्यननुव्यसायस्तु सौरभस्य न पारोक्ष्यात्। किन्तु लौकिकसन्निकर्षदोषविशेषान्यतरप्रयोज्यलौकिकविषयता शून्यत्वादेवेत्याशंकामपा-

कुर्वन्नपरोक्षवस्तुनि शब्दस्य पारोक्ष्यसंपादनाऽसामर्थ्यं दृष्टान्तेनोपपादयति— नचेति।।

मू०।। नच शब्दजन्यमतिमात्रतः स्वतो
प्यपरोक्षवस्तु भजते परोक्षताम्।
न खलु प्रदीपतरणिप्रकाशयोः
प्रतिभासतोऽस्ति विषये पृथग्विधा।। २।।

स्वतः = अन्यनिरपेक्षतया मुख्यम्, अपरोक्षवस्तु = नित्यापरोक्षमात्मवस्तु, शब्दजन्यमतिमात्रतः = शाब्दधीविषयत्वमात्राऽपराधेन परोक्षतां भजत इत्येतच्च न युक्तमित्यर्थः। स्वत इत्यनेन चेदं ध्वनितम्— यत्खलु कादाचित्कानावृत-चित्संवलनोपाधिना गौणमपरोक्षं विशेषदर्शनोत्तरप्रत्यक्षवेद्यं स्थाणुपुरुषादि तदपि परोक्षज्ञानमात्रे करणत्वेन क्लृप्तविशेषदर्शनरूपलिङ्गपरामर्शजन्यत्वाऽपराधेन परोक्षतां न भजते, किं वाच्यं मुख्याऽपरोक्षमात्मवस्तु पारोक्ष्यं न भजत इति। तथाच वह्न्याद्यनुमितिरूपपरोक्षज्ञानकारणस्याऽपि परामर्शस्य सन्निकृष्टविषये आपरोक्ष्यजन-कत्वस्य तार्किकैरप्यभ्युपगमान्न त्वदुक्तनियमे मानमस्ति। यत्तु परकीयसुखादेः पारोक्ष्यं तत्तु तस्य परंप्रत्ययोग्यत्वात्, न तु शाब्दधीगोचरत्वात्। स्वकीयसुखादौ तत्काले तथात्वेऽपि पारोक्ष्याऽदर्शनात्। कालान्तरे पारोक्ष्यं तु सुखादेः स्वोपादाने तिरोधानादेवेति भावः। नच मानवैचित्र्येण वस्तुनि वैचित्र्यमाधीयते। वस्तुयाथा-त्म्यमात्रव्यंजकेषु वैचित्र्याधायकत्वादर्शनादित्यभिप्रेत्याह — नखल्विति।। प्रदीपस्य प्रकाशे तरणेः सूर्यस्य प्रकाशे च घटादिवस्तुनः प्रतिभासतः = प्रकाशतः पृथग्विधा = प्रदीपेनप्रकाश्यमानो घटो नीलश्च स एव तरणिना प्रकाश्यमानः सन्घटो रक्तश्चेति प्रकाशकभेदाद्वस्तुनि वैचित्र्यं न खल्वस्ति। तद्वत्प्रमाणानामपि वस्तुयाथात्म्यव्यंजकत्वेन पारोक्ष्याऽऽपरोक्ष्यलक्षणवैचित्र्याधायकत्वाऽसंभवादित्यर्थः। नचाऽऽपरोक्ष्यपारोक्ष्यातिरेकेण लौकिकाऽलौकिकविषयते केनचिद्विषयेऽनुभूयेते, येन लौकिकाऽलौकिकसन्निकर्षभेदौ तद्धेतू कल्प्येयातामित्यघ्राणजं सौरभज्ञानं परोक्षमेवेति भावः।। २।।

ननु प्रकाशकवैचित्र्यादपि क्वचित्प्रकाश्ये वैचित्र्यं दृश्यते। यथा बालसूर्यमरीचिप्रकाशिताऽभ्रखण्डस्य रक्तता, प्रौढातपप्रकाशितस्य तु शुभ्रतेति। दृष्टश्च रक्तपटस्य चन्द्रिकायां नैल्यप्रतिभासः। विशेषदर्शनजन्ये भ्रमसंशयोत्तरप्रत्यक्षे च समाने विषये प्रत्यक्षसामग्रीप्राबल्येनाऽनुमितिप्रतिबंधादेव न पारोक्ष्यप्रसक्ति-रित्याशङ्क्याऽगृह्यमाणवैचित्र्ये मानाभावेन तस्याऽपि भानस्याऽवश्यवाच्य-त्वादपरोक्षैकस्वभावे च वस्तुनि आरोपमन्तरेण पारोक्ष्यप्रतिभासायोगादारो-

पितपारोक्ष्येणाऽऽत्मावगाहिन्यावाक्यार्थबुद्धेरप्रमात्वाऽवश्यंभावे वाक्यस्याप्यप्रामाण्यापत्तिरित्यभिप्रेत्याह— अपरोक्षेति।।

मू०।। अपरोक्षवस्तुविषया परोक्षधी
नंच मानभावमुपगन्तुमर्हति।
स्वत एव शश्वदवभातमात्मनः
कुशलोऽपि न स्वमपि गूहितुं क्षमः।। ३।।

अपरोक्षैकस्वभावं वस्तु विषयः = विशेष्यो यस्यास्तथाविधा परोक्षधीः = पारोक्ष्यप्रकारकबुद्धिः तदभाववद्विशेष्यकतत्प्रकारकबुद्धित्वात् मानं मितिः, तद्भावं प्रमात्वम्, उपगन्तुम् = प्राप्तुंनचार्हति, इदमिति ग्राह्ये तदिति प्रत्यये प्रमात्वव्यवहारादर्शनात्। तथाच महावाक्यस्य प्रामाण्यान्यथाऽनुपपत्याऽपि शाब्दापरोक्षसिद्धिरिति भावः। एतदुक्तं भवतिपारोक्ष्याऽऽपरोक्ष्ये हि विरुद्धे नैकवस्तुस्वभावौ। वस्तुनि विकल्पायोगात् अतएव हि चैतन्यस्यैव मुख्यमापरोक्ष्यमन्यत्र तत्संबंधाद्गौणमिति वक्ष्यति। नित्याऽपरोक्षं च पारोक्ष्येण ग्राहयद्वाक्यं कथं प्रमाणं स्यात्? न च बालार्ककरावमृष्टमेघशकले रक्तता प्रतिभासो याथार्थः, न वाऽर्ककराणां प्रमाणतेत्यनुदाहरणं सः। [१] एवं चन्द्रिकायां रक्तपटे नैल्यप्रतिभासोऽपि। अनुमितिप्रतिबंधकसद्भावाज्जायमानं [२]विशेषदर्शनोत्तरप्रत्यक्षमनुमितिर्माभूत्। पारोक्ष्यसामग्रसत्वात्। ज्ञानस्य तद्विषयस्य च पारोक्ष्यं तु स्यात्। [३] यदितु सन्निकर्षादिप्रयुक्तमसन्निहितमप्यापरोक्ष्यं प्रसक्तं पारोक्ष्यं ज्ञानेनिरुणद्धि, विषयेचापनयति किमङ्गवक्तव्यं प्राक्सिद्धं साक्षात्स्वाधिकरणे तदपनेष्यति निरोत्स्यतिचेति। किंच।। व्यवहितविप्रकृष्टाऽयोग्यगोचरमेवहिज्ञानं परोक्षं दृष्टं, नच स्वप्रकाशस्याऽऽत्मनः स्वं प्रत्येवव्यवधानं विप्रकर्षः प्रकाशापनयनेनाऽयोग्यता वा प्रयत्नसहस्रैरपि सुकरा, येन पारोक्ष्यं स्यादित्यभिप्रेत्याह—स्वत एवेति।. कुशलः = चतुरतरोऽपि पुरुषः स्वतः = साधननैरपेक्ष्येणैव शश्वत् = अनवरतम्,

---

(१) एवं चन्द्रिकायामिति।। चन्द्रिकायां रक्तपटे नैल्यावभासोपि मेघ रक्ततावभासवन्न यथार्थो नापि चन्द्रिकाप्रमाणमतो नोदाहरणमर्हतीति भावः।

(२) विशेषदर्शनोत्तर जायमानं प्रत्यक्षं यत्तस्यानुमितिप्रतिबन्धकस्वरूपत्वात् सति तस्मिन्ननुमितिर्माभून्मा भवत्वित्यन्वयः।।

(३) यदि तु सन्निकर्षादि प्रयुक्तमिति।। यदि तु वृत्यात्मक ज्ञानस्य चिदात्मकेन नित्यापरोक्षस्वरूपेण ज्ञानेन तादात्म्यसम्बन्धाभ्युपगमात्तत्प्रयुक्तं तथेन्द्रियद्वारकविषयसन्निकर्षप्रयुक्तं वाऽऽपरोक्ष्यं स्वगत पारोक्ष्यं निरूणद्धि। विषये स्वरूपे च घटादौ तमपनयति तदा नित्यसिद्धापरोक्षात्मनि स्वभावसिद्धापरोक्ष्यं स्वसमानाधिकरणवृत्तिपारोक्ष्यं निरुणद्धिरित्यत्र किमुवक्तव्यमिति भावः।।

अवभातम् = प्रकाशमानं, स्वम् = आत्मानम्, आत्मनः = पञ्चमी द्वितीयार्थे स्वंप्रत्येवेत्यर्थः। गूहितुम् = संवरीतुम्, अन्तर्द्धाय गोपयितुमिति यावत् "अतर्द्धौयेनादर्शनमिच्छति"* इत्यपादानत्वम्। अपिशब्दाद्विप्रकर्षयितुमयोग्यकर्तुं च यत्नतोपि उपायसहस्रैः प्रयतमानोऽपि न क्षमः = न समर्थः। तथा च श्रुतेर्बाधितार्थबोधनाऽशक्तेरपि शाब्दाऽऽपरोक्ष्यसिद्धिरिति भावः।।३।।

ननु जन्यापरोक्षज्ञानत्वावच्छिन्नं प्रति इन्द्रियत्वेन करणत्वाद्वाक्यार्थ-ज्ञानेचेन्द्रियकरणत्वाभावात्कथमापरोक्ष्यम्। नचापरोक्षवस्तुविषयकत्वमेव ज्ञानानामापरोक्ष्यं सुवचम्। विषयाऽऽपरोक्ष्यस्य ज्ञानापारोक्षत्वाधीनत्वेनाऽन्योन्या-श्रयाऽऽपत्तेः। सिद्धान्तेप्यभानापादकाऽज्ञानावरणभंगत्वावच्छिन्नंप्रति अपरोक्षज्ञानत्वेन हेतुत्वस्यावश्यंवाच्यतया ज्ञानाऽऽपरोक्ष्यस्याऽनावृततत्वरूपविषयापरोक्ष्यप्रयोज्यत्वा योगाच्चेत्याशंङ्क्याऽऽह— सुखदुःखेति।।

मू०।। सुखदुःख - रागयतनेष्वसंमते
स्तिमिरप्रसुप्तिविषयेष्वदर्शनात्।
अपि हेतुरस्य विषयस्य योग्यते
त्यपरोक्षता न करणैर्नियम्यते।।४।।

न तावज्ज्ञानविषययोरापरोक्ष्ये करणानां नियामकता। सा हि करणेषु सत्स्वेवाऽपरोक्षज्ञानं करणाभावे चाऽपरोक्षज्ञानाभाव इत्यन्वयव्यतिरेकनियमसंभवे स्यात्। न तावद्व्यतिरेकनियमसंभवः, व्यभिचारादित्याहसुखदुःखेतिश्लोकार्द्धेन। सुखे, दुःखे, रागे = इच्छायां, यतने = प्रयत्ने पराभिमतयोग्यात्मविशेषगुणेष्विति-यावत्। एष्वौपनिषदानामिन्द्रयवेद्यत्वाऽसंमतेः। मनसोऽनिन्द्रियत्वात्। तदभ्युपगमेऽपि "कामस्संकल्पो विचिकित्सा" इत्यादिश्रुतेस्तेषां मनस्तादात्म्यापन्नतया करण-कोटिप्रवेशेन तद्वेद्यत्वायोगात्। नहि परशुना स्वधर्माः छिद्यन्ते, किन्तु स्वबहिर्भूता दार्वादयः। "बुद्धेःसाक्षी मनसस्साक्षी" "प्रतिबोधविदितं मतम्" इत्यादि-श्रुतिसिद्धबुद्धितद्धर्मसाक्षिणैव तेषां प्रथासिद्धेश्चेति भावः। एवं तिमिरप्रसुप्तिविषयेषु = अंधकाराज्ञानयोः स्वाप्नपदार्थेषु च अपरोक्षत्वेन सर्वाऽनुभवसिद्धेषु करण-वेद्यत्वाऽदर्शनादित्यर्थः। न तावदंधकारश्चाक्षुषः, तस्य भावत्वे आलोकसापेक्ष-चक्षुर्ग्रह्यतापत्तेः। अभावत्वे विशेषणताख्यसंनिकर्षनिरासेनाऽधिकरणा-लोकसंयोगरूपाऽभावचाक्षुष हेत्वभावेन च चक्षुरयोग्यत्वात्। एवं प्राक्साधितभावरूपा-ऽज्ञानेऽपि नेन्द्रिययोग्यता। रूपाद्यभावान्मनसोप्युपादानत्वाच्च। तथा स्वाप्नपदार्थनामपि

*येन व्यवधानेसति यत्कर्तृकस्याऽऽत्मनोदर्शनाभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः।।

जागृद्वासनावासितमनः परिणामत्वेन मनसा ग्रहीतुमशक्यत्वाच्चक्षुरादीनां तदानीं लीनत्वात्साक्षिवेद्यत्वमेवेति तेषां तत्साक्षिणश्चाऽऽपरोक्ष्यस्य करणव्यतिरेकेऽपि दर्शनाद्व्यतिरेकनियमाऽसिद्धिरित्यर्थः। नाप्यन्वयनियम इत्यभिप्रेत्याह— अपीति।। अस्य = जन्यज्ञानापरोक्ष्यस्य विषयस्य = वेद्यस्य योग्यताऽपि हेतुः नियामिका सर्वैरभ्युपगम्यत इति शेषः। अयंभावः— सत्यपि संयोगादिसन्निकर्षेरूपादिरेव चक्षुषा गृह्यते न गुरुत्वादि। तत्कस्य हेतोः? अयोग्यत्वादितिचेत्, किन्तद्योग्यत्वम्? रूपादिमत्वं चेत्, गुणादिष्वननुगतम्। रूपमहत्वादिमत्समवेतत्वं चेत्, रूपत्वत्र्यणुकादिष्वननुगतम्। [१]रूपघटादेः प्रातिस्विकरूपमपि सुतरां तथैवेति परैरनुगतजन्यज्ञानापरोक्ष्यप्रयोजकयोग्यताया दुर्वचत्वादगत्या अस्मदभिमत-मनावृतचिदभिन्नत्वमनुगतं तत्प्रयोजकं वाच्यम्। इत्थंच प्रत्यक्षे विषयस्य कारणतामभ्युपगच्छतः तव आपरोक्ष्ये तादृशयोग्यतायाः प्रयोजकता दुर्वारैवेति योग्यतयैवाऽऽपरोक्ष्यनियमसिद्धेः अयोग्ये सौरभादौ चाक्षुषत्वेन त्वयाऽभ्युपगते आपरोक्षाऽनुल्लेखादन्वयव्यभिचारोऽपि स्फुटएवेऽति अपरोक्षता करणैः = इन्द्रियैः न नियम्यत इत्यर्थः। अभानापादकाऽज्ञानावरणभङ्गे च विषयावच्छिन्नचैतन्ये प्रमातृचैतन्याऽभेद एव प्रयोजकः। तत्रचेन्द्रियाणामन्तःकरणस्य बहिर्निर्गमने द्वारतैव, न प्रमातृचैतन्याऽऽपरोक्ष्यप्रयोजकता तस्य पूर्वसिद्धत्वादितिभावः।। ननु बहि प्रमातृचैतन्यव्याप्तावपि रूपघटादिष्वेवाऽभानापादकाज्ञानावरणभंगो न गुरुत्वादिष्विति कुतः? अन्तः करणपरिणामत्वाविशेषेऽपि परम रागेच्छादीनामेवाऽऽपरोक्ष्यं न धर्मा-धर्मादेरिति च कुत इति चेत्। अत्राहुः-सर्वकार्याणां पूर्वपूर्वसंस्काराऽनुसारेणैवाऽध्यासान्नीलपीतादिवैचित्र्य इव नित्यपरोक्षलक्षणवैचित्र्येऽपि संस्कार एव हेतुः। तथाच तत्राऽसत्वापादकाज्ञानावरणमेकमेवेत्याहुः। अन्येतु— तदभानापादकावरणभंगे योगाभ्यासजन्यादृष्टमपि सहकारीत्याहुः। अपरेतु— "कर्माध्यक्षः" इति श्रुतेरीश्वरसाक्षिणं प्रत्यनावृतत्वस्यावश्यवाच्यतया ब्रह्मस्वरूपवन्मूलाज्ञानेनैव तदावरणमिति न ब्रह्मज्ञानमन्तरेण तदावरणभङ्ग इत्याहुः।। ४।।

ननु महावाकयार्थबोधस्याऽनावृतचिदभिन्नविषयत्वमेवाऽसिद्धम्। साक्ष्यंशे अनावरणस्य स्वतस्सिद्धत्वेऽपि ब्रह्मांशे 'नाहं ब्रह्मजानामि' इति आवरणस्य सर्वाऽनुभवसिद्धस्य प्राक्त्वयैवोपपादनात्, शाब्दवृत्तेश्च तद्भगे असमर्थत्वादित्याशंक्य

(१) रूपघटादेः प्रातिस्विकरूपमपि तथैवेति।। घटरूपस्य स्ववृत्तिरूपत्व जातिवद्रूपमहत्वादिवत्समवेतत्वं नास्ति। घटेऽनेकरूपाभावेन तद्रूपस्य रूपमहत्वादिमत्समवेतत्त्वासम्भवात्। घटस्यापि यत्स्वकीयमसाधारणस्वरूपं तस्यापि परमाणु पुञ्जो घट इति पक्षे परमाणूनां महत्वशून्यत्वेन यथोक्तरूपमहत्ववत्समवेतत्त्वासम्भवान्नानुगतजन्यज्ञाननिष्ठापरोक्ष्य प्रयोजकीभूत योग्यतालाभो नापि रूपत्वादिजातेरपि यथोक्त समवेतत्त्वासम्भवेनापरोक्षत्वप्रयोजकीभूत योग्यतालाभ इति भावः।।

शाब्दवृत्तेरपि तदज्ञाननिवर्तकत्वेश्रुत्यनुभवौ प्रमाणयति— अपिचेति।।

मू०।। अपिचाऽऽवृतार्थविषया परोक्षधी
वर्चसा च भग्नमनुभूयते तमः।
उपदेशमात्रमुपवर्ण्य तत्पुनः
श्रुतिराह दर्शयति पारमित्यपि।।५।।

अपिचेत्युक्तसमुच्चये। परोक्षधीः = परोक्षबुद्धिः, आवृतार्थविषया = अज्ञान-तिरोहितार्थगोचरा 'आवृतार्थाकारा वृत्तिः परोक्षा' इति तल्लक्षणयोगादित्यर्थः। नच प्रकृतबुद्धिस्तथा। यतो वचसा = महावाक्येन, तमः = अज्ञानं, भग्नम् = विध्वस्तमनुभूयते मुख्याधिकारिभिरिति शेषः। नच तत्र विप्रतिपत्तिः। श्रुत्यापि तदनुवादादित्याह— उपदेशमात्रमिति।। श्रुतिः = छान्दोग्यसप्तमप्रपाठकरूपा सनत्कुमारस्य गुरोः नारदाय शिष्याय "योवै भूमा तत्सुखम्" इत्यादिना आत्मोपदेशमात्रमुपवर्ण्य प्रपाठकान्ते स्वयमेवाह— "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः तं स्कन्द इत्याचक्षते" इति।। तत्र साक्षात्कारा-ऽनुकूलव्यापारवान्हि दर्शयतीति णिजन्तप्रकृतिकाख्यातेनोच्यते। यदि च बोधकवाक्यप्रयोगरूप उपदेशःशिष्यस्यात्मसाक्षात्कारे अहेतुः स्यात् 'दर्शयति' इति नाऽवक्ष्यदित्यर्थः। तथाचाऽखण्डशाब्दवृत्युदयसमकालमेव ब्रह्मावारकाज्ञान-नाशान्नाऽऽपरोक्ष्यव्याहतिरिति भावः।।५।।

एवम् "आत्मावारे द्रष्टव्यः श्रोतव्यः" इति साक्षात्कारमेवोद्दिश्य श्रवणविधानान्मुख्याधिकारिणां श्रवणमात्रेण कृतार्थताश्रुतेश्च शाब्दाऽऽपरोक्ष्य-सिद्धिरित्याह— 'विदधाति' इति।।

मू०।। विदधाति यच्च परमात्मदृष्टये
श्रवणं विमृष्टनिगमान्तगोचरम्।
श्रुतिमात्रतीर्णतमसो यदब्रुवन्
जनकोऽसि तारयसि पारमित्यपि।।६।।

यत् = यस्मात्कारणात्, बृहदारण्यकश्रुतिः परमात्मदृष्टये = ब्रह्मसाक्षात्कार-मुद्दिश्य विमृष्टनिगमान्तगोचरम् = विचारिततात्पर्यकवेदान्तविषयकम्, श्रवणम् विदधाति ततोप्यभिमतसिद्धिरिति पूर्वसाध्येन संबंधः। ननु तत्रैव "मन्तव्यो निदिध्यासितव्यः" इति मनननिदिध्यासनयोरपि श्रवण सहकारित्वेन विधानात्परम्परया साक्षात्कारप्रयोजकतैव तस्याः श्रुतेरभिप्रेतास्त्वित्याशंकां वारयन् प्रश्नोपनिषद्वाक्यमपि

उक्तेऽर्थे संवादयति— श्रुतिमात्रेति।। तत्रह्येवमुक्तम्— सुकेशादयः षट्शिष्याः परं ब्रह्माऽन्वेषमाणाः पिप्पलादं गुरुमुपसन्नाः, तस्माच्च सम्यगात्मतत्त्वं श्रुत्वा श्रुतिमात्रेण = श्रवणमात्रेण, तीर्णं तमः = अज्ञानान्धकारो यैस्ते तथाविधाः सन्तः तं गुरुमब्रुवन्, किमिति— हेगुरो ''त्वंहि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि'' इति। त्वमेवच नः पिता मुख्यः यस्त्वं निर्दुःखपरमानन्दरूप-स्वात्मतत्वप्रदर्शनेन मोहसमुद्रान्निस्तारयसि, प्रसिद्धस्तु पिता देहमात्रोत्पादने पालने चात्मजन्मपालनोपचारान्नतथेति हि तेषामभिप्रायः। यत् = यस्मात् उपदेशमात्रेण स्वरूपप्रापकत्वात्पितेत्यब्रुवन्, तारयसीति लटा वाक्यार्थबोधसमकालमेवाऽविद्यानिवृत्त्या कृतकृत्यतामब्रुवन्। ततोऽपि शाब्दाऽपरोक्षसिद्धिरित्यर्थः। मननिदिध्यासनसहकारि-विधेस्तु मन्दमध्यमाऽधिकारिविषयतेति भावः।। ६।।

(१)अनावृतचिदभेद एव विषयेषु योग्यता, सैव हि वृत्तीनामापरोक्ष्ये प्रयोजिकेत्युक्तम्। तत्र चिदभेदः स्वाभाविकश्चिति, घटादिजडेतु विषयताख्य चित्तादात्म्यघटक आध्यासिक इत्यवान्तरवैलक्षण्येऽपि तादृशचिदभेदत्वेनैवोभयत्रापि वृत्तावापरोक्ष्यप्रयोजकत्वात्तस्या ऐकरूप्यमेव। आपरोक्ष्यं तु मुख्यं चैतन्यस्यैव। ज्ञातृज्ञानज्ञेयेषुतु अपरोक्षचित्संवलनाद्विमर्शे गौणम्। तथा च बाह्यवस्तुषु अपरोक्षचित्संबंधाय करणजन्यवृत्त्यपेक्षायामप्यन्तरे ब्रह्मणि वाक्योत्थवृत्त्यैवा-ऽज्ञाननिवृत्तिसंभवान्नास्त्येव करणाऽपेक्षेत्या— चैतन्यस्येति।।

मू०।। चैतन्यस्याऽऽपरोक्ष्यं स्वरसनिजदृशो मुख्यमन्याऽनपेक्षं
गौणं तद्गोचरेष्वावरणविरहिते तत्र तादात्म्यवत्सु।
बाह्ये चैतन्ययोगं घटयितुमुचिता वृत्तिरक्षप्रसूता
वाक्योत्था मोहमात्रं विघटयति चितस्स्फूर्तिरन्याऽनपेक्षा।। ७।।

स्वरसनिजदृशः = स्वयमेव रसस्य सारस्य निजदृशः = स्वप्रकाशचैतन्यस्य, आपरोक्ष्यं मुख्यम्। तत्र हेतुगर्भं विशिनष्टि— अन्येति।। यतस्तदन्यनिरपेक्षमित्यर्थः। तद्गोचरेषु— तस्य = साक्षिचैतन्यस्य, गोचरेषु = विषयेषु ज्ञातृज्ञानज्ञेयेषु गौणम्। तत्राऽपि तथैव विशिनष्ठि— आवरणविरहित इति।। आवरणेन विरहिते = शून्ये, तत्र = साक्षिणि, आध्यासिकतादात्म्यवत्सु निरावरणचित्तादात्म्याऽपेक्षत्वादित्यर्थः। ततश्च रंजकद्रव्यरक्तिम्ना रंजितपटे 'रक्तः पटः' इतिवद्गौणोऽपरोक्षव्यवहारस्तेष्विति भावः। ननु यदि चित्तादात्म्यादेवाऽऽपरोक्ष्यं विषयाणां, तर्हि सर्वस्य जगतश्चित्त्येवा-ऽध्यस्तत्वादापरोक्ष्यापत्तिः। नचाऽऽवरणादतथेति वाच्यम्। अधिष्ठानचैतन्य

(१) तत्र अनावृतचित्तादात्म्यस्यापरोक्षत्व प्रयोजकत्वे सति इत्यर्थः।।

तदध्यस्तयोरन्तराऽऽवरणसद्भावेऽध्यस्तस्य चित्तादात्म्यस्यैवाऽसंभवादध्यासाभाव-प्रसङ्गादितिचेत्, सत्यम्। अस्त्येव सर्वाधिष्ठानब्रह्मचैतन्यंप्रति सर्व विषयस्याऽव्यव-धानादापरोक्ष्यम्। अत एव हि ब्रह्म सर्वज्ञमित्युक्तम्। नैतावता सर्वेषां सार्वज्ञ्य प्रसङ्गः। तत्तत्प्रमात्रवच्छिन्नसाक्षिण्यौपाधिकभेदसत्वात् तं प्रत्येव बाह्यविषयाणा मावरणाऽभ्युपगमात्। अत एव हि तद्भङ्गाय वृत्तिनिर्गमः। अथवा—मास्तु बाह्यवस्तुष्वावरणम्। तथापि न तत्तत्पुरुषान्प्रति विनातत्तत्प्रमातृचैतन्योपरागं स्फुरणप्रसक्तिः। अत एव हि तत्र चिदुपरागाय वृत्तिनिर्गमाऽपेक्षेत्याह—बाह्य इति।। बहिर्भवे बाह्ये घटादौ प्रमातृचैतन्यस्य योगं = संपर्कं घटयितुं = संपादयितुम्, अक्षप्रसूता = इन्द्रियजन्या वृत्तिः उचिता = आवश्यकीत्यर्थः।

नन्वेवमपरिच्छिन्नब्रह्मस्वरूपेऽपि सर्वतो वृत्तिव्याप्तये इन्द्रियद्वारा बहिर्वृत्तिनिर्गम आवश्यकः। आवरणभङ्गार्था वृत्तिरिति पक्षेऽपि सार्वत्रिकब्रह्मावरणभङ्गाय सर्वतोवृत्तिव्याप्त्यपेक्षास्त्येवेति कथं वाक्योत्थवृत्तिमात्रेण परिच्छिन्नेन निर्वाह इत्याशङ्क्याह—वाक्योत्थेति। वाक्योत्था = महावाक्यजन्यादर्शिताऽखण्डवृत्तिः, मोहमात्रम् = कृत्स्नमज्ञानं, विघटयति = अधिष्ठानात्प्रच्यावयति बाधत इत्यर्थः। अयं भावः—न कार्त्स्न्येन वृत्त्याविषयव्याप्तावेव तत्स्फुरणमिति नियमः। पर्वतं पश्यतो व्यवहितविप्रकृष्टतत्प्रदेशेषु च संयोगाभावात्तत्रान्तः करणस्य कार्त्स्न्येन व्याप्त्यभावेन पर्वताऽऽपरोक्ष्याऽभावप्रसङ्गात्। घटादिपदार्थस्याऽपि तन्याये-नाऽऽपरोक्ष्याऽपलापाऽऽपत्तेश्च। किंच*।। विषयस्य स्वाकारवृत्तिः संपर्कः, सचैकदेशाऽसंबंधेनाऽपि घटादावन्तः करणस्य तदाकारतापत्तौ संपद्यत इति यद्यगत्याऽभ्युपगच्छसि, तर्हि वाक्यजन्यब्रह्माऽऽकारवृत्तेरपि अन्तरेव शुद्धब्रह्मसंपर्कस्याऽवर्जनीयत्वात्तदापरोक्ष्ये तदज्ञाननाशं कुतोनाऽभ्युपगच्छसीति।। एतावांस्तु विशेषः—पर्वते साक्षात्कृतेऽपि व्यवहितविप्रकृष्टतद्गतविशेषाणां साक्षात्कारवृत्त्याऽनवगाहनात्तद्विषये अज्ञानजिज्ञासे अवशिष्येते। ब्रह्मणस्तु निर्विशेषत्वाद्वृत्त्यनवगाह्यस्य कस्यचिदंशस्याऽनवशेषात्कृत्स्नजिज्ञासाऽज्ञानमूल-मूलाऽज्ञानोन्मूलनाच्च कृतकृत्यतैवेति। ननु तर्हि ब्रह्मणः सर्वतः प्रमातृचिदुपरागार्थमेव वृत्तिनिर्गमाऽपेक्षाऽस्तु इत्याशङ्क्याह—चित इति।। चितः = अनावृतचैतन्यैकरसस्य ब्रह्मणः स्फूर्तिः = प्रतिभानम्, अन्याऽनपेक्षा = चिदुपरागाऽनपेक्षेत्यर्थः। अस्वच्छ-मित्यादौ सौराऽऽलोकादिप्रतिबिंबोदयाय काचरसादिस्वच्छद्रव्योपलेपनमिव जडे घटादौ अनावृतप्रमातृचैतन्योपरागाय स्वच्छतरान्तः करणवृत्तिव्याप्त्यपेक्षायामपि स्वयंप्रकाशे ब्रह्मणि न तदपेक्षा। उपाध्यावरणयोर्भङ्गेन च सेतुभंगे जलस्येव

* किन्तु इति पाठः।

प्रमातृचैतन्यस्याऽपि अपरिच्छिन्न ब्रह्मसंबंधः सिद्ध इति न तदर्थमपि तदपेक्षेति भावः। तथाचाहुः—

"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।
स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते"।। इति।।

अत एव वृत्तिसंबंधमभ्युपगम्य "मनसैवाऽनुद्रष्टव्यं" "चेतसानान्यगामिना। परमं पुरुषं दिव्यं याति" इत्यादि श्रुतिस्मृतिवादाः, फलव्याप्त्यभावाच्च "नैववाचा न मनसा" "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" इत्यादिवादाश्च प्रवृत्ता न विरुध्यन्त इति भावः।।७।।

बहिर्विषये वृत्तिनिर्गमनस्य दर्शितमेव मतभेदेन फलद्वयं स्फुटयतिविषयेति।।

मू०।। विषयाऽप्रबोधदलनाय संविदो
विषयोपरागजननाय वा धियम्।
विषयाऽऽकृतित्वमुपनेतुमिष्यते
विषयाऽक्षयोगसरणिस्तनोर्बहिः।।८।।

विषयस्य = बाह्यघटादेः, अप्रबोधस्य = तदधिष्ठानचैतन्याऽऽवरकतूलाऽज्ञानस्य दलनाय = नाशाय, अथवा, संविदः = प्रमातृचैतन्यस्य विषयोपरागः = विषये प्रतिफलनेन तादात्म्यं तस्य जननाय = उत्पादनाय वा, धियम् = साक्षीद्धमन्तःकरणं, विषयाऽकृतित्वम् = घटाद्याकारताम् उपनेतुम् = तदुपश्लेषेण संपादयितुं, तनोः = शरीरात्, बहिः अन्तःकरणनिर्गमनद्वारतया विषयाऽक्षयोगसरणिः = विषयेन्द्रियसन्निकर्षरूपो मार्गः इष्यते = अवश्यमपेक्ष्यत इत्यर्थः। तेन मार्गेण निस्सृतस्यांऽन्तःकरणस्य घटादिव्याप्त्या घटाद्याकारतासंपत्तौ घटाद्याधिष्ठानचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्य च केदारतद्व्याप्तजलावच्छिन्नाऽऽकाशयोरिव समान प्रदेशावच्छिन्नोपाधिद्वयस्य परस्परोपहित भेदाऽनियामकत्वादैक्यापत्तौ घटाद्युपहितचैतन्यनिष्ठाऽज्ञानाऽऽवरणभंगात्तत्प्रतिभासे तदध्यस्तघटादेरपि प्रतिभास इत्याचार्य वाचस्पतिमिश्रमतम्।।

विवरणानुसारिणां तु—"जीवेशावाभासेन करोति" इति श्रुतेः जीवस्याऽविद्याप्रतिबिंबत्वादविद्यान्तः करणतद्वृत्त्यादीनां चित्प्रतिबिंबग्राहिणामेव तं *प्रत्याऽऽपरोक्ष्यदर्शनाद्बाह्यघटादावपि स्वच्छान्तः करणव्याप्त्या चित्प्रतिबिंबोदयेनैवाऽऽपरोक्ष्यमिति

*तत्प्रत्यक्षदर्शना त् इति पाठः।

मतमिति मतद्वयोपन्यास इति भावः।।

इति शाब्दाऽऽपरोक्ष्यनिर्णयः।। ८।।

इत्थं शाब्दाऽऽपरोक्ष्यं तत्प्रसङ्गाप्रतिकर्मव्यवस्थां च व्युत्पाद्य मुख्याऽधिकारिविशेषविषयमुपदेशमुपसंजिहीर्षुः प्रतिकर्मव्यवस्थास्मारित सर्वेन्द्रियव्यवहारनिर्वाहकं निष्प्रपंच चैतन्यैकरसमात्मानं सिंहावलोकनन्यायेनाऽऽलोच्य दर्शयति— यदिति।।

मू०।। यन्नेक्ष्यं चक्षुराद्यैः प्रतिविषयममी येन संधुक्षितार्थाः
यद्वागादेः पदं न व्यवहरति मुहुर्येन वागादिवर्गः।
येन प्राण प्रणीतस्तनुकरणमनोबुद्धयो येन चेद्धाः
तच्छुद्धं स्वेन सिद्धं निरुभयमभयं बोधसत्सौख्यमात्मा।। ९।।

यत् = वस्तु, चक्षुराद्यैः = ज्ञानेन्द्रियैः, नेक्ष्यम् = शक्यार्थे कृत्यः। ईक्षितुमशक्यमित्यर्थः। श्रुतिरपि = "यच्चक्षुषा नपश्यति" इत्यादिः "पराञ्चि खानि व्यतृणत्स्वयंभूः" इतिच। चक्षुरादेस्तत्प्रकाशकत्वाऽभावेऽपि तत्सद्भावे लिङ्गमस्त्येवेत्यभिप्रेत्याह— प्रतिविषयमिति।। अमी = चक्षुरादयः विषयेविषये-इतिप्रतिविषयम् (१)"यथार्थे" *इतिवीप्सायामव्ययीभावः। सर्वेष्वपि स्वस्वविषयेष्वित्यर्थः। येन = आत्मचैतन्येन संधुक्षिताः = सम्यक्प्रकाशिताः स्वस्वयोग्यसन्निकृष्टपदार्थास्तत्तदाकारस्वजन्यवृत्तिरूपप्रयोजनानि येषां ते तथोक्ताः। तथा च श्रुतिः— "श्रोत्रस्य श्रोत्रम्" इत्यादि।। तथाचेन्द्रियतज्जन्यवृत्त्याद्युपाधिविवेकमात्रेणाऽऽत्मचैतन्यं शुद्धं लक्षयितुं शक्यमित्यर्थः। एतदेवश्रुतिराह— "अतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति' इति।। सन्निधानाच्छ्रोत्रादिकलापाऽभिमानमतिमुच्य इति हि तदर्थः। एवं क्रमेन्द्रियविषय चतुर्विधक्रियाफल वैलक्षण्येन कर्मेन्द्रिय प्रवृत्तिनिमित्ताऽभावेन पूर्वसिद्धत्वेन च नित्यनिर्विकारतया कर्मेन्द्रियैरप्याऽऽत्मा लक्षयितुं शक्य इत्यभिप्रेत्याह-यदिति।। यत् = आत्मवस्तु, वागादेः = कर्मेन्द्रियस्य, पदं = विषयः न, वक्तव्याऽऽदातव्य गन्तव्य विसर्जयितव्याऽऽनंदयितव्यानि हि तेषां पदम्। आत्मा तु न तथेत्यर्थः। अत्रापि श्रुतिः "यद्वाचाऽनभ्युदितं" "नैववाचा

(१) यथार्थेति = अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्यासं प्रतिशब्दप्रादुर्भावः पश्चाद्यथानुपूर्व्ययौगपद्य सादृश्यसम्पत्ति साकल्यान्तवचनेषु।।अष्टा० अ० २ पा० १ सू० ६।। अव्ययमिति योगो विभज्यतेऽव्ययं समर्थेन समस्यते सोऽव्ययीभावः। इति।। विभक्तिरिहकारकशक्तिः। विभज्यतेऽनया प्रातिपदिकार्थ इति व्युत्पत्तेः। अतएव वक्ष्यति विभक्त्यर्थादिपु विद्यमानमव्ययमिति तत्त्वबोधिनी पाठः।।

*योग्यता वीप्सा पदार्थाऽनतिवृत्तिं सादृश्यानि यथार्थाः। तथाच "अव्ययं विभक्ति" इत्यादि सूत्रघटकीभूत यथार्थेत्यंशेनोक्तवीप्सारूपाऽर्थे 'अव्ययम्" इत्यादिसूत्रेणैव प्रतीत्यव्ययेन समासः।

नमनसा'' इत्यादि।। तथा च सूच्यादिलोहचलनेन तन्निमित्तमयस्कान्तमिव कर्मेन्द्रियव्यापारैर्लक्षणीयमित्यभिप्रेत्याह— व्यवहरतीति।। मुहुः = सर्वदा। ननु प्राणाऽन्तःकरणाभ्यामेव क्रियाज्ञानशक्तिमद्भ्यामुभयमप्यन्यथासिद्धमित्याऽऽशंकां निरस्यन्नाह— येनेति।। येन = आत्मवस्तुनैव प्राणः स्वव्यापारे प्रणीतः = प्रवर्तितः। तनुः = शरीरम्, करणानि, प्रागुक्तानि, मनोबुद्धिशब्दाभ्यां शक्तिभेदाद्वृत्तिभेदाद्वाऽन्तःकरणमेव द्विधोपात्तम्। तन्वादिबुद्ध्यन्ता येन सर्वान्तरेण स्वयंज्योतिषा स्फाटिककोशपरंपरान्तर्गतप्रदीपेनेव, इद्धाः = दीप्ताः सदैवाऽनुभूयन्त इत्यर्थः। तनुकरणयोः पुनरुपादानमन्तः करणस्याऽपि पारार्थ्येन तत्साम्यप्रदर्शनार्थम्। तथाच श्रुतिः—''न प्राणेन नाऽपानेन मर्त्यो जीवति कश्चन'' ''मनोमयः प्राणशरीरनेता'' ''बुद्धेस्साक्षी मनसस्साक्षी सर्वस्य साक्षी'' इतिच।। तत् = तथाभूतम्, शुद्धम् = असङ्गत्वादत्यन्तपरिशुद्धं स्वेनैव सिद्धस्वप्रकाशमित्यर्थः। स्वविषयस्य चाऽवस्थात्रयस्य स्वव्यतिरिक्तसत्तास्फूर्त्यभावान्निरुभयम् = अद्वयम्, अतएव भयहेतुद्वितीयाऽभावात् = अभयम् ''द्वितीयाद्वै भयं भवति'' इति श्रुतेः। बोधसत्सौख्यमेव आत्मा स एव निश्चितः कृतकृत्यताहेतुः ''तरति शोकमात्मवित्'' इत्यादिश्रुतिशतेभ्यः इति भावः।। ९।।

इत्थं मन्दमध्यमाऽधिकारिणामपि आत्मतत्त्वबोधाय श्रुति युक्त्यनुभवप्रकारैः शास्त्राऽऽचार्यसंप्रदायसिद्धैर्विचारो विस्तरेण दर्शितः। एतावतैव कृतपुण्यपुञ्जाः प्रक्षीणरागादिदोषास्ते कृतकृत्या भविष्यन्त्येवेति। यस्तु तेषामपि मध्ये बलवत्तर-प्रारब्धवशात् दृढतराऽसंभावनादिदोषात् विचारितमप्यात्मतत्त्वं नविन्दति, यश्च दृढतररागद्वेषादिद्वैतसंस्कारव्याकुल आत्मविचारे विचारित आत्मतत्त्वे वा चित्तस्थैर्यं न लभते, तयोराद्यस्य यावद्बोधोदयं श्रवणाद्याऽऽवृत्तिं, द्वितीयस्य योगाऽभ्यासेन चित्तनिग्रहं चाऽवश्यकर्तव्यत्वेनोपदिशति— इत्थमिति।।

मू०।। इत्थं सम्बोधितस्याप्यनवहितमतेर्यस्य बोधो न वृत्तः
स स्याद्भूयोविचारव्यसनवशमनाः सत्सहायः स्वतश्च।
अक्षान्विक्षेपशान्त्यै चपलमपि मनो लालनैर्वा हठाद्वा
रुध्वा ध्यायेदनन्तं परमसुखचिदात्मानमेकं विविक्ते।। १०।।

इत्थं = उक्तप्रकारेण शास्त्राऽऽचार्याभ्यां सम्बोधितस्य = सम्यकबोधितस्यापि दृढाऽसंभावनादि दोषवशात् अनवहिता = श्रुतितात्पर्यनिर्णये सूक्ष्मतराऽऽत्मतत्त्वा-ऽवधारणे वा संशयादिभिरस्थिरीकृता मतिः यस्य तथाविधस्य यस्य = अधिकारिणः, बोधः = आत्मनिर्णयः नवृत्तः = न सम्पन्नः, सः = तथाविधोऽधिकारी श्रवणादौ

श्रान्तस्सन् 'दुरधिगममिदं नास्ति मे बोधप्रत्याशा' इति निर्वेदान्न श्रवणादि परित्यजेत्। किन्तु उत्साहसम्पन्नस्सन् भूयः = पुनः पुनः सत्सहायः = सन्तो मृदिताऽसंभावनादिदोषाः कृतसाक्षात्कारा आचार्यसतीर्थ्यादयः अभ्यासपरा अन्ये वा सहाया अनुभवमूलयुक्तिभिः बोधने ऊहापोहसंवादग्रन्थाऽभ्यासादौ च सहकारिणो यस्य स तथाविधस्सन् तेषांसंनिधिकाले च स्वतश्च ग्रन्थपरिशीलनादिना प्रत्यक्प्रवणचेतसा आत्मतत्त्वपर्यालोचनेन च यावत्साक्षात्कारोदयं विचारव्यसनवंशमनाः = यथा स्त्रीधनादिव्यसनिनः तदेकप्रवणं मनः प्रसिद्धं, तथा आत्मतत्त्वविचारे व्यसनस्य = अत्याऽऽसक्तेः वशं = निरन्तराऽधीनं मनो यस्य स तथाविधस्स्यात् = भवेदित्यर्थः। तथा च सूत्रम् "(१)आवृत्तिरसकृदुपदेशात्" इति। आहुश्च वृद्धाः,

"गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा।
न विचारपरं चेतो यस्याऽसौ मृत उच्यते"।इति।।

अयंभावः— द्विविधाह्यसंभावनाप्रमाणाऽसंभावना प्रमेयाऽसंभावनाचेति। तत्र, यस्य प्रमेयाऽसंभावना स्वत एव नास्ति स्वल्पकालकृतशास्त्राचार्यपूर्वकविचाराद्वा निवृत्ता। प्रमाणानित्वस्मिन्नर्थे कथं सर्वाण्यविरोधेनाऽनुकूलानि स्युरित्येव असंभावनाऽऽस्ते। स यावद्बोधं श्रवणमेवाऽऽवर्तयेत्। यस्य तु सकृच्छ्रवणेनैव प्रमाणाऽसंभावना निवृत्ता अस्तु सर्वश्रुतीनामद्वितीयात्मवस्तुन्येव तात्पर्यम्। वस्तु स्वरूपं तु नैवंविधंप्रसिद्धं संभावयितुं शक्यमित्येव साऽऽस्ते, सत्वनुभवनिष्ठानाचार्यसतीर्थ्यादीनुपासीनः तद्दर्शितयुक्त्यनुसंधानरूपं स्वबुद्ध्या देहेन्द्रियादिविलक्षणसर्वान्तर चिदात्मपर्यालोचनरूपं च मननमेवाऽऽवर्तयेत्। यस्य तु द्विविधाप्यसंभावना न निवृत्ता स यावत्तत्फलाऽवाप्त्युभयमावर्तयेदिति। यस्य तु द्विविधाप्यसंभावना निवृत्ता केवलं द्वैतवासना दार्ढ्याद्विपरीतभावनयैव चित्तमाकृष्यते, तस्य निदिध्यासनमेव यावद्बोधोदयं कर्तव्यत्वेन दर्शयति— ध्यायेदिति। विक्षेपाः = विपरीतप्रत्ययाः तत्संस्काराश्च तेषां शान्त्यै = अनुत्पादाय उच्छेदाय च। विविक्ते = "समे शुचौ शर्करावह्निबालुकाविवर्जिते। शब्दजलाशयादिभिः मनोनुकूले नतुचक्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेत्" इतिश्रुत्याद्युक्तलक्षणवति देशे मृद्वासने सुखोपविष्टस्सन्

(१) आवृत्तिरसकृदुपदेशात्।। अ० ४ पा० १ सू० १।। नन्वात्मा वाऽरे दृष्टव्यः श्रोतव्यो मन्तव्य इत्यादि श्रवणवाक्येषु सकृदेव प्रत्ययः कर्तव्य आहोस्विदावृत्तिरिति संशये सकृत्प्रत्ययः स्यात्प्रयाजादिवत्तावतैव शास्त्रस्य कृतार्थतोपपत्तेरिति पूर्व पक्षे सत्युत्तरमाह। आवृत्तिरिति। प्रत्ययावृत्तिरभ्यासः कर्तव्यः। कुतः। असकृदुपदेशात्। श्रोतव्यो मन्तव्यो निदिध्यासितव्यं इत्येव जातीयकोह्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयति तेनाभ्यास एव कर्तव्यः। इति भावः।।

अक्षान् = बाह्येन्द्रियाणि चक्षुरादीनि वागादीनि च चपलं = चञ्चलंमनोऽपि रुध्वा = पराक्प्रवणतायाः निर्वर्त्य अनन्तं = त्रिविधपरिच्छेदशून्यं परमसुखचिदात्मानं = निरतिशयाऽऽनन्दज्ञानैकरसं स्वात्मानं एकमित्यवधारणे तमेकमेव ध्यायेत् = अविच्छेदेन चिरंचिन्तयेदित्यर्थः। तत्र यस्य स्वरसतो मनो वश्यं नाभ्येति तस्य मनोनिग्रहे यथातत्परिपाकमुपायद्वयमाह— लालनैर्वा हठाद्वेति। यथा दुर्दान्तस्य पशोः अभिमतदेशप्रवेशनेन बन्धने हरित्तृणापिण्याकाद्युपदर्शनं कण्डूयनादिः (लालनोपायः) सामोपाय लगुडप्रहारभर्त्सनानुधावनादिस्तु दण्डोपाय इतिद्विविधः। एवंचित्तस्यापि बहिः प्रवणतानिवारणेन आत्मप्रवणतासम्पादने अभ्यासवैराग्ये, विषयदोषानुसंधानं, अमानित्वादिधर्माः, असङ्गात्मभावना, *अन्यसङ्कल्पवर्जनं, वासनाक्षयमनोनाशाभ्यासौ, द्वैतस्यमिथ्यात्वादात्ममात्रत्वानुसन्धानं, ध्यानैकव्यसनिताचेत्यादिः लालनोपायः। अष्टाङ्गयोगाभ्यासलक्षणस्तु हठोपायः। तत्राऽऽद्यो राजयोगाख्यः "त्रिरुन्नतं स्थाप्य समं शरीरम्" इत्यादि श्रुत्या, गीतासु भगवता च दर्शितः—

"अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।।
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।।
यतो यतो निश्चरति मन श्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।
यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्रचैवाऽऽत्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति।।
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र नचैवाऽयं स्थितश्चलति तत्त्वतः।।
यं लब्ध्वा चाऽपरं लाभं मन्यते नाधिकं ततः।
यस्मिंस्थितो न दुःखेन गुरुणापि विचाल्यते।।
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।।" इति।।

अस्य च सुकरत्वं प्रत्यक्षफलत्वंच भगवतैवोक्तम्—

"राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्।।" इति।।

*सङ्कल्पवर्जनमिति ग्र० पा०।

अमानित्वादयो भगवतैव ज्ञानज्ञेयविभागप्रसङ्गेन दर्शिताः। वासनानां चित्तबीजत्वात् तन्नाशस्य चित्तनाशहेतुत्वं, वासनाप्राणस्पन्दयोः अन्योन्यहेतुकत्वं एकतरनिरोधेनैव उभयक्षयसिद्धिं चाह वसिष्ठः—

"वासनावशतः प्राणस्पन्दस्तेन च वासना।
क्रियते चित्तवृक्षस्य तेन बीजाङ्कुरक्रमः।।
द्वे बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने।
एकस्मिंस्तु तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः।।" इति।।

चित्तस्य सङ्कल्पमूलत्वं तत्परित्यागेन मनोनाशसिद्धिं चाऽऽह जनकः—

"अस्य संसारवृक्षस्य मनो मूलमिति स्थितम्।
सङ्कल्पमेव तन्मन्ये सङ्कल्पोपशमे न तत्।।
शोषयामि यथाशोषमेति संसारपादपः।।" इति।।
"चित्त! जानामि ते मूलं सङ्कल्पात्किल जायसे।
नैव संकल्पयिष्यामि तेन त्वं न भविष्यसि"।।

इति अन्यत्राप्युक्तं।। वासनानाम–रागद्वेषादीनां पूर्वावस्थारूपः चिराभ्यस्त-विषयसेवनोत्थः चित्तकषायः। सा त्रिधा— देहवासना, लोकवासना, शास्त्रवासना चेति। सदन्नपानादिसेवनबलवीर्यादिसम्पादनाऽलङ्करणादिभिः देहसौष्ठव-सम्पादनाऽभिनिवेशहेतुराद्या। सा च बलवीर्यसौन्दर्याद्यभिमानभोगलाम्पट्य तत्साधनविघातकेषु रागलोभद्वेषादिजननेन दुरन्तनरकादिदुःखहेतुः। स्वस्य लौकिकजनेषु आधिक्यसम्पादनाभिनिवेशहेतुर्द्वितीया। सा च दैवात् बहुतरश्रमेण सम्पन्नफला मदमानमोहमहत्तिरस्कारादिसम्पादनेन अनन्तनरकाद्यनर्थहेतुः, असंपन्नफलात्वमर्षाऽ-सूया मात्सर्यादि द्वारा महानर्थहेतुः। शास्त्रवासना द्विविधा— मलिना शुद्धा च। तत्र अनात्मशास्त्रेषु सकलग्रन्थाऽभ्यासपाटव वादिविजिगीषाद्यभिनिवेश हेतुराद्या। सापि श्रमाऽसूया मान मद मत्सर महत्तिरस्कार सच्छास्त्रप्रद्वेषादि द्वारा महानर्थहेतुः। अध्यात्मशास्त्राऽभ्यासजन्या विषयदोषदर्शन विवेक वैराग्यादि हेतुः शुद्धा। सा च चिराभ्यस्ता विरोधिवासनोन्मूलनेन आत्मैकप्रवणतामापादिते चेतसि स्वयमेव उपशाम्यति। तत्र देहवासना देहस्याऽनित्यत्वाऽमङ्गलत्व सर्वरोगाकरत्वाद्यनुसंधानात् तत्स्थैर्यस्य असाध्यत्वनिश्चयेन च वासिते चेतसि निवर्तते। यथाहुः—

"कोटयो ब्रह्मणां याताः गताः सर्गपरम्पराः।
प्रयाताः पांसुवद्भूपाः का धृतिर्मम जीवने।।" इति।।

लोकवासनापि उत्कर्षाय यतमानानामपि बहूनामविश्रान्तिविपरीतफलादिदर्शनेन

संसाराऽनर्थहेतुत्व प्रतिसंधानेन च वासिते चेतसि निवर्तते। अत्राप्याहुः—

"येषां निमेषणोन्मेषौ जगतः प्रलयोदयौ।
तादृशाः पुरुषाः सन्ति मादृशां गणनैव का।।" इति।।

शास्त्रवासनापि सर्वेषां ग्रन्थानां जन्मसहस्रैरप्यध्येतुमशक्यत्वात् असारबहुलत्वात् सर्वेषां वादिनां दुर्जयत्वात् आत्मपराभवस्याऽवश्यंभावित्वात् वृथा श्रमोऽयमिति प्रतिसंधानेन वासिते चेतसि निवर्तते।। अत्राप्याहुः—

"अनन्तशास्त्रं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमिश्रम्"।।
"इदं ज्ञेयमिदं ज्ञेयं यः सर्वं ज्ञातुमिच्छति।
अपिकल्पसहस्रायुः तस्यान्तं नाधिगच्छति"।।
गुरुं हुङ्कृत्य तुङ्कृत्य विप्रं निर्जित्य वादतः।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः"।। इति।।

तथाच शाकल्यप्रभृतीनां मूर्धपाताद्यनर्थः श्रूयतेइति [१]मूलवासनाजयोपायाः। रागादिवासनाजये मैत्र्यादिभावनं तत्तद्विषयदोषभावनं चोपायः। तथाच पातञ्जलसूत्रम्—[२]"मैत्री करुणा मुदितोपेक्षाणां सुखदुःखपुण्याऽपुण्यविषयाणां भावनातश्चित्तप्रसादनम्" इति। सुखमनुशेते रागात्मिका चित्तवृत्तिः अन्यान् सुखिनो दृष्ट्वा श्रुत्वा च ममापि तादृश सुखं स्यादिति। सा च स्वस्य दृष्टाऽदृष्टसामग्र्यभावात् असम्पन्नफला चित्तं तापयति। यदा असौ सुखिषु सर्वप्राणिषु स्वीयत्वलक्षणां ऐकात्म्यलक्षणां वा मैत्रीं भावयति, तदा तदीयं सर्वं सुखं स्वपुत्रादिसुखवत् स्वसुखवद्वा स्वीयमेव सम्पन्नमिति स रागः तत्प्रयुक्तद्वेषाऽसूयादयश्च निवर्तन्ते। एवं दुःखमनुशेते द्वेषात्मिका वृत्तिः कदाचिदपि मे दुःखं माभूदिति। सा च शत्रुव्याघ्रवृश्चिकादिषु सत्सु दुःखस्याऽपरिहार्यत्वात् सर्वदुःखहेतूनां उच्छेत्तुमशक्यत्वात् परितः प्रयतमानस्यापि असम्पन्नफला चित्तं तापयति। यदा असौ स्वस्येव कस्यापि कदापि दुःखं माभूदिति स्वसाम्येन स्वैकात्म्येन वा सर्वभूतेषु करुणां भावयति, तदा सा तत्प्रयुक्तक्रोधहिंसादयश्च निवर्तन्ते यथाहुः—

---

(१) मूलवासना जयोपायाः।। सर्वानर्थ मूल भूतायाः वासनाया जयोपायाः शास्त्रकृद्भिः श्रुतिस्मृतिभिर्निरूपिता इत्यर्थः।।

(२) मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।। पा० यो० पा० १ सू० ३३।। सर्वप्राणिषु सुखभोगसम्पन्नेषु मैत्रीं भावयेत्। दुःखितेषुकरुणां भावयेत्। पुण्यात्मकेषु मुदितां भावयेत्। अपुण्यात्मकेषूपेक्षां भावयेत्। एवमस्य भावयतः शुक्लो धर्म उपजायते ततश्चित्तप्रसन्नमेकाग्रं स्थिति पदं लभते।।

"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वीत मानवः"।।इति।।

तथा सर्वप्राणिनां प्रमादादकृतं पुण्यं कृतं पापं च चिन्त्यमाने चित्तं तापयतः। तत्राऽसौ यदा पुण्यकारिषु सर्वेषु मुदितां प्रीतिं भावयेत् पापिषु चोपेक्षां तदा स्वयमप्रमत्तः पुण्यतमसमाध्यभ्यासादौ प्रवर्तते पापाच्च निवर्तत इति [१]सा चिन्ता पापप्रवृत्तिमूलदम्भदर्पादयश्च निवर्तन्त इति तत्सूत्रार्थः। एवं स्वदोषविषयदोषादि-चिन्तनमपि दम्भदर्परागाद्युपशमहेतुः। स्वीयमनोवाक्कायदोषाः पुत्रमित्रादिविषयदोषाश्च स्वानुभवसिद्धाः पुराणेषु पूर्वाचार्यैश्च प्रपञ्चिताश्चेति नेह प्रपञ्च्यते। एवमसङ्गाऽकर्त्रैकात्म्य चिन्तनस्य द्वैतसंस्कारोच्छेदहेतुत्वं श्रुत्या, भगवता वसिष्ठेन च दर्शितम्। "तत्र को मोहः कः शोकः ,एकत्वमनुपश्यतः।" "आत्मेत्येवोपासीत"

"अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा।"
"असङ्गव्यवहारित्वात् भवभावनवर्जनात्।
शरीरनाशदर्शित्वात् वासना न प्रवर्तत" इति।।

तादृशात्मचिन्तनप्रकारश्च वृद्धैर्दर्शितः। यथा स्वर्णतत्त्वपरीक्षकः कुण्डल-कटकाद्याकारं भासमानमप्युपेक्ष्य वर्णगुरुत्वयोरेव मनः प्रणिदधाति, तथा सच्चि-त्संवलनेन भासमानमपि ज्ञातृज्ञानज्ञेयात्मकं सर्वप्रपञ्चभेदमुपेक्ष्य निष्कृष्टसच्चिन्मात्रे तावत्कालं मनः प्रणिधानमभ्यसनीयम्, यावताकालेन उच्छ्वासनिःश्वासवदनायासेन केवले आत्मनि चित्तं स्थिरीभवतीति। तदेवं चिन्मात्रवासनायां स्थिरीकृतायां अहमेतच्चिन्तयामीत्यभ्यासकालोपात्तं अहंत्वभेदाऽवमर्श प्रयत्नं च परित्यज्य चिन्मात्रैकरसेन मनसः संस्थितिलक्षणस्समाधिर्भवति। स एव मनोनाश इत्युच्यते। तदानीं च योगी यदि तत्त्वज्ञः तदा साक्षात्कैवल्यलक्षणं परमानन्दमनुभवति। अतत्त्वज्ञस्तु चित्तस्थैर्यपरिपाकवृद्धिक्रमेण उत्तरोत्तराऽतिशयि सुखमनुभवन् सम्यक् परिपाके माहवाक्यजन्यवृत्तिसमानाकारया अखण्डाकारवृत्त्या स्वात्मानं साक्षात्करोति। तेन च सकार्याऽविद्या निवर्तते। तथाच श्रुतिः—"ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः" इति। "तस्याऽभिध्यानात् योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः" इतिच। अथवा श्रवणादिना निश्चितं ब्रह्म प्रणवेन एकीकृत्य ध्यायन् तत्र चित्ते स्थिरीकृते प्रणवमात्रात्रयं विराडादित्रयेणैकीकृत्य पूर्वपूर्वमुत्तरोत्तरत्र प्रविलाप्य अर्धमात्रालक्षिते तुरीये साव्याकृतं मकारं च प्रविलाप्य तस्मिँस्त्र्युन्नोतादियोगक्रमेण समाहितो यावत्साक्षात्कारोदयं भवेदिति राजयोगाख्यलालनेन

(१) सा चिन्तादुःखाद्यनुभवकाले बहिर्मुखानां जायमाना या किं मयापुण्यं न कृतं किं मया पापं च कृतमित्येवं रूपा चिन्ता सापि निवर्तत इत्यन्वयः।

चित्तवशीकारप्रकारः।। १०।।

अथ द्वितीयं हठयोगाख्यं दुर्दान्तस्य चित्तस्य दमनोपायं सङ्क्षिप्याह— मुक्त्वेति।।

मू०।। मुक्त्वा सङ्गं सहिष्णुः शुचिहितमितभुग्योगशास्त्रार्थदर्शी
पुण्ये निर्दोषदेशे यमनियमदृढः स्वासनस्थः प्रसन्नः।
प्राणायामक्रमेणाहृतचपलमनः स्थूलसूक्ष्मे निरुध्य
ध्यायन्नैकात्म्यसौख्यस्थिरगलितमना मोहबन्धं छिनत्ति।। ११।।

सङ्गं = बहिर्मुखजनानां योगाभ्यासोत्साहविघातिभीरुजनानां च समागमं, मुक्त्वा = परित्यज्येत्यर्थः। अथवा— आसङ्गमिति पदच्छेदः। आसज्यते निबध्यते येन रागादिना विषयेषु स आसङ्गः तं मुक्त्वेत्यर्थः। तदुक्तं योगशास्त्रे—

"जित्वा रागात्मनः शत्रून् कामादीन्योगमभ्यसेत्।।" इति।।

सहिष्णुः = दृढतरोत्साहबलात् शीतोष्णमशकमक्षिकावृश्चिकवातातपाद्यभिघातान् मानादीन् प्राणनिरोधनादिजन्यक्लेशांश्च सहिष्णु सहनशील इत्यर्थः। तदप्युक्तं योगशास्त्रे—

"अभियोगाद्दृढाभ्यासात्तत्रैव च विनिश्चयात्।
पुनः पुनरनिर्वेदात्सिध्येद्योगो न चान्यथा।।" इति।।

एवं च तीर्थयात्राग्रन्थाभ्यासाद्युत्साहोऽपि हेय एव। शुचिहितमितभुक्— शुचि = पवित्रं, हितं = पथ्यं, मितं = नात्यल्पबहुलं च भोज्यं भुनक्ति अभ्यवहरतीति तथोक्तः। अशुचेः कलञ्जमांसादेः देहपुष्ट्यादिहेतुत्वात् हितत्वेऽपि चित्तकालुष्यहेतुत्वात् हेयता। तदुक्तं पराशरेण—

"अन्नदोषेण चित्तस्य कालुष्यं सर्वदा भवेत्।
कलुषीकृतचित्तानां धर्मः सम्यङ्न्नभासते"।। इति।।

एवं शुचेः पवित्रस्यापि रूक्षोष्णकट्वम्लादेरोगाद्युत्पादकत्वेन योगाभ्यास-विघ्नहेतुत्वात् हेयत्वं।। इदंच "कट्वम्ललवणात्युष्ण" इति भगवतैव दर्शितं। एवं "नात्यश्नतस्तु योगोऽस्ति" इत्यादिना मिताशननियमोऽपि तेनैव दर्शितः। योगशास्त्रार्थदर्शी = हैरण्यगर्भस्य पातञ्जलस्य वा सूत्रभाष्यादेरन्येषां च मुनिसाम्प्रदायिकग्रन्थानां सांप्रदायिकतदनुष्ठाननिपुणगुरुमुखात् अर्थं सम्यक् परिशीलितवान् सन्नित्यर्थः। अन्यथाहि स्वेच्छया अभ्यासे व्याध्याद्यन्तरायः स्यादित्यर्थः। ईदृशस्याधिकारिणः तदभ्यासयोग्यं स्थानमाह— पुण्येति।। पुण्ये = पवित्रे सिद्धिप्रदत्वेन लोकशास्त्रप्रसिद्धे, निर्दोषे = मशकमक्षिकावृश्चिक-

वातातपाद्युपघातदोषशून्येदेशे। तथाच श्रुतिः—"समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोऽनुकूले न तु चक्षुःपीडने गुहानिरुद्धाश्रयणे प्रयोजयेत्।।" इति। पुराणेऽप्युक्तम्—

"न तोयवह्निसामीप्ये नजीर्णागारगोष्ठयोः।
न दंशमशकाकीर्णे न चैत्ये नच चत्वरे।।
नाभ्यसेत्पूतिगन्धादौ न स्थाने जनसङ्कुले।
केशभस्मतुषाङ्गार - कीटकादिविवर्जिते।।
सर्वबाधाविरहिते सर्वेन्द्रियसुखावहे।
मनःप्रसादजनने स्त्रग्धूपामोदमोदिते।।" इति।।

तत्राष्टाङ्गयोगाभ्यासप्रकारं दर्शयति—यमनियमेत्यादिना।। तेच पतञ्जलिना दर्शिताः। "अहिंसासत्यास्तेयब्रह्मचर्याऽपरिग्रहा यमाः। शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः। (१)स्थिरसुखमासनम्। (२)तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। (३)स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इव इन्द्रियाणां प्रत्याहारः। (४)देशबन्धश्चित्तस्य धारणा। (५)तत्र प्रत्ययैकतानता ध्यानं। (६)तदेव अर्थमात्रनिर्भासं स्वरूप शून्यमिव समाधिः" इति। एषां च सूत्राणां यथायथं तात्पर्यं स्फुटीकुर्मः। हिंसादिभ्यो निषिद्धधर्मेभ्यो योगिनं यमयन्तीति अहिंसादयो यमाः। दुःखजन्मादिहेतोः अशौचासन्तोषादेर्योगिनं निवर्त्त्य निष्कामधर्मे

(१) स्थिरसुखमासनम्। यो० पा० २ सू० ४६।। स्थिरं = निश्चलं सुखं = यत्सुखावहं तदासनम् इत्यर्थः।।

(२) तस्मिन् सति श्वासप्रश्वासयोर्गतिः विच्छेदः प्राणायामः।। यो० पा० २ सू० ४९।। तस्मिन् सत्यासनजये बाह्यस्य वायोरागमनं श्वासः कोष्ठ्यस्य वायोर्निःसरणं प्रश्वासस्तयोर्गति विच्छेद उभयाभावः प्राणायाम इति।।

(३) स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इव इन्द्रियाणां प्रत्याहारः।। पा० २ सू० ५४।। चित्तस्य स्वविषयैर्मोहनीयरंजनीय कोपनीयैरसंप्रयोगे सम्बन्धाभावे सति य इन्द्रियाणामपि तैर्विषयैरसम्प्रयोग-लक्षणश्चित्तानुकार इव चित्तवद् विषयासम्बद्धितयाऽवस्थानं स प्रत्याहारः।।

(४) देशबन्धः चित्तस्य धारणा।। पा० ३ सू० १।। नाभिचक्रहृदयपुण्डरीकादिदेशेषु बाह्ये वा विषये चित्तस्यवृत्ति मात्रेण ज्ञानमात्रेण सम्बन्धः सा धारणा इत्यर्थः।।

(५) तत्र प्रत्ययैकतानता ध्यानम्।। पा० ३ सू० २।। तस्मिन्नाभिचक्रादिदेशेध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृश प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्।

(६) तदेवार्थमात्र निर्भासं स्वरूपशून्यमिव समाधिः। पा० ३ सू० ३।। ध्यानमेव ध्येय मात्राकार निर्भासं प्रत्ययात्मकस्वरूपेण च शून्यमिवभवति ध्येयस्वभावविशेषात्तादृक् चित्तस्यावस्था विशेषा समाधिरित्युच्यते।।

नियमयन्तीति नियमाः तैः दृढः = वैरदेहाभिमानादिभिरप्रकम्प्यः योगी भवतीत्यर्थः। तथाच पातञ्जलसूत्राणि—"तत्संनिधौ वैरत्यागः। शौचात्स्वाङ्गजुगुप्सा।" इत्यादीनि।। आसनं दर्शयति— स्वासनस्थइति।।

आसनानि च तावन्ति यावन्त्यो जीवजातयः।

इति आसनस्याऽनेकविधत्वेऽपि सिद्धासनादिषु यदेव यस्य पुरुषस्य कायमनस्स्थैर्यसौख्यहेतुः तदेव तस्य स्वासनं।। सिद्धाद्यासनानां चतुर्णां लक्षणमुच्यते—

"एकं पार्ष्णिमधः कृत्वा द्वितीयं वृषणोपरि।
बध्नीयादर्धचन्द्राभं सिद्धासनमितीर्यते।।
दक्षिणं चरणं न्यस्य वामोरूपरि योगवित्।
याम्योरूपरि वामं च पद्मासनमिदं विदुः।।
कराभ्यां धारयेत्पश्चादङ्गुष्ठौ दृढबन्धवित्।
भवेत्पद्मासनादस्माद - भ्यस्ताद्दृढविग्रहः।।
जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे।
ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते।।
एकं पादमधः कृत्वा विन्यस्योरौ तथोत्तरम्।
ऋजुकायो विशेद्योगी वीरासनमितीरितम्।।
अथवाह्यासने यस्मिन् सुखमस्योपजायते।
स्वस्तिकादौ तदध्यास्य योगं युञ्जीत योगवित्।।" इति।।

आसनस्थैर्यस्य दृष्टादृष्टोपायं फलं चाह भगवान् पतञ्जलिः-"प्रयत्नशैथिल्याऽनन्तसमापत्तिभ्यां। ततो द्वन्द्वानभिघातः" इति। तस्यासनस्य ग्रहकृत्यतीर्थयात्रास्नानगमानादिप्रयत्नो मानस उत्साहो विरोधीति तस्यशैथिल्यं लौकिक उपायः,अन्यथा स उत्साहो देहमुत्थाप्य प्रवर्तयेदिति। फणासहस्रेण धरणीं धारयन्नास्ते योऽनन्तः सएवाहमस्मीति चिन्तनं अनन्तसमापत्तिः, तया आसनस्थैर्य सम्पादकमदृष्टमुत्पद्यते। सिद्धे चासने शीतोष्णसुखदुःखमानावमानादिद्वन्द्वैर्नाभिहन्यते इत्यर्थः। प्रसन्नः = क्षुत्तृषाचिन्तालस्यादिभिरखिन्नः सन्नित्यर्थः। तदप्युक्तं योगशास्त्रे—

"नातितृप्तः क्षुधार्तो वा नविण्मूत्रप्रबाधितः।
नाध्वखिन्नो न चिन्तार्तो योगं युञ्जीत योगवित्।। इति।।

तदुत्तरकृत्यमाह— प्राणायामेति। तत्क्रमश्चोक्तो मुनिभिः—

"इडया कर्षयेद्वायुं बाह्यं षोडशमात्रया।
धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया।।
सुषुम्नामध्यगं सम्यक् द्वात्रिंशन्मात्रया शनैः।
नाड्या पिङ्गलया चैनं रेचयेत् योगवित्तमः।।
भूयो भूयः क्रमात्तस्य व्यत्यासेन समाचरेत्।
स्रवत्पीयूषधारौघं ध्यायंश्चन्द्रमसं भ्रुवि।।
वामायामेन योगीन्द्रः सुखमाप्नोति तत्क्षणात्।
ज्वलज्ज्वलनपुंजाभं *शोधयन्नुष्णगुं हृदि।।
रविणा प्राणमाकृष्य पूरयेदौदरीं गुहाम्।
कुम्भयित्वा शनैः पश्चात् योगी चन्द्रेण रेचयेत्।। इति।।
तदभ्यासेनैव नाडीगणशुद्धिं तत्फलं चाहुः—
"इत्थं मासत्रयाभ्यासादुभयायामसेवनात्।
शुद्धनाडीगणो योगी सिद्धप्राणोऽभिधीयते।।
यथेष्टधारणं वायोरनलस्य प्रदीपनम्।
नादाभिव्यक्तिरारोग्यं भवेन्नाडीविशोधनात्।।
रेचकादित्रयाभ्यासो नाडीशोधनपूर्वकः।
स्वेच्छोत्क्रमणपर्यन्तः प्रोक्तो योगानुशासने।। इति।।
मात्राकालप्रमाणं चान्यत्रोक्तं—
"जानुम्प्रदक्षिणीकृत्य न द्रुतं नं विलम्बितम्।
अङ्गुलिस्फोटनं कुर्यात्सा मात्रेति प्रकीर्तिता"।।इति।।
स प्राणायामः सगर्भाऽगर्भभेदेन द्विधा। यथाहुः—
"जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः।
तदपेतं विगर्भं तु प्राणायामं परे विदुः"।।इति।।
रेचकादिप्रकारश्च क्वचिदुक्तः—
"उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकम्।
शून्यभावेन युञ्जीयाद्रेचकस्येति लक्षणम्।।
वक्त्रेणोत्पलनालेन तोयमाकर्षयेद्यथा।
एवं वायुर्गृहीतव्यः पूरकस्येति लक्षणम्।।
नोच्छ्वसेन्निः श्वसेन्नापि नैव गात्राणि कम्पयेत्।
एवंतावन्नियुञ्जीत कुम्भकस्येति लक्षणम्"।। इति।।

*शीलयन्नुंष्णगमिति पा०

आकाशम् = औदरं, निरात्मकं = वायुरहितं। बाह्याभ्यन्तरभेदेन कुम्भको द्विविधः। तदुक्तम्—

"अपानेऽस्तंगते प्राणो यावन्नाभ्युदितो हृदि।
तावत्सा कुम्भकावस्था योगिभिर्याऽनुभूयते।।
बहिरस्तंगते प्राणे यावन्नापान उद्गतः।
तावत्पूर्णसमावस्थं बहिष्ठं कुम्भकं विदुः"।। इति।।

तदभ्यासपरिचयप्रकारं पतञ्जलिराह—"बाह्याभ्यान्तरस्तम्भवृत्तिर्देशकाल-संख्याभिः परिदृष्टो दीर्घसूक्ष्मः" इति। यत्र प्रश्वासपूर्वको गत्यभावः सः बाह्यः। यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः। तृतीयस्तु स्तम्भवृत्तिः यत्रोभयाभावः सकृत्प्रयत्नाद्भवति। त्रयोऽप्येते देशेन परिदृष्टा इयानस्य देश इति।। यथा बहिर्द्वादशाङ्गुलपर्यन्तं श्वासः समाप्यते। अभ्यासेतु नाभेराधाराद्वा वायौ निर्गच्छति सति चतुर्विंशत्यङ्गुलपर्यन्ते षट्त्रिंशदङ्गुलपर्यन्ते वा समाप्तिः। एवमन्तरपि। तत्र बहिः तत्तत्प्रदेशधृततृणादिचलनेन गतिरनुमातुं शक्यते। अन्तस्तु नाभ्यादिप्रदेशचलनेन। एवं कालसंख्ययापि मात्रापरिगणनरूपया परिच्छिन्नो बोध्यः। स खल्वेवमभ्यस्तो दीर्घसूक्ष्मः। यथा घनीभूतस्तूलपिण्डः प्रसार्यमाणो दीर्घो, विरलत्वात् सूक्ष्मश्च भवति एवंश्वासोऽपि। रेचकादित्रयाऽन्यः चतुर्थोऽपि प्राणायामः पतञ्जलिना उक्तः—"बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" इति। रेचकपूरकविषयदेशकालनियमं परित्यज्य यथाशक्ति वायुं विरेच्य आपूर्य वा क्रियमाणः चतुर्थः कुम्भको भवतीत्यर्थः। तत्र निद्रातन्द्रादिदोषयुक्ताधिकारिणां आद्यत्रयं, तद्रहितानां तु चतुर्थ एवेति विवेकोविद्यारण्यश्रीचरणैरुक्तः। उक्तप्राणायामानां फले च पतञ्जलिना सूत्रिते—"ततः क्षीयते प्रकाशावरणं" "धारणासु च योग्यतामनस इति। सत्वप्रकाशस्यावरणं तमः तत्प्रयुक्तनिद्रातन्द्रादि च क्षीयते, वक्ष्यमाणधारणासु मनसो योग्यता च भवतीत्यर्थः। पापक्षयलक्षणं च फलमन्यत्रोक्तम्—

"यथा पर्वतधातूनां दह्यन्ते धमनान्मलाः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्"।। इति।।

सच प्राणायामोऽधममध्यमोत्तमभेदेन त्रिधा। तदप्युक्तम्—

"क्रमादभ्यस्यतः पुंसो देहे स्वेदोद्गमोऽधमः।
मध्यमः कम्पसंयुक्तो भूमित्यागः परो मतः"।।इति।।

क्रमादित्यनेन शीघ्रसिद्ध्यौत्सुकयात् अविचारादेव अतिमात्रनिरोधो न कार्य इति सूचितम्। तदप्यन्यत्रोक्तम्—

"हठान्निरुद्ध्यमानस्तु कुष्ठादि जनयत्यपि।
तत्प्रत्याययितव्योऽसौ क्रमेणारण्यहस्तिवत्"।।इति।।

एवं प्राणायामशीलस्यापि मनो यदि स्वभावचापल्यात् कदाचिद्विषयेषु प्रवर्तेत, तर्हि प्रत्याहारेण परावर्त्त्य विषयविशेषे धारणा कार्येत्याह—आहृतेति। आहृतं = निवर्तनाभ्यासपाटवेन प्रत्याहृतं स्वभावतो विषयसांनिध्ये विशेषतश्च चपलं = चञ्चलं मनः स्थूले गिरिकूटचन्द्रतारादौ बाह्ये, आभ्यन्तरे वा देवतामूर्त्यादौ प्रथमं, ततः सूक्ष्मे = अव्यक्ते परमात्मनि वा निरुध्य = बध्वेत्यर्थः। स निरोध एव धारणेति "देशबन्धश्चित्तस्यधारणा" इति सूत्रार्थ इति भावः।. स्वविषयाऽसंप्रयोगे इत्यादिप्रत्याहारलक्षणसूत्रस्य चाऽयमर्थः— बलात् परावर्तितस्य चित्तस्य इन्द्रियविषयैः असंप्रयोगे = असम्बन्धे सति चित्तपराधीनानां इन्द्रियाणां चित्तवदेव अर्थान्निरुद्धत्वाद-चाञ्चल्ये चित्तस्वरूपाऽनुकरणमिव सम्पद्यते स प्रत्याहारः इति। स्मृतावपि तल्लक्षणमुक्तम्—

"इन्द्रियाणां विचरतां विषयेषु निरर्गलम्।
बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते।।" इति।।

प्रत्याहारफलं च पतञ्जलिना सूत्रितं "ततः[(१)] परमावश्यता इन्द्रियाणाम्" इति। धारणाप्रकारश्च स्मर्यते—

"मनः सङ्कल्पकं* ध्यात्वा सङ्क्षिप्याऽऽत्मनि बुद्धिमान्।
धारयित्वा तथाऽऽत्मानं धारणा परिकीर्तिता"।। इति

योगभाष्ये तु देशबन्धश्चित्तस्येति सूत्रं नाभिचक्र मूर्धादिदेशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्धो धारणा इति व्याख्यातम्।। केचित्तु

"हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां ततो नसि।
भ्रूमध्ये मस्तके मूर्ध्नि द्वादशांते यथाविधि।।
धारणं प्राणमरुतो धारणेति निगद्यते।" इति।।

हृदय कण्ठमूल कण्ठ तालुमूल भ्रूमध्य मस्तकाग्रेषु क्रमात् प्राणनिरोधं धारणेत्याहुः। एवं धारणाजये ध्यानकर्तव्यतां दर्शयति-ध्यायन्निति। तत्र = ध्येयवस्तुनि, प्रत्ययानां = चित्तात्मकचित्तवृत्तीनां एकतानता = नियतैकारता विजातीयप्रत्ययाऽनन्तरिता

(१) ततः परमावश्यता इन्द्रियाणाम्।। पा० २ सू० ५५।। ततः = शब्दादिविषयेष्विन्द्रियाणामव्यसन स्वेच्छया सम्प्रयोगादि लक्षणायावश्यतायाः सकाशादियं चित्तनिरोधपूर्वकाविषय व्यावृत्यात्मकावश्यता परमा तस्यां चित्तरोधक प्रयत्नातिरिक्तेन्द्रिय निरोधार्थ प्रयत्नान्तरानपेक्षणादिति भावः।।
*सङ्कल्पकृद्ध्यातृ इति क्वचित्पाठः।

ध्यानमिति तल्लक्षणसूत्रार्थः। तथैवह्युक्तं पुराणे—

"तद्रूपप्रत्ययैकाग्रसन्ततिश्चाऽन्यनिःस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप"।। इति।।

ध्यानस्याऽऽनुषङ्गिकं सर्वोत्कृष्टफलं चोक्तं स्कान्दे—

"नाऽश्वमेधेन तत्पुण्यं न च वै राजसूयतः।
यत्पुण्यमेकध्यानेन लभेद्योगी स्थिरासने"।इति।।

एवं ध्यानपरस्य तत्परिपाकरूपं संप्रज्ञाताऽसंप्रज्ञातसंज्ञकसमाधिद्वयं दर्शयति—ऐकात्म्येति। एकः = अद्वितीयः आत्मैव, ऐकात्म्यं तदेव सौख्यमिति स्वार्थे, योवैभूमैत्यत्रेव अपरिच्छेदद्योतनाय भावे वा ष्यञ्। अद्वितीयप्रत्यक्-चैतन्याऽऽत्मकपरमानन्दः तस्मिन् स्थिरं = निश्चलमेकाग्रमित्यर्थः। गलितं = उदक-क्षिप्तलवणखण्डइवस्वरूपतिरोधानेनतादूप्यमापन्नंच मनोयस्य स तथोक्तः। अत्र स्थिरमिति संप्रज्ञातो, गलितमित्यसंप्रज्ञातश्च लक्षणेन दर्शितः। क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति हि चित्तस्य पञ्चभूमयः। तत्र लोकदेहवासनावशं आसुरसम्पत्तिमत् क्षिप्तं। निद्रातन्द्रादिग्रस्तं मूढं। कादाचित्कध्यानाङ्गयुक्तं क्षिप्ताद्विशिष्टतया विक्षिप्तं। तत्र हि क्षिप्तमूढयोः भूम्योः समाधिशङ्कैव नास्ति। विक्षिप्ते तु चेतसि यद्यपि विक्षेपोपसर्जनीभूतः समाधिर्वर्तते, तथापि स विक्षेपान्तर्गतत्वात् दहनान्तर्गतबीजशक्तिरिव क्षिप्रमेव नश्यति। एकाग्रेतु चेतसि परमार्थस्वरूपावद्योती कर्मबन्धान् श्लथयन् संप्रज्ञाताख्यः समाधिर्भवति। एकाग्रतालक्षणं च पतञ्जलिनोक्तम्।। (१)"शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः" इति। शान्त = अतीतः उदितः = वर्तमानः तावुभौ प्रत्ययौ समानविषयत्वात् यदि तुल्यौ = अत्यन्तसदृशौ भवतः तदा चित्तस्यैकाग्रताख्या चतुर्थी भूमिकेति तदर्थः। न च कादाचित्काऽव्यवहित-तादृशवृत्तिद्वयेनैव तत्सिद्धिः, विक्षिप्तेऽपि संभवादित्यभिप्रेत्य स एवाह—"सर्वार्थतैका-ग्रतयोः क्षयोदयो चित्तस्य समाधिपरिणामः" इति रजसा चाल्यमानं हि चित्तं क्रमेण सर्वानर्थान् गृह्णाति। प्रयत्नविशेषेण रजोनिरोधेऽभ्यस्यमाने दिने दिने चित्तस्य सर्वार्थता क्षीयते एकाग्रता च वर्धते तादृशः परिणामः समाधिरित्यर्थः। इयं चैकाग्रता यद्यपि ध्यानेऽप्यस्ति, तथाप्यभिनवाभ्यस्ताऽनुवाकस्य असंवलितोच्चारणे शिष्यस्येव तत्र प्रयत्नविशेष आयासश्च। अस्मिन्समाधौ तु तत्र चिरन्तनाऽध्यापकस्येव स नास्तीति भेद इति केचित्। स्कान्देतु—

(१) शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः।। पा० २ सू० १२।। विक्षिप्ताया निःशेषक्षयादनन्तरं पुनः सकृज्जायमान समाधि परिणामानन्तरं यौ चित्तस्यातीत वर्तमानप्रत्ययौ समानध्येयविषयतया तुल्यौ भवतः स्वः खल्वयं चित्तस्य धर्मिण एकाग्रतापरिणामः।।

"शब्दादीनां च तन्मात्रा यावत्कर्णादिषु स्थिता।
तावदेव भवेद्ध्यानं स्यात्समाधिरतः परम्"।। इति।।

श्रोत्रादिसंनिकृष्टशब्दादेः सूक्ष्मरूपस्याप्यग्रहणेन उपलक्षिता ध्यानपरिपाकावस्था समाधिः। तद्ग्रहणयोग्यतायां तु ध्यांनमेवेति भेद इत्युक्तम्। विद्यारण्यस्वामिनस्तु— समानाकारचित्तवृत्तिप्रवाहो द्विविधः विच्छिद्य विच्छिद्य जायमानः, सन्ततश्चेति। तावुभौ क्रमेण ध्यानसमाधी भवत इत्यूचुः। संप्रज्ञातसमाधिस्वरूपं च सर्वाऽनुभवयोगिना दर्शितम्—

"विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्।
परिशिष्टं च सन्मात्रं चिदानन्दं विचिन्तयेत्।।
ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिं विना।
संप्रज्ञातसमाधिः स्यात् ध्यानाभ्यासप्रकर्षतः"।। इति।।

श्रीमद्भगवत्पादा अप्येनमेवमभिनिन्युः।

"दृशिस्वरूपंगगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्।।

दृशिस्तु शुद्धोऽहमविक्रियात्मको नमेऽस्ति कश्चिद्विषयः स्वभावतः।
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः सुपूर्णभूमा त्वज आत्मनि स्थितः।।

अजोऽमरश्चैव तथाऽजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमद्वयः।
नकारणं कार्यमतीव निर्मलः सदैव तृप्तश्च ततो विमुक्त ओम्।।" इति।।

अयमेव धर्ममेघाख्यः। सर्वधर्मफलोपवर्षित्वात्। यत्तुपतञ्जलिना (१)"वितर्कविचाराऽऽनन्दाऽस्मितारूपानुगमात्संप्रज्ञातः" इति भौतिकभूततन्मात्रेन्द्रियाऽहङ्कारविषयश्चतुर्विधः संप्रज्ञातसमाधिर्दर्शितः, सोन्तर्धानादिसिद्धिहेतुः, न मोक्षहेतुरिति नेह प्रपञ्चितः। अयं च समाधिः चित्तस्यसर्ववृत्तिनिरोधाऽऽभिमुख्यहेतुत्वाद संप्रज्ञातसमाधेरङ्गम्। ध्यानान्तास्त्वस्याऽसंप्रज्ञातसमाधेश्चाङ्गानि। तत्रापि प्रत्याहारान्तानि बहिरङ्गानि धारणादित्रयंत्वन्तरङ्गमिति "त्रयमन्तरङ्गं पूर्वेभ्यः" इति सूत्रयता पतञ्जलिनैव दर्शितम्।। अथाऽसंप्रज्ञातसमाधिः किमुपायः किंस्वभावः इत्येतदपि स एवाऽसूत्रयत् "विरामप्रत्ययाऽभ्यासपूर्वकः संस्कारशेषोऽन्यः" इति। विरामः = वृत्तीनामभावः तस्य प्रत्ययः = कारणं परवैराग्यसहकृतप्रयत्नविशेषः तस्याऽभ्यासः = पुनः

(१) वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः।। पा० १ सू० १६।। स्थूलार्थालम्बनावितर्कः सूक्ष्मार्थालम्बनाविचारः। ग्रहणात्मकेन्द्रियालम्बनाऽऽनन्दः। गृहीतृमात्रालम्बनाऽस्मितेति चतुर्विधालम्बनसाधन सम्बन्धात्सम्प्रज्ञातसमाधिश्चतुर्विधो भवतीति भावः।।

पुनः अनुष्ठानं तत्पूर्वकः = तज्जन्यः सर्ववृत्तिप्रत्यस्तमये तत्संस्कारमात्रशेषो निरोधः पूर्वस्मात् संप्रज्ञातसमाधेरन्योऽसंप्रज्ञातसमाधिरिति तदर्थः।। एवं च निर्वृत्तिकस्य मनसः क्षीरोदकवत् स्वरूपतिरोधानेन ब्रह्मण्यवस्थितिः असंप्रज्ञातसमाधिरिति फलितम्।।

ननु प्रतिक्षणपरिणामिनो हि सर्वे भावा ऋतेचिति शक्तेरितिन्यायात् व्युत्थानदशायां बाह्यनानार्थाऽऽकारतयेव निरुद्धस्य मनसः कीदृशः परिणामः स्यादित्याशङ्क्य स एवाह—[१]"तस्य प्रशान्तवाहिता संस्कारात्" इति। यथा अग्नेः समिदादिप्रक्षेपे उत्तरोत्तरं वृद्ध्याख्यः परिणामः तदभावे तु प्रतिक्षणं शान्तिर्वर्धते, तथा निरुद्धचित्तस्यापि आत्मसाक्षात्कारोदयेन आत्यन्तिकविनाशपर्यन्तं उत्तरोत्तरमधिकः प्रशमः पूर्वपूर्वप्रशमसंस्कारस्योत्तरोत्तरं प्रशमहेतुत्वादिति तदर्थः। तथा निरुद्धचित्तस्य आत्मरूपतासम्पत्तिरपि श्रूयते—

"निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि।
यदा यात्यात्मनो भावं तदा तत्परमं पदम्"।। इति।।

अयमेव मनोनाश इत्याख्यायते। अयमेव हि समाधिः "यदा विनियतं चित्तम्" इत्यादिना भगवता प्रपञ्चितः। एनमेवह्यभियुक्ताः प्रशंसन्ति

"कुलं पवित्रं जननी कृतार्था विश्वंभरा पुण्यवती च तेन।
अपारसच्चित्सुखभूम्यनन्ते लीनं परे ब्रह्मणि यस्य चेतः"।। इति।।

"यतो निर्विषयस्याऽस्य मनसो मुक्तिरिष्यते।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा"।।

"अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।"
"ततस्तु तं पश्यति निष्कलं ध्यायमानः" इत्यादि श्रुतिभ्यः।।

"आत्मा वाऽरे द्रष्टव्यः" इति ब्रह्मसाक्षात्कारमुद्दिश्य 'निदिध्यासितव्यः' इतिध्यानपरिपाक परकाष्ठालक्षण समाधेः विधानाच्च अयमेव समाधिः सकार्याऽविद्यालक्षण सर्वबन्धोच्छेदक्षम ब्रह्मात्मैक्यसाक्षात्कार जननेन मोक्षहेतुरित्यभिप्रेत्याह— मोहबन्धं छिनत्तीति। ज्ञानोदयस्वरूप एवं बन्धनाशो नाऽतिरिक्त इतिद्योतनाय 'छिनत्ति' इति पदेनैव समाधिफलं ज्ञानं दर्शितम्।। ननु संप्रज्ञातसमाधेः आत्ममात्राऽऽकार वृत्तिधारारूपत्वात् स्वसमानाकारसाक्षात्कारजनकत्वं

(१) तस्य प्रशान्तवाहितासंस्कारात्।। पा० ३ सू० १।। तस्य = चित्तस्य संस्कारात् = निरोध-संस्काराभ्यासपाटवादुत्तरोत्तर प्रशान्तवाहिता भवतीत्यर्थः।।

वक्तुमुचितम्। निरोधसमाधेस्तु सर्ववृत्तिप्रशमनरूपस्य सुषुप्तिकल्पस्य कथं तज्जनकत्वमुच्यते इति चेत्। न। स्वतः सिद्धायाः सदातन्याश्चित्तस्यात्माऽऽकारताया बाह्यसर्ववृत्तिनिरोधे निष्प्रत्यूहं प्रवृत्ताया निवारयितुमशक्यत्वेनाऽदोषात्।। तदुक्तं श्रेयोमार्गे–

"आत्माऽनात्माकारं स्वभावतोऽवस्थितं सदा चित्तम्।
आत्मैकाकारतया तिरस्कृताऽनात्मदृष्टि विदधीत"।। इति।।

अत्र निदिध्यासनपरिष्कृतस्य मनस एव साक्षात्कारे करणत्वम्, "मनसैवेद-माप्तव्यं" "मनसैवाऽनुद्रष्टव्यं" "दृश्यते त्वग्र्यया बुद्ध्यासूक्ष्मया सूक्ष्मदर्शिभिः" इत्यादिश्रुतेः। अतएव "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा" इत्यादिश्रुतीनामपरिष्कृतमनोविषयत्वं, मनसोहिसुखादिसाक्षात्कारे करणत्वं क्लृप्तं, नशब्दस्य इत्याचार्यवाचस्पतिमिश्राः।। विवरणानुसारिणस्तु–"तंत्वौपनिषदं पुरुषं पृच्छामि" "नाऽवेदविन्मनुते तं बृहन्तम्" इत्यादिश्रुतेः "(१) सहकार्यन्तरविधिः" इत्यधिकरणे निदिध्यासनस्य श्रवणसहकारित्वव्यवस्थापनात् सुखदःखादीनां मनो वृत्तित्वेन तद्ग्रहेमनसः करणत्वाऽसंभवेन साक्षिमात्रवेद्यत्वस्य अवश्यवक्तव्यतया मनसः क्वचिदपि स्वातन्त्र्येण करणत्वाऽक्लृप्तेः प्रमाणान्तरसहकारेणैव ग्राहकत्वक्लृप्तेश्च क्लृप्तप्रमाणभावस्य महावाक्यस्यैव निदिध्यासनाऽन्त्यक्षणे स्मृतस्याऽऽत्मसाक्षात्कारे करणत्वं शाब्दापरोक्षव्यवस्थापनादित्याहुः। अयंच समाधिः अकृतसाक्षात्काराणां साक्षात्कारहेतुः। कृतसाक्षात्काराणां तु जीवन्मुक्तिसुखोपभोगहेतुः। यद्यपि ब्रह्मसाक्षात्कारेणैव सकार्याऽविद्याबाधान्मुक्तिः सम्पन्ना, तथापि प्रारब्धशेषभोगाय ब्रह्मविद्यासंप्रदायाऽनुच्छित्तये च "तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ सम्पत्स्ये" इति श्रुत्या दग्धपटन्यायेन अविद्यालेशप्रयुक्तबाधितप्रपञ्चा–

(१) सहकार्यन्तर विधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्।। अ० ३ पा० ४ सू० ४७।। तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्यबाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ ब्राह्मणः। बृ० ३।५।१।। इति बृहदारण्यके श्रूयते। तत्र मौनं विधीयते नवेति संशये। न विधीयते बाल्येन तिष्ठासेदित्यत्रैव विधेरवसितत्वादथ मुनिरित्यत्र विधि विभक्त्यश्रवणाद् बाल्यपाण्डित्य शब्दयो-र्ज्ञानार्थत्वेन ताभ्यामेव प्राप्तत्वादिति पूर्वपक्षिते सिद्धान्तमाह। विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद्विधेरेवाश्रयितव्योऽपूर्वत्वात्। न तस्य बाल्यादिशब्देन प्राप्तमुनिशब्दस्य ज्ञानातिशयार्थत्वात्। यथोक्तार्थे मननान्मुनिरिति व्युत्पत्ति सम्भवाच्च। तस्माद्बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते। तद्वतो विद्यावतः संन्यासिनः। व्युत्थायाथ भिक्षाचर्यं चरन्तीति श्रुतेः संन्यासिन एवायं विधिरिति गम्यते विद्यावत्त्वे प्राप्नोत्येवातिशयः किं विधिनेत्याह पक्ष इति। यस्मिन्पक्षे भेददर्शनप्राबल्यान्नातिशयं प्राप्नोति तत्रास्य विधेः सम्भवात्। विध्यादिवत्। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेदित्येवं जातीयकेविधौ सहकारित्वेनाग्न्यन्वाधानादिकमङ्गजातं विधीयते एवमविधिप्राधान्येप्यस्मिन् वाक्ये मौनविधिरित्यर्थः।।

नुवृत्तिर्यावदायुरभ्युपगम्यते। तत्र च कर्मवैचित्र्यात् चित्तविक्षेपे अपरोक्षीकृतमपि आत्मसुखं न सम्यगनुभवितुं शक्यमिति समाध्यभ्यासः तत्त्वज्ञानामपि ननिष्फलः। अत एव हि विद्यारण्यस्वामिभिः वसिष्ठोक्तासु शुभेच्छा विचारणा तनुमानसा सत्वापत्यसंसक्ति पदार्थभावनी तुर्यगामिनी संज्ञक सप्तयोगभूमिकासु चतुर्थीभूमिकामारभ्य क्रमेण भूमिकाचतुष्टयं प्राप्ताः—ब्रह्मवित्, ब्रह्मविद्वरः ब्रह्मविद्वरीयान्, ब्रह्मविद्वरिष्ठः इति कृतसाक्षात्कारा एव विक्षेपोपशमतारतम्यात् चतुर्धा व्यपदिष्टाः। आसां च सप्तभूमिकानां लक्षणान्याह वसिष्ठः—

"स्थितः किं मूढ एवास्मि प्रेक्षेऽहं शास्त्रसज्जनैः।
वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः।।
शास्त्रसज्जनसम्पर्कवैराग्या - ऽभ्यासपूर्वकम्।
सद्विचारप्रवृत्तिर्या प्रोच्यते सा विचारणा।।
सविचारशुभेच्छाभ्यामिन्द्रियार्थेषु सक्तता।
यत्र सा तनुतामेति प्रोच्यते तनुमानसा।।
भूमिकात्रितयाभ्या - साच्चित्तेऽर्थाद्विरतेर्वशात्।
सत्त्वात्मनि स्थिते शुद्धे सत्त्वाऽऽपत्तिरुदाहृता।।
दशाचतुष्टयाभ्यासाद - संसर्गफला तु या।
रूढसत्त्वचमत्कारा प्रोक्ताऽसंसक्तिनामिका।।
भूमिकापञ्चकाभ्यासात्स्वात्मारामतया भृशम्।
आभ्यन्तराणां बाह्यानां पदार्थाऽभावना परा।।
परप्रयुक्तेन चिरं प्रयत्नेनाऽवबोधनम्।
पदार्थाऽभावनी नाम षष्ठी भवति भूमिका।।
भूमिषट्कचिराऽभ्यासादन्यस्याऽनुपलम्भनात्।
यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगामिनी"।। इति।।

साधनचतुष्टयसम्पत्तिः प्रथमा। संन्यासपूर्वकश्रवणसिद्धिर्द्वितीया। मननिदिध्यासनसम्पत्तृतीया। साक्षात्कारश्चतुर्थी। निर्विकल्पकसमाधेः स्वत एव नियतकालमुत्थाने पञ्चमी। पार्श्वस्थबोधनेन व्युत्थाने षष्ठी। स्वतः परतोऽपि चिरमनुत्थाने सप्तमी इति निष्कर्षः। तत्र आद्यभूमित्रयं प्रपञ्चे सत्यताबुद्ध्यबाधनात् जागृदित्युच्यते। चतुर्थी तु ज्ञानबाधितप्रपञ्चस्य स्वप्न इव संस्कारमात्रेण मिथ्याभूतस्य भानात् स्वप्न इति। पञ्चमी सुषुप्तिरिति। षष्ठी गाढसुषुप्तिरिति (१)द्वैतैकंयवर्जिताऽवस्थेति

(१) द्वैतैक्यवर्जित इति।। द्वैतेनाज्ञानतत्कार्येण सहैक्य लक्षणं तादात्म्यं वर्जितं तत्त्वज्ञानेन नाशितं येन स तथा। यद्वा ऐक्यशब्दो मात्रार्थकस्तथा च द्वैतमात्रेण सर्वथा सम्बन्ध शून्यः केवलचिन्मात्रनिष्ठ इति यावत्।।

चाऽख्यायते। यथाऽऽह वसिष्ठः—

"भूमिकात्रितयं त्वेतद्राम ! जागृदिति स्थितम्।
यथावद्भेदबुद्ध्येदं जगज्जागृति दृश्यते।।
विच्छिन्नशरदभ्रांशविलयं प्रविलीयते।
सत्तावशेषं वस्त्वेतच्चतुर्थीं भूमिकामिते।। इते = प्राप्ते।।
पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकाम्।
शान्ताऽशेषविशेषांशः तिष्ठत्यद्वैतमात्रके।।
अन्तर्मुखतया नित्यं बहिर्वृत्तिपरोऽपि सन्।
परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते।।
कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः।
षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकाम्।।
यत्र नासन्नसन्नोभौ नाहं नाप्यनहङ्कृतिः।
केवलं क्षीणमनन आस्ते द्वैतैक्यवर्जितः।।
अन्तः शून्यो बहिः शून्यः शून्यकुम्भ इवाऽम्बरे।
अन्तःपूर्णो बहिः पूर्णः पूर्णकुम्भ इवाऽर्णवे।।
सप्तमीं तां परानन्दां भूमिकामधिरोहति"।। इति।।

केचित्तु विदेहकैवल्यमेव सप्तमीं भूमिकामाहुः। तस्मात्समाध्यभ्यास एव परमपुरुषार्थहेतुः तत्त्वबुभुत्सुभिर्बुद्धतत्त्वैश्च निरन्तरं कार्य इति भावः।।११।।

एवं मुख्याधिकारित्वात् सकृच्छ्रवणाद्वा, मध्यमाद्यधिकारतारतम्यात्तदावर्तनात् मननसहकारात् राजयोगेहठयोगाभ्यासपरिपाकाद्वा यथाकथञ्चित् ब्रह्मसाक्षात्कारे सम्यग्वृत्ते सति पश्चाज्जीवन्मुक्तिसुखभोगेच्छया स ब्रह्मवित् समाधिनिष्ठो वाऽस्तु लोकसङ्ग्रहाय वर्णाश्रमाद्यनुरूपविहित कर्मपरः प्रारब्धोपनीतमनिषिद्धं विषयजातं स्रक्चन्दनादि यथाकाममुपभुञ्जानो वा कालं क्षपयतु सर्वथा तस्य पुनर्बन्ध-प्रसक्तिर्नास्त्येवेत्याह—निरवधीति।।

मू०।। निरवधिसुख भूमाऽनन्त संवित्परात्म-
न्यनुभवमधिरूढे वाक्यतो योगतो वा।
भवतु दृढसमाधि र्लोकसङ्ग्राहको वा
भजतु विषयजातं नैति भूयोऽपिबन्धम्।।१२।।

निरवधिः = दैशिकादिपरिच्छेदशून्यः यः सुखभूमा तथाविधो यो अनन्तः = पूर्णसंविद्रूपः परः = अनृतादुत्कृष्टः परमार्थरूप आत्मा तस्मिन्

वाक्यतः = विहित विचारनिर्णीततात्पर्यकमहावाक्यात्, योगतः = दर्शित-द्विविधयोगाभ्यासपरिपाकाद्वा अनुभवं = साक्षात्कारं अधिरूढे सति स आत्मवित् दृढः = अचलः समाधिः दर्शिताऽसंप्रज्ञातसमाधिः यस्य स तथाशीलो यावद्देहपातं भवतु। अथवा लोकहिताय सदाचारधर्म ज्ञान संप्रदाय प्रवर्तनाय तदाचरणोपदेशादिना लोकानां = सज्जनानां सङ्ग्राहकस्सन् विषयजातं = अनिषिद्धभोगसाधनानि भजतु = सेवताम्। तथाप्यविद्या काम कर्म वासनादि पुनर्जन्मबीजाभावात् भूयः = पुनरपि बन्धं = उत्क्रमणपुनर्जन्मादिसांसारिकबन्धनं नैति = नप्राप्नोति। तथा च श्रुतिः "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्येति" इति।। १२।।

अतिदुर्लभत्वात्, शाश्वतत्वात्, समस्तसुखोत्कर्षपरम्परावधित्वाच्च आत्मलाभ एव परमो लाभः नाऽतः परोऽस्तीत्याह— अपीति।।

मू०।। अपि भूपरमाणुभूरिसंख्ये-
ष्वपयातेषु चतुर्मुखेष्वलब्धात्।
अपदुःखनिरन्तं - सौख्यसिंधोः
न च लाभोऽस्ति परो निजात्मलाभात्।। १३।।

भुवः = कृत्स्नाया भूमेः अणुशो विभज्यमानायाः परमाणवः सौक्ष्म्यावधिभूता ये अणवः तेभ्योऽपि भूरिसंख्येषु = अधिकसंख्येषु चतुर्मुखेषु = द्विपरार्धकालजीविषु हिरण्यगर्भेषु महाकालप्रवाहेण नीयमानेषु अपयातेष्वपि = गतेष्वतिक्रान्तेष्वपि अनादिकालादारभ्य जन्मपरम्परासु भ्रमता जीवेन कदाचिदपि प्रागलब्धात् = अ-प्राप्तादित्यर्थः। न केवलमस्य दौर्लभ्यादेव सर्वोत्कर्षः अपि तु सर्वदुःखप्रशम-नोपलक्षितनिरतिशयानन्दरूपत्वादपीत्याह— अपदुःखेति।। अपगतं सहेतुकसर्वदुःखं यस्मात् तथाविधं यन्निरन्तसौख्यं = अनवधिसुखं तस्य सिन्धोः = समुद्रात् निजात्मलाभात् = स्वात्म प्राप्तेः परः = उत्कृष्टः लाभो न चाऽस्ति = नास्त्येवेत्यर्थः।। तथाहि उक्तमापस्तम्बाचार्यैः— "आत्मलाभान्न परं विद्यते" इति।। १३।।

स चाऽऽत्मलाभो नबाह्यधनादिवदप्राप्तप्राप्तिः, अपितु प्राप्तस्यैव। मोहादप्राप्तप्रायस्य ज्ञानमेव लाभ इति सदृष्टान्तोपपत्तिकमाह— मोहमात्रादिति।।

मू०।। मोहमात्रादलब्धस्य लाभस्त्वसौ
स्वात्मनः कण्ठचामीकरन्यायतः।
बोधमात्रं तदाक्रम्य यस्माच्छ्रुतिः
प्राह भूयः पदेनाऽनुविन्देदिति।। १४।।

आत्मत्वादेव नित्यलब्धस्य स्वात्मनः मोहमात्रात् = अनाद्यविद्यारूपात् अलब्धस्य = अप्राप्तस्य असौ = पूर्वोक्तो लाभः बोधमात्रं = साक्षात्कार एव। तत्र लौकिकन्यायसिद्धं दृष्टान्तमाह— कण्ठचामीकरन्यायत इति। यथा कश्चित् स्वकण्ठाऽवलम्बमानमेव चामीकरं = स्वर्णनिष्कं विस्मृत्याऽन्वेषमाणो अन्येन दृष्ट्वा 'कण्ठ एव ते चामीकरमस्ति' इति प्रबोधितः न तल्लाभाय पुनर्यतते, प्रबोधमात्रेणैव लब्धं मत्वा हृष्यति तन्न्यायेनेत्यर्थः।। नन्वेवं किमर्थं गौणो लाभो वर्ण्यते अर्चिरादिमार्गेण गत्वा उपासक इव ब्रह्म प्राप्नोत्वित्याशङ्क्य नाऽयं पक्षः श्रुतेरभिप्रेतइत्याह— तदिति। यस्मात्कारणात् श्रुतिः— "आत्मेत्येवोपासीत" इति विद्यासूत्रेण तत् = ज्ञानं, आक्रम्य = प्रस्तुत्य "अनेन ह्येतत्सर्वं वेद यथा ह वै पदेनाऽनुविन्देत्" इत्यनेन आत्मना विदितेन एतत्सर्वं वेद्यजातं वेदैव नान्यद्वेद्यमवशिष्यत इत्युक्त्वा भूयस्तदनन्तरं यथा गवाद्यन्वेषमाणः पदेन पांस्वादिन्यस्तखुरलाञ्छनेन अन्विष्य तद्विन्देदिति लाभार्थकेन* विन्दतिना ज्ञानदृष्टान्तं लाभं प्राहेत्यर्थः। तथा च तत्रभाष्यं, "आत्मनो ह्यलाभोऽज्ञानमेव, तस्माज्ज्ञानमेव आत्मनो लाभो नाऽनात्मलाभ इव अप्राप्तप्राप्तिः" इति। उपासकानां "कार्यं बादरिरस्य गत्युपपत्तेः" इति हिरण्यगर्भप्राप्तेरेव व्यवस्थापनात्। ब्रह्मविदस्तु विनैव चोत्क्रान्तिं ज्ञानेन पूर्वमेव ब्रह्मप्राप्तेः सिद्धत्वात्। "अत्र ब्रह्म समश्नुते न तस्य प्राणा उत्क्रामन्ति। अत्रैव समवनीयन्ते" इति हृदयप्रदेश एव उपाधिनाशेन ब्रह्मप्राप्ति श्रवणाच्चेति भावः।।१४।।

ननु ज्ञानेन नाशितमप्यज्ञानं प्रलये नष्टं जगदिव पुनरुद्भवेदित्याशङ्कां वारयन् तद्बाधस्वरूपं निर्धारयति— बाधितमिति।।

मू०।। बाधितं स्यादसत् ध्वस्तवैधर्म्यतो
मोहबाधोऽपि न ध्वंसरूपोऽपरः।
बाधबुद्धिश्च नाऽभावमात्रप्रथा
स्यादभावोऽप्य - धिष्ठानरूपोऽथवा।।१५।।

यद्बाधितं तदत्यन्ताऽसदेव भवति न संस्कारेणाप्यवशिष्यते इति जगत्प्रलयवैषम्यमित्यर्थः। तदेवाह— ध्वस्तवैधर्म्यत इति। कारणे तिरोभूतं सदेव हि कार्यं ध्वस्तमित्युच्यते, न तु तथाबाधितमिति वैधर्म्यादित्यर्थः।। ननु बाधोऽपि ध्वंसरूप एवास्त्वित्याशङ्क्य प्रतिषेधति— मोहेति। मोहस्य = अज्ञानस्य बाधः = ध्वंसरूपः नैयायिकादिपरिकल्पितो जन्याऽभावो न भवति। तथा हि

*लाभार्थक "विद्लृ" धातुना इत्यर्थः।

सति तेनैव मुक्तौ सद्वितीयता स्यात्। किन्तु केवलाधिष्ठानरूपः। तथा हि तस्य त्रैकालिकविषयत्वं "नासीदस्तिभविष्यति" इति प्राग्वर्णितमितिभावः। अपिशब्दात् ध्वंसस्यापि चरमभावविकाररूपत्वमेव नाऽभावरूपत्वं, सत एव तेन तिरोधानोपपत्तेः नत्वभावत्वं। निरुपाख्यस्योत्पत्त्यादिधर्मसम्बन्धस्य, प्रतियोग्यधिकरणादिसम्बन्धस्य, अत्यन्ताभावभेदादिवैलक्षण्यस्य चाऽऽधारत्वायोगादिति ध्वनितम्।। ननु तर्हि त्रैकालिकात्यन्ताभाव एवं प्रथमानो बाधोऽस्तु, तथापि तेनैव सद्वितीयतेत्याशङ्क्याह— बाधबुद्धिश्चेति। नाऽभावमात्रप्रथा बाधबुद्धिः। वायौ रूपं नास्तीति प्रथाया अपि तथात्वप्रसङ्गात्। अपितु तदारोपाधिष्ठाने तदभावप्रथेत्यवश्यं वाच्यम्। एवं तर्ह्यवश्याऽपेक्षिताऽधिष्ठानतत्त्वप्रथैव अव्यभिचरिता बाधबुद्धिरस्तु नाऽभावप्रथा। अभावस्याप्यनिर्वचनीयतया मायिकत्वव्यवस्थापनेन मायानिवृत्तौ स्थित्ययोगादित्यर्थः।। ननु "नासीदस्तिभविष्यति" इति सकार्याऽविद्यानिवृत्तेः वार्तिके नञा उल्लेखादभावप्रथा आवश्यकी बाधबुद्धाविति जल्पंस्तुष्यत्वित्यभिप्रेत्याह— स्यादिति। अथवेति पक्षान्तरे।। घटाभावे घटो नास्तीति प्रत्यये अभेदेऽपि (१)"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इतिविकल्परूपस्य आधाराधेयभावप्रत्ययस्य दर्शनात् भूतले घटो नास्तीति प्रत्ययेऽपि भूतलस्यैव घटसापेक्षनिरपेक्षरूपाभ्यां भावाभावाभ्यां तथा व्यपदेशप्रत्यययोः सिद्धेः नाधिकरणादन्योऽभावोऽस्तीत्यर्थः। अथवा आरोपाधिकरणे बाधबुद्धिविषयोऽभावोऽधिष्ठानरूप एव। मिथ्याभूतस्य प्रतियोगिनो वस्तुतः सत्याभावप्रतियोगित्वादिनिरूपकत्वायोगात्। अभावस्यापि मिथ्यात्वे त्वधिष्ठानमात्रस्यैव परिशेषादितिभावः।। १५।।

"तथा विद्वान् पुण्यपापाद्विमुक्तो निरञ्जनः परमं साम्यमुपैति" "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा" इति श्रुतिस्मृतिभ्यां ज्ञानेन सञ्चितसर्वकर्मनाशः। "तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवं हैवंविदि पापं कर्म न श्लिष्यते"।

"यस्य नाऽहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते"।।

इति श्रुतिस्मृतिभ्यां प्रारब्धवेगबलेन क्रियमाणस्य च कर्मणोऽसंश्लेषः, प्रारब्धफलस्य तु भोगेनैव क्षय इति दर्शयति— कर्मजातमिति।।

---

(१) शब्दज्ञानानुपाती वस्तुशून्योविकल्पः।। यो० द० पा० १ सू० ९।। शब्दश्चतज्ज्ञानञ्च शब्दज्ञानं तदनुपलक्ष्य पतितुं शीलमस्येति स तथा शब्दज्ञानानन्तर जायमानो वस्तुशून्यश्च यः प्रत्ययः स विकल्प इत्युच्यते इति।।

मू०॥ कर्मजातं समारब्धदेहेतर-
त्सत्वरं भस्मतामेति बोधाग्निना।
श्लिष्यते नैष्यताप्येष बोधोज्वल:
कर्मणा जीवनेनेव पद्मच्छद:॥१६॥

प्रारब्धदेहेतरत्सत्वरं भस्मतामेति बोधाग्निना श्लिष्यते न, समारब्धो ज्ञानिदेहो येन स्वफलभोगाय तत् समारब्धदेहं = प्रारब्धकर्म, तस्मात् इतरत् = अन्यत् प्राग्बोधोदयात् इह जन्मनि प्राक्तनजन्मपरम्परासु च सञ्चितं = कर्मजातं = सुकृत-दुष्कृतरूपसर्वकर्मवृन्दं, बोधाग्निना = ज्ञानवह्निना, सत्त्वरं = शीघ्रं स्वोदय-समकालमेवेत्यर्थ:। भस्मतां = नाशं, एति = गच्छति। बोधेन = असङ्गचि न्मात्रवस्तुगोचरज्ञानेन, उज्वल: निर्मल:, एष: = तत्त्ववित् एष्यता = भाविनापि पुण्यपापकर्मण, न श्लिष्यते = न सम्बध्यते। तत्र दृष्टान्त:, यथा जीवनेन = ज-लेन, पद्मच्छद: = पुष्करपलाशं न श्लिष्यते, तद्वदित्यर्थ:॥१६॥

नन्वस्तु प्रारब्धकर्मशेष:, तथापि भोगनिमित्तस्य द्वैतस्य बाधितत्वात् कथं भोगसिद्धि:, मूलाऽज्ञानोच्छेदे कथं वा प्रारब्धपरिशेष इत्याशङ्कां दृष्टान्तेन वारयति— चोरबाध इति॥

मू०॥ चोरबाधेऽपि तज्जन्यभीत्यादिव-
च्चेलदाहेऽपि भस्मेव चेलाकृति।
ज्ञानिनां विश्वमादेहपातं स्वतो
बाधितत्वेऽपि चाऽऽरब्धभोगक्षमम्॥१७॥

यथा स्वप्ने स्वस्य वधबन्धादौ प्रवृत्ततया प्रतीतस्य चोरस्य तत्कालमेव प्रबोधेन बाधे वृत्तेऽपि किञ्चित्कालं भीति: तत्प्रयुक्तहृदयकम्पादिश्चानुवर्तते। यथा वा चेलस्य = पटस्य दाहेऽपि चेलस्य आकृतिरिवाकृतिर्यस्य तथाभूतं भस्म किञ्चित्कालमुपलभ्यते। एवं ज्ञानिनामपि भोगनिमित्तं विश्वं स्वतो बाधितत्वेऽपि आदेहपातं = जीवनकालावधि देहारम्भककर्मणा आरब्धस्य = सुखदु:खादे: भोगक्षमं = प्रत्यापनसमर्थ-अनुवर्तत इत्यर्थ:। तथा च "तस्य तावदेव चिरम्" इति श्रुतिबलात् विदुषां देहादिदर्शनाच्च, प्रारब्धस्य चेलदाहे चेलांशभस्मन इव अविद्यालेशस्य च प्रारब्धप्रतिबद्धस्य प्रातिभासिकप्रपञ्चस्थितिनिर्वाहकस्य किञ्चित्कालं परिशेषोऽभ्युपगम्यत इति केचित्। अन्ये तु अविद्याया: श्रवणादिनाऽसत्त्वा-पादकावरणांशनाश:, साक्षात्कारेण त्वभानापादकावरणांशनाश:, विदुष:

प्रायाणकालोत्पन्नसाक्षात्कारवृत्त्या विक्षेपांशनाश इति त्रिधा अविद्यानाश इत्याहुः। परे तु अविद्याया निःशेषनाशः, कार्यप्रपञ्चस्यैव तु भगवच्छक्तिप्रतिबद्धद्रौण्यस्त्रनिर्दग्धपार्थरथस्येव यावत्तद्भोगमनुवृत्तस्य प्रतिबन्धाऽपगमादेव निवृत्तिः छत्रापाये छायापायवदित्याहुः।।१७।।

नन्वस्तु प्रारब्धप्रयुक्तो विदुषोऽपि देहादिद्वैतप्रपञ्चः, तथापि तत्राऽहं ममेतिद्विविधाऽध्यासमन्तरेण हानोपादानादिव्यवहारासिद्धेः कथं भोगसिद्धिः। तथाचोक्तं भगवद्भिर्भाष्यकारैः, "देहेन्द्रियादिषु अहंममाभिमानहीनस्य प्रमातृत्वाऽनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः" इति। यदि च जीवनान्यथानुपपत्त्यैव अध्यासोऽप्यभ्युपगम्येत, तर्हि सम्पन्नः पुनर्बन्धहेतुः अस्मदादिसाम्यापत्तेरित्याशङ्क्याह— जीवत इति।।

मू०।। जीवतोऽप्यस्य नह्यात्मबुद्धिस्तनौ
वामलूरेऽप्यहे - र्निर्ल्वयिन्यामिव।
मोहमात्रात्परे कल्पयन्त्यस्य चे-
द्देहितामस्तु तद्धानिरस्येह का।।१८।।

जीवतः = कर्मशेषभोगाय देहे प्राणान् धारयतोऽप्यस्य तत्त्वविदः तनौ = स्वदेहे आत्मबुद्धिः = देवदत्त एवाहं मनुष्य एवाहमित्येवं रूपोऽन्येषामिव दृढतरोऽध्यासो नहि = नास्त्येव। अत एव ह्यसौ प्रियाऽप्रियप्राप्तिनिमित्तहर्षविषादाभ्यां न युज्यत इति वक्ष्यति। तत्र "तद्यथाऽहिनिर्ल्वयिनीवल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेते। अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव" इति श्रुतिदर्शितं दृष्टान्तमाह— वामलूरेऽपीति। अहेः = सर्पस्य परित्यागात्प्राग्देहभावेन अहंबुद्धिग्राह्यायामपि परित्यागोत्तरं अहि निवासे वामलूरे = वल्मीकेऽपि पतितायां अतएवाऽजस्रं स्वसंयुक्तायामपि निर्ल्वयिन्यां = निर्मोकत्वचि, यथा नाऽऽत्मबुद्धिस्तद्वदित्यर्थः। तथाचाऽस्य भोगसिद्धिर्दारुपुत्रिकासंयुगक्रीडन इव शिथिलतरेणैव तात्कालिकाऽध्यासाऽऽभासेन भविष्यतीति भावः।।

ननु श्रुतिपुराणादिषु जनकयाज्ञवल्क्यप्रभृतीनां इन्द्रादीनां च तत्त्वज्ञत्वेन प्रसिद्धानामपि गुरुतराऽऽरम्भराज्याङ्गसंभरणपूर्विका जयलाभख्यात्याद्यर्था च प्रवृत्तिः श्रूयते। आचार्यप्रभृतीनामपि प्रतिवादिनिराकरणे सिद्धान्तस्थापनादौ च सोत्साहाभिनिवेशपूर्विकैव प्रवृत्तिर्दृश्यत इति कथन्तेषामस्मदादिवद्देहित्वमित्याशङ्क्य परिहरति— मोहमात्रादिति। परे = अन्ये द्रष्टारः स्वकीयमोहमात्रात् = अज्ञानवैभवात् अस्य = तत्त्वज्ञस्य देहितां स्वस्वकर्मोपभोगाऽनुरूपं कल्पयन्तिचेत्, अस्तुनाम। तत् = ततः, अस्य = तत्त्वज्ञस्य का हानिः। न स्वोपभोगार्थः तेषां तादृशगुरुतरार-

म्भाभिनिवेशः। किन्त्वनुग्राह्यजनाऽदृष्टनिमित्तः तन्मोहमात्रकल्पितः। कृतकार्याणां तेषां पुनःशरन्मेघनदीनामिव स्वाभाविकयोः औदासीन्यस्वच्छतयोर्दर्शनादिति भावः।। १८।।

नन्वस्तु तत्त्वज्ञानं तथापि प्रारब्धकार्यापरिहारात् कदाचित् बलवत्तरेण तेन दैवतमहर्ष्याद्यपराधसम्पत्तौ तत्कोपेन जयविजययोर्ययातिनहुषादीनां च स्वपदभ्रंश रक्षस्सर्पादि योनिप्राप्तिवत् तत्त्वज्ञस्यापि सा संभाव्येतेत्यनियतफलत्वं तत्त्वज्ञानस्य दुर्वारमेवेत्याशङ्क्य श्रुत्यैवाऽस्य परिहार उक्त इत्याह— ईशतेइति।।

मू०।। ईशते ज्ञाततत्त्वस्य नाऽभूतये
यत्नवन्तोऽपि सर्वेऽपि देवाऽसुराः।
को हि नामाऽऽत्मनोऽनिष्टकारी भवे-
दात्मभूतो* यतिस्त्वेष तेषामपि।। १९।।

ज्ञाततत्त्वस्य = कृताऽऽत्मतत्त्वसाक्षात्कारस्य पुरुषधौरेयस्य अभूतये = अनैश्वर्याय अहितायेत्यर्थः। यत्नवन्तः = सर्वैः साधनैः संभूय यतमाना अपि सर्वेऽपि देवाऽसुराः महाप्रभावत्वेन प्रसिद्धा अपि न ईशते = न समर्था भवन्ति। किं पुनरेकैकः कोपमात्रेणेत्यर्थः। कथमस्य ईदृशं सामर्थ्यमिति चेत्? नेदं तादृशसामार्थ्यप्रयुक्तं, किंतु नित्याऽद्वेष्यनिरुपाधिसर्वप्रेमास्पदाऽऽत्मभावप्रयुक्त-मित्याह— कोहीति। इह जगति को हि नाम आत्मनः = स्वस्य अनिष्ट-कारी = प्रतिकूलाऽऽचरणशीलः भवेत्। स्वानिष्टाऽऽचरणस्य केनापि कर्तुमशकय-त्वादित्यर्थः। ॐननु देवासुरैः स्वानिष्टाचरणस्य कर्तुमशकयत्वेऽप्यस्य अनिष्टाचरणे को विरोधस्तत्राह— आत्मभूत इति। एषः = तत्त्वज्ञः यतिः = संन्यासी तु तेषां = देवासुराणां, अपिशब्दात्सर्वप्राणिनां च आत्मभूत एव नान्य इति नानिष्टमस्य कर्तुं शक्यमित्यर्थः। यतिग्रहणं यतीनामेव विशेषतो ज्ञानाधिकारात्। यत इति वा पाठो हेत्वर्थः। तथा च श्रुतिः— "तस्य ह न देवाश्च नाऽभूत्या ईशते आत्मा ह्येषां स भवति" इति। तथाहि भृगुणा पादेनापि प्रहृतो भगवान् तुतोषैव न चुकोपेति प्रसिद्धम्।। १९।।

अभ्युपेत्याप्येतदुक्तं, वस्तुतस्तु तत्त्वज्ञस्य न देवाद्यपराधप्रसक्तिः तद्धेतुरागादिदोषाणां क्षीणत्वादित्यभिप्रेत्याह— रागेति।।

---

*यतः इत्यपि पाठान्तरम्।

ॐकः केन सम्बन्धः।

मू०।। राग लोभ प्रमादादि दोषक्षया-
न्नायमासज्जते दुश्चरित्रे क्वचित्।
साधुवत्साधु - चारित्र्यरक्षापरः
साधुमार्गेण संस्कारतो वर्तते ।। २०।।

अयं = विद्वान्, क्वचिदपि = देशे काले वा दुश्चरित्रे = शास्त्रनिषिद्धाचरणे पराऽनिष्टाचरणे वा नाऽऽसज्जते = न प्रसक्तो भवति। कुतः? राग लोभ प्रमादादीनां = भोगलाम्पट्याऽपराधादिहेतूनां दोषाणां क्षयात् = आत्यन्तिकोच्छेदात्। "यः [१]शलाटुः सुमधुरः पाके तस्यकुतोऽम्लता" इति न्यायेन ज्ञानोदयात्प्राक् अभ्यासकालेऽपि यो रागलोभादिदुष्टो नाभूत्स तत्परिपाके [२]महाभाग्यफलज्ञानोदये तथाभविष्यतीति संभावनाप्यसंभावनीति भावः।। स तर्हि कथमास्ते तत्राह- साधुवदिति। साधूनां = महतां श्रौतस्मार्तधर्मानुवर्तिनां ब्रह्मविदां च यच्चा- रित्र्यं = स्वाश्रमविहितधर्मानुष्ठानसमाध्यभ्यासादि तस्य रक्षायां लोकहिताय शुद्धसंप्रदायप्रवर्तनेन परिपालने परः = उद्युक्तः सन् साधुमार्गेण = सर्वजनानुकूल- मार्गेणैव वर्तते। तत्रहेतुमाह— संस्कारत इति।। "अनेकजन्मसंसिद्धस्ततोयाति- परांगतिम्" इति भगवद्वचनात् चिराऽभ्यस्तसाध्वाचरणसंस्कारस्य तथैव प्रवर्तकत्वाद्दयालुत्वाच्चेत्यर्थः। तथाहि— कुलालचक्रादेः [३]अमत्रनिष्पत्त्यनन्तरमपि पूर्ववदेव भ्रमणं दृश्यते न तु तद्विपरीतमिति भावः।। २०।।

अत एव ह्यसौ हर्षविषादादिनापि नाऽऽक्रम्यते इत्याह— न प्रहृष्यतीति।।

मू०।। न प्रहृष्यत्यसौ प्राप्य भूयः प्रियं
मेरुवन्निश्चलो भूरिकृच्छ्रेष्वपि।
भावयन्नात्मना - ऽऽत्मानमानन्दितो
देववत्सञ्चरत्येव विश्वम्भराम्।। २१।।

असौ = विद्वान् भूयः = बहुतरं प्रियं = लोके प्रीतिजनकत्वेन प्रसिद्धं महाराज्यस्वाम्यदिव्यसिद्ध्यष्टैश्वर्यादि दैवात् प्राप्य नैतत्सारमनृतत्वादिति दर्पणदृष्टधनराशाविव निरासङ्गो न प्रहृष्यति = हर्षात्मकं विकारं न भजते।

(१) शलाटुः = नाम्नाप्रख्यात वृक्षस्यफलः अर्धपक्वफलविशेष इति।।
(२) महाभाग्यफलज्ञानोदये = महान्तश्च त एव भागा अदृष्टविशेषास्ते सन्ति येषां ते महाभाग्यास्तैः प्राप्यं फलं महाभाग्यफलं तदेव च ज्ञानमिति महाभाग्यफलज्ञानं तस्योदये इति। तथा रागद्वेषादि दोषदुष्टो भविष्यतीति सम्भावनाप्यसम्भवीत्यर्थः।।
(३) अमत्रं = घटादिपात्रम्।

भूरिषु = बहुतरेषु शीत वर्षातप सिंह व्याघ्र दुर्भिक्ष वध बन्धनादि क्लेशरूपेषु कृच्छ्रेषु = महासङ्कटेष्वपि मेरुणा तुल्यं मेरुवत्। निश्चलः = अप्रकम्प्यः अविषण्णस्वरूपएवाऽऽस्ते। तस्य मिथ्यात्वनिश्चयादेवेति भावः।। किमस्य ईदृशधैर्ये कारणं तत्राह— भावयन्निति। यतोऽसौ निर्द्वयपूर्णानन्दैकरसमात्मानं सर्वदैव भावयन् = तदात्मनैव स्थितः। तेनैव परमानन्देन निरन्तरमानन्दित आस्ते इत्यर्थः। तथाच श्रुतिः— "यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति" इति।। यथाहु—

"अपि सप्तार्णवक्षोभादपि कल्पमहानिलात्।
अपि संवर्तदहनात्तत्त्वविन्न प्रकम्पते"।।इति।।

एवंशीलोऽसौ लोकानुग्रहाय भिक्षाचर्यादिसिद्धये सहजकौतूहलाच्च देववत् = ईश्वरइव, विश्वम्भरां = विपुलां पृथिवीं निषिद्धदेशानपहाय सर्वतः संचरत्येव नैकत्रनिवसतीत्यर्थः।।२१।।

दर्शितेयं तत्त्वज्ञचर्या औत्सर्गिकी, प्रारब्धगतेः विचित्रत्वेन ऐकरूप्य-निर्धारणाऽसंभवादित्याह— केपीति।।

मू०।। केऽपि वर्णाश्रमाचारनिष्ठापरा
मुग्धबालप्रमत्तो - पमाश्चाऽपरे।
रागिणो भोगिनो योगिनश्चेतरे
ज्ञानिनां लक्ष्यते नैकरूपा स्थितिः।। २२।।

केऽपि = तत्त्वज्ञा *वसिष्ठाद्याः अन्ये च तत्त्वविदः वर्णाश्रमाचाराणां निष्ठायां = अनुष्ठाने प्रवर्तने च पराः तत्परा श्रूयन्ते दृश्यन्ते च।। अपरे = ऋभु जडभरत दत्तात्रेय प्रभृतयोऽन्ये च मुग्धाः = अप्रौढचित्ताः, बालाः = प्रसिद्धाः, प्रमत्ताः = ग्रहाऽऽवेशादिना पराधीनस्वान्तास्ते उपमा दृष्टान्तो येषां तथाविधाः त्यक्तसर्वकर्माणः श्रूयन्ते दृश्यन्तेचेत्यर्थः। इतरे = सौभरिप्रभृतयः रागिणः सन्तो वशीकृतसिद्धित्वात् भोगिनः = भोगपराः श्रूयन्ते। जैगीषव्य प्रभृतयस्तु योगिनः समाधिनिष्ठा एव श्रूयन्त इति ज्ञानिनांस्थितिः = चर्या एकरूपैवेति न लक्ष्यत इत्यर्थः।। २२।।

असङ्गोदासीनाऽत्मप्रतिष्ठत्वादबहिर्मुखजनसंसर्गित्वादरागाद्युपहतत्वाच्च स्वच्छन्दविचित्रा तेषां चर्या बहुधा गूढैव न सर्वजनज्ञेयेत्याह— स्वानन्द इति।।

* वसिष्ठादय इति पाठ।

मू०।। स्वाऽऽनन्दे सहजे सदा विहरतां स्वच्छन्दलीलाजुषां
निस्सङ्गा च निरर्गला च जगतां कल्याणसंदोहनी।
मत्स्यानां सलिलेऽम्बरे च वयसां वायोरिवाऽऽशामुखे
दुर्लक्ष्ये पथि योगिनां बहुविधा गूढा विचित्रा गतिः।।२३।।

सहजे = स्वाभाविके स्वानन्दे = आत्मसुखे सदा = निरंतरम्, विहरताम् अत एव स्वच्छन्देन = स्वेच्छानुसारेण जगदनुग्रहानुकूलां लीलां = वाङ्मनः कायचेष्टां जुषन्ति = सेवन्ते तथाविधानां योगिनां ज्ञानयोगिनाम्, दुर्लक्ष्ये = निपुणतरैरपि जनैर्लक्षयितुमशक्ये पथि = जगच्छ्रेयोमार्गे निः सङ्गा = बहिर्मुख जनसङ्गेन रागाद्यनुषङ्गेण च शून्या निरर्गला = निष्प्रतिबन्धा द्वितीयश्चकारः पराऽनुद्वेजकत्वाद्यनुक्तगुणसमुच्चयार्थः। जगतां = सर्वलोकवासिजनानां कल्याणस्य = ऐहिकामुष्मिकसुखस्य संदोहनी = सम्यक्प्रपूरणी। अथवा कल्याणस्य = सुकृताभ्युदयादेः, सन्दोहः = राशिः अस्यास्तीति तथा। एवंविधा गतिश्चर्या गूढा = दुर्लक्ष्या विचित्रा = बहुधा च भवतीत्यर्थः। तत्रदृष्टान्तमाहमत्स्यानामिति। यथा मत्स्यानां जले = सलिले, गतिः = गमनमार्गः, यथा वा अम्बरे = आकाशे वयसां = पक्षिणां सा, यथा वा वायोः आशानां = दिशां, मुखे = प्रदेशे सा गूढा विचित्रा च तद्वदित्यर्थः।। २३।।

तत्त्वज्ञ एव धन्यो नान्यः तस्मात्त्रिजगति धन्यतमोऽस्तीत्यभिनन्दति— योगीति।।

मू०।। योगिध्येयपदाम्बुजस्त्रिजगतां नाथो हरिर्यं स्वयं
शान्तं नित्यमनुव्रजामि रजसा *पूयेयमित्यब्रवीत्।
तस्माद्विश्वगुरोः सुरासुरनरैरानम्यपादाम्बुजा-
दात्मानन्दनिमग्ननिश्चलमतेरन्योऽत्र धन्योऽस्ति कः।। २४।।

योगिभिः = कर्मयोगिभिः अष्टाङ्गयोगिभिर्ज्ञानयोगिभिश्च अभ्युदयनिः श्रेयसप्राप्तये ध्येये = अवश्यं ध्यातव्ये पदाम्बुजे = पादारविन्दे यस्य तथाविधः त्रिजगतां = त्रिभुवनानां, नाथः = ईश्वरो भगवान्हरिः श्रीकृष्णः

"निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः।।

इति शान्तं = जितक्रोधं "ज्ञानीत्वात्मैव मे मतम्" इतिभगवद्वचनात्

*"अनुव्रजाम्यहं नित्यं पूयेयत्यङ्घ्रिरेणुभिः" इति श्रीमद्भागवते पाठदर्शनात् अत्र पूयेय चेत्यब्रवीत् इत्येव पाठः साधुरिति भाति।।

आत्मभूतं ब्रह्मविदं स्वयं नित्यं = निरन्तरं अनुव्रजामि, तेनाऽनुव्रजनेन च रजसा तदीयचरणरेणुना पूयेय = पवित्रीभवामि इति यं = ब्रह्मविदं अब्रवीत् = व्यक्तमुक्तवान् तस्मात् विश्वगुरोः = सर्वोत्कृष्टात् सर्वेभ्यो ब्रह्मविद्योपदेशेन आचार्यभूतात्सर्वेषां-गुरुवत्सेवनीयाद्वा। अतएव स्वर्गस्थैः सुरैः पातालस्थैः असुरैः भूस्थैर्नरैश्च आनम्ये = नित्यंवन्दनीये पादाम्बुजे यस्य तथाविधात् आत्मानन्दे = अपरिच्छिन्नसुखस्वरूपे निमग्ना = समुद्रोदरन्यस्ता महाशिलेव पुनरनिर्गमनाय प्रविष्टा अतएव निश्चला = निःस्पन्दा मतिर्यस्य तथाभूतात् तस्मात् ब्रह्मविदः सकाशात् अत्र = अस्मिन् ब्रह्माण्डोदरे को धन्योऽस्ति स एव धन्यो नान्यः कश्चिदित्यर्थः।।२४।।

कृतकृत्यस्य जगदनुग्रहकौतुकेन धरणीपर्यटनशीलस्य नित्यनिरतिशयाऽऽत्मानन्दाऽमृततृप्तस्य तस्य "यास्तु स्वैरकथास्तेषामुपदेशा भवन्ति ताः" इतिवचनात् विवेकिजनेषु तथापर्यवसितान् सहजोद्गारभूतान् ब्रह्माऽमृतरसस्राविणः सविस्मयादि-सहजमधुरालापान् दिदर्शयिषुर्भूमिकामारचयति— सोऽयमिति।।

मू०।। सोऽयं पूर्णमनोरथोऽपि सहजात्कौतूहलात्पर्यट-
न्नुर्वीं सर्वहिते रतः प्रतिपदं स्वानन्दमास्वादयन्।
साश्चर्यं सकुतूहलं सकरुणं सानन्दमुत्कण्ठया
धीरः पारमवाप्य मोहजलधेरेवं मुहुर्गायति।। २५।।

स वर्णितोत्कर्षोऽयं धीरः ब्रह्मवित् मोहजलधेः = दुस्तरस्य मायासमुद्रस्य पारं = परतीरभूतमात्मतत्त्वं अवाप्य = ज्ञानेन प्राप्य स्वयं पूर्णमनोरथोऽपि विनैवप्रयोजनोद्देशं सहजात् = स्वाभाविकात् कौतूहलात् = विचित्र देश तीर्थ सज्जनादि दर्शनौत्सुक्यात् उर्वी = भूमिं पर्यटन् सर्वतो विहरन् सन् सर्वेषां = प्राणिनां हिते = अनुद्वेगे अभिलषितप्रापणे च रतः = तत्परस्सन् तथा पदेपदे इति प्रतिपदं = प्रतिपादन्यासं स्वानन्दं = आत्मसुखरसायनं आस्वादयन् = परमप्रेम्णा अनुभवन्सन् ब्रह्मादिदुर्लभमिदं कथं मया प्राप्तमिति साश्चर्यं, हन्त! वाचामगोचरं अपारमिदमात्मसुखमनुभवामीति सकुतूहलं = सकौतुकं हन्त! दुरन्तेऽस्मिन्मोहजलधौ निमग्नाः प्राणिनोऽहमिव कथं पारमेष्यन्तीति सकरुणं, परमपुरुषार्थो मयाऽऽसादितः कृतार्थोऽस्मीति सानन्दं च उत्कण्ठया अनुभूयमानं-सुखोत्कर्षपारवश्येन तन्निगूहनाऽशक्त्या अधिकारिजनेषु प्रकाशनोत्कटेच्छया मुहुः = बारंबारं एवं = वक्ष्यमाणप्रकारेण गायति = सुस्वरमभिलपतीत्यर्थः।। २५।।

तमेवाऽभिलापं पञ्चदशभिः श्लोकैः वर्णयिष्यन्प्रथमं श्रीगुरुकरुणाकटाक्ष-सदुपदेशयोरेवैष प्रभाव इति तं दर्शयति— चिरादिति।।

मू०।। चिरान्मग्नेनाऽन्तः प्रकृतिविषमे जन्मजलधौ
मया पुण्यैर्लब्धो गुरुरमृतचिन्तामणिरहो।
यदीयाभिर्गोभिर्विशदमधुराभिर्वितिमिरे
स्वसंपूर्णे यस्मान्निरवधिसुखे धामनि रमे।। २६।।

प्रकृतिविषमे = राग द्वेष जरामय मरण नरकादि दुरन्तदुःख ग्राह बहुलत्वात् स्वभावसङ्कटे जन्मजलधौ = जन्मपरम्परोपलक्षित संसारसागरे चिरात् = अनादिकालादारभ्य मग्नेन = अन्तर्गतेन मया रत्नमिव अभ्युदय निःश्रेयस साधनमन्विष्यता परमभाग्योदयात् गुरुः = श्रीदेशिकलक्षणः अमृतचिन्तामणिः = मोक्षलक्षण चिन्तितार्थप्रदो मणिः अर्थान्तरे गुरुः = सर्वोत्कृष्टः न विद्यते मृतं मरणं यस्मात् तथाविधश्चिन्तामणिः लब्धः = प्राप्तः अहो इत्याश्चर्ये। कथमसावमृतचिन्तामणिरिति ज्ञात इति चेत् कार्येणेत्याह— यस्मादिति।। यस्माल्लाभानन्तरं अहं विशदमधुराभिः = स्वच्छहृद्याभिः यदीयाभिः यस्य श्रीगुरोस्संबन्धिनीभिः गोभिः = कटाक्षलक्षणैः किरणैः उपदेशवाग्भिश्च अन्यत्र प्रभाभिः वितिमिरे = निरस्ताऽज्ञाने निर्धूतान्धकारेच स्वसम्पूर्णे = स्वेन = आत्मनैव सम्यगपरिच्छेदेन पूर्णे = व्याप्ते स्वेन = धनेन संपूर्णेच निरवधिसुखे = निरतिशयानन्दे धामनि = स्वप्रकाशाऽऽत्मज्योतिषि गृहे च रमे = विहरामीत्यर्थः ।। २६।।

"या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।

इति भगवदुक्तेः विद्वदविद्वद्दृष्टिगोचरे आत्मदर्शनाऽदर्शन जगन्मिथ्यात्व सत्यत्व दर्शनलक्षणे परस्परविपरीत जागृन्निशे पौर्वापर्येण स्वेनैवाऽनुभूते अभिलप्य दर्शयति–यथेति।।

मू०।। यथा पूर्वं मायापरिकलितदृष्टिर्निजसुखं
स्वयं भातं पश्यन्नपि नपरिपश्यामि सहजम्।
तथेदानीं ज्ञानाञ्जनविमलचक्षुर्जगदिदं
चिदाकाशे पश्यन्नपि न परिपश्यामि वितथम्।। २७।।

पूर्वं = अज्ञातादशायां सहजं = स्वाभाविकं सत्यं. परमप्रेमास्पदत्वेन स्वयंभातं = स्वप्रकाशं निजसुखं = आत्मानन्दं अहं यथापश्यन्नपि सर्वव्यवहारेषु पुरःस्फूर्तत्वात् अनुभवन्नपि मायालक्षणतिमिररोगेण परिकलिता = सर्वत आच्छादिता स्वरूपदृष्टिर्यस्य तथाभूतः सन् द्वैतनिविष्टदृष्टित्वात् नीलपटसंयुक्तप्रभाशौक्ल्यमिव

नपरिपश्यामि = नाऽज्ञासिषं "[१]वर्तमानसामीप्ये लट्"। तथेदानीमपि ज्ञानलक्षणेन = सिद्धाञ्जनेन विमलं = निर्मलीकृतं चक्षुः = स्वरूपदृष्टिर्यस्य तथाभूतः चिदाकाशे = आकाश-वत् वितते स्वरूपचैतन्ये प्रतिभासमानं इदं = जगत् पश्यन्नपि दृढबाधनिश्चयात् वितथं = अनृतमिति नपरिपश्यामि। अहो चिरान्ममेदं वैरनिर्यातनमिव वृत्तमित्युत्कण्ठोक्तिः।। २७।।

मनोवाक्कायव्यवहाराऽगोचरत्वेऽपि स्वप्रकाशत्वादेव स्वतः सिद्धत्वेन, निर्विशेषत्वादवाच्यत्वेऽप्यप्रत्याख्येयत्वेन, आत्मत्वादेव नित्यलब्धत्वेनच, विषयादिरूपप्रपञ्चविलक्षणस्य आत्मन एव चरमसाक्षात्कारवृत्त्याऽऽरूढस्य द्वैतप्रपञ्चबाधकत्वमनुभूयाऽभिलपति— न वेद्य इति।।

मू०।। न वेद्यो नाऽवेद्यः स्वरसमतिहृद्यः सुखघनो
न गद्यो नाऽपोद्यो न पुनरुपरोध्यः कथमपि।
न हेयो नाऽऽदेयो न पुनरपिधेयः क्षणमहो
स्फुरन्नाऽऽत्माऽस्माकं जगदिदमकस्मात्तिरयति।। २८।।

मनसा इन्द्रियान्तरैरपि न वेद्यः = बोद्धुमशक्यः तेषां। विषयोन्मुखत्वेन आत्मनि व्यापाराऽयोगात्। तथापिधर्मादिवन्नपरोक्षैकस्वभाव इत्याहनाऽवेद्य इति। अवेद्योपिन नित्याऽपरोक्षत्वादित्यर्थः तथा निर्विशेषत्वादेव इत्थमेवंरूप इति वाचापि न गद्यः। नापि नास्तीत्यपोद्यः = अपवदितुंनशक्यः। निरवच्छिन्नप्रतियोगिताकनिषेधाऽयोगात् प्रतिषेद्धुरात्मत्वाच्चेत्यर्थः। तथा आत्मत्वादसङ्गत्वाच्च न हेयः = हातुं न शक्यः। नाप्याऽऽदेयः = आदातुंनशक्यः। नापि भूतलादिवृत्तिप्रदीपशरावादिनेव अपिधेयः = आच्छादयितुं शक्यः। स्वयंप्रति स्वस्य तिरोधातुमशक्यत्वात् अपरिच्छिन्नत्वाच्च। ईदृशः स्वरसं स्वत एवातिहृद्यः परमप्रेमास्पदम्, अत एव सुखघनः = सैन्धवघनवत्सुखैकघनः अस्माकमात्मा स्फुरन् = चरमसाक्षात्कारवृत्त्यारूढः सन् इदं = प्रत्यक्षादिसिद्धं, कुद्दालकोटिभिरप्यभेद्यं जगत् अकस्मात् = सहसैव तिरयति = स्वरूपेणाऽऽच्छादयति बाधते इत्यर्थः। अहो इत्याश्चर्ये।। २८।।

प्रबोधोत्तरकालं स्वप्न इव तत्तिरोहितं जगत्तुच्छमेव, न सर्वथा तस्य गतिः

(१) वर्तमान सामीप्ये वर्तमानवद्वा।।३।।३।।१३१।। समीपमेव सामीप्यम्। स्वार्थेषयञ् वर्तमाने लट्।२।१।५१।। इत्यारभ्यउणादयो बहुलम्।।३।१।६९। इति यावद्येनोपाधिना प्रत्ययः उक्तास्ते तथैव वर्तमान समीप भूते भविष्यते च वा स्युः।। कदाऽऽगतोसि। अयमागच्छामि। अयमागमम्। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा।। (अ०अ०३पा०३सू०१३१)

प्रेक्षावत्सहस्रैरपि ज्ञातुं शक्या। विमर्शे तस्य मनोमात्रविलसितत्वात् तच्छान्त्यैव प्रशमदर्शनादित्येतदानुभविकं दर्शयति— किमिति।।

मू०।। किमस्तं किंध्वस्तं किमु विलुलितं किन्नु गलितं
विशीर्णं वा गीर्णं ननु सपदि जीर्णं किमथवा।
अमन्दे स्वच्छन्दे निरुपमनिजानन्दजलधौ
मयि स्वान्ते शान्ते जगदिदमशेषं न कलये।। २९।।

मयि-पूर्णानन्दैकरसे प्रत्यगात्मनि स्वान्ते-मनसि शान्तेसहजचरमसाक्षात्कार-वृत्त्या निर्वाणे सति, इदं-दृश्यं, अशेषं-कृत्स्नं जगत्, न कलये = नानुभवामि। तत्कुत इति नशकयं परिज्ञातुं तुच्छत्वादितिभावः। तुच्छतामेव स्फुटीकर्तुं अपगमप्रकारसन्देहमनिर्णयव्याप्यमभिनयति— किमिति। किमिदं जगत् सूर्यचन्द्रादिवत् अस्तं, किंवा कठिनतर शिलापृष्ठ निपतितघटपिठरिकादिवत् ध्वस्तं, किंवा (१)मदविधूतश्रृङ्खलमतङ्गज करचरणपरिमृदित मृणालमिव विलुलितं, किंवा प्रतप्ततरखर्परन्यस्त(२)हैयङ्गवीनपिण्ड इव करतलकलितकरकोपलखण्ड इववा गलितं। किंवा जवनतरपवनदोधूयमानशरदभ्रपटलशकलमिव विशीर्णं। किंवा चिरबुभुक्षिताऽजगरवदननिपतितचपलतरशशकशरीरमिव गीर्णं। किमथवा निरुपमानतया योगप्रभाव विशेषविजृंभमाणकुंभसंभवोदरप्रविष्टवातापिशरीरमिव जीर्णं। *अस्तिध्वस्त्यादौ रूपान्तरेणापि परिशेषः संभाव्येत जरणे तु नतत्संभावनापिति द्योतनाय— किमथवेति। नन्विति = वितर्के। नन्वात्मनि तदापि सन्नेव प्रपञ्चो ग्राहकाभावादेव न प्रतीयतामित्याशङ्कावारणाय विशिनष्टि— अमन्द इति। मन्दः-मूढः अज्ञानाऽऽवृतः तद्विलक्षणे अनावृतस्वप्रकाशचिद्रूपे इत्यर्थः। तथाच तत्र सत्त्वे भासेतैवेति भावः।। तर्हि तदा अन्यत्रैव जगदस्तु न भासतां चेत्याशङ्क्याह— स्वच्छन्द इति। स्वः = स्वाधीनः छन्दः = विहारादिचरित्रं यस्य स इव निरङ्कुशव्यापनशीले त्रिविधपरिच्छेदशून्य इति यावत्। तथा च वस्त्वन्तराऽभावात्, भावे वा तस्यापि जगदन्तः पातेन आधारत्वाऽयोगाच्चेत्यर्थः।। ननु तर्ह्यप्सु सैन्धव इव आत्मन्येव निलीनं पृथक् सत्तयाऽस्तु तत्राह— निरुपमेति।। निरुपमस्य अप्रतिमस्य निजस्य-स्वात्मकस्य आनन्दस्य जलधौ समुद्रे इत्यर्थः। तथाचाऽऽनन्दैकरसे अनानन्दादिरूपस्य जगतः पृथक् सतो मिश्रणे जलमाधुर्यस्येव

(१) मदविधूतश्रृङ्खल-मतङ्गज = मदेन विधूता इतस्ततश्चालिता उत्पाटिता वा श्रृंखला पादबन्धन साधनं येन तथा भूतो मतङ्गजस्तस्य करेण चरणाभ्यां च मृदितमृणालमिवभिसतन्तुवदित्यर्थः।

(२) तत्तु हैयंगवीनं यत् ह्यो गोदोहोद्भवं घृतमित्यमरः।।

*अस्त इति पाठः

सुखैकरसत्वस्य विघातः स्यात्। तथा च श्रुत्यनुभवविरोध इति सर्वथा प्रपञ्चस्याऽपरिशेषात् जीवन्मुक्तदृशा तुच्छतैवेति भावः।। २९।।

न केवलमस्य ज्ञानेन बाधस्य पर्यालोचनादेव तुच्छता, अपितूत्पत्त्यादेः परिशीलनेनाऽपीति दर्शयति— कथमिति।।

मू०।। कथमिदमभवत्कथंनु तिष्ठ-
त्यथ कथमेति लयं प्रतीचि विश्वम्।
विमलदृशि निजे निरस्तसङ्गे
पटु परिमृश्य मृषेति निर्वृतोऽस्मि।। ३०।।

विमलदृशि = निर्मलचैतन्यस्वभावे स्वतो विकाररहिते इति भावः। निरस्त-सङ्गे = वस्त्वन्तराऽसंस्पर्शिनि परतोऽपि विकारशून्ये इति यावत्। ईदृशे निजे परमार्थसत्य प्रतीचि = प्रत्यग्ब्रह्मणि इदं = प्रातीतिकं, विश्वं = जगत् कथमभवत् एवममूर्ते अनन्तरे अबाह्ये च तस्मिन् कथं तिष्ठति, नु = इति संभावनायाम्। मूर्तं हि मूर्ते, अन्यद्धि अन्यत्राऽन्तर्बहिर्वा आस्ते इति प्रसिद्धं। उत्पत्तिस्थित्यभावे अलब्धस्वरूपस्थितिकस्य वन्ध्यापुत्रस्येव नाशोऽप्यत्यन्ताऽसंभावित एवेत्याद्य-भिप्रेत्याह— अथेति। अथ = तदनन्तरं लयं = तिरोभावं च कथमेति? निरधिकरणस्य भावशेषस्य अभावशेषस्य वा नाशस्याऽयोगात्। [१]आत्मनश्चोभयाऽसङ्गत्वात् नाशस्य प्रतियोग्यसंस्पर्शे तदीयत्वाऽसिद्धेः। [२]संस्पर्शे चोत्पत्तौ तदविघातिनः पश्चादप्यविरोधापत्तेः। भावाऽभावयोः संस्पर्शस्य दुर्वचत्वाच्चेति भावः। एतदेवह्यभिप्रेत्याह भगवान्.

"नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः"।। इति।।

एवं जगत्स्वरूपं पटु = निपुणतरं परिमृश्य = विचार्य मृषा = तुच्छमेवेति निश्चित्य निर्वृतः = सुखिनोऽस्मीत्यर्थः।। ३०।।

सृष्टि स्थिति लयाऽऽधारत्वाऽसंभवेन आत्मनः उपादानताऽसंभवात् जगतस्तुच्छता दर्शिता। इदानीं कर्तृत्वाद्यऽसंभवोपपादनेनाऽपि तां त्रिभिः

---

(१) उभयासङ्गत्वात् = उभाभ्यां भावाभावाभ्यां वास्तवसम्बन्धशून्यत्वादित्यर्थः।।

(२) संस्पर्शे चोत्पत्तौ तदविघातिन इति। अभावस्य च प्रतियोगिनां संस्पर्शे सम्बन्धे स्वीकारे सति तस्य च सम्बन्धस्य चोत्पत्तौ प्रतियोगिसाकाङ्क्षस्याभावस्य स्वाकाङ्क्षितप्रतियोग्यविघातिनस्तस्य पश्चादपि स्वप्रतियोगिना सहाविरोधापत्तेरित्यर्थः।।

श्लोकैरुपपादयिष्यन् प्रथमं निर्माणमाक्षिपति— निराधारेति।।

मू०।। निराधाराऽऽकारं निरवयवसंस्थानमचलं
निरीहं निर्द्वन्द्वं निरुपम निजानन्द विभवम्।
विनोपायं स्वीयं करणसमुदायं च परमं
कथं तन्निर्मायं त्रिभुवननिकायं रचयति।। ३१।।

निर्गत आधार आश्रयः आकारः = पुरुषादिदेहश्च यस्य तत् तथा। निर्गतं हस्तपादाद्यवयवानां संस्थानं संनिवेशो यस्य तत्तथा। अचलं = निश्चेष्टं निरीहं = निरभिलाषं तथा। निर्द्वन्द्वं = शीतवाताद्युपघातशून्यं मृदादिस्वातिरिक्तो-पादानशून्यं च तथा। निरुपमः = अप्रतिमः निजः = स्वात्मकः आनन्द एव विभवः = सर्वैश्वर्यफलं यस्य तत्। तथाविधं परमं = ब्रह्म उपायं = बाह्यमुपकरणं स्वीयं = आभ्यन्तरं चक्षुरादिकरणसमुदायं च विना त्रिभुवननिकायं = त्रैलोक्यगृहं कथं रचयति = निर्मिमीते। लोके हि साधारः शरीरी हस्तपादादिमान् बाह्याभ्य-न्तरोपकरणसंपन्नः शिल्पी शीतवाताद्युपघातनिवृत्तये वेतनादिलाभाय वा अल्पतरमपि गृहं रचयन् दृष्टः। तद्विलक्षणं ब्रह्म तद्विलक्षणं जगद्गृहं कथं रचयतीति संभावयितुमप्यशक्यमिति भावः।। ननु विनैवाऽन्यत्साधनं मायावीव मायया निर्मा-स्यति, स्वप्ने विनैव साधनं गृहादिसिद्धिदर्शनादित्याशङ्क्य विशिनष्टि-निर्मायमिति। असङ्गे मायासङ्गस्याप्ययोगात् आरोपिततत्सङ्गोक्तौ जगत्स्रष्टृत्वादिसङ्गस्यापि आरोपितत्वाऽऽपत्तेः, आरोपमात्रेण वास्तवनिर्मातृत्वोक्त्यसंभवाच्चेति भावः।। ३१।।

एवं पालनसामग्र्यभावात् पालयितृत्वकलनापि तुच्छैवेति दर्शयति— न भृत्या इति।।

मू०।। न भृत्या नामात्या न खलु विषया नैव च हया
न चाऽशून्याः कोशा न च पुरनिवेशा न सुहृदः।
तथाप्यात्मैकाकी निजबलवराकीमरिचमूं
विजित्यैतद्विश्वं भुवनमवतीत्यद्भुतमिदम्।। ३२।।

भृत्याः = अवश्यभरणीयाः स्वदेहपुत्रदारादयः अन्यत्र भटाश्च न सन्ति। तथा अमात्याः = बाह्यव्यवहारसचिवाः मनोबुद्ध्यादयो मन्त्रिणश्च न सन्ति। तथा विषयाः = शब्दादयः उपभोग्याः, पालनीयदेशाश्च न सन्ति। खल्विति निश्चये। तथा हयाः = "इन्द्रियाणि हयानाहुः" इति श्रुतेः इन्द्रियाणि तुरङ्गमाश्च नैव सन्ति। चकारः सर्वत्र तत्तदुपकरणाऽसत्वसमुच्चयार्थः। तथा च

अशून्याः = अनलीकाः कोशाः = अन्नमयादयः धनरत्नादिसंभृतकोशागाराणि च न सन्ति। अत एव पुरस्य–ज्ञानेन्द्रिय कर्मेन्द्रिय प्राणमहाभूतान्तः करणाऽविद्या काम कर्म लिङ्गदेह लक्षणपुर्यष्टकस्य नगरस्य च निवेशाः = अध्यासाऽभिमानरूपाः वसतयश्च न सन्ति। रागद्वेषादीनां आयुधादीनां च वैकल्यसमुच्चयार्थश्चकारः। तथा न सुहृदः = सु–शोभनं सम्यक् प्रवर्तकं हृत् = मनो येषु लौकिकवैदिकव्यापारेषु ते व्यापाराः मित्राणि च न सन्ति। "अथात आदेशो नेति नेति" "स एष नेति नेत्यात्मा" "अगृह्यो नहि गृह्यते" "यत्र त्वस्य सर्वमात्मैवाऽभूत् तत् केन कं पश्येत्" इत्यादि श्रुतिभिः सर्वद्वैतप्रतिषेधादसङ्गेऽन्यसंगाऽसंभवाच्चेति भावः। तथापि निजबलेन–अपरिच्छिन्नपरमार्थसत्यचैतन्याऽऽनन्दैकरसस्वाभाव्यलक्षणया स्वशक्त्यैव, वराकीं–तुच्छीकृतां स्वबाहुबलतिरस्कृतां च, अरिचमूम्–कामक्रोधलोभमोहमदमत्सर लक्षणाऽरिषड्वर्गसेनां शत्रुसेनां च एकाकी–अद्वितीयः असहायशूरश्च आत्मा विजित्य–अभिभूय पराभाव्य च, एतत्–दृश्यं विश्वं–कृत्स्नं भुवनं जगत्, अवति–पालयतीति इदमद्भुतं–अत्याश्चर्यं संभावयितुमशक्यमिति भावः।। ३२।।

एवं संहर्तृत्वमप्याक्षिपति— असङ्गोदासीन इति।।

मू०।। असङ्गोदासीनः स्वरस परमानन्द सुहितो
जिघत्सानिर्मुक्तश्चिति – तनुरपाण्यङ्घ्रिजठरः।
अमायोऽप्यात्मासौ स्वयमनवकाशोऽपि सहसा
समायं त्रैलोक्यं कबलयति कस्मात्कथमहो।। ३३।।

असङ्गः अनन्यस्पर्शी उदासीनः–निष्क्रियः स्वरसेन–स्वाभाविकेन स्वप्रकाशेन च परमानन्देन सुहितः–तृप्तः जिघत्सया–क्षुधया निर्मुक्तः रहितः। "अजिघत्सोऽपिपासः" इति श्रुतेः। चितितनुः–चैतन्यस्वाभाव्यात् परमसूक्ष्मः अपाण्यङ्घ्रिजठरः–हस्तपादोदरहीनः तथा स्वयं अच्छिद्रत्वात् पूर्णत्वाच्च अन्तर्बहिर्वा अवकाशरहितः। मायया ऐन्द्रजालिकः प्रासादमिव ग्रसिष्यतीत्याशङ्कावारणाय विशिनष्टि— अमाय इति। ईदृशोऽप्ययमात्मा समायं–सर्वोपसंहारि मायालक्षणमृत्युसहितं त्रैलेक्यं कवलयति–ओदनपिण्डमिव ग्रसति। "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मत्युर्यस्योप सेचनम्" इति श्रुतेः। तदेतत्सर्वग्रसितृत्वं कस्मान्निमित्तात्प्रयोजनाद्वा स्यात्, कथं च संभवतीति प्रलयकर्तृत्वकल्पनापि श्रौती बालप्रहेलिकावत् वस्तुबोधनायैव न वास्तवी संभवतीति तुच्छैवेत्यर्थः। यद्यपि मायोपसंहर्तृत्वं न संहारश्रुतेरर्थः बीजाभावे पुनःसर्गानापत्तेः। तथापि विष्णुपुराणोपदर्शितचतुर्विधप्रलयेषु

नित्य नैमित्तिक दैनन्दिन प्राकृताख्य प्रलयवत् ज्ञानेन सकार्याऽविद्याबाधलक्षण वैज्ञानिकप्रलयोऽपि तुच्छसापेक्षस्तुच्छ एवेति प्रदर्शनाय तथोक्तमिति बोध्यम्।। तथा च श्रुतिः—

"न निरोधो नचोत्पत्तिर्नबद्धो नचसाधकः।
न मुमुक्षुर्नवै मुक्तः इत्येषा परमार्थता"।। इति।। ३३।।

असङ्गाद्वितीयपरमानन्दैकरसस्वात्मलाभान्मयेत्थं सर्वाऽपलापेन महाधूर्तेनेव सर्वं जगद्वञ्चितमिवेति स्वनिष्ठामभिनन्दति— मुहुरिति।।

मू०।। मुहुर्मूढैर्न्यस्तं भृशमपलपाम्यर्थनिचयं
नकश्चिद्विश्वास्यो न मम यमदण्डादपि भयम्।
गुणद्वेषी स्वार्थप्रियइति जगद्वञ्चनपरं
चरित्रं मे चित्रं क्वचिदपि न कश्चित्कलयति।। ३४।।

मूढैः-जडैः अन्तःकरणेन्द्रियादिभिः न्यस्तं-अध्यासेन सत्यतया प्रत्यापितं अर्थनिचयं-शब्दादिविषयजातं भृशं-अत्यर्थं "नेतिनेति" इत्यादिश्रुत्यनुभवबलात् अपलपामि-तुच्छत्वेनाऽवधारयामि निषेधामि च। धूर्तपक्षे मूढैः-जनैः मुहुः-वारंवारं। न्यस्तं-न्यासत्वेन स्थापितं अर्थनिचयंधनरत्नादिसञ्चयं अपलपामि-अपहरामीत्यर्थः। अतएव ह्यात्मातिरिक्तः कश्चिद्विश्वास्यः-परमार्थबुद्ध्योपादेयो नास्ति। अन्यत्र *सर्ववञ्चकस्य कश्चिदपि पुरुषो विश्वास्यः-प्रत्ययपात्रं नास्ति। आत्मदर्शननिर्दग्धपाप्मत्वात् यमादीनामात्मभूतत्वाच्च मम यमदण्डात्-यमप्रयुक्तनरकपातादिदण्डनात् यमायुधविशेषाच्च भयं नास्ति। अभयात्मदर्शित्वादिति भावः। धूर्तस्य च पारलौकिकभयं नास्तीति प्रसिद्धम्। नकेवलं कार्यप्रपञ्च-एवाऽविश्वासः, किन्तु सर्वकार्यमूलमायागुणेष्वपीत्याह—'गुणद्वेषीति।। गुणान्-सत्त्वादीन् द्वेष्टिअनृतकार्यपरिणामित्वादेव अनृतत्वबुद्ध्या अभिभवति तच्छीलः। तथाधूर्तस्यापि परगुणद्वेषिता प्रसिद्धा। स्वः-आत्मैव अर्थः-परमार्थः प्रियः-प्रेमास्पदं यस्य तथाविधश्च अहं अन्यत्र स्वकार्यमात्रतत्पर इति ईदृशं जगद्वञ्चनपरं-सर्वाऽपलापनिपुणं अन्यत्र जनप्रतारणानिपुणं मे-मम चित्रं-अद्भुतं चरित्रं-चेष्टितं क्वचिदपि-देशे काले वा कश्चिदपि पुरुषः नकलयतिनजानाति, तत्त्वज्ञचरित्रस्य धूर्तचरित्रस्य च दुर्विज्ञेयत्वादितिभावः।। ३४।।

ननु सर्वद्वैताऽपगमे दारिद्र्य इव न्यूनता स्यादित्याशङ्क्य स्वगृहान्तर्भूमिगत

*सर्ववञ्चकत्वात् इति पाठः।

निधानपिधानाऽपगमादिव न ततो न्यूनताप्रसक्तिः। अपितुपूर्णतालाभ एवेति दर्शयति—न तात इति।।

मू०।। न तातो नो माता सुहृदपि न मे धाम निधनं
नचान्नं पानं वा न सततगतिर्नाम्बरमपि।
चरन्तं कृत्स्नं मामहह न हि लोकोऽपि विमृश-
त्यहो मे दौर्गत्यं तदपि सुखसाम्राज्यमतुलम्।। ३५।।

तातः = कारणं पिता च नास्ति। माता = परिमाता परिच्छेदको जननी च नो नास्ति सुहृत् = अन्तर्बहिश्च सर्वव्यवहारनिर्वाहकत्वात् इतरकरणेभ्यः शोभनंहृन्मनो मित्रं च मे नास्ति। "स्वान्तंहृन्मानसं मन इत्यमरः"। "*उरःप्रभृतिभ्यः कप्" इत्युत्तरसूत्रे प्रभृतिग्रहणस्य प्रकारार्थत्वात् अत्रापि हृदयशब्दस्य हृदादेशः। शब्दान्तरंवा। धाम = शरीरं गृहं तृतीयमहाभूतं वा नास्ति। तथानिधनं = मरणादि नास्ति अन्यत्र धामनि = गृहे धनं = वित्तं नास्ति। अन्नं = "पृथिवीवाअन्नम्" इतिश्रुतेः पृथिवी पानं = जलं न चस्तः। अन्नं = अदनीयं धान्यादि पानं = पानार्हं पयः तक्रादि वा नास्ति। एवंसततगतिः = सदागतिः वायुः सदैव परिपालकः अन्यो बन्धुः स्वाम्यादिश्च नास्ति। एवं अम्बरं = आकाशं वस्त्रमपि नास्ति। एवंच कारणस्य अविद्यादेः कार्यस्य महाभूतादेश्च परिच्छेदस्याऽभावात् सर्वतः चरन्तं = व्याप्नुवानं अतएव कृत्स्नं = पूर्णं कृत्स्नं सर्वेषांहृदयप्रदेशे चरन्तं = आत्मतया प्रविष्टमिति वा मां, लोकयति = बाह्यार्थानितिलोकः = इन्द्रिय-कलापः अपिशब्दान्मनो, मूढजनश्च नविमृशति = नपश्यति नश्रवणादिनाविचारयतिच। अन्यत्र कृत्स्नं = सर्वदेशंग्रामाद्ग्रामं गृहाद्गृहं भैक्षकणाद्याशया चरन्तं मां लोको जनो दृष्ट्वापि नविमृशति = दयया नविचारयति। अहहेति हर्षे खेदेच। इत्थं मे = मम दौर्गत्यं = अन्यदुर्गमत्वं दारिद्र्यं च यद्यप्यस्ति तदपि = तथापि अतुलं = अनुपमं सुखमेव सम्यक् राजते दीप्यते तद्भावः सुखसाम्राज्यं = सौख्यो-त्कर्षशालिसर्वाधिपत्यं च अत्यन्तविरुद्धमपिस्वतस्सिद्धमेवाऽस्तीति अहो = आश्चर्य-मित्यर्थः।। ३५।।

एवं सर्वात्मके निर्द्वये चात्मनि विरोधान्तरप्रतिभासेनापि आश्चर्यम-भिनयन्नाह— यदिति।।

*सुहृद्दुर्हृदौ मित्राऽमित्रयोः। अष्टाः-५-४-१५०।। उरःप्रभृतिभ्यः कप् ५-४-१५१।। अत्र उरः प्रभृतिभ्यः इति उत्तरसूत्रस्थप्रभृतिग्रहणस्य प्रकारार्थत्वादत्रापि सु = शोभनम् हृदयम् अस्येति विग्रहे हृदयशब्दस्य हृदादेशो बोध्यः। अथवा शोभनहृदयवानित्यर्थे सुहृत् इति शब्दान्तरं वा बोद्धव्यम्।।

मू०।। यद्विश्वं यदविश्वं यद्बहिरन्तश्च नो बहिर्नान्तः।
यद्भवपारमपारं तदनहमहमस्मि विस्मितः स्वेन।। ३६।।

यत् = आत्मवस्तु मायिकदृष्ट्या अवलोक्यमानं विश्वं = जगदेवेति सर्वजगदाकारेण नटवत् व्यवस्थितं नृत्यतीवेत्यर्थः। परमार्थदृष्ट्या तु दृष्टं यदविश्वं = निष्प्रञ्चमेव। तथाचश्रुतिः-"स एव सर्वं यद्भूतं यच्च भाव्यं सनातनम्" इति "एकमेवाद्वितीयम्" इतिच। एवं सर्ववस्तूनां अन्तर्बहिश्च व्यापनात् यदात्मवस्तु सर्वस्य बहिः = बाह्यदेशे अन्तः = मध्ये च भवति जगद्व्याप्तिदृष्टौ, परमार्थतस्तु नो बहिः नान्तश्च। तथाच श्रुती भवतः "तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः" इति। "तदेतद्ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः" इतिच। यत् = यदेवात्मवस्तु भवस्य = संसारसमुद्रस्य पारं = परतीरभूतं अपारं = अनवधिकंच "ब्रह्म विश्वस्य पारं, महद्भुतमनन्तमपारम्" इतिचश्रुतिः। तत् = तादृशं अनहं-अहङ्कारनिष्कर्षादहंशब्दाऽवाच्यं अहमेवास्मीति सर्वतो विलक्षणमेतदात्मस्वरूपं अनुभवन् स्वेनैवस्वयं विस्मितोऽस्मीति। विस्मयेऽपि विस्मयप्रदर्शनादुत्कर्षः। "विभुं चिदानन्दमरूपमद्भुतम्" इतिश्रुत्यापि तस्याऽऽश्चर्यरूप तैवदर्शितेति भावः।। ३६।।

आत्मसुखलाभे ब्रह्मविष्णुरुद्राख्यानां ईश्वरमूर्तीनां यत्सर्वैश्वर्यसुखं तदपि तदात्मभावाल्लब्धमेवेति नाधिकमवशिष्यते, जगद्व्यापारविक्षेपराहित्यात् समाहितसुखं ततोऽप्यधिकमेवेति वा जीवन्मुक्तिसुखस्य सर्वोत्कर्ष प्रतिपादनाय तत्तद्व्यापारमात्ररहितं स्वस्यापि ब्रह्मादिभावं त्रिभिः श्लोकैर्दर्शयति— न सत्य इति।

मू०।। न सत्यो मे लोको न खलु पुनरोकः सरसिजं
रजःसङ्गो दूरे न मयि विधिशब्दःप्रभवति।
नवाग्भिः संसर्गो न च विषमसर्गव्यसनिता
तथापि ब्रह्माहं निगमनिकुरुम्बं गदति तत्।। ३७।।

निष्प्रपंञ्चाऽऽत्मभूतस्य मे-मम भूरादिर्लोकः सत्यः-परमार्थो न, प्रसिद्धस्य हि चतुर्मुखस्य ब्रह्मणः सत्यसंज्ञको लोकोऽस्तीत्यर्थः। एवं सरसिजं-हृदयपुण्डरीकं जीवभावे मुख्याऽऽविर्भावस्थानत्वेन उपासनस्थानत्वेन च प्रसिद्धं पद्मं च ओकः-गृहं तद्विशेषाभिमानस्थानमित्यर्थः। भगवतस्तु पद्मासनत्वं प्रसिद्धम्। पुनश्शब्दः समुच्चये। खल्विति प्रसिद्धौ। तथा मे रजसा-रागद्वेषमोहादिमालिन्येन रजोगुणेन च सङ्ग-सम्बन्धः दूरे-न संभावित एवेत्यर्थः। भगवतस्तु रजोगुणः प्रसिद्धः। तथा मयि अनियोज्येप्रत्यगात्मनि 'यजेत दद्यात्' इत्यादि विधिशब्दः-नियोजकलिङा दिशब्दः नियोजयितुम् न प्रभवति-न समर्थो भवति। तदाहुर्वार्तिकाचार्याः—

"स्वामी सन्नहि भृत्येन स्वामिनेव नियुज्यते।
सम्बोधनीय एवाऽसौ स्तुत्यो राजेव वन्दिभिः"।। इति।।

तथाविधिरिति शब्दो। वाचको मयि न भवति। भगवतस्तु विधिशब्दवाच्यता प्रसिद्धा, तथा मम वाग्भिः-महावाक्यैः संसर्गः-एकपदार्थ संसृष्टाऽपरपदार्थतया बोधनं शब्दसम्बन्धश्च नाऽस्ति। भगवतस्तु चतुर्वक्त्रेषु चतुर्वेदाऽऽत्मकवाक्सम्बन्धः प्रसिद्धः। तथाविषमे-दुस्तरे सर्गेसंसारे व्यसनित-दुःखिता अत्यासक्तिश्च मे नचाऽस्ति। भगवतस्तु उत्कर्षाऽपकर्षादि वैषम्यशालिनिसर्गे-सृष्टौ व्यसनिता-तत्परता प्रसिद्धा। तथाप्येवं वैधर्म्ये सत्यपि पारमार्थिकं ब्रह्म सोऽपि चाऽहं भवाम्येव। मद्वचनाऽविश्वासे श्रुतिः साक्षीक्रियतामित्याह— निगमेति। निगमानां-वेदानां निकुरुम्बं-समूहः। "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादिः "एष ब्रह्मैष इन्द्रः" इत्यादिश्च तत्-मदुक्तं ममैव ब्रह्मादिभावं गदति-व्यक्तं वदतीति नाऽत्र संदेह इति भावः।। ३७।।

एवमस्य वैष्णव परमपदप्राप्त्या विष्णुत्व सौख्यसम्पत्तिमपि पूर्ववद्दर्श-यति— अहमिति।।

मू०।। अहं न मायी न च भोगिशायी न चक्रधारी न दशावतारी।
न मे प्रपञ्चः परिपालनीयस्तथापि विष्णुः प्रभविष्णुरस्मि।।३८।।

निष्प्रपञ्चपरमानन्दैकरसब्रह्मभावमापन्नोऽहं माया-कूटवृत्तं जगत्कारणेश्वर-शक्तिश्च तद्वान् मायी न भवामि। भगवतस्तु "दैवीह्येषा गुणमयी" इति स्ववचनेनैव मायिता प्रसिद्धा। एवं भोगिषु-विषयाऽऽसक्तेषु शेते, भोगी सन्वा स्वयं शेते, भोगिनि सर्पसदृशे रागद्वेषादिविषज्वालाऽऽकुले संसारे वा शेते आत्मानमप्रितसन्दधानः आस्ते इति भोगिशायी अहं न भवामि। भगवतस्तु भोगिनि-महाशेषे शयनं प्रसिद्धम्। तथा चक्रवत् भ्रमति कृन्तति चेति चक्रं-कालः तं धारयति-पोषयति तद्ग्रासभावेन तच्छीलोऽहं न भवामि। भगवतस्तु सुदर्शनचक्रधारिता प्रसिद्धा। एवं दशासु-बाल्यादिषु जागृदादिषु वा अवतरणशीलोऽहं न भवामि। भगवतस्तु मत्स्यकूर्मादिभिर्दशभिरवतारिता प्रसिद्धा। तथा मे-मम प्रपञ्चः-मायादिद्वैतप्रपञ्चः न परिपालनीयः-नरक्षणीयः। प्रत्युत प्रविलापनबाधाभ्यां तन्निरासकत्वात्। भगवतस्तु जगत्पालनकृत्यं प्रसिद्धम्। तथापि एवं वैधर्म्ये सत्यपि नाहमन्यः किन्तु प्रभविष्णुः-सर्वजगदीश्वरत्त्वेन श्रुतिस्मृतिलोकप्रसिद्धः विष्णुः-व्यापनशीलः भगवान्नारायणोऽहमेवास्मि अत्रापि सन्दिहानं प्रति "नारायण परो ज्योतिरात्मा नारायणः परः" इत्यादि श्रुतयः-

"आत्मा हि पुरुषव्याघ्र! ज्ञेयो विष्णुरिति स्थितः"।
इत्यादिस्मृतयश्च प्रमाणयितव्या इति भावः।। ३८।।

एवं स्वस्य परमशिवस्वरूपप्राप्त्या तद्भावसौख्यसंपत्तिमपि पूर्ववद्दर्शयति— नेति।।

मू०।। न मूर्तयोऽष्टौ विषमा न दृष्टिः
न भूतिलेपो न गतिर्वृषेण।
न भोगिसङ्गो न च कामभङ्गः
तथापि साक्षात्परमः शिवोऽहम्।। ३९।।

पूर्वश्लोकान्मे इत्यनुषज्यते। सर्वात्मभूतस्य मे अष्टौ = अष्टसंख्याः मूर्तयः = शरीराणि प्राग्दर्शित पुर्यष्टकलक्षणानि अण्डज स्वेदजोद्भिज्ज जरायुजाऽऽप्य तैजस वायवीय मानसलक्षणानि वा शरीराणि न सन्ति। भगवतस्तु पृथिव्यप्तेजोवाय्वाकाश सोम सूर्य यजमान संज्ञका अष्टौ मूर्त्तयः प्रसिद्धाः। तथा विषमा = भेदग्राहिणी दृष्टिः = बहिर्मुखचित्तवृत्तिः मे नास्ति। भगवतस्तु अयुग्मनेत्रत्वं प्रसिद्धम्। एवं मे भूत्या = जन्मना संपदा च लेपः = संसर्गः गर्वश्च नास्ति। भगवतस्तु अष्टमूर्तिसमृद्धत्वं भस्माङ्गरागत्वं च प्रसिद्धम्। एवं मे वृषेण यागोपास्त्यादिजन्यधर्मेण गतिः दक्षिणायनोत्तरायणमार्गेण परलोकगमनं नास्ति। भगवतस्तु स्ववाहनेन धर्मवृषभेण गमनं प्रसिद्धम्। एवं मे भोगिभिः = विषयलम्पटैः सङ्गः = समागमः नास्ति। भगवतस्तु भोगिभिः सर्पैर्भूषणत्वेन सम्बन्धः प्रसिद्धः तथा मे कामस्य = मनोरथस्य भङ्गः = फलाऽसम्पत्तिः नास्ति पूर्णकामत्वात्। भगवतस्तु स्वाऽपराधिनः कामस्य = मन्मथस्य भङ्गः = भस्मीभावः कृत इति प्रसिद्धम्। तथापि एवमौपाधिकवैधर्म्येऽपि नाहं जीवः। किन्तु साक्षात् = प्रत्यक्षः परमाः = सर्वोत्कृष्टः जगदीश्वरत्वेन एकः प्रसिद्धतमः शिव एवास्मि न सर्वथाऽन्य इत्यर्थः। अत्रापि "शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" इत्यादि श्रुतयः,

"(पं०टि०)शिवः शिवोऽहमस्मीति वादिनं* पञ्चकञ्चनम्卐।

इत्यादि स्मृतयश्च सन्दिहानं प्रति साक्षीकर्तव्याः। यथाहुवृद्धाः—
"शिव इत्यहमित्युभौ न भिन्नौ शिव एवाहमहं शिवः स एव
यदि नैवमनात्मता शिवस्य प्रसरेदप्यशिवत्वमात्मनोऽपि"।। इति।। ३९।।

* "वञ्चकं जनम्" इति पाठस्साधुरिति भाति।

卐 पञ्चकञ्चनम्। मुमूर्षाकालापन्नं मुमूर्षाकाल एव शिवः शिवोऽहमिति वादिनं पुरुषमित्यर्थः।।

ब्रह्मविष्ण्वादिसुखानामप्यात्मसुखेन्तर्भावात् जीवन्मुक्तसुखस्य निरततिशयत्वमुक्तम्। इदानीमसङ्गाऽद्वितीयत्वात् "यतो वाचो निवर्तन्ते" इति *श्रुत्युपदेशेनेन्द्रियवाङ्मनसाऽपरिच्छेद्यत्वादनावृतस्वप्रकाशत्वात्, कालाऽपरिछेद्यत्वादपि तस्य निरतिशयत्वं दर्शयन् स्वस्याऽपुनरावृत्ति परमपदप्रतिष्ठितत्वमाह— जागृदिति।।

मू०।। जागृत्सुप्तिस्वपनविपिने गाहमानोऽप्यसङ्गः
सत्त्वोत्कर्षात्करणहरिणैर्नेक्षणीयः पराग्भिः।
लीलावृत्ति प्रशमित महामोह मत्तेभजालः
कालातीते विलसति पदे स्वात्मकण्ठीरवो नः।।४०।।

जागृत् = ऐन्द्रियकव्यवहारोपलक्षिताऽवस्था। सुप्तिः = सर्वकरणलयोपलक्षिताऽवस्था, स्वपनं = मानसव्यवहारमात्रयोग्याऽवस्थेति अवस्थात्रयलक्षणे विपिने = महारण्यत्रये गाहमानः = प्रविश्य यथेच्छं विहरन्नपि तद्धर्मैरनन्वागतत्वादसङ्गः। तथा सत्त्वस्य = सत्यत्वस्य प्रातिभासिकव्यावहारिकसत्यत्वाऽपेक्षया पारमार्थिकत्वेन उत्कर्षात् = आधिक्यात् बलाधिक्याच्च पराग्भिः = व्यावहारिकवस्तुमात्रप्रवणैः त्रासात्पलायनशीलैश्च करणहरिणैः = बाह्यान्तःकरणलक्षणैर्मृगैः नेक्षणीयः = ईक्षितुमशक्यः। तथाजागृद्विहारान्तरगतश्रवणादिलीलाजन्यया चरमसाक्षात्कारवृत्त्या प्र-प्रकर्षेण शमितं = नाशितं महामोहमत्तेभजालं = कालतो देशतः कार्यतश्च अतिविपुलो मूलाऽज्ञानलक्षणमत्तमतङ्गजसमूहो येन। अन्यत्र लीलार्थं = क्रीडनार्थं वृत्त्यर्थं = देहयात्रार्थं प्रशमितं = संहृतं महतां = पशूनां मोहेन = सिंहवलाऽपरिज्ञानेन मत्तानां = इभानां जालं = समूहो येनेत्यर्थः। स तथाविधो नः = अस्माकं स्वात्मकण्ठीरवः = श्रीनृसिंहमूर्तिः प्रत्यगात्मपञ्चाननः। कालाऽतीते = सर्वग्रासिमहाकालचक्राऽविषये। पदे = स्वरूपलक्षणे परमे पदे प्रतिष्ठितः विलसति = सर्वोत्कर्षेण प्रकाशते इत्यर्थः।। ४०।।

प्रकृतां जीवन्मुक्तगीतामुपसंहरन् तस्य जगत्पावनत्वमाह— इत्यादिभिरिति।

मू०।। इत्यादिभिर्भुवनजाड्यहरैः सुगोभिः
सत्योज्वलैः श्रुतिसुखैरमृतप्रबोधैः।
आनन्दयन्प्रतिपदं प्रणतान्सभाग्या
नाशाः पवित्रयति भानुरिव प्रबुद्धः।।४१।।

*श्रुत्युपदर्शित दशेन्द्रिय इति ग्र० पा०।।

प्रबुद्धः = अपरोक्षीकृताऽऽत्मतत्त्वः जीवन्मुक्तः भानुरिव = सूर्य इव भुवनस्य = त्रैलोक्यस्य जाड्यस्य = अज्ञानाऽन्धकारस्य हिमस्य तिमिरस्य च हरैः = निवर्तकैः सत्येन = परमार्थेनार्थेन उज्वलैः = शुद्धैः। अन्यत्र सत्याख्येन मण्डालान्तर्गतेन ईश्वरेण उज्वलैः = दीप्तैः। "येन सूर्यस्तपति तेजसेद्धः" इति श्रुतेः। श्रुतिसुखैः = मधुराऽक्षरत्वाच्छ्रवणानन्दनैः अन्यत्र शीतार्तानां श्रोत्रप्रदेशे शीतपीडाधिक्यस्य आनुभविकत्वात् तदुपलक्षितसर्वाङ्गसुखकरैरित्यर्थः।। तथा अमृतं = अमरणधर्मकं अमृतवन्मधुरतरं च ब्रह्म प्रबोधयन्ति अमृतमिव प्रबोधो येभ्य इति वा अमृतप्रबोधैः। अन्यत्र अमृतं मरणरहितं यथा स्यात्तथा सर्वजनान् प्रतिदिनं प्रबोधयन्तीति अमृतप्रबोधाः तैः। सूर्यकिरणाऽप्रसरे हि प्रतिदिनं सर्वेषां मरणस्य प्रसक्तत्वादित्यर्थः। अथ वा। अमृतेन जलेन पार्यते पाल्यते इत्यमृतप्रं पद्मं तद्बोधयन्ति विकासयन्तीति तथोक्तैः। सुगोभिः = शुभवाक्यैः। शोभनैः। किरणैश्च। "(१)नपूजनात्" इति निषेधान्नटच्। गोशब्दस्य उभयलिङ्गत्वात् पुंस्त्वेन विशेषणनिर्देशः। ईदृशैर्वाक्यैः प्रतिपदं = प्रतिचरणन्यासं प्रतिविश्रान्तिस्थानंच। प्रणतान् = भक्त्या नमस्कुर्वाणान् सभाग्यान् = कृतपुण्यपुञ्जान् जनान् आनन्दयन् = तत्त्वप्रबोधोपजनितसाक्षात्कारेण परमानन्दसमृद्धान्कुर्वन् सन्। सूर्योऽपि हि नमस्कुर्वाणान् आरोग्यधनसन्तानस्वर्गादिना आनन्दयतीति प्रसिद्धम्। आशाः = दिशः चरणन्यासेन = किरणप्रसरैश्च। पवित्रयति = पावनीकरोतीत्यर्थः।। ४१ ।।

तस्मादीदृशी जीवन्मुक्तिरेव जन्मसाफल्यकरी महतापि यत्नेन सर्वैः संपादनीयेति प्रोचनाय तमेव जीवन्मुक्तं पुनः प्रशंसति— धन्यइति।।

मू०।। धन्यः स एव कृतकृत्यतमः समस्त-
मान्यः सएव कुलमस्य च धन्यधन्यम्।
संन्यस्य कर्मनिगडं श्रुतिसारसौख्ये
विन्यस्य चित्तमभयाऽऽत्मनि निर्वृतोयः।। ४२।।

यः = पुरुषधौरेयः कर्मनिगडं = निगडवत् बन्धहेतुं लोकिकवैदिकसर्वकर्मवृन्दं

---

(१) न पूजनात्। ५।४।६९।। पूजनार्थात्परेभ्यः समासान्ताः न स्युः। सुरा अतिराजा। स्वातिभ्यामेव। नेह परमराजः। पूजनात्किम्। गामतिक्रान्तोऽतिगवः।। बहुव्रीहौ सक्थ्यक्ष्णोः।। ८५२।। इत्यतः प्रागेवायं निषेधः। नेह सुसक्थः। स्वक्षः।।

इति श्रीमत्परमहंस परिव्राजकाचार्य श्री स्वामिब्रह्मानन्दगिरि पूज्य पाद शिष्येण विरक्त शिरोमणि परमहंस श्री स्वामिवामदेवेन विरचितायां श्रीवामदेवप्रसादिन्याख्यटिप्पण्यां कैवल्याख्य तृतीय प्रकरणं सम्पूर्णम्।।

दृढतरवैराग्यबलेन संन्यस्य = विधिना त्यक्त्वा सदगुरूपसदनपूर्वकश्रवणाद्युपायैः सर्वश्रुतीनां सारे = परमतात्पर्यविषये सौख्ये = निरतिशयानन्दैकरसे अभयात्मनि-सर्वद्वैतभयशून्ये परमात्मनि चित्तं = मनः विन्यस्य = तदैकरस्येन स्थापयित्वा साक्षात्कृते तस्मिन् तेनैव परमानन्देन निर्वृतः = सदैव सुखित आस्ते स एव धन्यः = श्रेष्ठः। कृतकृत्येभ्यः क्रममुक्तिफलाश्वमेधदहराद्युपास्त्यनुष्ठातृभ्योऽपि सद्योमुक्तत्वात् कृतकृत्यतमः स एव नान्यः। समस्तैः = ब्रह्मादिमनुष्यान्तैः प्राणिभिः मान्यः = पूज्योऽपि स एव। अस्य = जीवन्मुक्तस्य कुलं = वंशबान्धवादि च धन्येभ्यः = अश्वमेधाद्यनुष्ठातृभ्यः धन्यं अनायासेनैव ब्रह्मादिलोकसुख-भोक्तृत्वादित्यर्थः।। ४२।।

जगदुद्धारैकप्रयोजनां जीवन्मुक्तचर्यामुपसंहरंस्तस्य विदेहकैवल्याऽवाप्तिं दर्शयति— एवमिति।।

मू०।। एवं विहृत्य सुचिरं परिपूर्णकामः
कारुण्यपूरपतितोद्धरण प्रवीणः।
प्रारब्धशेषविगमे गतसर्वशोकः
स्वाराज्यसौख्यजलधिर्निरुपाधिरास्ते।। ४३।।

कारुण्यपूरे = सहजदयाऽमृतप्रवाहे पतितानां = दीनजनानां उद्धरणे = संसारो-त्तारणे प्रवीणः = कुशलः परिपूर्णकामः = प्राप्तसर्वमनोरथः जीवन्मुक्तः सुचिरं = बहुकालं एवं = उक्तप्रकारेण सर्वदेशेषु विहृत्य = लीलया संचर्य प्रारब्धफलस्य कर्मशेषस्य विगमे = फलोपभोगेन समाप्तौ सत्यां निरु-पाधिः = प्रतिभासादपि निवृत्तदेहेन्द्रियाद्युपाधिः विदेहस्सन्नित्यर्थः। गतसर्व-शोकः = प्रतिभासतोऽप्यापगतसर्वदुःखः, स्वयमेव राजते दीप्यते यत्सौख्यमानन्दः तत्स्वरूपेण जलधिः समुद्रः समुद्र इव सर्वतः परिपूर्णः परमात्मा तन्मात्रस्वभावे कैवल्ये प्रतिष्ठितः स्वरूपभूतयैव सत्तया आस्ते = तिष्ठतीत्यर्थः।। ४३।।

तस्य पुनरावृत्तिशङ्कावारणाय सर्वविकारशून्यतां नित्यपरिपूर्णपरमानन्दस्वभावतां च पुनराह— नोदेतीति।।

मू०।। नोदेति नाऽस्तमुपयाति न वृद्धिमेति
नाऽपक्षयं च भजते निजतेजसेद्धः।
पूर्णः सदैव सहजेन सुखाऽमृतेन
निर्लाञ्छनः स्फुरतिकोऽपि निजाऽऽत्मचन्द्रः।।४४।।

प्रसिद्ध चन्द्र इव नोदेति उदयमुत्पत्तिं न गच्छति, अस्तं = अदर्शनं नाशं च नोपयाति, एवं वृद्धिं = कलोपचयमवयवमचयं नैति = न गच्छति, तथा अपक्षयंकलावयवह्रासं च न भजते-न प्राप्नोति, किन्तु निजेन-स्वरूपेणैव स्वप्रकाशचैतन्यलक्षणेन तेजसा इद्धः-दीप्तः सदैव सहजेन-स्वभाविकेन-सुखलक्षणेनाऽमृतेन सर्वतः पूर्णः निर्लाञ्छनः-निर्धूतमायादिद्वैतकलङ्कः कोपि। वाङ्मनसाऽपरिच्छेद्यस्वभावः अलौकिको निजात्मैव आह्लादबोधैकस्वाभाव्यात् चन्द्रः स्फुरति-दीप्यते विराजते वा सैव स्वाराज्यसिद्धिः स एव कैवल्यलक्षणः परमपुरुषार्थ इत्यर्थः।।४४।।

"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्येतारश्च मङ्गलयुक्ता यथास्युः" इति महाभाष्योदाहृतश्रुतिवचनात् ग्रन्थस्य प्रचयगमनादिसिद्धयेऽन्तेऽपि सत्यज्ञानानन्दाद्वयसर्ववेदोत्तमाङ्गप्रतिपाद्यपरमपुरुषाऽनुसन्धान लक्षणं, मङ्गलमाचरति— विश्वेति।।

मू०।। विश्वाऽनन्दतुषारसिन्धुरखिलज्ञानस्फुलिङ्गानलः
प्रच्छन्नाऽसिलता च कोशकुहरे द्वैतभ्रमच्छेदिनी।
मोहध्वान्तविभाकरः परिलसन्वेदान्तसीमन्तिनी-
मौलिस्थानमणिः सदा विजयते संविन्मयः पूरुषः।।४५।।

विश्वेषां = सर्वेषां ब्रह्मादिस्तम्बपर्यन्तप्राणिनां विषयोपभोगजनिताः तारतम्येन विद्यमाना ये आनन्दास्तएव ब्रह्मानन्ददृष्ट्या अतिक्षुद्रत्वात् तुषाराः = हिमशीकराः तेषां सिंधुः = समुद्रः, तथा अखिलप्राणिनां इन्द्रियार्थसंप्रयोगजन्यज्ञानान्येव स्फुलिङ्गाः = अग्निकणाः तेषां अनलः = प्रकृतिभूतमहाग्निस्थानीयः। तथाकोशकुहरे-पञ्चकोशान्तः, हृदयपुण्डरीकछिद्रे वा अन्यत्र असिचर्मणः छिद्रे प्रच्छन्ना-सर्वप्राणिनां वास्तवरूपेण अप्रकाशमाना आच्छादिता च असिलता सैव हि साक्षात्कारनिरस्तावरणा द्वैतभ्रमस्य-जगत्प्रतिभासस्य छेदिनी-उच्छेत्री। छिन्नस्य पुनःप्ररोहशङ्कांवारयन्नाहमोहेति। मोहः-अज्ञानं तदेव स्वरूपावरकत्वात् ध्वान्तं-अन्धकारः तस्य विभाकरः-सूर्यः, तथा च सूर्येणाऽन्धकारस्येव द्वैतभ्रममूलस्य अज्ञानस्य छेदात् न तस्य पुनः प्ररोहसंभव इति भावः।। तथा वेदानां-सर्वश्रुतीनां अन्तः उपनिषत् सैव सीमन्तिनी-वधूः तस्या मौलिस्थाने-सीमन्तप्रदेशायमाने महावाक्ये मणिरिव विराजमानत्वात् परिलसन्-सर्वगतत्वात् सर्वतः स्फुरन्, स्व किरणैः सर्वतः प्रसृतैः दीप्यमानश्च तया प्रेमातिशयेन धृतत्वाच्च मणिरिव मणिः संविन्मयः-विशुद्धविज्ञानैकघनः पूर्णत्वात्पूरुषः-परमात्मा सदा विजयते-सर्वोत्कर्षेण वर्तत इत्यर्थः। तथाच तत्प्रसादादे

तद्ग्रन्थपरिशीलिनामपि सर्वोत्कर्षरूपः परमापुरुषार्थः सिद्ध्यत्विति भावः।। ४५।।

इदानीं ग्रन्थस्य प्रचयगमनाय कीर्तये च शुभनाम निबध्नन् विशिष्टाधिकारिभिः विद्वद्भिश्च परिशीलनाऽध्यापनादिना तस्याऽऽदरणीयतां प्रार्थयते— शान्त्यादीति।।

मू०।। शान्त्यादि दिव्यमणिभूषण मण्डितानां
वेदान्तवारिधि सुधारस लालसानाम्।
कैवल्यकल्पतरुमूल मुपाश्रितानां
स्वाराज्यसिद्धिरियमस्तु मुदे बुधानाम्।।४६।।

"शान्तोदान्तः" इतिश्रुतिदर्शितैः अन्यैश्च विवेकवैराग्यादिभिः अधिकारिगुणैः दैवसम्पद्रूपत्वात् दिव्यैः मणिप्रचुरसर्वभूषणवत् सुजनालङ्कारभूतैः मण्डितानां-अलङ्कृतानां, अतएव वेदान्तलक्षणस्य मन्दमतिदुरवगाहत्वाददतिगम्भीरत्वात् मोक्षलक्ष्मीजन्मभूमित्वाच्च वारिधेः-समुद्रस्य परमसारभूते परमानन्दैकरसप्रत्यगा-त्मलक्षणे सुधारसे-अमृतद्रवे लालसानां-अतिशयेन साभिलाषाणां, अत एव कैवल्यकल्पतरोः-मोक्षकल्पवृक्षस्य श्रीगुरोः पादमूलमुपाश्रितानां-श्रवणार्थितया विधिवदुपगतानां, बुधानां-पदवाक्यप्रमाणकुशलानां अधिकारिणां पण्डितानां च मुदे-परिशीलनाध्यापनादिना सन्ततसन्तोषजननाय अस्तु-भवतु। शान्त्यादिभिः सात्त्विकगुणैर्दिव्यरत्नभूषणैश्च भूषितानां वेदान्तशास्त्रवत् स्वच्छतरगम्भीरवारिधि-सारसुधारसाभिलाषाणां कैवल्यवत्सुखकरकल्पवृक्षमूलमुपाश्रितानां बुधानां-देवानां स्वाराज्यसिद्धिः-स्वर्गराज्याधिपत्यसहिता अणिमाद्यऽष्टसिद्धिः अत्यन्तं मुदे भवतीति प्रसिद्धम्। ग्रन्थपक्षे-

कैवल्यकल्पतरुसंज्ञकस्वव्याख्यानग्रन्थस्य मूलं व्याख्येयमित्यप्यर्थो बोध्यः।। ४६।।

अस्य ग्रन्थस्य जगदीश्वरप्रसादजन्यत्वात् निर्दोषत्वमिति सूचयन् स्वकृतश्रमस्य सार्थकयाय ग्रन्थ स्वबुद्धिप्रेरकस्य जगन्मातापितृरूपस्य स्वेष्टदैवतस्य चरणारविन्दयोः समर्पयति— वाक्येति।।

मू०।। (प०टि०)वाक्यपुष्पाञ्जलिः सेयं भक्त्या न्यस्ता पदाब्जयोः।
धियः प्रेरकयोरस्तु शिवयोः प्रीतिसिद्धये।।४७।।

सेयं-स्वाराज्यसिद्धिः।। ४७।।

अपरोक्षीकृते तत्त्वे वाक्याद्वा योगतोऽपि वा।
जीवन्मुक्तस्य धन्यस्य कैवल्यमिह कीर्तितम्।।

नित्यं दिशन् सुकृतिनामभिवाञ्छितार्थान्
निर्वाणसिंधुसलिलैर्भरितालवालः।
आनन्दनन्दनवने नितरां निरूढः
कैवल्यकल्पतरुरस्तु मुदे बुधानाम्।

वस्वब्धिमुन्यवनिमानशके वृषाख्य-
वर्षस्य माधसितवाक्पतियुक्तषष्ठ्याम्।
गङ्गाधरेन्द्रयतिना शिवयोः पदाब्जे
भक्त्यार्पिता सुकृतिरस्तु सतां शिवाय।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीरामचन्द्रसरस्वतीपूज्यपादशिष्येण
श्री सर्वज्ञसरस्वती पूज्यपादप्रशिष्येण
गङ्गाधरसरस्वत्याख्यभिक्षुणा
विरचितायां स्वाराज्यसिद्धिव्याख्यायां
कैवल्यकल्पद्रुमाख्यायां
कैवल्यप्रकरणं सम्पूर्णं।।

।। श्रीगणेशाय नमः।। ।। शुभमस्तु।। ।। ॐ नमः शिवाय।।





एतद्ग्रन्थस्थ श्लोकानामकारादिक्रमः।।

।। ॐ नमस्सदाशिवाय।।

परिमलाख्या टिप्पणिः प्रारभ्यते।।

स्वाराज्यसिद्धिं विबुधाः कल्पवृक्षविराजिताम्।
मिलत्परिमलां प्राप्य प्रमोदं यान्तु सन्ततम्।।

तत्रतावत्परमानन्दात्मकमहामङ्गलमूर्तेःश्रीपरशिवात्तत्प्राप्तिप्रत्यनीक मोहध्वान्त निवृत्तिं प्रार्थयमानेन मूलकारेण "अचलतनयां" इति श्रीशिवसमवेतरत्यालंबनस्य तदेकायत्तचित्तताऽवद्योतिता। "भीतामालिङ्गन्तीम्" इत्यनेन मुग्धाऽवस्था। स्वयमालिंगनञ्च मुग्धासमवेतरतेः परमकाष्ठा पन्नोऽनुभावः। तेन च सम्यगुद्दीपिता सस्मितवीक्षणाऽनुभाविता च श्री शिवसमवेता रतिरभिव्यज्यते।। नचेदं भीतिमात्राऽऽयत्तं स्वयमालिङ्गनम्। तथासति भीतिहेतुभोगिनिकेतनाच्छिवादपसरणाऽऽपत्तेः। किन्तु मुग्धास्वाभाव्येन व्रीलाऽवकुण्ठिता तदीयारतिः पटाक्षेपेणेव परिस्फुरन्ती अनुभावयामास स्वयमालिङ्गनम्। अत एव "भीतामालिङ्गन्तीम्"। इत्युक्तिः, नतु भीतेस्तथेति। "भोगीन्द्रभीतां सस्मितं वीक्षमाणः। लीलापांगैः प्रणतजनतां नन्दयंश्चन्द्रमौलिर्मोह-ध्वान्तम्" इत्येतैः "अजात इत्येव कश्चिद्भीरूः प्रपद्यते जन्तुरजातमेव सन्तं शिवम्"

"संसारसर्पदष्टानां जन्तूनामविवेकिनाम्।
चन्द्रशेखरपादाब्जस्मरणं परमौषधम्"।।

इत्यादिश्रुति स्मृत्यनुसारेण सस्मितापांगवीक्षणमात्राऽपेक्षणमेव निटिलेक्षणस्य प्रणतजनताऽऽनन्दन भयनिवारण मोहविनाशनेष्वितेप्यर्था अनुरणन्ति। "चन्द्रमौलिर्मोह-ध्वान्तं हरतु" इति परिकरालंकारः। सर्वेप्येते कवि समवेतां श्रीशिवविषयिणीं रतिमेव पुष्णन्तीति रसवदलंकारोऽत्र काव्यविश्रान्तिभूमिमधिरूढः।। एवञ्चात्राऽचञ्चला-खण्डाकारवृत्तिसंवलितमच्छाऽच्छमवभासमानं प्रणतजनताप्रत्यगभिन्नमज्ञान-ध्वान्तविनाशनं परमानन्दघनं श्रीशिवाऽभिधानं सर्वदृगात्मकं चैतन्यमभिव्यजितं भवति महामङ्गलम्।।

व्याख्यातुस्सप्तमे* "श्रीसंबन्धमुदीक्ष्य" इतिमंगलश्लोकेश्रीचन्द्रशेखराऽद्वया-ऽनन्दयोगीन्द्रान् श्रीगुरून्वन्दे इत्यर्थोऽवगन्तव्यः।।

"स्मारं स्मारम्" (अध्या+२) इति मूलस्थे द्वितीये मंगलश्लोके कारणमालाऽलंकारगर्भितश्शान्तो रसोऽभिव्यंजितो भवति। तथाहि जनिमृतिभरित-

*एते संन्यासाऽऽश्रमगुरवः, विद्यागुरवस्तु श्रीरामचन्द्रसरस्वतीपूज्यपादाः।।

जगदालंबनो जननमरणभयस्मरणपरंपरोद्दीपितः सन्तत सन्तन्यमान पशुपतिद्ध्यान परमानन्द पीयूषपानाभ्यां अनुभावितो, निजगुरुचरणनलिनभूयोनमनाऽनुसंधानोपष्टंभितो निर्वेदोह्यत्र चर्वणाविश्रान्ति भूमिमधिवसति तत्र च जनिमृतिभयस्मरणान्निर्विण्णस्य पशुपतिध्यानेन परमानन्दपीयूषपानपरितृप्त्या गुरुपादनमनाऽनुसंधानमिति कारण माला। न च स्थायिनो निर्वेदस्य स्वपदेनाऽभिधानमनुचिमिति वाच्यम्। व्यवहारदोषदर्शिनो निर्विण्णस्य "निर्विण्णोऽस्मि" इति स्वनिर्वेदाऽभिधानरूप-व्यवहारदोषस्य नास्त्यदुष्टो व्यवहारः इत्यर्थाऽभिव्यंजनार्थतयाऽदोषत्वात्।।

(८ पृष्ठे १९ पङ्क्तौ) नकोमलकण्टकायमानं कादाचित्कमल्पमिति।। यथा कोमलकण्टकनोदनं कादाचित्कं कादाचित्कमेव मार्गसञ्चारविरागमुत्पादयति न त्वामवातरुग्णतेव सदातनं, तथाकादाचित्कतयाऽल्पं विषयदोषदर्शनमपीति भावः।।

(१०-पृ ४-प) "पराग्भ्यः प्रतिलोम्येन प्रकाशत इति" प्रत्यञ्चं निरवोचत्। तत्र पराक्त्वेन प्रकाशकभिन्नत्वेन इदन्तया प्रकाशमानाद्देहादेः प्रातिलोम्येन प्रकाशो नाम तादृशभेदवर्जमेव प्रकाशः, नतु तद्विपरीतधर्मान्तरेंण। यथा प्रदीपस्स्वभिन्नतया प्रकाशमानेभ्यो घटादिभ्यः प्रतिलोम्येन तादृशभेदविहीनतयैव प्रकाशते, नतु तत्प्रतिद्वंद्विना स्वाऽभेदेन धर्मान्तरेणेति। यस्त्वहन्तया प्रकाशते सोपि परागेव, न प्रत्यगिति विवेक्तव्यम्।।

(१४-पृ १८-प) "वृत्तिज्ञानप्रागभावस्य प्रतियोगिनाश्यत्वात्तद्वारणाय भावमिति" इति।। अत्र वृत्तीतिव्यर्थम्, स्वरूपज्ञानस्य प्रागभावाऽभावात्तत्र व्यभिचारशंकाऽनुन्मेषात्। अथ तस्यापि स्यात्प्रागभाव इति यदि कश्चिन्मन्दोमन्येत, एवन्तर्हि नास्त्येव व्यभिचारः। किन्तु कस्यचिद्भ्रमो निवर्त्यत इति भवति। यदि तस्य प्रागभावमिव तेन तस्य निवृत्तिमपि स मन्दो मन्येत तदेदमपि प्रयोजनं न स्यात्। अस्तुतर्हि विवक्षितस्वरूपपरिचयार्थमेवेदं वृत्तिपदमितिचेत् एतदेववरम्। अथ प्रागभावविनाशस्य प्रतियोगिस्वरूपत्वे कुतो मूलकारीयस्य भावपदस्य प्रयोजनमितिचेत्। तथासति इच्छाप्रागभावविनाशमादाय कृतार्थयितव्यम्। एतेन वित्तित्वेन विवक्षायां तद्व्यक्तित्वेन वित्तिनाश्यमादाय कुतोऽत्रातिप्रसंगाऽवकाशः, आवश्यकी च तादृशी विवक्षा, कथमन्यथोत्तरत्वेन वित्तिनाश्यं भावमेव पूर्वज्ञानमादाय प्रसक्तस्य व्यभिचारस्य निवृत्तिः इत्येत्परास्तम्। वित्तित्वे नैव वृत्तिनाश्यत्वा-दिच्छाप्रागभावस्य।।

(२२-पृ २६-प) "प्राप्तिसापेक्षं प्रापकशास्त्रविरुद्धमधिकारमिति"।। "विधिर्वा

धारणवत्'' इतिन्यायेन श्रवणाद्यंगत्वेन संन्यासविधायकतया प्रमितप्रत्यक्षशास्त्रविरोधे नाऽऽर्थवादिकगृहस्थाधिकारत्वदर्शनान्नाऽप्रत्यक्षतदधिकारिकश्रवणादिविधायक-शास्त्रानुमानसंभवइत्यर्थः।।

(३०-पृ १८-प) ''यदि यज्ञेनेत्यादिपदैः करणत्वेनोपस्थितानां प्रधान प्रत्ययार्थेच्छायामन्वयः, यदितु प्रकृत्यर्थेज्ञानेऽन्वयः'' इति। प्रथमे-यज्ञादिकमनुतिष्ठतो वेदनेच्छा भवतीति शाब्दबोधः। द्वितीयेतु-यज्ञादीननुतिष्ठन् ब्रह्मवेदनमाप्नवानि इत्यभिलषतीति। न ह्यश्वेन गमनं मे भूयादितिवत् अश्वेन जिगमिषा मे भूयात् इति कश्चिदभिलषति। तस्माद्यज्ञाद्यनुतिष्ठतां भवति विविदिषेति प्रथमपक्षे, वेदनार्थं यज्ञाद्यनुतिष्ठाम इत्यभिलषन्तीति द्वितीयपक्षे च वाक्यार्थभेदोऽवगन्तव्यः।

(३४-पृ २०-प) यद्यस्मिन्नेव जन्मनि प्रतिबंधापगमस्तर्हि ऐहिकमेव ज्ञानम्। यदितु बलवत्प्रतिबंधकमस्मिन्जन्मनि नापैति, तदाऽऽमुष्मिकमपि भवति। तथाच सूत्रम् ''ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात्'' इत वर्तते। अत्र समुच्चय एव विनियोजितोऽपिकारः। नेदं साधीयः, असति प्रतिबन्धे ऐहिकोक्त्यैव सति तु तस्मिन्नामुष्मिकत्वस्यार्थतस्सिद्धेः ''अनन्यलभ्यः शब्दार्थः'' इति न्याय-विरोधाऽऽपत्तेः। अपितु ऐहिकत्वे दौर्लभ्यं द्योतयत्ययमपि, सर्पिषोऽपिस्यादितिय-द्वत्तद्वत्। तथाच ऐहिकमपि भवति विद्याजन्म, कदा? -असति प्रस्तुतस्य श्रवणादेः प्रतिबन्धे। प्रायेण प्रतिबद्धसाधना एव भवन्ति साधका अतिदुरवगाहे ब्रह्मात्मनि परमपुरुषार्थे विज्ञातव्ये। यत आह श्रुतिः- ''श्रृण्वन्तोऽपि बह्वो यन्नविद्युः'' इति। आहुश्च- ''श्रेयांसि बहुविघ्नानि'' इति। एवञ्चेदेव ''ऐहिकमेव विद्याजन्म'' इति प्रत्यवतिष्ठमानोऽपि सुदृढं प्रतिक्षिप्तो भवत्यतिदुर्लभेऽस्मिन्विद्याजन्मनि कथमेवं प्रत्यवतिष्ठसे ऐहिकमेव भवद्भवेद्विद्याजन्मेतीति। एतेनाऽत्यन्तमप्रमत्तैरेव यतितव्यं विद्यां प्रत्यंतरंगसाधने श्रवणादौ साधकप्रवरैर्यथाऽप्रतिबद्धं स्याच्छ्रवणादिकमिति शिष्यगणसुशिक्षिणं च कृतं भवति। यथा पूर्वतनेष्वधिकरणेषु। दौर्लभ्यप्रद्योतनाय प्रयुज्यमानोऽयमपिकारः पक्षान्तरमपि यद्यनुवदति अनुवदतु कामं। सर्वञ्चेदमभि-प्रेत्यैवोक्तमत्र मूलकृता ''श्रुतमपि सहसा नैव संभावनीयम्'' इति।। अत्राऽप्रति-बद्धस्येहैव विद्याजन्म, इतरस्येतरत्रेति विशेषप्रतिनियमस्सूत्रतात्पर्यविश्रान्तिंधामेति प्रतिपत्तव्यम्। अयमेवनियमः ''एवम्'' इत्युक्तसूत्रेपरामृष्टोऽनियमप्रतियोगिन्य भेदेनान्वेति। एतेन प्राणवर्जमिव अपिवर्जं पूर्वसूत्रं पठतामनियममेव तत्र सिद्धान्तयताम् 'एवम्' इति तमेव परामृश्याऽनियम एवाऽभेदेन योजयताम् एवं सत्येवं मुक्तिफलेपि इत्येतावदेव कर्तव्यमित्यनालोचयतामस्मन्मतोपरि न कथञ्चिदपि चोदनास्यावकाशो भवेदित्यवगन्तव्यम्। पराऽभिमताधिकरण विरचनप्रकारस्तु विस्तरभयान्न विलिख्यते।।

(३८ पृ-२३ प) "यच्चं शास्त्रैकयोनिरिति मूलम्" इदञ्च मूलं शास्त्रात्मकैककार्यजनकं सदपि सर्वज्ञमिति संबन्ध इत्यर्थः इति शास्त्रयोनित्वसूत्र-प्रथमवर्णकाऽनुसारेण सूत्रार्थविवरणरूपतया व्याख्यातम्। एवञ्चकैमुतिकन्यायेन पूर्वसूत्रोपक्षिप्तं सर्वज्ञत्वं दृढीकृतमितिभवति। परन्तु शास्त्रस्य ऋगादेरिदमेकमेव योनि: इत्येकपदस्य योनिपदेन कर्मधारयाऽवलंबने विभिन्नयोनिकत्वेन न कस्यापि सर्वज्ञत्वं संभवतीत्याशंकाऽपनुद्येत। वर्णकान्तरे तथाऽन्वयस्यावश्यकत्वात्। "अस्य महतो भूतस्य" इति श्रौतैक वचनविवरणात्मत्वसंभवाच्च। तथाच सर्वार्थाऽवद्योतिनो वेदराशेश्शास्त्रस्य इदमेकमेव योनिरिति श्रूयते यस्मात्तस्मादपि सर्वज्ञं ब्रह्मेत्ययमप्यर्थो-ऽत्रक्रोडीकृतोऽवगन्तव्य:।।

(५७ पृ-१०-प) "परमाणुद्वित्वादेर्जन्यत्वाऽजन्यत्वाऽतिरिक्ततृतीयविधापत्ते-श्चेति"। न हीदमनादीश्वरापेक्षाबुद्धिसापेक्षं परमाणुद्वित्वं जन्यंभवितुमर्हति। अनादितन्मात्रसापेक्षस्याऽनादित्वाऽवश्यंभावेन जन्यत्वाऽयोगात्। नच तर्ह्यजन्यमेवेदं स्यादितिवक्तुं पार्यते भवता। एकत्वाऽतिरिक्तसंख्याया अपेक्षाबुद्धिजन्यत्वनियमा-भ्युपगमात्। नचेदं जन्याऽजन्यं भवितुमर्हति। विरोधात्। तस्मात्प्रलयाऽवसाने-ऽवश्याऽपेक्षितं परमाणुद्वित्वादिकं जीवीयाऽपेक्षाबुद्धेस्तदानीमसंभावितत‌या द्वित्वादिस्वाभाव्येनाऽगत्याऽनादिमीश्वरापेक्षाबुद्धिमेवावलंबमानमेवन्दुरवस्थं संपद्यत इतिभाव:।।

(६६-पृ ५-प) "तत्पूर्वसन्तानिनामपीति"।। उपान्त्यस्सन्तानी नाऽर्थ-क्रियाकारी, सन्तानित्वात्, अन्त्यसन्तानिवत्। नचान्त्यत्वमुपाधि:। साधनवद्विपक्षव्या-वृत्तस्यैव धर्मस्य उपाधित्वाभ्युपगमात्। नचोपान्त्यात्पूर्वेभ्यस्साधनवद्विपक्षेभ्य-स्सन्तानिभ्योव्यावृत्तमिदमन्त्यत्वं भवत्यत्रोपाधिरिति वाच्यम्। तेषां पक्षसमत्वेन विपक्षत्वासंभवादित्यर्थ:। किञ्च, अर्थवती = प्रयोजवती = या क्रिया तत्कारित्वं हि अर्थक्रियाकारित्वं, प्रयोजनञ्च पूर्वक्रियासाध्य उत्तरसन्तानी। तस्याऽनर्थक्रियाकारित्वे असत: कुत: प्रयोजनता। सद्धि प्रयोजनमिति च।

(६६-पृ ६ प) "सन्तानमात्राऽसत्वापत्ताविति"।। नन्वत्र मात्रशब्द: कार्त्स्न्यार्थक एवोपेत्य:। तत्रैकमेव सन्तानमधिकृत्येदानीमयं विचार: प्रवर्तते। तन्न्यायेनैवान्यत्र सेत्स्यत्यसत्वम्। तत्र कथमत्र कार्त्स्न्यार्थकमात्रशब्दप्रयोगोपपत्तीति चेन्न। सन्तानस्य स्वघटकाऽनेकसन्तान्यव्यतिरिक्ततया तदीयकार्त्स्न्यस्य सन्तान-कार्त्स्न्यत्वोपपत्तेरिति।।

(६६-पृ १२-प) निरवकाशत्वप्रसंग इति।। आवरणसामान्याभावस्या-

ऽऽकाशत्वे दूषणमिदम्। नन्वावरणाभाव विशेष एवाऽऽकाश इति चेत्। स किं प्रतियोगिविशेषाऽधीनोऽभावविशेषः? उताऽधिकरणविशेषाऽधीनः? आद्ये यदि तत्प्रतियोग्युत्पतितसुपर्णाऽधीनमावरणं, तदोक्तदोषप्रसंगः। यदि सुपर्णान्तरोत्पतनाऽधीनं, तदा यत्र सुपर्ण उत्पतितस्तत्रैव सुपर्णाऽन्तरोत्पतन प्रसंग इत्यभिप्रेत्य द्वितीयं शंकते-यत्रेति।। निराकरोति येनेति।। अयं भावः- न हि यत्किञ्चिदधिकरणको यत्किञ्चित्प्रतियोगिकश्चेति वक्तुं पार्यते। पूर्वोक्तदोषाऽऽपत्तेः। किन्तु यत्किञ्चिदधिकरणकः आवरणसामान्याऽभाव एवाऽऽकाश इति वक्तव्यम्।। तत्र भोः। यत्र स्थित्वाऽयमावरणसामान्याभाव उत्पतनोत्तंभनं भवति, तस्यैव तत्वे मध्येकिमनेन। तथाच तदेवाऽधिकरणत्वे नाऽभिमतमाकाशमिति।।

(६६-पृ १६-प) ननु तेनेव तत्सदृशेनापि स्मर्तुं शक्यत्ते तदनुभूत-मित्याशंक्याहसादृश्याऽसंभवादिति।।

(६६-पृ २५-प) "अयोग्यत्वदुर्निरूपत्वाभ्यामिति"।। पक्षद्वयेप्युभयापादन परमिदम्। तथाहि-अयोग्यत्वमत्रेन्द्रियाऽयोग्यत्वम्। तच्च परमाणुत्वपक्षे स्थितमेव। समूहत्वपक्षे तु-नहि समूहिभ्योऽन्यस्समूहो भवितुमर्हति। यतो घटेभ्योऽन्यः पटो नघटसमूहो भवति, अतोऽनन्य इत्येव भवति, तथाचाऽयोग्यत्वप्रसंगः। न च अनन्योऽन्यश्चेति वाच्यम्। अन्यत्वेन योग्यत्वस्येवाऽनन्यत्वेनाऽयोग्यत्वस्याप्यापत्तेः। नह्यकिञ्चित्करोप्यभेदोऽभ्युपगन्तव्यो भवतीति। एवं परमाणुरपि दुर्निरूपः। यदि द्व्यणुकात्परोऽणुः परमाणुः, तदा ततोऽपि परोऽणुः कश्चन परतराऽणुस्स्यात्। तथाचाऽस्याऽन्त्यावयवत्वहानिः। यदिच यस्मात्परोऽणुर्नास्ति स परमाणुरित्युच्येत, तदापि किमस्मात्परोणुः प्रसिद्धः? उताऽप्रसिद्धः? प्रसिद्धौ कथं तस्य प्रतिषेधः अप्रसिद्धौ कथं वा तस्य प्रतिषिद्धेति। एवमणुत्वपक्षे- प्रत्येकस्य घटत्वे, प्रत्येकेनापि घटकार्यापत्तिः। अथ तावन्त एवघटः, तदा तेषामर्धांशेनाऽर्धजल-धारणाऽनुपपत्तिः। अर्धांशे घटत्वस्याऽपरिसमाप्तेः। यद्यर्धांशोऽर्धो घट इति तेन तद्धारणं, तदा प्रत्येकांशाभ्यां भिन्नोवास्याद्घटः? उत वाऽभिन्नः? भेदे, ताभ्यमेवार्धमर्ध जलं धृतमिति घटस्य किं कार्यम्। अभेदे तु अर्धांशेनैव यावज्जलविधारणप्रसङ्गः। समूहस्य समूहिभ्योऽन्यत्वाऽनन्यत्वोभयथात्वेषूक्तप्राया एव दोषा इति।।

(६७-पृ १३-प) "स्वगोचरत्वेऽपीति"।। विज्ञानस्य स्वगोचरत्वेप्यनाश्वास-प्रसङ्गेन तस्याप्यभावप्रसङ्ग इत्यर्थः।

(६७-पृ १५-प) "बहिर्वदवभासत इतिव्यवहरणं कुर्वतो भवतोप्यनुभवसिद्ध-त्वादिति"।। नन्विदमसङ्गतम्, विज्ञानधर्मतया अन्तरेव वर्तमानो घटाकारो बहिर्वदवभासते, न तदतिरेकेण घटो नाम बाह्योऽस्ति कश्चित्पदार्थ इत्यभिप्रेत्यकिल

वत्करोति बुद्धबंधु:। तत्र कथं बाह्यस्य घटस्य तदनुभवसिद्धता, कथं वा तत्र तदीयं वत्करणं हेतुस्स्यादिति चेत्? एवम्। 'इदं रजतम्' इति प्रथमं प्रतिपद्यमानो हि पुरुष: पश्चादियं शुक्तिरिति प्रत्यये सति शुक्तिका हि रजतवदवभासत इति वत्कुरुते। अयन्तु तद्वदयं घट इति प्रथमं प्रतिपद्यमान: पश्चान्नायं घट:, किन्तु वाल्मीकमिदमिति न प्रतीत्यवत्करोति। अपित्वन्तर्विज्ञाने प्रतीयते घटाकार इत्यभिमन्यमान:। नचैवमनेन वत्कर्तुं युक्तम्। यत: क्वचित्किञ्चिद्रजताकारं प्रतीयमानमित्यन्यत्र रजतप्रत्ययवति तद्भावेन न भाव्यम्। अत: परं किन्नामाऽनेन वक्तव्यम्? अन्तर्विज्ञाने प्रतीयमानेन तत्तदाकारेणैव तत्तद्व्यवहारोपपत्तौ व्यर्थो बाह्योऽर्थ इति वक्तव्यम्। कथमेवं वक्तुं पार्यते? युक्ति: किलेयमुच्यते लाघवापरनाम्न्यनेन, कथमियं स्वपूर्वभाविनम् अयं घट इति स्वरसवाहिनं सार्वजनीनमध्यक्षात्मानमनुभवं बाधितुमुत्सहेत। नोत्सहेत। अस्तु बाह्य एवाऽर्थ: मास्तु विज्ञाने तदाकार इति पृष्ट: किमयं व्याचष्टाम्? तस्मादनेन क्रियमाणमिदं वत्करणमस्यापि सर्वजनसाधारणमुक्तमनुभवं स्वपूर्वभाविनमुन्नयति। स चोक्तेन प्रकारेणाऽबाद्ध्यमानस्तदनुभव विषयत्वेनापि बाह्यमर्थं साधयतीत्येतदर्थकेऽस्मिन् किन्नामाऽसांगत्यमिति।।

(६८-पृ २-प) "नानाकारविरोधादिति"।। इमानि घटपटकुड्यकुसूलानीति नानाकारविरोधादित्यर्थ:। मिथो वार्तानभिज्ञत्वादिति।। उक्तानि मिश्रीभूय प्रकाशन्त इत्यनुभवसिद्धम्। तत्र प्रत्येकमेकैकाकारेषु बुहुषु प्रत्ययेषु न कस्याऽपि तावदर्थ-प्रकाशकत्वं संभवति। इतरेतरविषयाविषयकत्वादित्यर्थ:।।

(६९-पृ १०-प) "साक्षिस्वीकारापत्तेरिति"।। कथमियमापत्ति:? न हि प्रत्ययावमर्शिना साक्षिणा भवितव्यमित्यस्तिनिर्बंधस्स्वावमर्शिनस्स्वस्यस्वं प्रति साक्षित्वमनभ्युपगच्छति बुद्धबंधाविति चेन्न। यदि प्रत्ययस्यप्रत्ययान्तरवेद्यत्वमुपेयते, तदा तस्याऽपि तदन्यवेद्यत्वाऽवश्यंभावेन परस्पराश्रयाद्यापत्त्या स्वयमनन्यवेद्य-स्सर्वावभासक: स्वप्रकाशचिन्मात्ररूपो दण्डायमानोऽनादिरनन्त एकस्साक्षी नाम कश्चिदभ्युपगन्तव्यो भवतीत्यर्थकत्वात्।।

(६९-पृ १७-प) "वियद्वस्त्विवति"।। यथा कुंभस्योत्पत्तौ सत्यां सद्यो वियत्संपूर्णता, वियद्वस्तुस्वभावानुरोधादेव, न कारकात्, एवं धियां स्वोत्पत्तिसमकालमेव दृशा पूर्णता, दृक्स्वभावानुरोधादेव न कारकादितिवार्तिकार्थ:।

(७२-पृ १३-प) "सर्वत्रेति"।। कारणीभूतस्याऽभावस्य सर्वत्र सुलभत्वा-दित्यर्थ:।।

(७२-पृ १३-प) "सर्वदेति"।। तस्य सर्वदा विद्यमानत्वादित्यर्थः।।

(७२-पृ १३-प) "सर्वात्मकञ्चेति"।। कारणस्याऽभावस्यैकरूपत्वेन कार्य वर्गस्य परस्परवैलक्षण्याऽयोगात् सर्वं सर्वात्मकञ्च किमिति न स्यादित्यर्थः।।

(७५-पृ १०-प) "अनर्थाऽवाप्तिरपि स्यादिति"।। ननु कथमनर्थावाप्तिर्धर्मेण, स्यात्पक्षेऽर्थाऽवाप्तावपि नास्तिपक्षे तदभाव एव स्यात् नह्यनिष्टावाप्तिरपीति चेन्न। यदा स्यादस्तिपक्षेऽधर्मे धर्मत्वं तदा तस्याधर्माद्व्यावृत्तस्याऽर्थप्रयोजकत्वेऽपि यदा स्यान्नास्तिपक्षे धर्मे न धर्मत्वं तदाऽधर्माद्व्यावृत्तस्य धर्मस्य स्यादस्तिपक्षे-ऽधर्मस्येवाऽनर्थप्रयोजकत्वप्रसंगादित्यभिप्रायात्।।

(७७-पृ १६-प) "योगाद्यभिमतेश्वरवत्केवलनिमित्तकारणं वेति"।। ननुयोगेन "स पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्" इतीश्वरमुपयतापि सर्वाऽऽदिगुरुत्वमेव तस्योपगतं, नतु जगदुत्पत्तौ गौतमीयैरिव निमित्तत्वमपि। तथासति प्रधानस्य तदभ्युपगतस्य पारतन्त्र्याऽऽपत्तेरिति चेन्न। प्रधानपरिणामे तस्याऽनपेक्षितत्वेपि योगिनां योगादिमार्गोपदेशद्वारा तेषामणिमाद्यैश्वर्यसिद्धौ तन्मतसिद्धेश्वरस्य निमित्तत्वाऽवश्यंभावात्। यदि जीवविलक्षणोऽनादिः कश्चिरीश्वरोऽभ्युपगम्यते तर्हि सकलजगदुपादानं निमित्तञ्चेत्येवोपेत्यः, अन्यथा दोषप्रसरादिति सिद्धान्ता-ऽभिप्रायाच्च ननु जगदुत्पत्तौ नेश्वरो योगेन निमित्ततयेष्यते स कथं दृष्टान्तीक्रियता-मित्येतदस्वरसादेव योगादीत्यादिना पाशुपतादि परिग्रह इत्यपि वेदितव्यम्।।

(७७-पृ २०-प) "कापिलवैशेषिकाद्युपदर्शितेति"।। वेदप्रमाण्याभ्युपगन्तृ-भिरवश्यमेवेश्वरोभ्युपगन्तव्यो न गौतमीयादिभिरेवेत्यभिप्रेत्यैवमुक्तिः। कथमन्यथा कापिलग्रहणस्योपपत्तिः। आदिपदेन पाशुपतादिपरिग्रहः तथाऽनभ्युपगमेपि वादिसंपादनार्थम्।।

ननु दहराद्युपासोपास्यः किमनादिसिद्धः परमेश्वरः? उत लिंगसमुदायात्मा? आद्ये "कार्ये बादरिरस्य गत्युपपत्तेः" इति न्यायविरोधस्तत्क्रतुन्यायविरोधात्। अन्त्ये "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" इतिन्यायविरोधः। जगद्व्यापारे मुक्तस्य नाऽधिकारः, किन्तु अनादिसिद्धः परमेश्वर एवं तत्र सदाऽधिकरोति प्रकरणात्, सदा तस्य सन्निहितत्वात्, मुक्तानां स्वस्वमुक्तेः पूर्वमसन्निहितत्वात् बहूनान्तेषामेकवाक्यत्वाऽसंभवाच्चेति हि तदर्थः। तत्रकार्योपासकानां कुतस्तत्प्राप्तिः येन तद्व्यापारमाशंक्य निराकरणं क्रियेत, कुतो वा तत्क्रतुन्यायोपि न विरूद्ध्येत इतिचेत्। न। कार्यं ब्रह्म द्विविधम्-कार्यविशिष्टं, कार्योपहितं चेति। विशिष्टंतु-विराट्, वैश्वानरः प्राणश्चेति त्रिविधं वर्तते जीवकोटावेवनिविष्टम्। तत्तद्भावस्तु

प्राप्तुंशक्यते तत्तदधिकारनिवृत्तौ जीवान्तरेण। उपहितमपि त्रिधावर्तते- ब्रह्मविष्णु-रुद्रात्मकं विशिष्टकार्यत्रयाधिष्ठातृदेवतयेश्वकोटिनिविष्टं शाण्डिल्योपकोसल दहराद्युपासोपास्यंसत्यलोकवैकुण्ठकैलासाद्यधिष्ठानम्। तत्र ब्रह्मा स्वयंभूः जन्मादित्रयहेतुभूतस्य तुरीयस्य परमेश्वरस्य रजोगुणोद्रेकवति विराडात्मनि स्वयमेवाऽऽविर्भावात्। अच्युतो हरिः सत्वगुणोद्रेकवति लिंगसमुदायात्मनि वैश्वानरे हृषीकेशतयाऽऽविर्भूतस्य परस्य सत्यामपीन्द्रियप्रवृत्तिपरंपरायां च्युत्यभावात्। इन्द्रियप्रवृत्तिपरंपरया किल च्यवते जीववर्गः। एवन्तमोगुणोद्रेकवति सौषुप्ते प्राणे मृत्युंजयरुद्रतयाऽऽविर्भूतः परोहरः। प्राणवियोगे किल म्रियते प्राणिनिकायः। मृत्योरपि मृत्युरयंभगवान्प्राणाऽधिष्ठाता। यस्य कालकूटमपि अमृतीबभूव एतेच स्वस्वोपाधिद्वारा तत्तल्लोकनिवासिन इति स्वस्वोपासकान्स्वं स्वं लोकमानयन्ति अर्चिरादिनाऽऽतिवाहिकगणेन द्वारेण। यत्राचाऽऽनीता उपासकास्ते कार्यभूता एव बहवो लोका इत्युपाधिप्राधान्येन "कार्यबादरिरस्यगत्युपपत्तेः" "विशेषितत्त्वाच्च" कार्यात्यये तदध्यक्षेण विराड्वैश्वानरप्राणोपाधिकेन ब्रह्मविष्णुरुद्राख्येन सह तुरीयेलीयन्ते इति कार्याऽधिकरणसंगतिः। ब्रह्मादीनान्तोपाधिवियोग एव नाऽत्ययः। तत्तल्लोकगतानां तत्तदुपास्यगतं व्यापारमपि प्रसक्तं निराकर्तुं प्रवृत्तं जगद्व्यापारा-ऽधिकरणम्। जगद्व्यापारस्याऽनुपास्यत्वान्नतत्प्राप्तिरित्येतत् तत्रैवभामत्यां स्पष्टम्। एतेषु च कस्यचित्कदाचित्स्वरूपप्राधान्यात्प्रथमत्वम् इतरयोस्तूपाधिप्राधान्या-त्ततोऽवरत्वं। एवमितरयोरपि प्रथमत्वमित्यभिप्रेत्य तत्र तत्र तेषांपरस्परं प्रथमाऽवरभाववर्णनं पुराणेषु दृश्यते।। उक्तंचइदंसर्वमभिप्रेत्याऽभियुक्तैः "*सामान्यमेषां प्रथमावरत्वं" इति। तुरीयस्यापि हि जन्मादित्रितयोपहितस्य विहितमुपासनं प्रश्नोपनिषदि तदुपलक्षितमेव शुद्धं ब्रह्मेति मत्वा तदुपासकानामपि कार्यप्राप्तिद्वारा परप्राप्तिरवधारिता "ईक्षतिकर्मव्यपदेशात्सः" इत्यधिकरणे। तथा च कुतो न प्राप्तिरूपासकैश्वर्ये जगद्व्यापारस्य। तस्मात्प्रसक्तमेव परिहृतं "जगद्व्यापारवर्जमिति"। किञ्च अनादित्वेपीश्वरस्याध्यस्तत्वरूपं कार्यत्वमवश्य-मेवोपेत्यम्। तच्च नोपासनार्हं जीवस्य। किन्तु भोगोपयोगिन एव गुणास्तथेत्यपि विवेक्तव्यम्। तत्र कुतस्त्यात्क्रतुन्यायविरोध इति।।

(८०-पृ १३-प) "न हि भवति मधुरं कुण्डमिति"।। मधुरत्वकुण्डत्वधर्मौ विभिन्नधर्मिकाविति नैवं भवति सामानाऽधिकरण्यप्रतीतिरित्यर्थः।।

(८४-पृ २९-प) "असन्निकृष्टग्राहकत्वेऽतिप्रसंगादिति।। निमीलितचक्षु-षोप्यर्थोपलब्ध्यापत्तेरित्यर्थः।।

---

*कालिदासेन कुमारसंभवे काव्ये।

(८४-पृ २९-प) आलोकादिसहकार्यसंबन्धाच्चेति = ननून्मीलितनयनगोलकस्य सहकारिदीपाद्यालोकसंबंधाऽवश्यंभावेन कथं तदसंबन्धोक्तिरिति चेन्न। समवायघटित-सामानाधिकरण्याऽवच्छिन्नाऽऽलोकसंयोगनिष्ठाऽवच्छेदकताकसमवायसंबंधाऽवच्छिन्न प्रमाण संयोगनिष्ठकारणातानिरूपित विषयता सम्बन्धाऽवच्छिन्न प्रत्यक्षनिष्ठकार्यतायाएवाऽभ्युपगन्तव्यतया तस्याः प्रकृतेऽसंभवात्।। इदन्त्ववधेयम् प्रत्यक्षस्य गोलकहेतुकत्वे प्रत्यक्षमेव नोत्पत्तुमर्हति। गोलकस्य बहिर्निर्गमनाऽसंभवेन विप्रकृष्ट इव स्वसन्निकृष्टेपि प्रत्यक्षोत्पादकत्वं न संभवति। अत्यन्तसन्निकर्षस्य तमोव्यतिरिक्तविषयक प्रत्यक्षप्रतिबंधकत्वात्। अन्यथा गोलकसंलग्नतृणादिप्रत्यक्षाऽऽपत्तेः। अतोऽसन्निकृष्टग्राहकत्वमेव वक्तव्यम्। तत्रचोक्तो दोष इति।।

(८५-पृ२-प) अनुमित्यादि प्रामाण्यस्यापि प्रत्यक्षसिद्धत्वादिति = ननु अनुमितिमेवाऽनंगीकुर्वति चार्वाके कुतस्तत्प्रामाण्यस्य प्रत्यक्षसिद्धत्वमिति चेन्न। नहि पर्वते धूमदर्शनाऽधीना पर्वतो वह्निमानित्याकारिका काचन मनोवृत्तिरपलप्यते चार्वाकेण। शक्यतेवाऽपलपितुं तेन सर्वजनीना सा। किन्तु संभावनामात्रात्मिका स्यात् पर्वते वह्निरित्येवं रूपैवेयमुपेयते तेन। नच तथापि संभावनात्वमेव तत्राऽध्यक्षमितीष्यते तेनेति वाच्यम्। कथमेवं तेनेष्यतामित्यभिप्रायात्। तथाहि-भूयस्सहचारदर्शनाऽधीना हि इयं मनोवृत्तिः पक्षधर्मतादर्शनबलाधीना च। पक्षधर्मता दर्शनन्तु प्रमाणमेव तन्मतेपि। सहचारांशोपि निश्चित एवोपेत्यः परामर्श न विषयेषु भूयोदर्शनस्मारित इति।। परन्तु तन्नियमांशएवतत्र संदिग्धो वाच्यो देशतः कालतश्च विप्रकृष्टेषुधूमेषुधूमध्वजसहचारोऽनुपलब्ध इति। तत्रसंशयात्मिकैवेयमनुमितिरित्येषितव्ये कथमियं संभावनात्मिकेत्यभ्युपगतं पण्डितमानिनाऽनेनेति प्रष्टव्यं भवति। स यदि ब्रूयात् "प्रबलाभ्यां सहचारपक्षधर्मत्वांशाभ्यां समवलेन नियमांशेन च दुर्बलीकृतो बह्न्यभावांशो नियमाऽभावांशमात्रोपनीतोऽनुमित्याम्" इति। "तदा तैरेव प्रबलैस्त्रिभिः प्रतिबद्ध एवाऽभावांशोऽनुमित्यामिति" कुतो नांऽगीक्रियते मूर्खेण।। किञ्च।। विप्रकृष्टेषु सहचारोपलंभाऽभावो विप्रकर्षप्रयुक्तोऽयोग्येष्वयोग्यताप्रयुक्त इति स्थिते कथं तादृशेन तेन नियमाऽभावकोट्यन्तरोपनयः? तेन वा कथमनुमित्यां वह्न्यभावकोट्युन्मेषः? अपिच प्रत्यक्षाऽतिरिक्तेषु विज्ञानेषु कुतस्संशयता? कुतो वा संभावनात्वम्? किञ्च।। उपलंभाऽभावस्याऽऽभावांशोपनायकत्वेऽनिष्टं ह्यापतति अनुपलब्धेरभावोपस्थापकत्वाऽभ्युपगमात्मकम्। अथ यदिब्रूयात् 'नाऽनुमित्यामुपेयते संभावनात्वं परन्तु तदनजायमाने मानसे बोध' इति। तर्हि प्रत्यक्षइवाऽनुमितावपि सिद्ध्यत्येव प्रामाण्यं प्रत्यक्षेणेति।।

(८९-पृ ९-प) "तादृशदुःखाऽभिज्ञानामपीति"।। निर्द्धारणे षष्ठी।।

(९०-पृ १७-प) "नाहं चलस्वभाव इति सर्वजनाऽनुभवादपीति" = नन्वहं गच्छामि लंघयामि चेति वदति विद्वानपि व्यवहारपथमवतीर्ण इति स्थिते कथमेवमुच्यते? "एतस्मिन् सञ्चरत्यप्यहमचल इति प्रत्ययादम्मयत्वात्" इति मूलमपिवर्तते तस्य वा कथमुपपत्तिरिति चेत्? उच्यते। यदा तु कश्चित्कालं तूष्णीमेवाऽऽसीनः कश्चिन्निर्व्यापारः सः तदनन्तरमागतेन केनचित् किंकृतमेतावन्तं कालं भवता? इति पृष्टो वदति- "अहमचरएवाऽऽसमेतावन्तं कालं न किमपि कृतं नकुत्रापि गतं च मया" इति चरत्यपि तावन्तं कालं प्राणे इत्यभिप्रायकं मूलम्। सुदृढप्रत्यायनार्थमेवं विवृतमित्यवगन्तव्यम्।।

(९९-पृ ७-प) ननु असन्निहितोपि स्वरूपेण शीतद्रव्यसंयुक्तपादतलादिषु अणुरेष आत्मा स्वात्मनो धर्मभूतेन ज्ञानेन आपादतलमस्तकं इदं शरीरमभिव्याप्य वर्तमानो यदा यदा यत्रयत्रावयवविशेषे विषयसंबंधः तदा तदा तत्तदवच्छेदेनोपलभेतैव तं तं विषयं तदुपरागजनितं सुखदुःखादिकञ्च। यथा एकदेशस्थोपि दीपः स्वप्रभयाऽपवरकमभिव्याप्य वर्तमानो यत्रयत्र यो यो विषयः स्वप्रभासंवलितो भवति तत्र तत्र तं तं विषयं प्रकाशयति प्रकाशयति च समग्रमेवापवरकं यथा स्वीयं शरीरं जीव इति चेत्किमुत्तरमित्याशंकते-यत्तूक्तं सर्वदेहव्यापीति।।

(११५ पृ २८ प) "विभिन्नरूपभास्येति"।। आत्रेत्थं न्यायप्रयोगः- साक्षी नित्यैकरूप स्वप्रकाशस्वरूपः विभिन्नरूप भास्यगोचरैकरूपभासक-परंपराऽवधित्वात्, व्यतिरेकेण चक्षुरादिवत् इति। स्वप्रकाशत्वाऽभावान्नचक्षुरादिकं विशिष्टसाध्यविशिष्टं, भासकपरंपराऽन्तर्गतमिति न तदवधिभूतञ्च। सर्वाऽवभासकत्वमिह साध्यत्वेन विवक्षितम्। सर्वार्थावभासकस्य च स्वप्रकाशत्वमर्थसिद्धम्। नचेतराऽवभास्यं सर्वावभासकं भवितुमर्हति स्वावभासकाऽनवभासकत्वात्। नहिचक्षुरवभास्यं रूपं तदवभासकं भवति इति।।

(१३३-पृ ३-प) "इन्द्रलोक" इति।। अचिन्तितोपनताऽसुरादिकर्तृक स्वाराज्याऽपहरणादिजनित महद्दुःखं प्रसिद्धमेवेन्द्रलोके श्रुतिस्मृतीतिहासपुराणादिसिद्धम्। प्रजापतेरपि भगवतो "यो ब्रह्मा ब्रह्मणः" इति मन्त्रसिद्धं शिरः कर्तनादिकं, वैकुण्ठकैलासयोरपि जय विजय नन्दिकेशादीनां शापनिमित्तं पुराणादिसिद्धं जननादीति विचारतो दुःखमेव सर्वत्रेति भावः।।

(१६५-पृ १३-प) "द्वयोरेव द्वित्वोत्पत्त्यनन्तरम्" इति।। तदा तयोरेव प्रत्येकमेकत्वस्य सत्त्वादित्यर्थः।।

(१६५-पृ १६-प) ''द्वित्वान्तराऽऽश्रयेति''।। तद्घटकैकवृत्त्यैकत्वस्य द्वित्वसमानाधिकरणत्वादित्यर्थः।।

(१८५-पृ २७-प) ''जन्मादिकारणत्वंस्वरूपलक्षणमेव किन्नस्यात्'' इति।। वस्तुतः कारणत्वविशिष्टमेव ब्रह्मस्वरूपं किन्नस्यादित्याशयः।।

(२००-पृ १०-प) ''अपितु ज्ञानभास्यत्वेन'' इति।। किं नाम ज्ञानभास्यत्वतद्गोचरत्वयोर्वैषम्यं? येन भास्यत्वेन गोचरत्वं व्यवस्थाप्यत इति चेत्-उच्यते। यथा आलोकसंयोगाधीनः प्राकट्यात्मा घटस्य प्रकाशो भवति एवं प्राकट्याख्यं विषयाधिष्ठानं भानं भास्यत्वशब्दार्थः। तत्प्रयोजकस्तु ज्ञानज्ञेययोस्संबंधो गोचरतेत्युच्यत इति विवेचनीयम् इति।।

(२२९-पृ १८-प) ''निरवच्छिन्नवृत्तिकपरस्परात्यन्ताभावव्याप्येति''।। एकस्मिन्नेव देवदत्ते परस्परात्यन्ताभावव्याप्यबालत्वयुवत्ववृद्धत्वपादत्वहस्तत्वादिधर्मविशिष्टत्वसत्वान्निरवच्छिन्नवृत्तिकेंति विशेषणम्।।

(३१७-पृ २६-प) शिवश्शिवोहमस्मीति वादिनं यं च कंचनेति पाठः।।

(३२२-पृ २५-प) ''वाक्यपुष्पांजलिः'' इति।। वाक्यपुष्पांजलिरूपासेयं स्वाराज्यसिद्धिः।।

स्वयं परिमलोपेतः कल्पद्रुरखिलार्थदः।
स्वाराज्यसिद्धिमाश्रित्य विबुधैरुपसेव्यताम्।।
परिमलाख्या टिप्पणिस्समाप्ता।।
श्रीशिवश्शरणम्।।